aharaja Bhojaraja's
SRINGARA PRAKASHA

The Great tenth Century Work on Samskrit and Prakrit Rhetoric

FIRST EIGHT CHAPTERS

Manuscripts Collated by
Late His Holiness the Yatiraja Swamy of Melkote.

REVISED AND EDITED
by

G. R. JOSYER
FOUNDER DIRECTOR,
INTERNATIONAL ACADEMY OF SANSKRIT RESEARCH,
WITH THE AID OF PANDITS.

WITH A FOREWORD BY
Dr. Sir C. P. RAMASWAMY IYER, K.C.I.E., LL.D.
VICE CHANCHELLOR, BANARAS UNIVERSITY.

PRINTED BY
G. S. JOSYER M.A.
at the Coronation Press, 100 Feet Road,
Mysore.

1955. Rs. 25/-

महाराजाधिराज श्रीभोजदेवविरचितः

शृङ्गारप्रकाशः

प्रथमादि अष्टम प्रकाशात्मकः

प्रथमो भागः

कीर्तिशेषयदुगिरि यतिराज सम्पत्कुमार

रामानुज मुनिभिः प्रत्यवेक्षितः

विद्वद्वरेण्य साहाय्येन

प्राचीन संस्कृतग्रन्थ प्रकटन विश्वसंस्थाया अध्यक्षेण

गोमठं रामानुज ज्यौतिषिकेण

प्रकाशितः

मैसूर् नगर्यां

कारोनेषन् मुद्रणालये मुद्रापितो

विजयतेतरां.

१९५६

FOREWORD

It should be superfluous on the part of any student of Sanskrit to comment on Maharaja Bhoja Deva, who was one of the most celebrated patrons of art that human history has witnessed, and whose marvellous gifts of compression, verbal felicity, and depth of meaning have been illustrated in his *Champu Ramayana*, which is one of the "musts" for all Sanskrit students.

He was also celebrated in the domains of grammar and rhetoric.

In the "Shringara Prakasha", the aim of Bhoja Raja has been comprehensive. His descriptions and analysis of the elements of poetics are original, and he takes the line that Shringara Rasa is the substratum of all literary beauty.

But his conception of Shringara is not that of love as understood in Western Poetry, but is essentially transcendental in character.

Shringara Prakasha is in essence an encyclopaedia of Indian thought and Indian locution.

It is the good fortune of India that the manuscript of this great work was discovered in 1920, and the Indian world of literature owes a deep debt to Sri Yathiraja Swami of Melkote for having brought the book to light.

Mr. Josyer has continued and is endeavouring to complete the work done by Yathiraja Swami, and scholarly India will welcome this great contribution to the appreciation of both literature and the science of erudite and loving criticism.

Truly, as Mr. Josyer has stated, this is Bhoja Raja's *magnum opus*, and it is hoped that the entire manuscript will be adequately edited and published.

BANARAS.
28-11-1955.

C. P. RAMASWAMY IYER,
K.C.I.E., LL.D.
Vice-Chancellor,
BANARAS HINDU UNIVERSITY.

SRINGARA-PRAKASA

PROLOGUE

Only in India could a work of this kind remain unpublished for nearly a thousand years! Elsewhere writings are rushed to print before the ink is dry on the paper!

Maharaja Bhoja-Deva was an erudite and enlightened sovereign of Malava in Central India over 9 centuries ago. He wrote numerous works in Sanskrit, and has enjoyed almost mythical fame as a patron of men of letters. His "*Champu-Ramayana*" is one of the most mellifluous works in Sanskrit literature. His two "Saraswati-Kanthabharanas", on Grammar and on Poetics, rank him among the great masters of the science of Grammar and the science of Poetics.

Incidentally it may be observed that Sanskrit is the only language in the world, in which the science of Poetics has been developed with microscopic perfection. The reason is perhaps that Sanskrit is the oldest, the longest, and the greatest of world literatures, presenting a vast and variegated expanse for the literary star-gazer.

In that realm of literary science Bhoja-Deva has reached farther than any other thinker of ancient or modern times. Having dwelt over the subject in 'Saraswati-Kanthabharana' according to the accepted canons, he felt impelled to the conviction that, of all the rasas, Shringara, or Love, was the pre-eminent rasa contributive to literary excellence. The late Mahamahopadhyaya Professor S. Kuppuswamy Sastriar of Madras observes,—

"Sringara-Prakasa is a hitherto unpublished work on Alankara of an encyclopædic character. In this mammoth work King Bhoja endeavours to bring under literature and literary appreciation everything of importance in

Indian thought as embodied in Sanskrit writings, both Shastraic and non-Shastraic, and the method which Bhoja's massive mind adopts for this purpose is eclecticism of an all-comprehending type."

The manuscript came to light only about 1920 in the enlightened land of Malabar, when the Oriental Manuscripts Library, Madras, procured a transcript of an imperfect manuscript discovered there.

His Holiness Sri Yatiraja Swamy of Melkote, in Mysore State, also came across a fragment, and pursuing his search came into possession of another copy of the same kind. He spent years in perfecting it, and about 1924 brought out 3 of its 36 Prakasas or chapters, 22, 23, and 24, in a sample edition.

It created a stir in the literary world. Erudite Dr. Ganganath Jha of the Allahabad University, went lyrical over it, and wrote,—

'शृङ्गारभासं नृपभोजनिर्मितं सम्मुद्रितं स्वामिवरेण्ययत्नतः ।
आस्वाद्य चांशेन समस्तबन्धसंस्वादनायोल्लसतीव मानसम् ॥'

Sri K. P. Jayaswal, Jurist and Sanskritist of Patna, wrote;—"I thank His Holiness The Yatiraja. Even the whole of India should thank him for publishing the शृङ्गारप्रकाश. I request that the publication of the *full work* should be expedited. The first and most beautiful verse 'अच्छिन्नमेखलं' is cited in *Sahitya-Ratnakara* of Dharmasuri. I feel proud that there are amongst my country-men such good writers as Yatiraja has shown himself to be by his introduction."

Dr. F. O. Schrader of Kiel, Germany, wrote, "Accept my sincere thanks for your valuable gift. Glancing over *Shringara-Prakasa* I find that this is in spite of all defects a very useful publication which will be helpful for the textual criticism of the classical kavyas and dramas as well as on many other occasions."

Working on the manuscript in Madras, in the 30's, Dr. V. Raghavan brought out in English an elaborate survey of the work as compared with other leading Sanskrit works on Poetics. In his words, "Bhoja's Shringara-Prakasa in 36 chapters, running to 1908 pages in foolscap size in manuscript, is one of the biggest works in Sanskrit literature, and the biggest in the whole field of Alankara Shastra. Besides Bhoja's contribution to Sanskrit Poetics, a thousand things of interest with reference to almost all branches of Sanskrit learning lie scattered in the 1908 pages of this magnum opus of king Bhoja."

But the publication of the original was not yet to be for over 2 decades. H. H. Sri Yatiraja Swamy strove vainly to get it published by the Mysore or the Madras University. He passed away in 1943 at the ripe age of 84, and Sanskrit lost one of its most diligent and devoted votaries. His literary legatee, Sri A. Srinivasiengar, brought the manuscript to us, and by God's grace and some aid that the Government of Mysore under the Ministry of Sri K. C. Reddy was kind enough to grant, we are now presenting to the world the first volume consisting of eight chapters from the commencement, which are some of the longest in the remarkable work.

While H. H. The late Yatiraja Swamy had done a great deal in the way of editing the work and preparing it for the press, in the absence of his living presence, I have been greatly assisted by reputed Sanskritists, Mahavidwan S. Venkatacharyar and Vidwan N. Venkatanarasimhacharyar, both Professors of the Maharaja's Sanskrit College, Mysore, and Sri G. S. Josyer, M.A., in the work of editing and publication.

The International Academy of Sanskrit Research is happy to discharge the debt which the Nation has owed to Maharaja Bhojadeva, as well as to place before the Nation what is an outstanding work in Sanskrit Poetics and literary criticism, and also an invaluable collection of literary and artistic gems in the vast field of Sanskrit and Prakrit literatures prior to 1040 A.D.

12-12-55.
MYSORE.

G. R. JOSYER.

प्रस्तावना

अत्रेदानीं किञ्चिदिदं प्रास्ताविकमुपहारीक्रियते सहृदयधुरन्धराणां मनीषिणां सविधे । तदिदमपरोक्षं नाम समेषां संख्यावतां, यदियं भारतभूमिः महोदधिरिव महामणीनां, कुसुमसमय इव सौगन्ध्यसन्ततेः, सुधादीधितिरिव ज्योत्स्नाप्रसरस्य सकलविद्यास्थाननिर्वाहकाणां ग्रन्थरत्नानां आकर एव चिराय वरीवर्तीति ।

एवमुन्निद्रवैभवाप्येषा भारतभूमिः बहुमुखैरुपप्लवैराप्लाविता तादृशीं खलु दुरवस्थामासादिता– यस्यां च मनीषिभिः प्रकाशितानां ग्रन्थरत्नानां न केवलं दर्शनं, प्रत्युत नामग्राहं ग्रहणमपि सुदुर्लभमासीत् । एवमस्या रत्नगर्भायाः प्रतायमानेऽपि जरतीत्वे प्राक्तनयौवनपिशुनाः केचन ग्रन्थाः अङ्गुलीपरिगणनपरिमितसंख्या एव तत्र तत्र दृश्यन्ते । कति वा लुप्ताः, कति वा देशान्तरं प्रापिताः, कति वा सन्तोऽपि न गोचरं नीता इति मतिमतापि न शक्यते निर्णेतुम् ।

एतेषु तृतीयां कोटिमाटीकमानेष्वेकतरोऽयं शृङ्गारप्रकाशो नामालङ्कारप्रबन्धः श्रीमन्महाराजाधिराज श्रीभोजदेवप्रतिभापरीवाहः, यस्यास्य नामग्रहणमात्रेण कुतूहलिन आलङ्कारिकाः चिराय खलु अवलोकनभागधेयेनाप्यन्वगृह्यन्तेति महानयं साहितीसौहितीसमुल्लासः । सोऽयं स्वप्रमेयानुगुणासाधारणगुणगौरवगुम्भिततया सर्वानप्यलङ्कारप्रबन्धानाक्रम्य तिष्ठत इति स्पष्टं भावुकानाम् ॥

अलङ्कारो नाम सहृदयहृदयहारी कश्चन शब्दार्थधर्मः । सोऽयमर्थविशेषरूपतया शब्दसन्निवेशरूपतया च द्वैधीभावमात्मनि लभते । तन्निरूपणप्रधाना अलङ्कारनिबन्धाः । भामहभट्टोद्भटप्रभृतयो हि काव्यमलङ्कारप्रधानमातिष्ठन्ते । तदिदमलङ्कारप्रस्थानं अनादिकालादारभ्य प्रतायमानं वर्तत इति । कदास्य प्रादुर्भाव इति न शक्यते युक्तितो निर्धारयितुम् , यतो – 'द्वा सुपर्णा सयुजा' इति, 'आत्मानं रथिनं विद्धि' इति, 'कश्यपः पश्यकोऽभवत्' इति च क्वचित्क्वचिदाम्नायभागेष्वपि अलङ्कारकृतविच्छित्तिविशेषपरिकर्मितो वाक्यार्थो दृश्यते ।

पञ्चैवालङ्कारा इति भरतमुनिः, चत्वारिंशदिति भामहः, एकषष्टिरिति प्रकाशकारः, इतोऽप्यधिकतया नव्यैः मीमांस्यमानानामेषां प्रभेदाः शताधिकतयापि संख्यायन्ते । तदिदमलङ्कारप्रस्थानं भोजराजेन बहुमुखलक्ष्यभेदनिरूपणपुरस्सरं विशेषदृष्ट्या विचारितं सरस्वतीकण्ठाभरणाख्ये प्रबन्धे । परंतु चिरन्तनालङ्कारिकमतानुयायिना तदनुगुणा कापि सरणिः स्वीक्रियते । नव्यानां पुनः तद्भेदप्रभेदपद्धतिः नितरांततो भिद्यते । वामनमते गुणालङ्कारप्रविभागो दुर्लभः ।

भामहमते कथञ्चित्सम्पादितोऽपि न स्वरसवाहिनी रीतिः । प्रकाशकारमते तु गुणालङ्कारयोः व्यङ्ग्यविशेषाणां च स्वरूपं विविक्तविषयता च स्पष्टं प्रतीयते । ग्रन्थकारो भोजदेवः काव्यगुणान् बहु मनुते । तत्स्वरूपनिरूपणादिषु तु भूम्ना चिरन्तनानामेव पक्षं स्पृशति । यदा तावत् ध्वनिकारेणोल्लिखितः ध्वनिप्रपञ्चः रामायणमहाभारतादिप्रसिद्धबहुविधलक्ष्यविशेषव्यापकतया महाविषयतामात्मनः प्राचिख्यपत् । तत आरभ्य सकलसहृदयहृदयहारिणा काव्यात्मभूतेन व्यङ्ग्यविशेषेण प्रतिक्षिप्तं अलङ्कारप्राधान्यं निदाघजलधरलाघं क्वापि विलिल्ये । उपस्कारकाणा-मेवालङ्कारत्वव्यवस्थापनादुपस्कार्यस्य प्राधान्यमर्थसिद्धम् । एवं वस्तुतत्त्वे स्ववैचित्र्यमात्रविश्रान्त इति उदाहरतां चित्रमीमांसाकाराणां मते तादृशलक्ष्यविशेषः सुधीभिरन्वेषणीयः । गुणीभूत-व्यङ्ग्यविशेषाणामलङ्कारेषु निवेशस्साधीयानिति सिद्धान्तः । अलङ्काराणामलङ्करणसाधनत्वमपि स्वातिरिक्तेन स्फुटेनास्फुटेनास्फुटतरेण वा व्यङ्ग्यविशेषेण सामानाधिकरण्यात् सम्पादनीयम् । एवं सर्वस्यापि काव्यप्रपञ्चस्य व्यङ्ग्यविशेषेण क्रोडीकरणे दुर्लभ एवालङ्कारस्य विषय इति विमृशद्भिः प्रकाशटीकाकारैः, तच्चित्रमिति सूत्रव्याख्यावसरे चित्रमित्यस्य अस्फुटतरातिरिक्तव्यङ्ग्यशून्यत्वे तात्पर्यमुपवर्णितम् । एवंविधलक्ष्यविषयतया स्ववैचित्र्यविश्रान्तत्वं उपपादनीयमिति मन्यामहे । सजीवशरीरेष्वेव अलङ्काराणां तथात्वं लोकेऽप्यामनन्ति, निर्जीवशरीरेषु तादृशव्यपदेशस्य गौणत्व-व्यवस्थापनात् । एवं व्यङ्ग्यविशेषप्रतिपादनव्यग्राणामपि प्रबन्धानां मात्रयाऽलङ्कारविषयत्वानपगमा-दलङ्कारप्रबन्ध इति व्यवहारोऽनुक्रान्तः । अनया च नीत्यालङ्कारप्रबन्ध इति व्यवह्रियमाणोऽप्ययं शृङ्गारप्रकाशः स्वाभिधेयेऽसाधारण्यमेवाविष्करोति । भगवता हि भरतमुनिना एकोनचत्वा-रिंशद्भावाः स्वोपज्ञं प्रकाशिताः, तेषु रसतापत्तियोग्याः नवैव स्थायिन इति व्यपदिश्यन्ते । तेषां स्वस्वसमुचितविभावानुभावादिसंवलनेन अलौकिकास्वादरूपा रसा अपि नवैव संख्यायन्ते । अन्ये च भावाः रसोपकारका अपि स्वस्वकार्यानुरोधेन व्यपदेशभेदं भजन्ते इति ।

इदं तु तत्त्वं ध्वनिकारैस्तदनुयायिभिरपि निर्विवादमङ्गीकारि । भोजराजस्तु कण्ठाभरणे अमुमेव सिद्धान्तमनुरुन्धानोऽपि प्रकृते शृङ्गारप्रकाशे शृङ्गारस्यैकस्यैव तादृशं रसत्वं मुख्यं अन्येषां रसत्वं प्रवादमात्रसिद्धमिति समुचितयुक्तिभिः स्वानुभवेन च स्थापयति । ध्वनिप्रस्थान-मप्यनेन प्रबन्धेन तदुपर्यप्यनुक्रान्तं दृश्यते । तदिदमुपरितनं शृङ्गमलङ्कारसिद्धान्तस्य ।

अस्मिंश्च प्रबन्धे षट्त्रिंशत्प्रकाशाः प्रतिपाद्यावान्तरप्रकरणभेदेन भिन्ना अपि अङ्गाङ्गि-भावेन प्रधानप्रतिपाद्यैकवाक्यतां न त्यजन्ति । प्राचीनालङ्कारनिबन्धप्रणेतॄणामिवास्यापि ग्रन्थकर्तुः व्याकरणशास्त्रनिष्णातता आद्येषु प्रकाशेषु विशेषरूपा विभाव्यते । ‘प्रथमे हि विद्वांसो वैयाकरणाः’ इति किल ध्वनिकारस्योद्घोषः । निबन्धस्यास्य अनवीनमपि सिद्धान्ततत्त्वं ग्रन्थपरामर्शेन नवीनायते सहृदयानाम् ।

कविसहृदयधुरंधरेण महाराजाधिराज श्री भोजदेवेन गम्भीरगुम्फया स्ववाण्या यथायथार्थं स्वसिद्धान्तः प्रकाश्यते, तथा तथास्य रमणीयतायां पण्डितजनहृदयदर्पणमेव प्रमाणमिति । अस्य इयत्ता मितंपचबुद्धिभिः परिच्छेत्तुं नालमिति सर्वं रमणीयम् ।

अयं च ग्रन्थकारः मालवाधीशस्य सिन्धुराजस्य पुत्र इति धारानगर्यां क्रिस्ताब्द ९९६ वत्सरादारभ्य १०५१ वत्सरपर्यन्तं सिंहासनमधितिष्ठन्नखिलविद्वज्जनप्रीतिपात्रं सकलशास्त्र-तत्वज्ञश्चासीदिति च निश्चिन्वन्ति विपश्चिदोऽपश्चिमाः ।

विपुलविषयतया विस्तृतस्यास्य प्रबन्धस्य समग्रस्य एकदैव मुद्रणेन प्रकाशनं दुष्करमिति प्राज्ञा एव जानन्ति । तथाप्यदृष्टपूर्वस्यास्य अवलोकने कुतूहलिनां विलम्बमसहमानानां विदुषां प्रीतये आदितः नवमाश्वासपर्यन्तो भागः विषयसूचिकादिभिः सज्जीकृत्य संपुटेऽस्मिन् संयोज्य प्रकाशितः । अस्य च हस्तलिखितमूलमातृकायां वाक्येषु पद्येषु च ग्रन्थपातः लेखकप्रमादस्खलितानि च बहुत्र दृश्यन्ते । तानि च आकराद्यवलोकनेन यथामति परिशोध्य निवेशितानि । प्राकृतगाधानां बहूनामाकराद्यनुपलम्भात्तथैव निवेशनमपरिहार्यमासीदिति प्राज्ञा एव तत्सर्मीकरणे प्रमाणमिति च सानुकम्पेषु विद्वत्सु शोधयित्रोः प्रार्थना ।

महाप्रबन्धस्यास्य सम्पादने प्रप्रथमं भूयोभूयः कृतपरिश्रमाः परमहंसेत्यादि श्री यदुगिरि यतिराज सम्पत्कुमाररामानुजमुनयः, इदानीं च महता प्रयत्नेन अस्य मुद्रणादिना प्रकाशने च प्रयतमानाः श्रीमन्तः जि. आर्. जोस्यर् महाशयाश्च अनेन महोपकारेण माननीयाः भारतीयैः विद्वद्भिरितिशम् ॥

विद्वज्जनविधेयौ शोधयितारौ –

आस्थानमहाविद्वान् सङ्कीघट्टाभिजनः वेङ्कटाचार्यः.
विश्रान्त अलङ्कारशास्त्रप्राध्यापकः.

आस्थानविद्वान् नोलातम्पल्लि वेङ्कटनरसिंहाचार्यः.
धर्मशास्त्रप्राध्यापकः.
महाराज संस्कृत महापाठशाला, मैसूरु.

२०—५—१९५५.
महीशूरपुरी.

विषय सूची

राजाधिराज महाराज श्रीभोजदेवविरचिते शृङ्गारप्रकाशाख्ये अलङ्कारशास्त्रे

प्रथमाद्यष्टमप्रकाशान्तभागे प्रतिपाद्याः प्रधानविषयाः

प्रकाशः.		प्रकाशः.	
१.	प्रकृत्यादिप्रकाशः	५.	उपाध्यायाद्यर्थचतुष्टयप्रकाशः.
२.	प्रातिपदिकादिप्रकाशः	६.	विभक्त्यर्थादिचतुष्टयप्रकाशः
३.	प्रकृत्यादिशब्दप्रकाशः.	७.	केवलशब्दसम्बन्धशक्तिप्रकाशः
४.	क्रियाद्यर्थचतुष्टयप्रकाशः.	८.	सापेक्षशब्दशब्दशक्तिप्रकाशः.

प्रथमे प्रकृत्यादिप्रकाशे विषयाः.

विषयसङ्ख्या		पत्रसंख्या
१ – ४	मङ्गलाचरणम्. शृङ्गारस्यैव रसत्वव्यवस्थापनं, तत्स्वरूपं च. वीराद्भुतादीनां रसत्वनिरासप्रतिज्ञा. एतद्ग्रन्थकरणे हेतूक्तिः.	१
५ – १०	रत्यादीनां शृङ्गारोपोद्बलकत्वं. रसशब्दनिर्वचनं. भावपदार्थः. शृङ्गारस्यैव रसत्वनिर्णीतिः. काव्यशब्दार्थः. शब्दार्थतत्सम्बन्धानां प्रत्येकं द्वादशविधत्वोत्कीर्तनं, तद्विवरणं च.	२
११ – १३	प्रकृतेस्त्रैविध्यं. धातूनां षाड्विध्यं. तत्र परिपठित अपरिपठित परिपठितापरिपठितानां उदाहरणानि.	३
१४ – १६	प्रत्ययधातवः, नामधातवः, प्रत्ययनामधातवश्च.	४
१७	प्रत्ययानां सुप्तिङादिभेदेन सोदाहरणं षाड्विध्यम्.	५
१८ – २१	प्रातिपदिकस्य नामादिरूपेण षाड्विध्यम्. प्रातिपदिकसंज्ञाविधायकसूत्रार्थः. आविष्टानाविष्टभेदेन नाम्नां द्वैविध्यं, सोदाहरणं आविष्टलिङ्गविभागः.	६

२२ – २६ सदृष्टान्तं अनाविष्टलिङ्गनिरूपणं. अव्ययस्वरूपनिरूपणं. अव्ययनिपातादिना षोढा तद्विभजनं. अव्ययस्य पुनरपि सत्वासत्वभेदेन द्वैविध्यम्. सत्वसन्धिनां सोदाहरणं षाड्विध्यं. ७

२८ – ३० असत्वसन्धिनां सोदाहरणं षाड्विध्यं. निपातशब्दार्थः, षोढा तद्विभागश्च. विध्यर्थादिनिपातविवरणम्. ८

३१ अर्थवादार्थनिपातविवरणं, तदुदाहरणानि च. ९

३२ – ३३ अनुवादार्थनिपातोदाहरणानि, निषेधार्थनिपातोदाहरणानि. १०

३४ विधिनिषेधार्थनिपातोदाहरणानि. ११

३५ अविधिनिषेधार्थनिपातोदाहरणानि. १२

३६ प्राद्युपसर्गनिरूपणम्. १३

३७ – ३८ उपसर्गाणां षड्विधत्वम्. वाचकानां, द्योतकानां, विशेषकाणां चोपसर्गाणां यथाक्रममुदाहरणानि. १४

३९ विशेषकाणां क्रियाविशेषणवाचकत्वशङ्कासमाधानम्. १५

४० – ४३ सहाभिधायकानां, कार्यार्थानां, निरर्थकानां च उदाहरणानि. प्रादीनामेव सम्बन्धनिमित्ततया कर्मप्रवचनीयरूपता. १६

४४ अनु प्रति पर्यध्यभ्यत्याङां अर्थविचारः. १७

४५ – ४६ विभक्तिप्रतिरूपकाणां अव्ययानां षोढा विभजनं. अव्ययानां अर्थभेदेनोदाहरणानि. १८

४७ – ५१ अनुकरणशब्दार्थः तद्विभागश्च. व्यक्तवर्णसादृश्योक्तेः, व्यक्तपदसादृश्योक्तेः, व्यक्तवाक्यसादृश्योक्तेः, अव्यक्तवर्णसादृश्योक्तेः उदाहरणानि. २०

५२ – ५६ अव्यक्तपदसादृश्योक्तेः, अव्यक्तवाक्यसादृश्योक्तेः उदाहरणे. अनुकरणीय-विचारः. अनुकरणस्य साधुताऽसाधुताविचारः. कृतां षोढा विभजनं, तदुदाहरणानि च. २१

५७, ५८ तद्धितशब्दार्थनिर्वचनं, षोढा तद्धिभागश्च. समासपदार्थस्य षोढा विभागः, तदुदाहरणानि च. २२

५९ सोदाहरणं तत्प्रपञ्चः. २३

६० सुसूक्ष्मजटकेशेति पद्यगतेषु पदेषु तत्पुरुषबहुव्रीहिसमासविचारः २६

६१, ६२ बहुव्रीहौ पूर्वपदप्रकृतिस्वरस्यावयवस्वरबाध्यत्वनिरूपणम्. द्वन्द्व-बहुव्रीह्यादिसमासविचारः. २७

६३ बहुभिर्बहुव्रीहिविचारः, सोदाहरणम्. ३०

६४ – ६६ उक्तार्थे महाभाष्यसंमतिः. प्रथमं प्रत्ययत्रैविध्यम्. सनादयो धातुप्रत्ययभेदाः, तद्विवरणं च. ३३

६७ – ७१ यदादयः प्रत्ययप्रत्ययभेदाः. टाबादयः प्रातिपदिकप्रत्ययभेदाः तद्विवरणं च. उपस्कारशब्दार्थः. प्रकृतिप्रत्ययोभयोपस्काररूपेण त्रेधा तद्विभजनम्. पुनरपि भूषणादिना षट्प्रकारता. ३४

७२ तद्विवरणं सोदाहरणम्. ३५

७३ अव्ययानामर्थविशेषतात्पर्येणोदाहृतिषु विनियोगः. ३६

७४ – ७५ प्रथमप्रकाशप्रधानार्थनिगमनं. वक्ष्यमाणद्वितीयप्रकाशार्थसूचनम्. ३७

॥ इति प्रथमप्रकाशसूची ॥

द्वितीये प्रातिपदिकादिप्रकाशे विषयाः

७६ – ७८ विभक्तावयवादिना प्रातिपदिकत्रैविध्यं. रूढ्रूपादिभेदेन विभक्तावयवत्रैविध्यम्. सदृष्टान्तं भावस्य षोढा विभजनम्. ३८

७९ सिद्धसाध्यवर्णने केषांचिदभिप्रायाविष्कारः. ३९

८० „ तत्रैवान्येषां अभिप्रायवर्णनम्. ४०

८१ क्रियाविशेषणानां नपुंसकत्वानपुंसकत्वविचारः. ४१

८२ – ८४ कारकशब्दार्थः, कर्त्रादिभेदेन षोढा तद्विभागः. कर्तृ, कर्म, करण, सम्प्रदान, अपादान, अधिकरणानां सोदाहरणं त्रैविध्यं. पुनरपि शुद्धादिभेदेन तदुभयत्रैविध्यम्. ४२

८५, ८६ शुद्धादीनां कारकभावयोः प्रत्येकमुदाहरणानि. कृतां त्रिप्रकारता, उदाहरणानि च. ४३

८७ – ८९ भावादिना तद्धितविभागः. भावद्वैविध्यम्. अन्तरङ्गशब्दार्थः, तस्य जात्यादिना षोढा विभागः, तदुदाहरणानि च. ४४

९०, ९१ भावविचारे मतभेदनिरूपणम्. बहिरङ्गस्वरूपं, षोढा तद्विभजनं च. ४५

९२ धात्वर्थस्य भावरूपता, भावकारकादिभिदया तत्त्रैविध्यं, सोदाहरणम्. ४६

९३ ‘ तेन तुल्य ’ मिति सूत्रार्थविवरणं, व्याख्यान्तरं च. „

९४ वत्यर्थविचारः, सौत्रपदानर्थक्यशंका, तत्समाधिश्च. ४७

९५, ९६ अन्येषां व्याख्यान्तरम्. कारकस्याप्यन्तरङ्गबहिरङ्गत्वे. ४८

९७ ‘ कर्मणी ’ त्यादि संप्रदानसूत्रार्थः, तद्विभागश्च. ४९

९८ अपादानसूत्रार्थः, तत्त्रैविध्यं, तद्विवरणं च. „

९९ – १०४ कर्मविशिष्टस्य, करणविशिष्टस्य, अधिकरणविशिष्टस्य कर्तुरुदाहृतिः. करणस्य कर्मवैशिष्ट्यसङ्ग्रहः. संप्रदानापादानाधिकरणानां कर्मवैशिष्ट्योदाहृतिः. कर्तृकर्मणोरपि क्रियया विशेषणयोगसम्भवाशंका, तत्समाधिश्च. ५०

१०५ – ७ 'कृतपूर्वी कट' मित्यत्र द्वितीयानुपपत्तिशंकातत्परिहारौ. क्रियाकर्त्रोः कर्मभिरभिसम्बन्धः. 'कर्तुरीप्सित' मित्यादिना प्रत्ययानभिहितस्य कर्मणो द्वितीयोपपत्तौ भाष्यसंमतिः. ५१

१०८ – १० कृतपूर्वी कटमित्यादौ अन्तर्भूतकर्मणः क्तान्तस्याकर्मकस्य भावाभिधायकत्वे भाष्यकारानुमतिः. सम्बन्धिद्वैविध्यम्, सोदाहृतिरान्तरालिकस्तद्विभागः. 'युष्मदस्मद्भ्या' मिति सूत्रार्थस्य छान्दसपदेषु योजनान्तरवर्णनम्. ५२

१११ षष्ठ्यन्ताभिधेयस्य गुणभूतस्य सोदाहरणं त्रैविध्यम्. ५४

११२ 'ऐन्द्रं हविरित्यादौ तद्धितप्रत्ययविचारः. ५५

११३ – २० ग्राम्यशब्दवृत्तिविषयविचारः. स्वार्थिकानां द्वेधा विभजनम्. पुनरपि सोदाहृतिरान्तरालिकविभागः. तत्रासत्वभूतार्थेषु वाचकानां, द्योतकानां, विशेषकाणां, सार्थकानां, निरर्थकानामुदाहरणानि. ५६

१२१ 'तेन तुल्य' मिति सौत्रक्रियाशब्दस्य गुणशक्त्याद्यर्थबोधकत्वम्. ५७

१२२ सत्वभूतार्थेषु वाचकद्योतकयोरुदाहृतयः. ,,

१२३ तत्र विशेषकादीनामुदाहृतयः. ५८

१२४ कुत्सानुकम्पादीनां स्वार्थादिसाकल्यनिबन्धनत्वम्. ५९

१२५ उपसर्गयोगाद्धातोरर्थभेदः. ६१

१२६ समासपदार्थः, प्राकृत वैकृत शेषभेदेन तत्त्रैविध्यम्, प्राकृतस्यान्तरालिको विभागश्च. ६२

१२७ वैकृतस्य चतुर्धा विभागः, आन्तरो विभागश्च. ६३

१२८ शेषस्य ,, ,, ,, ,, ६४

१२९ द्वन्द्वैकशेषसमासविचारोपन्यासः. ६६

१३० – ३१ अविभक्तावयवस्य प्रातिपदिकस्य नामादिरूपेण त्रैविध्यं, सोदाहरणं प्रत्येकतो विभागश्च. अनुकरणत्रैविध्यम्. ७१

१३२ विभक्तिशब्दार्थः. तत्त्रैविध्यं, सोदाहृतिरान्तरालिको विभागः. ७२

१३३ उपसर्जनत्रैविध्यं, सोदाहरणमन्तरा तद्विभागः. ७३

१३४ किं सब्रह्मचारीत्यत्र समासविकल्पाक्षेपः. ७५

१३५ समासपदार्थविवरणं, सोदाहरणं तद्विभागश्च. ,,

१३६ – ३८ अवस्तुरूपाद्युदाहरणानि. दण्डादण्ड्यादीनां सत्वासत्वरूपतोक्तिः. 'तत्र तेनेदमिति सरूप' इति सूत्रार्थोपन्यासः. ७६

१३९ अश्राद्धभोजीत्यत्र समासविचारः. ८१

१४० अब्राह्मण इत्यत्र समासविचारः. ८२

१४१, ४२ नञ्तत्पुरुषसमासविचारः. नञर्थभेदेन समासभेदः. ८३

१४३ – ४५ एकशब्दस्य बह्वर्थता. द्वितीयप्रकाशप्रधानार्थोपसंहारः. तृतीयप्रकाशप्रतिपाद्यार्थसङ्ग्रहः. ८४

॥ इति द्वितीयप्रकाशसूची ॥

तृतीये प्रकृत्यादिशब्दप्रकाशे विषयाः.

१४६ – ४८ पदस्वरूपम्. क्रियादिरूपेण त्रेधा तद्विभजनम्. प्रत्येकं षोढा विभागेन पदस्याष्टादशभेदाः, तदुदाहरणानि च. ८५

१४९ सोदाहरणं कर्मकर्तृपदविचारः. ८६

१५० क्रियारूपस्यापि कृदन्तस्य भावे, कर्मणि, कर्तरि भावकर्मणिचोदाहरणानि. ८७

१५१ – ५२ भावकर्तृ, कर्मकर्त्रादीनामुदाहरणानि, तत्र मतभेदोपन्यासः. 'लः कर्मणि' इत्यादिसूत्राणां 'द्व्येकयो' रिति विधानेन सहैकार्थविवक्षायामेकवाक्यतोपपत्तिः. ८८

१५३ – ५५ 'एको हि पचती' त्यादिवाक्यार्थः. संख्यामात्राभिधाने दोषोद्भावनं, तन्निरासश्च. लकारात्कर्तुरभिधाने शक्तेः कारकतया सामानाधिकरण्यानुपपत्त्याक्षेपः, तत्समाधिश्च. ८९

१५६, ५७ संख्याकर्मादीनां विभक्त्यर्थत्वम्. लकारेण कर्तृकर्मणोरभिधाने महाभाष्य वार्तिककारयोस्संमतिप्रदर्शनम्. ९०

१५८ – ६२ सङ्ख्यायाः कारकेणैव सम्बन्धः न क्रियादिनेति कथनम्. स्वतन्त्रादिभेदेन कर्तुस्त्रैविध्यम्. स्वविभक्तिवाच्यस्य परविभक्तिवाच्यस्य च स्वतन्त्रकर्तुरुदाहरणम्. उद्भूतानुद्भूतव्यापारभेदेन अस्वतन्त्रकर्तुरप्युदाहरणम्. कर्मकर्तृविभागः. ९१

१६३ – ६६ उद्रिक्तानुद्रिक्तकर्मांशयोरुदाहरणे. कर्मशब्दार्थनिर्वचनम्. निर्वर्त्य, विकार्य, प्राप्य, भेदेन कर्मणस्त्रैविध्यम्. यथाक्रमं तेषामुदाहरणानि. ९२

१६७ - ७१ करणशब्दार्थनिर्वचनम्. बाह्य आभ्यन्तर बाह्याभ्यन्तरभेदेन करणत्रैविध्यम्. बाह्यादीनामन्तरा विभागः, तेषां यथोद्देशमुदाहरणानि. सम्प्रदानशब्दार्थ-निर्वचनं, तत्रैविध्यं च. ददातिकर्मव्याप्यसम्प्रदानोदाहरणम्. ९३

१७२ - ७५ क्रियाकर्मव्याप्यादिसम्प्रदानोदाहरणानि. अपादानशब्दार्थनिर्वचनं, तत्रैविध्यं. उज्झितानुज्झितनिर्दिष्टविषयापादानोदाहरणानि. उपात्तविषयापादानस्य द्वेधा विभजनं, तदुदाहरणानि च. ९४

१७६ - ७९ अपेक्षितक्रियापादानस्य द्वेधा विभजनं, तदुदाहरणे. अधिकरणशब्दार्थ-निर्वचनम्. वैषयिक औपश्लेषिक नैमित्तिकभेदेनाधिकरणत्रैविध्यम्. प्रत्येकं तद्विभागः, तदुदाहरणानि च. ९५

१८० नैमित्तिकाधिकरणस्य शुद्ध, सङ्कीर्णभेदेन द्वैविध्यं, तत्तदुदाहरणानि च. ९६

१८१, ८२ णिचः प्रयोजकव्यापाराभिधायकत्वम्. णिजर्थस्य धात्वर्थेन साक्षादवच्छेदशंका, तत्परिहारश्च. ९७

१८३, ८४ क्रियाप्रापितसन्निधानस्य कर्तुर्नैयत्यविचारचर्चा. विधेरेव प्रत्ययार्थत्वोपपादनं, तत्र मतान्तरम्. ९८

१८५ - ८७ भावनापक्षे कारकाणामिति बहुवचनानुपपत्तिचोद्यम्. तस्यैव केषांचित् समाध्यभिधानम्. विशेषणादिरूपाणामुपस्काररूपता. ९९

१८८, ८९ क्रियाविशेषणादीनामुदाहरणानि. तादर्थ्यस्वरूपनिरूपणम्. १००

१९० - ९२ लक्षणस्यापि तादर्थ्यवद्धेतुविशेषरूपता. क्वचिद्धेतोरपि लक्षणत्वम्. वाक्यस्वरूपम्, सोदाहरणं वाक्यत्रैविध्योक्तिः. १०१

१९३ - ९७ सोदाहरणं काव्यशास्त्रभिदया लौकिकद्वैविध्यम्. सोदाहृतिस्त्रेधा प्राकृतविभागः. लक्षितद्वैविध्यं, श्लिष्टद्वैविध्यं, सोदाहरणे. अपभ्रंशत्रैविध्यम्. १०२

१९८-२०० लाटीयादीनामुदाहरणानि. वाक्यस्यैकादशप्रकारतारूपताकथनम्. अनेक आवृत्त अनुवृत्ताख्यातानामुदाहरणानि. १०३

२०३, ४ विपरीताख्यातादीनामष्टानामुदाहरणादीनि. निरन्तराख्यातानां अभ्युपगमानभ्युपगमविचारः. १०४

२०५ अत्रैव केषांचिन्मतम्. १०५

२०६ विशेषणविशेष्यभावस्य भिन्नाभिन्नोभयार्थकत्वशंकासमाधी. १०६

२०७ उपसर्गाणां क्रियाविशेषणता. १०७

२०८ तिङन्तयोर्वैयधिकरण्येन विशेषणविशेष्यभावानुपगमः. ,,

२०९, १० साध्यमानैकस्वभावायाः क्रियायाः कर्तृत्वे कर्मत्वे वा क्रियान्तरेण सम्बन्धानुपगमः. क्रिययोस्साध्यसाधनभावदर्शनम्. १०८

२११	आख्यातयोर्मिथस्सम्बन्धासम्बन्धः.	१०९
२१२	वाक्यभेदादिनाऽऽख्यातयोस्सम्बन्धास्तित्वचोद्यपरिहारः.	,,
२१३	निपातस्य प्रहासविषयसम्बोधनार्थतयाऽऽख्यातरूपता.	११०
२१४	सङ्ख्याबोधकस्यैकशब्दस्य बहूनां प्रहासे बहुत्वापत्तिशङ्का, तत्परिहारश्च.	,,
२१५	कात्यायनमते आख्यातयोस्सम्बन्धाभावः.	१११
२१६	सूत्रकारमते आख्यातयोस्सम्बन्धाङ्गीकारः.	,,
२१७ – १८	सम्बोधनस्य क्रियाविशेषकत्वम्. तत्र सूत्रवार्तिककारयोरभिप्रायाविष्कारः.	११२
२१९	क्रियाया अपि कारकत्वसम्भवोक्तिः.	११३
२२०	पदस्य वाक्यरूपादधिकार्थता.	११४
२२१	आकारभेदेन बुद्धेः क्रियारूपतावादिमतनिरूपणम्.	११५
२२२ – २८	विशेषक्रियायां क्वचित्कर्मत्वेन सम्बन्धदर्शनम्. वाक्यलक्षणविषये सूत्र, वार्तिक, भाष्यकृतामाविष्करणम्. क्रियाणां परस्पराभिसम्बन्धसंभवः. तत्र भिन्नाभिन्नप्रवक्तृकत्वयोरुदाहरणानि. प्रकरणपदार्थनिर्वचनम्. प्रस्तुत, कल्पित, ऽऽकस्मिकभेदेन प्रकरणत्रैविध्यम्. प्रस्तुतभेदोदाहरणम्.	११६
२२९	कल्पितद्वैविध्यम्, साभासनिराभासयोः कल्पितयोरुदाहरणानि च.	११७
२३०	सबीजनिर्बीजभेदेनाकस्मिकद्वैविध्यम्, तदुदाहरणानि च.	११८
२३१ – ३५	निरनुबन्धस्य, अनेकवाक्यस्य, अन्तोपसंहृतस्य, एकानेकवाक्यस्य, विभक्तियोजितस्य च उदाहरणानि.	११९
२३६ – ३९	पद वाक्य प्रकरणानां स्वरूपाणि. तत्र दण्डिनोऽभिप्रायाविष्कारः. पद्य-गद्यमिश्रात्मना प्रबन्धत्रैविध्यम्. आन्तरालिकस्तद्विभागः तदुदाहरणानि च.	१२०
२४०	विषम मात्राछन्दस्समाऽर्धसम गणछन्दस्समाऽर्धसमगणच्छन्दोगन्धिनामुदाहरणानि.	१२१
२४१	गुरुबहुल, लघुबहुल, मिश्रभेदेन चूर्णत्रैविध्यम्.	१२२
२४२	अललिताविद्धपदवाक्यमिश्रभेदानामुदाहरणानि.	,,
२४३	प्रकृत्यादीनामेव शब्दत्वव्यवस्थापनम्.	१२३
२४४	वर्णानामर्थवत्वे हेतूपन्यासः.	१२४
२४५ – ४८	वर्णसमुदायस्य स्फोटाभिव्यञ्जकत्वम्. प्रकृत्यादिस्फोट, पदस्फोट, वाक्यस्फोटभेदेन स्फोटत्रैविध्यम्. तृतीयप्रकाशप्रतिपाद्यप्रधानार्थ-निगमनम्. अर्थरूपेण विवर्तप्रतिपादनरूपवक्ष्यमाणार्थसङ्ग्रहः.	१२५

॥ इति तृतीयप्रकाशसूची ॥

चतुर्थे क्रियाद्यर्थचतुष्टयप्रकाशे विषयाः

२४९ – ५३ प्रकृत्यादिशब्दानां क्रियाकालादिविधभेदप्रत्यायकत्वम्. क्रियायाः कारकप्रवृत्तिविशेषरूपधात्वर्थत्वम्. धातूनां त्रैविध्यम्, सोदाहरणम्. क्रियाशब्दार्थः, कर्त्रादिस्वरूपनिरूपणम्. क्रियायाः कारकान्तरानतिरिक्तत्वशंका, तत्परिहारश्च. १२६
२५४ तत्र विचारः. १२७
२५५ क्रियाया एकत्वाभ्युपगमे साधनभेदेन द्विवचनानुपपत्तिचोद्यं, तन्निरासश्च. १३०
२५६ – ५८ द्रव्यनानात्वे सम्बन्धिभेदाद्भेदावगमे क्वचिद्भेदाभिधानम्. सिद्धवस्तुन एव संख्यायोगोपपत्तिः, न साध्यस्येति कथनम्. आख्यातानां क्रियाप्राधान्यचिन्ता. १३१
२५९ – ६१ क्रियाप्राधान्येनैकशेषोपपत्तिः. अत्रान्येषामभिप्रायवर्णना. क्रियायाः सोपपत्तिकं धात्वर्थातिरिक्तशंकापरिहारः. १३२
२६२, ६३ विस्तरेण क्रियाशब्दनिर्वचनम्. पुरुषव्यापारस्य कार्यानुमेयतया परोक्षत्ववादिमतानुवादः, तत्र दोषोद्घाटनं च. १३३
२६४, ६५ क्रियाया अनुमेयत्वासंभवोपपादनम्. धात्वर्थस्य पुरुषव्यापारातिरेकम्, तद्व्युदासश्च. १३४
२६६ फलस्य क्रियात्वानुपपत्त्युपपादनम्. १३५
२६७ चलति पचतीत्यादावनुमेयक्रियावादिनां समाधानम्. १३६
२६८ फलस्यापि सकलक्रियावयवसाध्यत्वात्साधनभावेनापेक्षणीयताप्रतिपादनम्. १३७
२६९ समुदायेषु समुदायाभ्यासेन पचतीत्यादिप्रयोगोपपत्तिः. ,,
२७० – ७३ सङ्घातस्यातीन्द्रियता. काल्पनिकयुगपद्ग्रहणाभिमानस्य प्रत्यक्षभ्रमनिबन्धनता. क्रियाया अप्रत्यक्षत्वे महाभाष्यकारसंमतिः. विस्तरेण क्रियायाः प्रत्यक्षत्वाप्रत्यक्षत्वसम्भवविचारः. १३८
२७४ क्रियायाः कालसम्बन्धः, कालाङ्गीकरणप्रकारश्च. १४०
२७५ क्रियाविशेषैः कालविशेषावगमोदाहरणानि. १४१
२७६ क्रियास्वरूपे मतभेदाविष्कारः. १४२
२७७ – ७९ भूतादयः कालभेदाः. नित्य नैमित्तिक स्वाभाविक वैपरामर्शिकभेदेन कालस्य चातुर्विध्यम्. चतुर्धा विभक्तस्यापि कालस्य प्रत्येकं त्रैविध्यं, तद्विवरणं च. १४३
२८० प्रायोगिक नैसर्गिक सांसर्गिक प्रकीर्णानां कालभेदानां स्वरूपनिरूपणम्. १४४
२८१ कालस्य क्रियातत्साधनोभयरूपताप्रपञ्चनम्. १४५
२८२ शक्तिमद्द्रव्यस्य अवान्तरव्यापारनिबन्धनं कर्त्राद्युपाख्याषट्कम्. ,,

२८३, ८४ कर्त्रादीनां षण्णामपि प्रत्येकं त्रिप्रकारता, तदुदाहरणानि च.
अन्तर्भावितण्यर्थानां णिजन्तनियमसम्भवोक्तिः. १४६
२८५ विकर्मकर्त्रादीनामुदाहरणानि. १४७
२८६, ८७ उत्पाद्यादीनामुदाहरणानि. अप्राप्यक्रियाविशेषोदाहरणानि. १४८
२८८ - ९० अविनाश्यादीनामुदाहरणानि. कर्तृकर्मोदाहरणम्. प्राप्यादिप्राप्यभेदानां
यथायथमुदाहरणानि. १४९
२९१ - ९२ करणशब्दार्थनिर्वचनम्. बाह्यादिरूपेण तत्त्रैविध्यं, तदुदाहरणानि च. १५०
२९३, ९४ आभ्यन्तरादीनामुदाहरणानि. ददातिकर्माप्य, कर्ममात्राप्य,
क्रियाप्य भेदेन सम्प्रदानत्रैविध्यं, तदुदाहरणानि च. १५१
२९५ - ९८ कर्ममात्राप्यस्य, ईप्सिततमस्य च षोढा विभागः, प्रत्येकं तदुदाहरणानि च.
अपादानशब्दार्थनिर्वचनम्. निर्दिष्ट, उपात्तविषय, अपेक्षितक्रिय रूपेण
तत्त्रैविध्यम्. १५२
२९९ निर्दिष्टविषयापादानस्य षोढा विभागः, प्रत्येकं तत्तदुदाहरणानि च. १५३
३०० 'ध्रुवमपाय' इत्यादिसूत्राणां निर्दिष्टादिविषयतया अन्वेषामर्थवर्णनम्. ,,
३०१, २ अधिकरणशब्दार्थविवरणं, वैषयिकादिना तत्त्रैविध्यम्. वैषयिकनैमित्तिकयोः
स्वरूपनिर्वचनं, षोढा तद्विभागः, तदुदाहरणानि च. १५४
३०३, ४ कर्मयोगनैमित्तिकोदाहरणानि. विस्तरेणैतद्विषयकोपन्यासः. १५५, ६
३०५ - ७ शक्तेर्भेदाभेदचिन्ता. स्वरूपनिर्वचनपुरस्सरं प्रथमादिपुरुषत्रैविध्य-
निरूपणम्. युष्मदस्मदादिप्रयोगविचारः. १५७, ८
३०८ क्रिया काल कारक पुरुषात्मकपदार्थचतुष्टयनिरूपणानिगमनम्. १५९
३०९ कालादेः क्रियायां सोपस्कृतप्रधानार्थस्य च प्रातिपदिकेऽन्तर्भावकथनम्. १६०

॥ इति चतुर्थप्रकाशसूची ॥

पञ्चमे उपाध्याद्यर्थचतुष्टयप्रकाशे विषयाः.

३१० अकर्मकादिना क्रियारूपाः द्वादशधात्वर्थभेदाः, तत्तदुदाहरणानि च. १६१
३११ कालो भूतादिभेदाद्द्वादशधा, ,, १६२
३१२ अनद्यतनविभागः, सोदाहृतिः तद्विचारश्च. १६३
३१३ वर्तमानाद्यतनस्य षोढा विभागः, विषयभेदेनोदाहरणानि च. १६४

३१४	अव्यक्तस्य षोढा विभागः, उदाहरणानि च.	१६५
३१५	भविष्यद्वर्तमानपरोक्षादीनामुदाहरणानि.	१६६
३१६	केषांचिद्धातूनां निमित्तभेदेन परस्मैपदात्मनेपदप्रयोगार्हता.	१६७
३१७	'य आत्मनेपदाद्भेदः क्वचित्' इत्यत्र क्वचिद्ग्रहणस्य सोपपत्तिकं विवेचनम्.	,,
३१८, १९	प्रत्ययार्थोपाधिनिरूपणम्. उभयोर्पार्थैरनन्तप्रकारता.	१६८
३२०	असूयासंमत्यादीनामुदाहरणानि.	१६९
३२१	प्रत्ययार्थप्राधान्यं, तत्त्रैविध्यं तदुदाहरणानि च.	,,
३२२ – २५	शुद्धसङ्कीर्णभेदेन क्रियाद्वैविध्यं, तदुदाहरणानि च. नियताऽनियतधातुविषयतया कारकद्वैविध्यम्. प्रातिपदिकार्थस्य व्यक्त अव्यक्त सन्दिग्धरूपेण त्रैविध्यं, सोदाहरणमान्तरालिको विभागश्च.	१७०
३२५	सक्रियादिना कारकत्रैविध्यं, सोदाहरणं तद्विभजनम्.	१७१
३२६	मिश्रक्रियात्रैविध्यं, सोदाहरणं प्रत्येकं तद्विभजनम्.	१७२
३२७	लोपागमवर्णविकारादीनामुदाहरणानि.	१७३
३२८, २९	अवध्यादिरूपेणोभयद्वारकस्य द्वादशविधत्वम्. पूर्वकालव्यतीहारादीनामुदाहरणानि.	१७४
३३० – ३२	सम्बोधनशब्दार्थनिर्वचनं, षोढा तद्विभागश्च. यथासंख्यं नियोगार्थादीनां उदाहृतयः. क्रियाविशेषणस्वरूपनिरूपणं, षोढा विभागश्च.	१७५
३३३ – ३५	अव्ययरूपादिविशेषणोदाहरणानि. कारकविशेषणस्य षोढा विभजनम्. कर्तृकर्मविशेषणोदाहरणे.	१७६
३३६ ३७	करणविशेषणादीनां यथाक्रममुदाहरणानि. शेषपदार्थः, तस्य षोढा विभागः, ,, ,, .	१७७
३३८ – ३९	परिशेषस्वरूपं, समुच्चयादिना तस्य षाड्विध्यं, तदुदाहरणानि च. सहार्थत्रैविध्यम्.	१७८
३४०, ४१	प्रतीयमानादि सहार्थभेदानामुदाहरणानि. तादर्थ्यस्वरूपं, षोढा तद्विभागः, सोदाहृतिः.	१७९
३४२, ४३	क्रियातादर्थ्यादीनामुदाहरणानि. अकारकप्रपञ्चनं, सोदाहरणं षाड्विध्यम्.	१८०
३४४ – ४६	तृतीयावाच्यादीनामुदाहरणानि. ज्ञापकहेतोरेव लक्षणत्वं, षोढा तद्विभजनं सोदाहरणम्. उपपदस्य सोदाहरणं तद्विभागः.	१८१, २
३४७ – ५०	लिङ्गादीनामुदाहरणानि. स्वार्थद्रव्यलिङ्गभेदेन प्रातिपदिकार्थत्रैविध्यम्. द्रव्यपदार्थविवरणं, आश्रयरूपाऽनाश्रयरूपभेदेन द्रव्यद्वैविध्यं सोदाहरणम्. शब्दार्थभेदेन लिङ्गद्वैविध्यं, शुद्धमिश्रादिभेदेन पुनष्षाड्विध्यम्.	१८३

३५१ - ५३ शुद्धमिश्रादिलिङ्गानां यथायथमुदाहरणानि. वाचकत्वद्योतकत्वविषये अभिप्रायवैलक्षण्यकथनम्. तत्रैवाक्षेपसमाधी. १८४, ५

३५४, ५५ गत्युपसर्गकर्मप्रवचनीयानां तत्तदर्थवाचकत्वनिष्कर्षः. विस्तरेण सम्बन्धानां कारकाश्रितत्वोपवर्णनम्. सम्बन्धानां स्वरूपातिशयेन क्रियाभेदाधिगमयितृत्वप्रपञ्चनम्. जातेरसत्यतावादः. १८६, ७

३५८ सामान्यस्यालीकत्वशङ्का, तत्प्रतिविधानं च. १८८

३५९, ६० सामान्यापह्नवस्य दुर्निरूपता. सामान्यासद्भावनिगमनम्. १८९

३६१, ६२ पञ्चमाध्यायप्रधानार्थक्रोडीकारः. विभक्त्यर्थवर्णनादिवक्ष्यमाण-षष्ठप्रकाशसङ्ग्रहः. १९०

॥ इति पञ्चमप्रकाशसूची ॥

षष्ठे विभक्त्यर्थादिचतुष्टयप्रकाशे विषयाः·

३६३ - ६५ सङ्ख्या कारक शेषरूपेण विभक्त्यर्थत्रैविध्यम्. सङ्ख्यायाष्षोढा विभागः सोदाहृतिः. कारकस्य द्वितीयादिवाच्यतया षोढा सोदाहरणम्. १९१

३६६ कारकातिरेकिणः क्रियाकारकपूर्वकस्य सम्बन्धविशेषस्य त्रैविध्य-निरूपणं, तदुदाहरणानि च. १९२

३६७ - ६९ सङ्ख्यापरत्योर्विभक्त्यर्थतया प्रातिपदिकाभिधेयजातौ तदन्वयासम्भवाशंका, तत्परिहारश्च. प्रकृतिप्रत्यययोस्समभिव्याहारचोद्यनिगमनं, तत्परिहारश्च. शक्तिसङ्ख्ययोर्जात्यवच्छेदकत्वनैयत्याभावः. १९३

३७० उद्देश्योपादेयगतसङ्ख्ययोः उदाहरणेषु यथाक्रममविवक्षाविवक्षयोः नैयत्यसम्भवप्रदर्शनम्. १९४

३७१ - ७३ मीमांसकसिद्धान्ते शाब्दिकानामपि संमतिप्रदर्शनम्. क्वचिद्गुणेऽपि सङ्ख्यायाः अविवक्षानिरूपणम्. विभक्त्यर्थसङ्ख्यायां विभक्त्यर्थ-कारकत्वान्वयोपपादनम्. १९५

३७४, ७५ विभक्तेः प्रातिपदिकाभिहितसत्वनिष्ठशक्तिसङ्ख्यासम्बन्धोपाधिवाचित्वम्. स्वरूपातिरिक्तशक्त्यभावशंका. १९६

३७६ शक्तेरावश्यकत्वाशंकानिरासपूर्वकं अतीन्द्रियायाश्शक्तेरनावश्यकत्व-चोद्यस्थिरीकरणम्. १९७

३७७ स्वरूपातिरिक्तशक्तिसद्भावनिरूपणम्. १९८

३७८, ७९ अपदार्थादिभेदेन वृत्त्यर्थत्रैविध्यम्. अन्तरातद्विभजनं सोदाहरणम्. १९९
३८० 'परार्थाभिधानं वृत्ति' रित्यस्यार्थविचारः. २००
३८१ उपसर्जनस्य प्रधानोपकारकत्वोपन्यासः. २०१
३८२ 'राजपुरुषे' त्यत्र वृत्तिप्रकारविवरणम्. २०२
३८३, ८४ समुदायस्यावयवात्मकत्वम्. सङ्ख्याभेदस्यावयवभेदनिबन्धनत्वम्. २०३
३८५ – ८७ अजहत्स्वार्थायां वृत्तौ भेदसंसर्गयोस्सामर्थ्याभावः. जात्याकृतिव्यक्तिभेदेन पदार्थत्रैविध्यम्. सोदाहरणं पुनस्तद्विभजनम्. २०४
३८८, ८९ जातेरेव शब्दार्थत्वमिति जैमिनिमतोपन्यासः. व्यक्त्याकृत्योः शब्दवाच्यत्वनिरासः. २०५
३९० – ९२ व्यक्तिशक्तिवादिनां व्याडीयानां मतानुवादः. व्यक्तिलक्षणानुपपत्त्युद्घाटनम्. जातिशक्तिवादे दोषोद्भावनम्. २०६
३९३ – ९५ जात्याकृत्योरशब्दार्थत्वेऽपि व्यक्त्युपलक्षकत्वम्. व्यक्तेरशाब्दत्वे सर्वार्थत्वापत्त्याक्षेपनिरासः. व्यक्तिवाचित्वोपसंहारः. २०७
३९६ सोपपत्तिकमाकृतिपदार्थतावादिविन्ध्यवासिमतग्रन्थीयाशयाविष्करणम्. २०८
३९७, ९८ अमूर्तानामपि गुणादीनां क्रियाङ्गत्वोक्तिः. शब्दानां जातिविशिष्टव्यक्तिवाचित्वोपपादनम्. २०९
३९९–४०२ शब्दव्यापारस्य केवलजातिमात्रबोधकत्वे संकोचकल्पनाप्रसङ्गनिरूपणम्. जातिविशिष्टव्यक्तिवाचित्वे अक्षपादसंमतिः. गोगोत्वशब्दयोस्सामान्यवाचित्वे तुल्यप्रतिपत्तिशंकापरिहारौ. जातिव्यक्त्योराकृतिव्यक्त्योः क्वचिदङ्गाङ्गिभावः. २१०
४०३ – ६ गुणवाचिनां शब्दानां गुण्याक्षेपकत्वम्. स्वरसतः पदप्रतीयमानार्थत्वं पदार्थत्वमिति निगमनम्. भावना विधि प्रतिभारूपेण वाक्यार्थत्रैविध्यम्. भावनायास्त्र्यंशत्वोपपादनम्. २११
४०७ – ११ भावनानिर्वचनम्. विधिस्वरूपनिरूपणम्. शब्दार्थभेदेन भावनाद्वैविध्यम्. शब्दभावनायास्त्र्यंशत्वप्रकारः. अर्थभावनाया द्व्यंशत्वम्. २१२
४१२ – १६ यथासम्भवं विधेः प्रवृत्तिः वृत्त्यन्तरबोधकत्वम्. धर्मस्य चोदनेन प्रमाणकत्वम्. विधेर्वाक्यार्थत्वनिगमनम्. प्रतिभाशब्दार्थनिर्वचनम्. व्यभिचारेण प्रतिभाज्ञानस्य वाक्यार्थत्वासम्भवाशंका. २१३
४१७ – २० उक्ताशंकापरिहारः. प्रतिभोत्पत्तिसाधनानि. क्रियावाक्यार्थनिरासपूर्वकं भावना विधि प्रतिभानामेव वाक्यार्थत्वसमर्थनम्. यजेतेत्यादौ भावनावगमप्रकारः. २१४

४२१ – २५ प्रत्ययस्य कर्तृसंख्याव्यतिरेकेण धात्वर्थातिरिक्तव्यापाराप्रत्यायकत्वम्. भावना याः प्रत्ययार्थत्वाभावेऽपि प्रकृत्यर्थत्वसम्भवोपपादनप्रकारः. क्रियायाः पदार्थत्वोपपत्तिः. पदार्थवाक्यार्थयोर्गुणप्रधानभावः. अधिकारिसमर्पकस्य स्वर्गकामपदस्य भावनापेक्षितकर्तृसमर्पकत्वनिरुक्तिः. २१५

४२६ – ३३ द्रव्यगुणसंस्कारेषु शेषत्वमिति बादरिमतोपपादनम्. ‘यजेत स्वर्गकामः’ इत्यत्राधिकारि कर्त्रैक्यानैक्यविचारः. जैमिनिमतानुरोधेन क्रियायाः वाक्यार्थनिरासपूर्वकं भावनावाक्यार्थस्थापनम्. जैमिनिमतानुरोधेन फलस्य पुरुषार्थत्वकथनम्. फलिपुरुषयोर्वाक्यार्थत्वानिरासः. आख्यातार्थस्यैव प्राधान्यम्. क्रियादीनां पदार्थरूपतानिर्वचनम्. सोदाहरणं शब्दगतवाचकत्वत्रैविध्यम्. २१६, १७

४३४ – ३६ सोदाहरणं प्रपञ्चनं त्रिधा विभक्तविशेषणत्वनिर्वचनम्. निर्विकल्पक-सविकल्पकवैलक्षण्यम्. शब्दशक्तिसामर्थ्याद्विचित्रार्थप्रतीत्युपपत्तिः. २१८

४३७ विशेषणस्योपाधिवशादन्यथार्थावभासकत्वम्. २१९

४३८ – ४२ अर्थस्यान्यथावभासः, अर्थोपाधिनिबन्धन इति पक्षान्तरोपन्यासः. अर्थतत्वस्य शब्दाध्यास विवर्त परिणामान्यतररूपता. अर्थस्य बुद्ध्यात्मकत्ववादि योगाचारमतोपन्यासः. विवर्तस्वरूपनिरूपणम्. शब्दस्यार्थविवर्तरूपतापक्षप्रतिक्षेपः. २२०

४४३ – ४५ विपरिणामस्वरूपं, सोदाहरणं तत्प्रपञ्चः. शब्दतात्पर्यस्यैव काव्येषु ध्वनित्वव्यपदेशः. काव्यवचनयोः ध्वनितात्पर्ययोश्च वैलक्षण्यम्. २२१

४४६, ४७ विभक्त्यर्थाद्युपवर्णननिगमनम्. पदपदार्थसम्बन्धवर्णनादिसप्तमप्रकाशसङ्ग्रहः. २२२

॥ इति षष्ठप्रकाशसूची ॥

सप्तमे केवलशब्दसम्बन्धशक्तिप्रकाशे विषयाः.

४४८ – ५१ अभिधादिभेदेन शब्दार्थयोर्द्वादशधा साहित्यम्. अभिधास्वरूपनिरूपणम्. मुख्यादिभेदेन शब्दगतास्तिस्रो वृत्तयः. तासां प्रत्येकं विभागः, तदुदाहरणानि च. २२३

४५२, ५३ आकृति गुण विषय तथाभूतार्थोदाहरणानि, तद्भावापत्तिस्वरूपम्, षोढा तद्विभागश्च. अध्यासपदार्थनिरुक्तिः, तदुदाहरणं च. २२४

४५४ सोदाहरणं कल्पना विवर्त विपरिणाम विपर्यय स्वरूपोत्कीर्तनम्. २२५

४५५, ५६ सोदाहरणं प्रवादस्वरूपोत्कीर्तनम्. गौणीद्वैविध्यम्, षोढा तदर्थविकल्पः, तदुदाहरणानि च. २२६

४५७, ५८ क्रिया जाति गुणस्वरूपनिमित्तानामुदाहरणानि. अन्योक्तावभेदविषयोदाहरणम्. २२७

४५९, ६० समासोक्त्यादावभेदविषयोदाहरणम्. मुख्यवद्गौणविशेषणस्यापि तद्विशेषणत्वसम्भवः. २२८

४६१, ६२ चेतनाचेतनप्रकृत्योः प्रभावनिमित्तकाविशेषणविपर्यासोदाहरणम्. गौण्यावृत्तेः धर्मनिमित्तादिना षट्प्रकारता. क्रमेण तदुदाहरणानि च. २२९

४६३ क्रिया स्वरूप जाति निमित्तक विशेषणविशेष्यभावोदाहरणानि. २३०

४६४, ६५ 'कुमुदानि निमीलन्ती' त्यादौ क्रियानिमित्तकत्वशङ्का, तत्परिहारश्च. भेदाभेदोपचाराभ्यां गौण्यागौणव्यवहितार्थता सोदाहृतिः. २३१

४६६, ६७ शब्दार्थयोरभेदेऽभेदव्यपदेशोपपादनम्. अभिन्नानामौपचारिकभेदोदाहरणम्. २३२

४६८ मुख्यवदुपचरितानामप्युपमानोपमेयभावसम्बन्धः. ,,

४६९ – ७२ केषुचिदुदाहरणेषु समासोक्त्यादिप्रतीतिसम्भवचोद्यं, तन्निरासश्च. लक्षणा लक्षितलक्षणा भेदेन लक्षणाद्वैविध्यम्. लक्षणायाः पुनरपि षोढा विभागः. सामीप्य साहचर्यलक्षणोदाहरणे. २३३

४७३ – ७५ सहचरित तादर्थ्य परिमाणलक्षणानामुदाहरणानि. लक्षितलक्षणाया अपि षोढा विभजनम्. रूढप्रतीकलक्षणयोस्स्वरूपोदाहरणे. २३४

४७६ विवक्षित विरुद्ध तदन्य प्रकीर्णलक्षणानां स्वरूपनिरूपणपूर्वकमुदाहरणानि. २३५

४७७ अन्याभिमतलक्षितलक्षणानिर्वचनं, सोदाहरणम्. २३६

४७८, ७९ उदाहरणान्तरेषु तद्विमर्शः. विवक्षास्वरूपम्. २३७, ८

४८०, ८१ अपौरुषेयादिना वाङ्मयत्रैविध्यं, सोदाहरणमान्तरालिको विभागश्च. अकारकेषु कारकविवक्षोदाहरणानि. २३८

४८२ – ९८ अक्रियायां क्रियाविवक्षा. क्रियायां क्रियान्तरविवक्षा. कारकेऽपि क्रियाविवक्षा. असम्बन्धे सम्बन्धविवक्षा. अचेतनेषु चैतन्यविवक्षा. प्रधाने गुणविवक्षा. गुणे प्रधानविवक्षा. अवयवे समुदायविवक्षा. अभेदे भेदविवक्षा. भेदेऽप्यभेदविवक्षा. असतो विवक्षा. सतोऽप्यविवक्षा. सदसतोर्विवक्षा. सदसतोरविवक्षा. स्तुत्या निन्दाविवक्षा. निन्दया स्तुतिविवक्षा. विधिना निषेधविवक्षा, एकैकं सोदाहृतिः. २३९

४९९–५०३ निषेधेन विधिविवक्षा, सोदाहृतिः. विवक्षाया लोककाव्यव्यवहारानु-

रोधेन त्रेधा प्रसिद्धिः. काकुत्रैविध्यं, सोदाहरणमान्तरविभागश्च.
प्रश्नगर्भा निर्देष्टुर्विधिरूपा काकुः. वितर्कगर्भोपदेष्टुरुत्तररूपा काकुः. २४०

५०४ – ८ उपदेष्टुर्निर्णयरूपा काकुः. अभ्युपगमानुनयकाकुः. अभ्यनुज्ञोपहासकाकुः.
आक्षेपकाकुः. अप्रतिबन्धात्रैविध्यम्. २४१

५०९ – १० त्रिगुणायाश्चतुर्गुणायाश्चोदाहरणम्. प्लुत उदात्त प्रगृह्यादिना त्रेधा
स्वरविभागः, सोदाहृतः. २४२

५११ – १६ अनुदात्तादिभिरर्थभेदप्रतीत्युदाहरणानि. विच्छेदत्रैविध्यम्. पदविच्छेद-
चातुर्विध्यम्. शृङ्खला भङ्ग परिवर्तक चूर्णकानामुदाहरणानि. वाक्य-
विच्छेदचातुर्विध्यम्. वाक्यसम्भेदोदाहरणम्. २४३

५१७, १८ वाक्यान्यथात्व वाक्यासमाप्ति वाक्यानुच्चारणानां उदाहरणानि.
शब्दार्थनिरूपणपूर्वकं यतेश्चातुर्विध्योक्तिः, सोदाहृतिः. २४४

५१९ प्रकरणादिभिरर्थप्रत्यायनम्. अभिनय अपदेश निर्देश-
संज्ञे ङ्गिताकारोदाहरणानि. २४५

५२० – २३ वाक्यादेव शब्दार्थव्युत्पादनम्. वाक्यप्रतिपाद्यस्य त्रिरूपता.
अभिधीयमान प्रतीयमान ध्वनीनां सोदाहरणं वैलक्षण्यनिरूपणम्.
विधि निषेध विधिनिषेधरूपाणामुदाहरणानि. २४६

५२४ – ३० विधौ निषेधस्य निषेधे विधेः विधौ विध्यन्तरस्य निषेधे निषेधान्तरस्य
विधिनिषेधे विधेः अविधिनिषेधे निषेधस्य क्वचिद्विधिनिषेधयोः
विध्यन्तरस्य च उदाहरणानि. २४७

५३१ – ३७ विधिनिषेधयोः निषेधान्तरस्य क्वचिद्विधावनुभयस्य क्वचिन्निषेधे
अनुभयस्य क्वचिद्विधिनिषेधयोरनुभयस्य अविधिनिषेधेऽनुभयस्य च
उदाहरणानि. अर्थशब्दभेदेन ध्वनिद्वैविध्यम्. अर्थध्वनेरनुनाद-
प्रतिशब्दध्वनिरूपतया द्वैविध्यम्. २४८

५३८ अनुनादध्वनेरुदाहरणान्तरेषूपपादनम्. २४९

५३९ – ४० प्रतिशब्दध्वनेरुदाहरणेषु योजना. अनुनादात्मकार्थध्वनेरुदाहरणम्. २५०

५४१, ४२ प्रतिशब्दात्मकार्थध्वनेरुदाहरणम्. काव्यवचसोर्ध्वनितात्पर्ययोर्विशेषः. २५१

५४३ – ४६ वचसि द्वेधा तात्पर्याविष्कारः. शास्त्रतात्पर्यस्य 'आत्मस्थित' मित्येत-
द्ग्रन्थादिमतृतीयपद्ये समन्वयप्रकारः. सङ्ग्रहेण साङ्ख्यमतोपन्यासः.
शृङ्गार तदाविर्भावकारण तत्कार्यादीनां 'सत्त्वात्मना' मित्यन्तरश्लोके निर्देशः. २५२

५४७ – ४९ 'अच्छिन्नमेखल' मिति मङ्गलपद्ये काव्यवचसोर्ध्वनितात्पर्ययोश्च क्वचित्संप्लव-
सम्भवोपपादनम्. 'यत्पादपङ्कजे' ति द्वैतीयीकश्लोकेऽप्येतदर्थाभिधान-

सङ्गतिः. आदिममङ्गलपद्यद्वयव्याख्यानम्. २५३

५५० – ५३ सम्भोगविप्रलम्भात्मना शृङ्गारद्वैविध्यम्. उभयोरपि प्रथमानुराग मान-
प्रवास करुणात्मना चातुर्विध्यम्. सत्ता जन्म अनुबन्ध प्रकर्षात्मकाश्चतस्रः
तदवस्थाः. उक्तेषु पद्येष्ववस्थाचतुष्टयसमन्वयः. २५४

५५४, ५५ अभिहितपद्यव्याख्यान्तरम्. पदानां संहत्यार्थाभिधायकत्वमित्यखण्ड-
वाक्यार्थवादिपक्षे व्याख्यायोजना. २५५

५५६ अशरीरिणो महेश्वरस्य वपुः पात्वित्यनुपपन्नमिति शङ्कायां आध्या-
त्मिकार्थवर्णनया समाध्यभिधानम्. २५६

५५७ अखण्डवाक्यार्थपक्षावलम्बेन द्वितीयपद्यार्थवर्णनम्. २५७, ८

५५८, ५९ 'इवेप्रतिकृता' वित्यत्रेवार्थविचारः. द्रव्यगुणयोः प्रकर्षाप्रकर्षविचारः. २५९, ६०

५६० – ६२ गुणानां द्विप्रकारता. सोदाहरणं तत्स्थानां विशेषणानां च गुणानां
अर्थवर्णनम्. गन्धादीनां द्रव्यवचनत्वेनैव षष्ठीसमासोपपत्तिः. २६१

५६३ 'द्विरदमदजलौघे' त्यत्र सप्तम्युपपत्त्युपपादनम्. २६२

५६४, ६५ प्रविभागशब्दार्थः. अन्वयव्यतिरेकमूलः सोदाहृतिः पदार्थविभागः,
वर्णानां शब्दातिरिक्तत्वशंका च. २६३

५६६, ६७ अर्थवत्तायाः प्रातिपदिकसंज्ञानिमित्तत्वम्. लौकिकीपारिभाषिकभेदेन
तद्वैविध्यम्. वृक्षादीनामर्थवत्त्वाभावे हेतुतयोपन्यस्तस्य
केवलेनावचनादित्यर्थोपन्यासः. २६४

५६८ कृत्तद्धितेति सूत्रे समासग्रहणस्य नियमार्थतया वर्णसमुदायस्य प्रातिपदिक-
संज्ञानिवारणात्तदन्तर्गतानां विभक्तीनां लोपासंभवशंका, तत्परिहारश्च. २६५

५६९ – ७१ अन्वयव्यतिरेकानवस्थानेन प्रकृतिप्रत्ययार्थवैलक्षण्यानवबोधशंका, तदुत्तरं च.
प्रकृतिप्रत्यययोस्सर्वाभिधायकत्वापत्तिशंका, तत्परिहारश्च.
प्रकृतिप्रत्यययोस्सहार्थाभिधायकत्वविचारः. २६६

५७२ – ७५ निर्वर्त्य अन्वाख्येय प्रतिपादकभेदेन शब्दत्रैविध्यम्. यथाक्रमं तन्निर्वचनम्.
सप्तमप्रकाशप्रतिपादितार्थनिगमनम्. वक्ष्यमाणाष्टमप्रकाशार्थसङ्ग्रहः. २६७

॥ इति सप्तमप्रकाशसूची ॥

अष्टमे सापेक्षशब्दशब्दशक्तिप्रकाशे विषयाः

५७६ – ७९ व्यपेक्षाशब्दार्थनिर्वचनम्. आभिधानिकी नैयायिकी नैषेधिकीभेदेन व्यपेक्षात्रैविध्यम्. यथोद्देशं तत्तत्स्वरूपनिरूपणम्. श्रुत्याभिधानिक्याः, पदेन समाख्याभिधानिक्याश्च उदाहरणे. २६८

५८० – ८५ वाक्याभिधानिक्याः, विकल्पाभिधानिक्याः, समुच्चयाभिधानिक्याः, सामान्यातिदेशाभिधानिक्याः, विशेषातिदेशाभिधानिक्याः, पदतः प्रसङ्गाभिधानिक्याः उदाहरणानि. २६९

५८६ – ९० वाक्यात्प्रसङ्गाभिधानिक्याः, ऊहनैयायिक्याः, विपर्ययनैयायिक्याः, विपरिणामनैयायिक्याः, वचन विभक्ति लिङ्गविपरिणामोदाहरणानि. २७०

५९१ – ९६ अध्याहारनैयायिक्याः, वाक्यशेषनैयायिक्याः, व्यवहितविकल्पनानैयायिक्याः, गुणकल्पनानैयायिक्याः, अपोद्धारनैयायिक्याः, वाक्यभेदनैयायिक्याश्च उदाहरणानि. २७१

५९७, ९८ वचननैषेधिकीद्वयस्य, अप्रस्तावनिमित्तासम्भवनैषेधिक्या उदाहरणे. २७२

५९९–६०१ अनुत्पादनिमित्तासम्भवनैषेधिक्याः, विरोधनैषेधिक्याश्चोदाहरणे. २७३

अत्र विचारः. ,,

६०२ – ४ गुणस्यापि साक्षात्क्रियोपयोगिताचोद्यपरिहारौ. अन्वयशब्दार्थः. शाक्त वैभक्त शक्तिविभक्तिमयभेदेनान्वयत्रैविध्यम्. २७४

६०५ – ७ विषयभेदेन शाक्तोदाहरणानि. सम्बन्ध शेषोपपद संबोधनविभक्तिभिः वैभक्तोदाहरणानि. सम्बन्धादिभिः शक्तिविभक्तिमयोदाहरणानि. २७५

६०८, ९ अभिहितान्वयान्विताभिधानयोरन्यतराङ्गीकारः. अन्विताभिधानवादिमतोपन्यासः. २७६

६१०, ११ पदसमूहात्मकस्य वाक्यस्यैकार्थाभिधायकत्वम्. अन्विताभिधानाभिहितान्वयपक्षयोस्स्वरूपनिरूपणेनौचित्यानौचित्यविचारचर्चा. २७७

६१२, १३ अभिहितान्वयवादे दोषोद्भावनम्. अन्विताभिधानवादिसिद्धान्तः. २७८

६१४ – १८ पदैः कदम्बकरूपार्थाप्रतिपत्तिः. अन्विताभिधाने शक्तिद्वयकल्पनागौरवासम्भवनिरूपणम्. प्रधानद्वयशङ्कयाऽऽपादितवाक्यभेदपरिहारः. प्रकृतिप्रत्यययोः पदस्य चाभिधाने द्विरभिधानदूषणस्याभिहितान्वयवादेऽपि तौल्यम्. अभिधानानभिधानपक्षयोः प्रसक्तदोषपरिहारः. २७९

६१९ – २३ कृतार्थत्वनैषेधिक्याः, परिसंख्यानैषेधिक्याः, नियमनैषेधिक्याः, असंभवनियमस्य, विशेषप्रत्यक्षश्रुतेश्च उदाहरणानि. १८०

§२४ – २९ आकांक्षायाः प्रतिपत्त्यजिज्ञासारूपता. अभिधानाभिधेयपर्यवसानयोः जिज्ञासोत्पत्तिसाधनत्वोपपादनम्. अन्विताभिधानपक्षवदभिहितान्वयवादेऽपि योग्याध्याहाराङ्गीकरणम्. गामानयेत्यादावाकांक्षाङ्गीकारे भाष्यकारसम्मतिः. निराकांक्षस्थले अन्विताभिधानानुपपत्तिः. युगपत्प्रतियोगिनामाकांक्षानुदयः. २८१

§३० – ३२ सन्निधिशब्दार्थः. अभिधानाभिधेयविषयभेदेन सन्निधिद्वैविध्यं, सोदाहरणम्. आकांक्षाया अपि सन्निधिवदविनाभावनिमित्तकत्वसम्भवाशंका, समाधी. २८२

§३३ – ३८ आकांक्षायामविनाभावस्य निमित्तत्वानाश्रयणोपसंहारः. अन्विताभिधाने क्रमोपयोगः. योग्यताशब्दार्थविवरणम्. मुख्यजघन्यार्थद्वारकतया योग्यताद्वैविध्यम्. जात्याकृतिभ्रान्तिमुख्यभेदेन सोदाहरणं मुख्यार्थत्रैविध्यम्. गौण उपचरित लाक्षणिकभेदेन जघन्यार्थत्रैविध्यं सोदाहरणम्. २८३

§३९ – ४३ गुणक्रिययोः द्रव्यव्यवधानेन क्रियासमन्वये द्रव्याणामलाक्षणिकत्वस्थितिः. 'यजेत स्वर्गकाम' इत्यादौ योग्यतानवधारणादन्विताभिधानानुपपत्तिशंका. तत्परिहारश्च. सामर्थ्यनिर्वचनम्. सोदाहरणं भेद संसर्ग उभयरूपेण सामर्थ्यत्रैविध्यम्. अङ्गाङ्गि व्यपेक्षा व्यतिषङ्गात्मना सम्बन्धत्रैविध्यम्. २८४

§४४ – ४६ यथाक्रमं तेषामुदाहरणानि. सम्बन्धपदस्य विकल्पेन सोदाहरणं नानार्थत्वोपवर्णनम्. प्रधानोपसर्जनभावस्य यथासन्दर्भं शब्दनिबन्धनत्वं, अशब्दोपादानत्वं च. २८५

§४७, ४८ अन्विताभिधानवादे स्वरूपमात्रस्मारकत्वोपपत्तिविचारः. अन्विताभिधानवाद एव प्रतिनियतार्थान्वयित्वोपपादनम्. २८६

§४९ – ५१ पदानामनन्वितार्थवाचकत्वाभावोपपादनम्. अन्विताभिधानाभिहितान्वयवादपक्षयोश्शक्तिकल्पने लाघवगौरवविचारचर्चानिरूपणम्. पदानां संहत्यार्थाभिधायकत्वचर्चा. २८७

§५२ – ५४ अन्विताभिधानवादे आकांक्षादीनामनुपयुक्तत्वाक्षेपसमाधी. अन्विताभिधानस्यैव न्याय्यत्वसमर्थनम्. अभिहितान्वयवादिमतोपन्यासः. २८८

§५५ शब्दस्यापि पदार्थगतशक्त्याधानशक्त्यनुमापकत्वम्. २८९

§५६ – ५८ पदार्थावगतिमात्रेणान्वयावगमे प्रमाणानन्तर्भावशंका, तत्समाधानं च. आकांक्षादिमतां पदार्थानामेव वाक्यार्थरूपतोक्तिः, तन्निरासश्च. आक्षेप समाधानपूर्वकं मतान्तरोपन्यासः. २९०

६५९, ६० पदेष्वेव शक्तिकल्पनौचित्यकथनम्. पदगतयोस्स्मारकत्वाभिधायकत्वयोरैक्यवादः. २९१

६६१ – ६४ पदानामभिधायकत्वपक्षे शक्तित्रयकल्पनाप्रसङ्गः. अन्विताभिधानवादे शक्त्यैक्यपरिकल्पनम्. शक्तिद्वयकल्पनादोषनिरासः. पदार्थानां वाक्यार्थरूपताप्रत्याख्यानम्. २९२

६६५ – ६७ वाक्यार्थे तात्पर्यशक्तेरेवोपयोगिताभिधानम्. अभिहितान्वयवादोपरि उद्घाटितदोषप्रत्याख्यानेन तस्यैव न्याय्यत्वसमर्थनम्. सामान्यतः अन्विताभिधानं विशेषतोऽभिहितान्वयं च वदतामाशयाविष्करणम्. २९३

६६८ उभयवादिमते विशेषेणाभिहितान्वया, अन्विताभिधानासङ्गतिनिरूपणं, तद्व्युदासश्च. २९४

६६९ – ७० पचतीत्यादौ प्रकृतिप्रत्ययार्थयोजनयोभयवादिमतसमर्थनप्रकारः. पदानां संहत्यकारितया संसर्गावगमरीतिः. २९५

६७१ – ७३ पदानां संहत्यकारितापक्षस्यैव श्रेयस्त्वोपपादनम्. अयोग्यत्वेऽपि 'भवति पश्य मृगो धावती' त्यत्रान्वयावगतिशङ्का, तद्व्युदासश्च. एतस्याप्यर्थस्य विषयभेदेन द्विधर्मत्वोपपत्तिः. २९६

६७४, ७५ एकार्थीभावस्वरूपनिरूपणम्. एकार्थीभावस्य सोदाहरणं व्यपेक्षावैलक्षण्योपपादनम्. २९७

६७६, ७७ वाक्यतुल्य वाक्याधिक वाक्यान्यार्थभेदेनैकार्थीभावस्य त्रिप्रकारता. सोदाहरणं नित्यसमासादिना पुनरप्यनेकधा तद्भेदनिरूपणम्.

६७८, ७९ सदृष्टान्तमेकदेशिसमासादिनिरूपणम्. पुरुषव्याघ्र इत्यादावुपमेयसमासविचारः. २९९

६८० शस्त्रीश्यामेत्यत्र समासे पक्षत्रयोपन्यासः. ३००

६८१ – ८३ 'सामान्यवचनै' रिति सौत्रपदार्थोपपत्तिकल्पनम्. 'उपमित' मिति सामान्यप्रयोगग्रहणपूर्वपक्षसिद्धान्तवर्णनम्. एकार्थीभावस्य तद्धिताख्यातयोः सोदाहरणमनन्तप्रकारत्वनिर्वचनम्. ३०१

६८४ – ८९ प्रादीनां वाचकत्वादिना षोढा विभजनम्. उदाहरणेषु तत्तदर्थसमन्वयः. द्योतकत्वनिर्वचनम्. प्रादीनां द्योतकत्वपक्षे तदन्यादिषडर्थकत्वसंपत्तिः. उदाहरणेषु तत्तदर्थसमन्वयः. विशेषकस्य षोढा विभागः. ३०२

६९० – ९७ प्रकृत्यर्थविशेषकादीनामुदाहरणानि. प्रादीनां कार्यार्थत्वनिरर्थकत्वयोः उदाहरणानि. पदैकार्थीभावनिगमनम्. वाक्यार्थीभावस्यापि

अनेकरूपतोपपादनम्. वाक्यार्थस्य भावना विधि प्रतिभारूपत्वम्.
युगलक सन्दानितकादीनां स्वरूपाणि. साङ्ग सन्धि वृत्त्युपकृतमहा-
वाक्यार्थस्य [illegible]भावरूपत्वम्. ३०३
६९८-७०० (महावाक्यार्थस्य) अखण्डवाक्यार्थस्य शब्दब्रह्मरूपतासम्पत्तिः.
अष्टमप्रकाशप्रतिपादितप्रधानार्थसङ्ग्रहः. वक्ष्यमाणनवमाध्यायार्थसंसूचनम्. ३०४

॥ इति अष्टमप्रकाशसूची ॥

॥ विषयसूची समाप्ता ॥

॥ श्रीः ॥

॥ शृङ्गारप्रकाशः ॥

महाराजाधिराज श्रीभोजदेवविरचितः

प्रथमः प्रकाशः

अच्छिन्नमेखलमलब्धदृढोपगूढ मप्राप्तचुम्बनमवीक्षितवक्त्रकान्ति ।
कान्ताविमिश्रवपुषः कृतविप्रलम्भसंभोगसख्यमिव पातु वपुः पुरारेः ॥ १ ॥

यत्पादपङ्कजरजःपरिमार्जितेषु चेतस्सु दर्पणतलामलतां गतेषु ।
शब्दार्थसंपद उदारतराः स्फुरन्ति विघ्नच्छिदेऽस्तु भगवान्स गणाधिनाथः ॥ २ ॥

आत्मस्थितं गुणविशेषमहंकृतस्य शृङ्गारमाहुरिह जीवितमात्मयोनेः ।
तस्यात्मशक्तिरसनीयतया रसत्वं युक्तस्य येन रसिकोऽयमिति प्रवादः ॥ ३ ॥

सत्त्वात्मनाममलधर्मविशेषजन्मा जन्मान्तरानुभवनिर्मितवासनोत्थः ।
सर्वात्मसंपदुदयातिशयैकहेतु र्जागर्ति कोऽपि हृदि मानमयो विकारः ॥ ४ ॥

तात्पर्यमेव वचसि ध्वनिरेव काव्ये सौभाग्यमेव गुणसंपदि वल्लभस्य ।
लावण्यमेव वपुषि स्वदतेऽङ्गनायाः शृङ्गार एव हृदि मानवतो जनस्य ॥ ५ ॥

शृङ्गारवीरकरुणाद्भुतरौद्रहास्य बीभत्सवत्सलभयानकशान्तनाम्नः ।
आम्नासिषुर्दश रसान्सुधियो वयं तु शृङ्गारमेव रसनाद्रसमामनामः ॥ ६ ॥

वीराद्भुतादिषु च येह रसप्रसिद्धिः सिद्धा कुतोऽपि वटयक्षवदाविभाति ।
लोके गतानुगतिकत्ववशादुपेतामेतां निवर्तयितुमेष परिश्रमो नः ॥ ७ ॥

अप्रातिकूल्यिकतया मनसो मुदादेर्यः संविदोऽनुभवहेतुरिहाभिमानः ।
ज्ञेयो रसः स रसनीयतयाऽऽत्मशक्तेः रत्यादिभूमनि पुनर्वितथा रसोक्तिः ॥ ८ ॥

रत्यादयोऽर्धशतमेकविवर्जितानि भावाः पृथग्विविधभावभुवो भवन्ति ।
शृङ्गारतत्त्वमभितः परिवारयन्तः सप्तार्चिषं द्युतिचया इव वर्धयन्ति ॥ ९ ॥

आभावनोदयमनन्यधिया जनेन यो भाव्यते मनसि भावनया स भावः ।
यो भावनापथमतीत्य विवर्तमानः साहंकृतौ हृदि परं स्वदते रसोऽसौ ॥ १० ॥

रत्यादयो यदि रसाः स्युरतिप्रकर्षे हर्षादिभिः किमपराद्धमतद्भिभिन्नैः ।
अस्थायिनस्त इति चेद्भयहासशोकक्रोधादयो वद कियच्चिरमुल्लसन्ति ॥ ११ ॥

स्थायित्वमत्र विषयातिशयान्मतं चेच्चिन्तादयः कुत उत प्रकृतेर्वशेन ।
तुल्यैव साऽऽत्मनि भवेदथ वासनायाः संदीपनात्तदुभयत्र समानमेव ॥ १२ ॥

अतः सिद्धमेतत्—रत्यादयः शृङ्गारप्रभवा एव एकोनपञ्चाशद्भावाः ; वीरादयो मिथ्यारसप्रवादाः ; शृङ्गार एवैकश्चतुर्वर्गैककारणं रस इति । स चानुभवैकगम्यत्वादसर्वविषयत्वाच्च दुरवसेयः, सम्यगभिनयेषु वा विदग्धशैलूषैः प्रदर्श्यमानः सामाजिकैरवधार्यते, प्रबन्धेषु वा महाकविभिर्यथावदाख्यायमानो विदुषां मनीषाविषयमवतरति । तत्र न तथा पदार्थाः प्रत्यक्षेण प्रतीयमानाः स्वदन्ते, यथा वाग्मिनां वचोभिरावेद्यमानाः । तदाह—

'अत्थविसेसा ण हि तह चित्तविआसं कुणन्ति सच्चविआ ।
जह उण ते उम्मिळन्ति सुकइवआहिं सुसासन्ता ॥'

अतोऽभिनेतृभ्यः कवीनेव बहुमन्यामहे, अभिनयेभ्यश्च काव्यमेवेति । तत्पुनः शब्दार्थयोः साहित्यमामनन्ति ; तद्यथा 'शब्दार्थौ सहितौ काव्यम्' इति । कः पुनः शब्दः ? येनोच्चारितेनार्थः प्रतीयते । स च द्वादशधा—प्रकृतिः, प्रत्ययः, उपस्कारः, उपपदम्, प्रातिपदिकम्, विभक्तिः, उपसर्जनम्, समासः, पदम्, वाक्यम्, प्रकरणम्, प्रबन्धः, इति । कोऽर्थः ? यः शब्देन प्रत्याय्यते । स च द्वादशधा—क्रिया, कालः, कारकम्, पुरुषः, उपाधिः, प्रधानम्, उपस्कारार्थः, प्रातिपदिकार्थः, विभक्त्यर्थः, वृत्त्यर्थः, पदार्थः, वाक्यार्थः, इति । किं साहित्यम् ? यः शब्दार्थयोः संबन्धः । स च

द्वादशधा—अभिधा, विवक्षा, तात्पर्यम्, प्रविभागः, व्यपेक्षा, सामर्थ्यम्, अन्वयः, एकार्थीभावः, दोषहानम्, गुणोपादानम्, अलङ्कारयोगः, रसावियोगः, इति ।

तत्र यद्यपि 'न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्ययः' इति प्रयोगनियमः, तथाऽपि धर्मनियमाय शास्त्रप्रक्रियाव्यवहारे प्रकृतिप्रत्ययविभागकल्पनया शब्दार्थभावनायां प्रत्ययात्प्रथममुपादान-कारणमिव योपादीयते तां प्रकृतिरिति व्यपदिशन्ति । सा त्रिधा—धातुरूपा, प्रत्ययरूपा, प्रातिपदिक-रूपा च । तत्र धातवः षोढा—परिपठिताः, अपरिपठिताः, परिपठितापरिपठिताः, प्रत्ययधातवः, नामधातवः, प्रत्ययनामधातवश्चेति । तेषु परिपठिता भूवादयः; यथा—

भूयात्तेषां कुले जन्म जायन्तां तेषु सम्पदः ।
येषां स्वमिति मन्वानाः स्वीकुर्वन्ति स्वमर्थिनः ॥

कविः सृजति काव्यानि हृद्यादधति सज्जनाः ।
सूते मुक्ताः पयोराशिर्विहन्ति तरुणीस्तनाः ॥

न रुणत्सीन्द्रियग्रामं न शृणोषि गुरोर्वचः ।
नोपार्जयसि मित्राणि कथं गृह्णास्यरिश्रियः ॥

अपरिपठिता आन्दोलयत्यादयः; यथा—

नीपानान्दोलयन्नेव प्रेङ्खोलयति मे मनः ।
पवनो वीजयन्नाशा मानाशामुच्चुलुम्पति ॥

तडित्खचयतीवाशा नसन्ते शर्म बर्हिणः ।
पान्थस्त्रीश्वासवेधौष्ण्यं विधमन्त्यब्दवायवः ॥

मिलन्त्याशासु जीमूता विक्लबन्ते दिवि ग्रहाः ।
तापं क्षपयति प्रावृट् क्षीयन्ते कामिविग्रहाः ॥

ये सूत्रेष्वेव पठ्यन्ते न भूवादिषु ते परिपठितापरिपठिताः स्कु इत्यादयः; यथा—

अनुस्कुनुहि मा मन्तून् वसन्तो मानघस्मरः ।
दूति द्रुतमृतीयस्व जिजावयिषति स्मरः ॥

मुसलक्षेपहुंकारस्तोभैः कलमखण्डिनि ।
कुचविष्कम्भमुत्तम्भन्निष्टम्नातीव ते स्मरः ॥

पतयालूनि चेष्टासु मनांसि गृहयालवः ।
यूनामेकेन रूपेण योषितो दाह्यसातयः ॥

सनाद्यन्ताः प्रत्ययधातवः ; यथा—

मीमांससे न शास्त्राणि कृतार्थयसि नार्थिनः ।
गोपायसि न संत्रस्तान् किमुद्धतमटाट्यसे ॥

सूर्यीयति सुधारश्मिं नरकीयति नन्दने ।
कामं कामयमाना त्वां सा जीवन्ती मृतायते ॥

कपोलौ लोहितायेते बाष्पायेते विलोचने ।
प्रियप्रणामकाम्यन्ती कृशाङ्गि कलहायसे ॥

कण्ड्वादयो नामधातवः ; यथा—

कण्डूयति न यो मर्म नर्मणा यो हृणीयते ।
उरुष्यति रुषं यः स राजा राज्यं भिषज्यति ॥

वल्गूयति न योऽसाधुमसूयति न साधवे ।
मन्तूयति न मान्याय महत्सु स महीयते ॥

कमिषुध्यन्तु यज्वानः कं मगध्यन्तु मागधाः ।
कमर्थिनः कुषुभ्यन्तु रामेऽरण्यं भुरण्यति ॥

कथं पुनः कण्ड्वादिर्नामधातुश्च भवति—

‘धातुप्रकरणाद्धातुः कस्य चासञ्जनादपि ।
आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः ॥’

येभ्यः परिपठितधातुभ्यो नामत्वसिद्धये नामभ्यो वा धातुत्वसिद्धये क्विवादिप्रत्यया लुप्यन्ते, ते प्रत्ययेन नामानि च धातवश्चेति प्रत्ययनामधातवः--होडगल्भक्लीबप्रभृतयः ; यथा--

गिरो गीर्भिश्च वाग्माशीः श्रियः प्रतिभुवौ भ्रुवौ ।
शत्रुशोर्मित्रपूर्वाहुर्युधि ते बन्धना सजूः ॥

होडसे नाभिजातेषु क्लीबसे नाभिमानिषु ।
विदग्धसि न मुग्धेषु नाप्रगल्भेषु गल्भसे ॥

सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः ।
यामिनयन्ति दिनान्यपि सुखदुःखवशीकृते मनसि ॥

एवं कंसवधमाचष्टे कंसं घातयति, आरात्रि विवासमाचष्टे रात्रिं विवासयति, पुष्यचन्द्रयोगं जानाति पुष्येण चन्द्रं योजयति, उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमं प्राप्नोति माहिष्मत्यां सूर्यमुद्गमयतीति । अत्र 'आख्यानात्कृतस्तदाचष्टे' इति णिच्, 'कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्' 'आङ्लोपश्च कालात्यन्तसंयोगे मर्यादायाम्' 'नक्षत्रयोगे ज्ञि' 'चित्रीकरणे प्रापि' इति स्मर्यते ॥

प्रकृतिः षट्प्रकारैषा धातुरूपा निरूपिता ।
अथ प्रत्ययरूपाऽपि षट्प्रकारैव कथ्यते ॥

प्रत्यया हि सुप्तिङ्कृत्तद्धितधातुप्रत्ययस्त्रीप्रत्ययभेदात् षट्प्रकाराः ; तदन्ता प्रकृतिरपि प्रत्ययरूपा षट्प्रकारैव भवति । सा सुप्प्रत्ययान्ता यथा—अहंयुः, शुभंयुः, सायन्तनम्, चिरन्तनम्, त्वयका, मयका, आमुष्यायणः, अप्सव्यः, प्राह्णेतराम्, प्रगेतराम्, पूर्वाह्णेतनम्, समांसमीना, इति । तिङ्प्रत्ययान्ता यथा—पचतितराम्, गच्छतितमाम्, स्पृशतिरूपम्, जल्पतिकल्पम्, जिघ्रतिदेश्यम्, पश्यतिदेशीयम्, आस्तिकः, नास्तिकः, पचतकि, भिन्धकि, पचतभृज्जता, खादतमोदता, इति । कृत्प्रत्ययान्ता यथा—कृत्रिमम्, भृत्रिमम्, सेकिमम्, साङ्कूटिनम्, सांराविणम्, व्यावक्रोशी, व्यावहासी, श्येनंपाता, तैलंपाता, जित्वरी, आढ्यंकरणी, इति । तद्धितप्रत्ययान्ता यथा—गार्ग्यायणः, दाक्षायणः, वार्ष्यायणिकः, वार्ष्यायणीयः, फाण्टाहृतः, फाण्टाहृतायनिः, आभिजित्यः, कौञ्जायन्यः, कुतस्त्यः, तत्रत्यः, पचतितराम्, पचतितमाम्, इति । धातुसंज्ञाप्रत्ययान्ता यथा—चिकीर्षा, कण्डूया, पुत्रीया, कारणा, मिश्रणा, मृगया, अटाट्या, सासहिः, यायावरः, यायजूकः, चिकीर्षुः, चङ्क्रमणः, इति । स्त्रीप्रत्ययान्ता यथा—गाङ्गेयः, सौदामेयः, कारीषगन्धेयः, द्रौपदेयः, गौरेयः, शार्ङ्गरवेयः, काद्रवेयः,

कामण्डलेयः, यौवतेयः, सौरभेयः, बहुस्त्रीकः, सुवधूकः, इति । अथ कथं यौवतेयः इति प्रत्ययप्रकृतावुदाहृतम्? यावता 'यूनस्तिः' (पा. ४. १. ७७.) इत्येतस्य तद्धितसंज्ञया प्रातिपदिकत्वमेव । सत्यमेतत्; किं तु स्त्रीसामान्यपर्यायो युवतिशब्दः प्रकृत्यन्तरमस्ति; यथाऽऽह— 'धर्मार्थाङ्गविद्याकालाननुपरोधयन् कामसूत्रं तदङ्गविद्याश्च पुरुषोऽधीयीत, प्राग्यौवनाद्युवतिः' (कामसू. ३.) इति । तस्य, 'यूनस्तिः' इत्येतस्यैव वा 'एरक्तिनः' इति विभाषितङीषो ढगुत्पत्तिः; यथा आदितेयः, सौरभेयः, इति; अथ काद्रवेयः, कामण्डलेयः, इति कथम्? ङ्यापोरप्रातिपदिकत्वेऽपि हि 'ङ्याप्प्रातिपदिकात्' (पा. ४. १. १.) इति विशेषविधानात्, 'यूनस्तिः' इत्येतस्य तु तद्धितत्वात् अस्तु सुबुत्पत्तिः; ऊङस्तु प्रत्ययत्वेन सा न सिध्यति; समर्थाच्च तद्धितेन भवितव्यम् । अन्तवद्भावाद्भविष्यति; तथा हि— ब्रह्मबन्धूरित्यादौ 'अकः सवर्णे दीर्घः' (पा. ६. १. १०१.) इति द्वयोरेकत्वं भवति । यद्येवं 'स्त्रीभ्यो ढक्' (पा. ४. १. १२०.) इति ढक् न सिध्यति, सोऽप्यादिवद्भावाद्भविष्यति । 'साऽस्य देवता' (पा. ४. २. २४.) इति ज्ञापकादूङुत्पत्तेः प्रागेव वा सुबुत्पत्तिः इति ॥

उक्ता षोढैवमेषाऽपि प्रकृतिः प्रत्ययात्मिका ।
अथातः प्रातिपदिकरूपा षोढैव कथ्यते ॥

॥ प्रातिपदिकप्रकृतिः ॥

तत्र नामाव्ययानुकरणकृत्तद्धितसमासाः प्रातिपदिकानि; यदाह—'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (पा. १. २. ४५.) 'कृत्तद्धितसमासाश्च' (पा. १. २. ४६.) 'निपातस्य चानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या' (म. भा. वा. १. २. ४५.) इति; तत्रार्थवद्ग्रहणेन नामाव्ययानुकरणानि गृह्यन्ते, कृत्तद्धितसमासास्तु कण्ठोक्त्या इति । नन्वेतेऽप्यर्थवन्त एव । सत्यमेतत्; किं तु कृतस्तद्धिताश्च प्रत्ययाः; तेषामप्रत्ययग्रहणात्प्रातिपदिकत्वं न प्राप्नोतीति कृत्तद्धितग्रहणेन तदुपसंगृह्णाति । समासग्रहणेन त्वर्थवत्समुदायस्य समासस्यैव प्रातिपदिकसंज्ञेति ज्ञापयन् तथाविधस्य वाक्यस्यैतां निवर्तयति ॥

तत्रानपेक्षितशब्दव्युत्पत्तीनि सत्त्वभूतार्थाभिधायीनि च नामानि । तानि द्विधा—आविष्टलिङ्गानि, अनाविष्टलिङ्गानि चेति । तेषु जातिद्रव्यपरिमाणाभिधायीन्याविष्टलिङ्गानि । तत्र जातिर्द्विधा—आकृतिव्यङ्ग्या, उपदेशव्यङ्ग्या च; तयोराद्या यथा—गौः, मृगः, पक्षी, सर्पः, सिंहः, वृक्षः, कुमारी, कुण्डम्, स्त्री, पुमान्, नपुंसकम्, इति । द्वितीया यथा—ब्राह्मणः, गार्ग्यः, कठः, क्षत्रियः, वैश्यः, शूद्रः, मूर्धाभिषिक्तः, अम्बष्ठः, पारशवः, सूतः, वैदेहकः, चण्डालः, इति । द्रव्यं द्विधा—सापेक्षम्, अनपेक्षं च; तयोराद्यं यथा—गुरुः, पिता, पुत्रः, भ्राता, जामाता,

मित्रम्, माता, स्वसा, दुहिता, याता, ननान्दा, भार्या, इति । द्वितीयं यथा—चैत्रः, मैत्रः, इन्द्रः, उपेन्द्रः, चन्द्रः, सूर्यः, कालः, आकाशः, प्राची, प्रतीची, शची, लक्ष्मीः, इति । परिमाणं द्विधा—नियतम्, अनियतं च; तयोराद्यं यथा—द्रोणः, खारी, पलम्, भारः, क्रोशः, योजनम्, निवर्तनम्, नल्वः, पणः, पुराणः, गणः, अक्षौहिणी, इति । द्वितीयं यथा—संघः, पूगः, सार्थः, समाजः, वर्गः, श्रेणिः, कुटुम्बम्, परिषत्, पङ्क्तिः, यूथम्, वनम्, सेना, इति । गुणसंख्यावचनसर्वनामान्यनाविष्टलिङ्गानि; तेषु गुणो द्विधा—अनुरञ्जकः, अननुरञ्जकश्च । तत्रानुरञ्जकयोगात्तदनुरक्तानि यथा—श्वेतः, स्वादुः, शीघ्रः, मन्दः, दीर्घः, ह्रस्वः, ऋजुः, वक्रः, मृदुः, कठिनः, युवा, वृद्धः, इति । अननुरञ्जकयोगात्तद्विपरीतानि यथा—दक्षः, जिह्मः, जडः, प्राज्ञः, खलः, साधुः, स्निग्धः, क्रूरः, शूरः, भीरुः, लघुः, गुरुः, इति । संख्या द्विधा—लिङ्गवती, अलिङ्गा चेति; तयोराद्या यथा—एकः, एका, एकम्; द्वौ, द्वे, द्वे; उभौ, उभे, उभे; त्रयः, तिस्रः, त्रीणि; चत्वारः; चतस्रः, चत्वारि, इति । द्वितीया यथा—पञ्च प्रातिपदिकार्थाः, पञ्च वृत्तयः, पञ्च पदजातानि, षड्विषयाः, षड्बुद्धयः, षडिन्द्रियाणि, अष्टौ वसवः, अष्टौ मूर्तयः, अष्टौ वर्णस्थानानि, दश दिशः, षोडश पदार्थाः, अष्टादश पुराणानि, इति । सर्वनामानि द्विधा—सर्वादीनि असर्वादीनि च; तेषु आद्यानि यथा—सर्वः, विश्वः, अन्यः, इतरः, कतमः, यः, सः, एषः, अयम्, त्वम्, अहम्, इति । द्वितीयानि यथा—प्रथमः, चरमः, अल्पः, कतिपयः, पूर्वः, परः, अपरः, दक्षिणः, उत्तरः, स्वः, अन्तरः, सकलः, कृत्स्नः इति ॥

प्रायेणालिङ्गसंख्याशक्तीन्यव्ययानि । तानि षोढा—अव्ययनिपातगत्युपसर्गकर्मप्रवचनीयविभक्तिप्रतिरूपभेदात् । तेषु प्रायेण शक्तिसंख्यायोगात्स्वरादीन्यव्ययानि; यदाह—

'सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥' (गोपथब्रा. १. १. २६. a.) इति ।

तानि द्विधा—सत्त्वगन्धीनि असत्त्वगन्धीनि चेति । तेषु सत्त्वगन्धीनि षोढा—द्रव्यरूपाणि, गुणरूपाणि, क्रियारूपाणि, जातिरूपाणि, संज्ञारूपाणि, संबन्धिरूपाणि चेति । असत्त्वगन्धीन्यपि षोढैव—क्रियापेक्षीणि, क्रियाद्रव्यापेक्षीणि, क्रियाविशेषणानि, क्रियाद्रव्यविशेषणानि, क्रियाविष्टरूपाणि, क्रियाद्रव्याविष्टरूपाणि चेति । तत्र सत्त्वगन्धिभेदेषु द्रव्यरूपाणि यथा—स्वः, दिवः, भुवः, विहायसा, रोदसी, आपः, भूः, ऋचः, शम्, महः, तपः, हाहा, हूहू इति; गुणरूपाणि यथा—शश्वत्, आवत्, नृवत्, कृपत्, कुवत्, साभि, साचि, द्राक्, स्राक्, ज्योक्, मनाक्, ईषत् इति; क्रियारूपाणि यथा—नमः, स्वस्ति, स्वाहा, स्वधा, वषट्, वौषट्, श्रौषट्, हन्त, अच्छ, वर्व, वर्वे, भाव इति; जातिरूपाणि यथा—कम्, शम्, योः, मयः, सायम्, प्रातः, अस्तम्, नक्तम्, दिवा, दोषा, ह्यः, श्वः, इति; संज्ञारूपाणि यथा—क्विप्, सः, ओम्, स्वाहा, ह्रां, ह्रीं, क्लीं, ब्रूं, दिङ्,

हेड्, ऋड्, जुड्, डुड्, इति; संबन्धिरूपाणि यथा—अन्तः, अन्तरा, ऊर्ध्वम्, बहिः, पारे, मध्ये, समया, निकषा, आरात्, विष्वक्, पुरः, पश्चात्, इति। असत्त्वगन्धिभेदेषु क्रियापेक्षीणि यथा—द्वन्द्वम्, यथायथम्, मिथः, अन्योऽन्यम्, परस्परम्, इतरेतराम्, परोपराम्, उत्तराधरम्, अधरोत्तरम्, इति; क्रियाद्रव्यापेक्षीणि यथा—साकम्, सार्धम्, सह, समम्, अमा, विना, ऋते, पृथक्, नाना, इति; क्रियाविशेषणानि यथा—अभीक्ष्णम्, मुहुः, पुनः, भूयः, युगपत्, अजस्रम्, अनिशम्, शनैः, उपांशु, मङ्क्षु, झटिति, प्रायः, इति; क्रियाद्रव्यविशेषणानि यथा—अलम्, बलवत्, सुष्ठु, मृषा, वृथा, मिथ्या, मुधा, अद्धा, ऋधक्, उच्चैः, नीचैः, इति; क्रियाविग्रहरूपाणि यथा—शश्वत्, सपदि, संप्रति, पुरा, असंप्रति, सना, सांप्रतम्, जातु, बाढम्, फाण्टम्, स्वयम्, कामम्, इति; क्रियाद्रव्याविग्रहरूपाणि यथा—आविः, प्रादुः, तिरः, साक्षात्, अलम्, प्राध्वम्, सत्, असत्, धिक्, हिरुक्, तूष्णीम्, जोषम्, इति॥

जात्यादिप्रवृत्तिनिमित्तानुपग्राहित्वेनासत्त्वभूतार्थाभिधायिनोऽलिङ्गसंख्याशक्तय उच्चावचेष्वर्थेषु निपतन्तीत्यव्ययविशेषा एव चादयो निपाताः; यदाह—'चादयोऽसत्त्वे' (पा- १. ४. ५७.) इति। ते खलु विध्यर्थाः, अर्थवादार्थाः, अनुवादार्थाः, निषेधार्थाः, विधिनिषेधार्थाः, अविधिनिषेधार्थाश्च इति षोढा संभवन्ति। तेषु मङ्गलम्, अधिकारः, संभ्रमः, नियोगः, समुच्चयः, विकल्पः, इति विधिः; कुत्सा, प्रशंसा, विषादः, हर्षः, ईर्ष्या, विस्मयः, इत्यर्थवादः; स्मरणम्, उपमा, अभ्युपगमः, अनुप्रश्नः, परकृतिः, पुराकल्पः, इत्यनुवादः; प्रतिषेधः, निवारणम्, अपाकरणम्, असूया, गर्हणा, विनिग्रहः, इति निषेधः; संबोधनम्, अनुकम्पा, वितर्कः, प्रश्नः, पक्षान्तरम्, हेत्वपदेशः इति विधिनिषेधः; पदपूरणम्, पादपूरणम्, वाक्यपूरणम्, अलङ्कारपूरणम्, वाक्यालङ्कारः, पदसंस्कारः, इत्यविधिनिषेधः॥

तेषु ओम्, अथ, स्वस्ति, दिष्ट्या, नह, स्म, शश्वत्, कच्चित्, इति मङ्गलार्थाः। यथा—ओम्, अग्निमीळे पुरोहितम्, अथातो ब्रह्मजिज्ञासा, स्वस्ति नो मिमीतामश्विना भगः, दिष्ट्या वर्धसे, नह भोक्ष्यसे भोगान्, ऊर्ध्वं मुहूर्तात् कटं करोतु स्म भवान्, शश्वदध्येष्यामहे, कच्चिदध्येष्यामहे, इति। अथ, अथो, यावत्, तावत्, अनु, पुनः, पश्चात्, भूयः, इत्यधिकारार्थाः; यथा—अथ शब्दानुशासनम्, अथो त्वमेष्यसि, यावत्संभवस्तावद्विधिः, मुनिं कणादमन्वतः, पुनः प्रभातं पुनरेव शर्वरी, पश्चादावां विरहगुणितम्, भूयश्चाह त्वमसि शयने, इति। यावत्, तावत्, ननु, पुरा, अङ्ग, हि, हन्त, सीम्, इति संभ्रमार्थाः; यथा—यावत्स एव समयः सममेव तावत्, ननु गच्छामि भोः, अधीष्व माणवक पुरा विद्योतते विद्युत्, अङ्ग पच, न हि पच, हन्त प्रशाधि, प्र सीमादित्योऽसृजत (ऋग्वे. २. २८. ४.); प्रासृजत् सर्वत आदित्यः इत्यर्थः। परम्, वै, वाव, एव, ह, अह, तु, उ, इति नियोगार्थाः, यथा—धर्मः सखा परमहो परलोकयाने, वेदो वै

धर्ममूलम्, द्वे वाव ब्रह्मणो रूपे, आत्मैवेदमग्र आसीत्, स होवाच, त्वमह ग्रामं गच्छ, आख्यास्यामि तु ते, सत्यमु ते वदन्ति (नि. १. ५.), इति । च, वा, आ, अपि, उत, अथ, अथो, तथा, इति समुच्चयार्थाः; यथा—अहं च त्वं च वृत्रहन् (ऋग्वे. ६. ४. ४१. ५.), वायुर्वा त्वा मनुर्वा त्वा (तै. १७. ७. २.), देवेभ्यश्च पितृभ्य आ, (ऋग्वे. ७. ६. २२. १.), दन्तैरपि नखैरपि, दैव्याः शमितार उत मनुष्याः (तै. ब्रा. ३. ६. ६.), देवानथ पितॄन्स्तुहि, अथो खल्वाहुः, हारीतोऽत्रिरहं तथा, इति । वा, अथ, अथो, यदि, चण्, चेत्, नेत्, मा, इति विकल्पार्थाः; यथा—राज्यं वा कर्तव्यं भाष्यं वा श्रोतव्यम्, ऋतौ व्यवेयादथानृतौ पर्ववर्जनम्, नदीषु स्नायादथो देवखाते, यदि शमः किं तपसा, त्वं च गन्ता किमत्र मे, उपाध्यायश्चेदागच्छेदाशंसे युक्तोऽधीयीय, नेज्जिह्मायन्तो (न्त्यो) नरकं पताम, (नि. १·११.), माकश्चिदिदमपि स्यात्, इति । एवमन्येऽपि प्रयोगानुसारतो द्रष्टव्याः । एते च विधेरन्यत्रापि वेदितव्या इति ॥

अर्थवादे—हा, धिक्, चित्, नाम, किम्, ह, अपि, जातु, इति कुत्सार्थाः; यथा—हा किमेवं प्रवर्तसे, धिक्प्रमादः, कुम्भार्याश्चिदाहर (नि. १·४·१४), को नामायं सवितुरुदयो यत्र न स्वे स्फुरन्ति, किमधीते देवदत्तः, त्वं ह ब्राह्मणोऽसि, अपि सिञ्चेत्पलाण्डुम्, तत्र जातु गमिष्यसि इति । तु, पश्य, पश्यत, अह, अहो, यथा, यावत्, चित्, इति प्रशंसार्थाः; यथा—यस्तु माणवको भुङ्क्ते, पश्य माणवको भुङ्क्ते, पश्यत माणवको भुङ्क्ते, अह माणवको भुङ्क्ते, अहो देवदत्तः पचति शोभनम्, यथा पचति शोभनम्, यावत् करोति चारु, आचार्यश्चिदिदं ब्रूयात् (नि. १·४·१२), इति । ही, ई, हा, हन्त, बत, नाम, भोः, कष्टम्, इति विषादार्थाः; यथा—ही महीशो दृश्यते, ई ईदृशः संसारः, हा प्रिये जानकि, निराश्रया हन्त हता मनस्विता, अहो बत महत्कष्टम्, क्व नाम गमिष्यसि, भोः श्रान्तोऽस्मि, कष्टं भोः कष्टम्, इति । दिष्ट्या, हन्त, बत, वट्, वाट्, कत्, कथम्, कच्चित् इति हर्षार्थाः; यथा—दिष्ट्या न मृतोऽसि सखे, हन्त जीविताः स्मः, सैवेयं बत मे प्रिया, बण्महाँ असि सूर्य (ऋग्वे. ८·१०१·११.), वाट् ताभ्यः स्वाहा (तै. ब्रा, १·४·५ ३), कद्रुद्राय प्रचेतसे (ऋग्वे १ ४३·१), कथं वत्सो मे रामभद्रः, कच्चिज्जीवति पार्वती, इति । ह, अह, प्रत्युत, परम्, किं तु, अपि, नाम, यदि नाम, इति ईर्ष्यार्थाः; यथा—स्वयं ह्योदनं भुङ्क्ते उपाध्यायं सक्तून् पाययति, स्वयमह रथेन याति उपाध्यायं पदातिं गमयति, प्रत्युत मामुपालभसे, देवो भवान् परं भृङ्गिरिटिः, विद्वानसि किं तु कितवः, मातर्यपि मृतायां दीव्यसि, भवतु नाम कामचारी तथाऽप्यसौ पतिरेव, असि तपस्वी यदि नाम मूर्खः, इति । ही, अहो, अहह, चन, नाम, पश्य, पश्यत, बत इति विस्मयार्थाः; यथा—हतविधिलसितानां ही विचित्रो विपाकः, अहो रूपमस्याः, अहह माहात्म्यं महीपतेः, याचिता ये न कुप्यन्ति पुरुषाः केचनैव ते, अन्धो नाम पर्वतमारोक्ष्यति, पश्य माणवको ब्रूते, पश्याकाशेन याति, कोऽयं बत दृश्यते, इति । एवमन्येऽपि यथाप्रयोगमनुसर्तव्याः । एते चार्थवादादन्यत्रापि वेदितव्या इति ॥

अनुवादे—आम्, आः, आ, अये, नाम, नूनम्, हुम्, ओम्, इति स्मरणार्थाः; यथा—आं सैषा पञ्चवटी, आः स तस्याः संलापः, आ ज्ञातं स जटायुरेषः, अये देवो दाशरथिः, स नामायं भविष्यति, नूनमेषा जानकी, हुं मकरन्दो, ओमेवमेतत्, इति। इव, वा, यथा, चित्, न, नकिर्, नु, प्रति, इत्युपमार्थाः; यथा—राजेव ब्रूयात्, मणी वोष्ट्रस्य लम्बेते, ज्येष्ठो भ्राता यथा पिता, अग्निश्चित् भायात्, मृगो न भीमः कुचरो गिरिष्ठाः (ऋग्वे. २-२-२४-२.), पावको नकिर्माणवकः, वृक्षस्य नु ते पुरुहूतवयाः शाखाः (ऋग्वे. ४ ६-१७-३), अभिमन्युरर्जुनतः प्रति, इति। ओम्, तथा, आम, नाम, अथ किम्, श्रत्, सत्यम्, वाढम्, इत्यभ्युपगमार्थाः; यथा—ओमिति होवाच, स तथेति प्रतिज्ञाय, आम यथा ब्रवीषि, एवं नाम भवतु, गमिष्यति भवान् अथ किम्, श्रद्धे यथाऽऽत्थ, सत्यमसारः संसारः वाढमेषोऽस्मि कामन्दकी संवृत्तः, इति। ननु, ही, नु, हुम्, नकिल, ननुकिल, एवम्, शश्वत्, इत्यनुप्रश्नार्थाः; यथा—अकार्षीः कटं देवदत्त? ननु करोमि भोः? आकर्ण ही ह्यः? कथं नु करिष्यामि? (नि. १-४-१७.) अपि भवान् मकरन्दः? हुं स एवास्मि। न किलैवम्? ननु किलैवम्? (नि. १-५-७) एवमेतत्? शश्वदेवम्? (नि. १-५-११.) इति। इति, एवं किल, खलु, ननु, स्म, अपि, नाम, इति परकृत्यर्थाः; यथा—नित्यः शब्द इति मीमांसकाः अनित्य एवेति तार्किकाः, एवं किलोपाध्यायः पठति, धन्याः खलु धर्ममाचरन्ति, नन्वेतदकार्षीत् सर्वोऽपि, इति स्मोपाध्यायः कथयति, सोऽपि मां जानात्येव, को नाम न मन्यते, इति। पुरा, शश्वत्, इतिह, इतिकिल, इतिस्म, इतिहस्म, यत्किल, शश्वत्किल, इति पुराकल्पार्थाः; यथा—नलेन स्म पुराधीयते, एवं शश्वदिति, इति ह चकार, इति किल श्रूयते पुराणेषु, इति स्म ब्रह्मवादिनः पूर्वे वदन्ति, इतिहस्म तत्रभवान् भागुरायणः, एवमिह गुरुभ्यः श्रूयते यत्किलेह तरुषण्डे पाण्डवा ऊषुः, शश्वत्किलेदमित्थं बभूव, इति। एवमन्येऽपि यथाप्रयोगमनुसर्तव्याः। एते चानुवादतोऽन्यत्रापि द्रष्टव्या इति॥

निषेधे—न, नञ्, अ, अन, नो, नकिर्, किम्, नहि, इति प्रतिषेधार्थाः; यथा—युगपन्नैकधर्माणाम्, नेन्द्रं देवममंसत (ऋग्वे. ८-३-४.); शश्वत्त्वमब्राह्मण इव भाषसे, अनोपमा ते बुद्धिः, तस्य तुल्योऽपि नो भवान्, नकिर्ग्रामं गमिष्यसि, किं गतेन करिष्यसि, न हि नहि प्रेमानिमित्ते सति, इति। मा, माङ्, मास्म, माकिर्, अलम्, खलु, कृतम्, पर्याप्तम्, इति निवारणार्थाः; यथा—मा करिष्यसि, मा कार्षीः (नि. १-५-८), मास्म करोः, माकिर्नशन्माकीं रिषत् (ऋग्वे. ६-५४-७), अलं कृत्वा, कृतं साहसेन, पर्याप्तं भयेन, इति। आः, ई, ओम्, हुम् फट्, धिक्, खर्, अरे, इत्यपाकरणार्थाः, यथा—आः, पाप प्रतिहतोऽसि, ई इतो निष्पत, ओं किमेवं वदसि, हुं णिर्लज्जापसर, फट् अपख्याकरोऽसि, धिक् त्वा जाल्म खर् दुष्टे पिशाचि, अरे दुरात्मन्, इति। अङ्ग, हि, अहो, हंहो, ए, हये, अरे, अररे, इत्यसूयार्थाः; यथा—अङ्ग कूजन्य इदानीं ज्ञास्यसि जाल्म, स हि व्याहरतु कथं हि व्याकरिष्यति (नि. ५. ५.), वृषलग्राममहो गमिष्यसि, हंहो गमिष्यसि ग्रामम्, ए देव

दत्त, हये जाये मनसा तिष्ठ घोरे (ऋग्वे. १०·९५·१), अरे नाहमुन्मत्तः, अररे महाराजं प्रति कुतः क्षत्रियाः, इति। कथम्, यत्, यदि, यदा, जातु, अपि, यच्च, यत्र, इति गर्हणार्थाः; यथा—कथं नाम तत्रभवान् वृषलं याजयेत्, यत्तत्रभवान् वृषलं याजयेत्, यदि तत्रभवान् वृषलं याजयेत्, यदा तत्रभवान् वृषलं याजयेत्, जातु तत्रभवान् वृषलं याजयेत्, अपि तत्रभवान् वृषलं याजयते, यच्च तत्रभवान् वृषलमयाजयिष्यत्, यत्र तत्रभवान् वृषलमयाजयिष्यत्, इति। ह, अह, त्वै, न्वै, वै, वाव, वरम्, ननु, इति विनिग्रहार्थाः; यथा—अयमिदं ह करिष्यति (नि. १·५·२.), अयमहेदं करोतु, अयं त्वै तत्र गन्ता, अयं न्वै ते नियोगः, बृहस्पतिर्वै देवानां पुरोहित आसीत्, अयं वाव हस्त आसीत्, वरमद्य कपोतः श्वो मयूरात्, ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः (किराता० २·५.)। एवमन्येऽपि यथाप्रयोगमनुसर्तव्याः। एते च निषेधतोऽन्यत्रापि द्रष्टव्याः इति॥

विधिनिषेधे—हे, है, अयि, अङ्ग, हो, अहो, हंहो, भोः, इति संबोधनार्थाः; यथा—हे देवदत्त, है यज्ञदत्त, अयि विष्णुमित्र, अङ्ग माणवक, हो अग्निहोत्रिन्, अहो महाराज, हंहो महाब्राह्मण, भोः पान्थ प्रवर्तस्व निवर्तस्व वा, इति। अ, इ, उ, ए, ओ, आ, ई, ऊ, इत्यनुकम्पार्थाः; यथा—अ अवेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ, ए इत एहि, ओ ओषति त्वां तरणिः, आ आगतस्ते तातः, ई ईक्षितोऽसि गच्छ, ऊ ऊषरे बीजं वपसि, इति। किम्, नु, नूनम्, आहो, उत, स्वित्, वा, इव, इति वितर्कार्थाः; यथा—किमयं स्थाणुः किं पुरुषः, अहिर्नु रज्जुर्नु, न नूनमस्ति नो श्वः (ऋग्वे. २·४·१०·१.), स्थाणुरयमाहो पुरुषः, धूमोऽयमुत कपोतः, पद्ममेतन्मुखं स्विज्जाति, हन्ताहं पृथिवीमिमां निदधानीह वेह वा (ऋग्वे. ८·६·२७·३), ताम्यतीव वत्सो मे मकरन्दः, इति। सत्यम्, किम्, हि, कच्चित्, एवम्, अपि, अथ, उत, इति प्रश्नार्थाः; यथा—सत्यं भोक्ष्यसे? किं देवदत्तः पचति? कटं करिष्यसि हि? कच्चिज्जीवति ते माता? एवमेतद्देवदत्त? अपि क्रियार्थं सुलभं समित्कुशम् (कुमारसंभवम्)? देवोऽयमथ मानुषः? उत दण्डः पतिष्यति? इति। ननु, पुनः, तु, तर्हि, यावत्, यावता, अथो, चित्, इति पक्षान्तरार्थाः; यथा—नन्वरण्यमेतन्न गृहम्, स पठत्ययं पुनः शेते, स रोदित्ययं तु हसति, यद्येवं तर्हि गम्यते, जानेऽन्योऽयं यावत् स एव, जाने गतो भवान् यावताऽद्यापि न याति, अथो शरस्तेन मदर्थमुज्झितः, कश्चिद्भुङ्क्ते कश्चिद्भोजयति, इति। हि, नु, अतः, इति, यत् तत्, येन तेन, इति हेत्वपदेशार्थाः; यथा—इदं हि करिष्यति, वत्सक एहि किमिह नु ते धानकाः, अतस्त्वामर्थयामि, हस्तीति पलायते, यदयं ददाति तत्सुभगः, येन लभते तेन स्तौति, इति। एवमन्येऽपि यथाप्रयोगमनुसर्तव्याः। एते च विधिनिषेधादन्यत्रापि वेदितव्याः॥

अविधिनिषेधे—उ, उत, आहो, वै, हि, वा, खलु, स्वित्, इति पदपूरणार्थाः; यथा—किमु, किमुत, उताहो, न वै, न हि, अथवा, न खलु, आहो स्वित्, इति। कम्, ईम्, सीम्, इत्, उ, तु, हि, च, इति पादपूरणार्थाः; यथा—शिशिरं जीवनाय कम्, [नि. १-१०-१] एमेनं सृजाता सुते [ऋग्वे. १-१-१७-२], प्र सीमादित्यो असृजद्विधर्त्ता [नि. १-७], तमिद्वर्धन्तु नो गिरः [ऋग्वे. ८-९२-२१], अयमु ते समतसि, [ऋग्वे. १-३०-४], देवः स तु न मानुषः, इन्दवो वामुशन्ति हि [ऋग्वे. १-२ ४], विलोलदृष्टं हरिणाङ्गनासु च, इति। एते चान्ये च, नूनम्, इव, एव, इति, खलु, इत्यादयो वाक्यपूरणार्थाः; यथा—विसीमतः सुरुचो वेन आवः [तै. सं. ४-२-८-२], नरं च नारयणमेव चेति, नूनं सा ते प्रति वरं जरित्रे [ऋग्वे. २-११-२१], कथमिवैतद्भविष्यति, एवाह्येव [तै. आ. १-२०-१], एवाहीन्द्र, अथो खल्वाहुः, अभीषु णः सखीनाम् [ऋग्वे. ४ ३१-३], आ एवं नु मन्यसे, इति। भङ्गश्लेषभाषाश्लेषयमकवक्रोक्तिचित्रानुप्रासपदावृत्तिप्रश्नोत्तरप्रभृतयोऽलङ्काराः; तदर्था यथा—न वार्यन्ते, न चार्यन्ते, न स्मार्यन्ते, न हसन्ति, न हीयन्ते, न वैरायते, इति भङ्गश्लेषे; स हि अहो रणे कत्थतेपि योनराया इति भाषाश्लेषे; योषितां गात्रं न खलूनं न खलूनम् इति यमकश्लोके; शस्त्रं न खलु वोढव्यम् इति वक्रोक्तौ; ननु होमथनाराद्यो घोरा नाथ महो नु न इति चित्रे; स हि महीशो वर्तते इत्यनुप्रासे; प्रासेप्रासेऽमुना रणे इति पदावृत्तौ, का ननाद तिमिरादपि कालीति प्रश्नोत्तरे इति। आर्षिक आर्षिपुत्रक आर्षिक इत्येतानि वैदिकवाक्यानामलङ्कारहेतवो वाक्यालङ्कारार्थाः; यथा—अथो खलु, त्वयि, तर्हि, अथ खल्वेतर्हि, अहो नु खलु भोः, हा धिक्कष्टं भोः, इति ह स्म भगवान् पुनर्वसुरात्रेयः, न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, [छान्दो. ८-१२-१] न वा अरे जायायै कामाय जाया प्रिया भवति [बृहदा. ४-५] न वा उ एतन्म्रियसे न रिष्यसि, इति। पदसंस्कारस्तु द्विधा विधिनिषेधरूपाभ्याम्; तयोः प्लुतविधिः, लडादिविधिः, पररूपादिविधिः, इति विधिरूपः; पररूपादिप्रतिषेधः, संहिताप्रतिषेधः, पदादेशादिप्रतिषेधः, निघातप्रतिषेधः, इति निषेधरूपः। तत्र, 'हैहेप्रयोगे हैहयोः' 'ओमभ्यादाने' 'ब्रूहि प्रेष्यश्रौषड्वौषडावहानामादेः [पा. ८-२-८५-८७-९१], इति प्लुतविधिः; यथा—देवदत्त है३, हे३ देवदत्त, ओम्३ अग्निमीडे पुरोहितम्, अग्निमा३ वह, अस्तु श्रौ३षट्, ब्रू३हि, वौ३षट्, इति। 'परेर्वर्जने' 'प्रसमुपोदः पादपूरणे' 'उपर्यध्यधसः सामीप्ये' इति द्विर्वचनविधिः; यथा—परिपरि त्रिगर्तेभ्यो वृष्टो देवः, प्रप्रायमग्निर्भरतस्य शृण्वे, संसमिद्युवसे वृषन्, उपोप मे परामृश, किं नो दुदुहर्षसे दातवा, उपर्युपरिग्रामम्। 'यावत्पुरानिपातयोर्लट्,' 'जातुयदोर्लिङ्,' 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति लडादिविधिः; यथा—यावद्भुङ्क्ते, पुरा व्रजति, जातु तत्रभवान् वृषलं याजयेत्, यत् तत्रभवान् वृषलं याजयेत्; अलं कृत्वा, खलु कृत्वा इति। 'ओमाङोश्च,' 'अव्यक्तानुकरणस्यात इतौ' 'आङ्माङोश्च' इति पररूपादिविधिः यथा—अद्योम्, अद्योढा, अद्येव झटिति,

आच्छादयति, माच्छिदत् इति । 'एवे चानियोगे' 'नाम्रेडितस्य' 'न माङ्योगे' इति पररूपादिप्रतिषेधः; यथा--अद्यैव गच्छ, इहैव तिष्ठ, पटत् पटदिति करोति, मा कार्षीत्, मा स्म कार्षीत्, मा स्म करोत् इति । 'निपात एकाजनाङ्' 'ओत्' 'संबुद्धौ शाकल्यस्येतावनार्षे' [पा. १. १. १४. १५. १६.] इति संहिताप्रतिषेधः; यथा--अ अवेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ, आ एवं नु मन्यसे, अहो, आश्चर्यम्, भानो इति, इति । 'न चवाहाहैवयुक्ते' [पा. ८. १. २४] 'नानोर्ज्ञः' [पा. १. ३. ५८] 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' [पा. ७. १. ३७] इति पदादेशादिप्रतिषेधः; यथा—ग्रामो युष्माकं च ग्रामोऽस्माकं च, ग्रामो युष्माकमेव ग्रामोऽस्माकमेव, पुत्रमनुजिज्ञासति, अस्नात्वा भुङ्क्ते इति । 'निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्' (पा. ८. १. ३०.) 'चादिषु च' 'चवायोगे प्रथमा' [पा. ८. १. ५८. ५९.] इति निघातप्रतिषेधः; यथा—यद् देवदत्तः पचति, यदि देवदत्तः पचति, देवदत्तः पचति च खादति च, देवदत्तः पचति वा खादति वा, गर्दभांश्च कालयति वीणां च परिवादयति, गर्दभान् वा कालयति वीणां वा परिवादयति इति ॥

समासार्हा निपाता एव कतिपयेऽपि गतयः; तद्यथा—'प्रादयः क्रियायोगे [पा. १. ४. ५९] 'ऊर्यादिच्विडाचश्च' 'अनुकरणं चानितिपरम्' (पा. १. ४. ६१. ६२.) 'आदरानादरयोः सद्. सती' 'भूषणेऽलम्' 'अन्तरपरिग्रहे' पा. १. ४. ६३. ६४. ६५.) 'कणेमनसी श्रद्धाप्रतीघाते' 'पुरोऽव्ययम्' 'अस्तं च' (पा. १. ४. ६६. ६७. ६८.) 'अच्छ गत्यर्थवदेषु' 'अदोऽनुपदेशे' 'तिरोऽन्तर्धौ' (पा. १. ४. ६९. ७०. ७१.) 'विभाषा कृञि' उपाजेऽन्वाजे' साक्षात्प्रभृतीनि च' (पा. १. ४. ७२. ७३. ७४.) 'अनत्याधान उरसिमनसी' 'मध्येपदेनिवचने च' (पा. १. ४. ७५. ७६.) 'नित्यं हस्तेपाणावुपयमने' 'प्राध्वं बन्धने' 'जीविकोपनिषदावौपम्ये' (पा. १. ४. ७७. ७८. ७९.) 'ते प्राग्धातोः' 'छन्दसि परेऽपि' 'व्यवहिताश्च' (पा. १. ४. ८०. ८१. ८२.) इति । अथैतदुदाहरणानि--प्रपचति, पराकरोति, कारिकाकरोति, शुक्लीकरोति, पटपटाकरोति, पटत्करोति, खाट् करोति, सत्करोति, असत्करोति, अलंकृत्य, अन्तर्हत्य, कणेहत्य, मनोहत्य, पुरस्कृत्य, अस्तंगत्य, अच्छगत्य, अच्छोद्य, अदःकृत्य, तिरोभूय, तिरस्कृत्वा, तिरस्कृत्य, उपाजेकृत्वा, उपाजेकृत्य, अन्वाजे कृत्वा, अन्वाजेकृत्य, साक्षात् कृत्वा, साक्षात्कृत्य, मिथ्या कृत्वा, मिथ्याकृत्य, उरसि कृत्वा, उरसिकृत्य, मनसि कृत्वा, मनसिकृत्य, मध्ये कृत्वा, मध्येकृत्य, पदे कृत्वा, पदेकृत्य, निवचने कृत्वा, निवचनेकृत्य, हस्तेकृत्य, पाणौकृत्य, प्राध्वंकृत्य, जीविकाकृत्य, उपनिषत्कृत्य, उपनिषत्कृतम्, यदुपनिषत्करोति, यद्युपनिषत्करोति इति ॥

गतिविशेषा एव प्रादय उपसर्गाः ॥

प्रपरापसमन्ववनिर्दुर्व्याङ्न्यधयोऽप्यतिसूदभयश्च ।
प्रतिना सह लक्षयितव्याः पर्युपयोरपि लक्षणमत्र ॥

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
द्वितादिषु समो ग्लोपं पाठं चात्र श्रदन्तरोः ॥

एवमेते विंशतिः वपिसश्रदन्तर्भिः सहोपसर्गाः पञ्चविंशतिर्भवन्ति ॥

ते खलु--[१] वाचकाः, [२] द्योतकाः, [३] विशेषकाः, [४] सहाभिधायकाः, [५] कार्यार्थकाः, [६] निरर्थकाश्चेति षोढा विप्रथन्ते । तेषु [१] वाचका यथा—प्रगता ऋषभा अस्माद्वनात् प्रर्षभम् वनम्, परागता असवोऽस्येति परासुः, अपगतो मन्युरस्य अपमन्युः, सङ्गतमक्ष्णेण समक्षम्, अनुप्राप्तोनासिकामनुनासिकः, अवकुष्टःकोकिलया अवकोकिलः, मक्षिकाणामभावो निर्मक्षिकम्, ऋद्ध्यभावो यवनानां दुर्यवनम्, विरुद्धः पक्षो विपक्षः, आदाय युध्यते तदित्यायुधम्, अत्ययो वातस्य निवातम्, अधिगतमक्ष्णेण अध्यक्षम्, अपिहितः शल इत्यपिशलः, अतीतः श्वानमतिश्वो वराहः, समृद्धिर्भद्राणां सुभद्रम्, उद्भूतोऽत्यर्थमुत्तमः, अभिलक्ष्यं मुखमस्याभिमुखः, प्रतिनिधेयः कायः प्रतिकायः, परिग्लानोऽध्ययनाय पर्यध्ययनः, उपेत्याधीयतेऽस्मादुपाध्यायः, एवम् अवगतवान् कोटं वकोटः, अपिहितः कायतीति पिकः, संपन्नं ब्रह्म बाभ्रवाणां सब्रह्म, श्रद्धीयत इति श्रद्धा, अन्तर्धीयते अन्तर्धिः, इति ॥

[२] द्योतका यथा—प्रतिष्ठते, पराक्रमते, अपकरोति, संक्रीडति, अनुकम्पते, अवधत्ते, निर्विवेश, दुर्ललितः, व्याददाति, आह्वयते, निशामयति, अधिकुरुष्व, अपिदधाति, अतिशेते सुरभिः, उल्लापयति, अभिधत्ते, प्रतीक्षते, परिणमते, उपायंस्त ; एवं वधत्ते, पिधत्ते, श्रद्धत्ते, सहितः, अन्तर्दधाति इति ॥

[३] विशेषकास्तु द्विधा—प्रकृत्यर्थविशेषकाः, प्रत्ययार्थविशेषकाश्च ; प्रकृत्यर्थविशेषका यथा—प्रवर्धते, पलायते, अपवदते, संसरति, अनुमन्यते, अवलोकते, निष्कर्षति, दुर्भवति, विलोकते, आलोकते, निषीदति, अधिवसति, अपिनह्यति, अतिवर्तते, सुभवति, उद्भवति, अभ्येति, प्रतिपद्यते, परिगणयति, उपदधाति, एवं वतंसः, पिनद्धवान्, सततम्, श्रद्धनः, अन्तर्भवति इति । प्रत्ययार्थविशेषका यथा—मनस्वी सुभवति सुमनायते, दुर्भवति दुर्मनायते, एवमभिमनायते ; पुच्छमुदस्यति उत्पुच्छयते, व्यस्यति विपुच्छयते, पर्यस्यति परिपुच्छयते ; भाण्डं समारचयति संभाण्डयते, चीवरं संचिनोति संचीवरयते ; हस्तेनापक्षिपति अपहस्तयति, वर्मणा संनह्यति संवर्मयति, पाशेन संयच्छति संपाशयति, चूर्णैरवध्वंसयति अवचूर्णयति, तूलैरवकुष्णाति अवतूलयति, हस्तिनाऽतिक्रामति अतिहस्तयति, सेनयाऽभियाति अभिषेणयति, वीणयोपगायति उपवीणयति, वास्या परिच्छिनत्ति परिवासयति, श्लोकैरुपस्तौति उपश्लोकयति, लोमान्यनुमार्ष्टि अनुलोमयति, पाशान् विमोचयति विपाशयति,

तूस्तानि विहन्ति वितूस्तयति, रूपं निरीक्षते निरूपयति, वस्त्रं परिदधाति परिवस्त्रयति, पर्याणमुत्तानयति उत्पर्याणयति, इति ॥

नन्वेतेऽपि क्रियाविशेषाणां वाचकाः कस्मान्न भवन्ति? यद्धि यत्प्रयोगादवगम्यते तत् तस्य वाच्यं भवति। नैवम्; 'भृशादिभ्यो भुव्यच्वेः' (पा. ३. १. १२.) इत्यादिभिर्भवत्याद्यर्थ एव प्रत्ययोत्पत्तेः। मैवं वोचः; नाहं क्यङन्तं पृच्छामि, किं तर्हि ण्यन्तम्; तत्र 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' (पा: ३. १. १७.) इति वर्तते; ततश्च करोत्यर्थलक्षणे धात्वर्थसामान्ये णिङ्णिचोर्विधानात्, पुच्छस्योदसनं करोति उत्पुच्छयते, सेनया अभियानं करोति अभिषेणयति इति करोत्यर्थस्य प्रत्ययेन उदसनाभियानादेस्तूपसर्गेणाभिधाने वाचकत्वमेषां भविष्यतीति। उच्यते—नेह करण इत्यनेन सकलधात्वर्थानुयायि क्रियासामान्यं प्रतिनिर्दिश्यते, अपि त्वनवधारितात्मस्वरूपा उदसनाभियानादयः क्रियाविशेषा एव। कथमिदं ज्ञायते इति चेत्, आचार्यप्रवृत्तिर्ज्ञापयति—यदयं मुण्डमिश्रश्लक्ष्णलवणेभ्यः करणमात्रे प्रत्ययमुदाहरति; तद्यथा—मुण्डं करोति मुण्डयति, एवं मिश्रयति, श्लक्ष्णयति, लवणयति। हलिकलिकृतत्वचेभ्यस्तु ग्रहणलक्षणे तद्विशेषे; यथा—हलिमग्रहीत् अजहलत्, कलिमग्रहीत् अचकलत्, कृतं गृह्णाति कृतयति, त्वचं गृह्णाति त्वचयति; वर्णसत्यार्थवेदेभ्यस्तदाचष्टे इत्युपसर्गविशिष्टे धात्वर्थे; यथा—वर्णमाचष्टे वर्णयति, सत्यमाचष्टे सत्यापयति, अर्थमाचष्टे अर्थापयति, वेदमाचष्टे वेदापयति इति; व्रताद्भोजने तन्निवृत्तौ च, यथा—पयो व्रतयति, वृषलान्नं व्रतयति। अतोऽवगम्यते करण इत्यनेनानवधारितविशेषो धात्वर्थः प्रत्ययाभिधेयतयाऽधिक्रियते इति। एवं तर्हि, सविशेषणस्यैव क्रियाविशेषस्य प्रत्ययेनोक्तत्वात् अभिषेणयत्यादिषूपसर्गप्रयोगो न प्राप्नोति; यथा—श्येन इवाचरति श्येनायते, बाष्पमुद्वमति बाष्पायते, हस्तेन निरस्यति हस्तयते, एवं पादयते इति। भवेदेतत् यत्रैक एव प्रत्ययार्थः; यथा—'उपमानादाचारे' (पा. ३. १. १०.) 'बाष्पोष्मभ्यामुद्वमने' [पा. ३. १. १६.] 'अङ्गान्निरसने' इति। इह तु बहवः प्रत्ययार्थाः; यथा—'पुच्छादुदसने व्यसने च,' 'भाण्डात् समाचयने विभजने च,' 'चीवरादार्जने परिधाने च,' मुण्डादिभ्यस्तत् करोति तदाचष्टे तेनातिक्रामति इत्यादाविति; तत्रोपात्तस्यापि क्रियाविशेषस्य प्रत्ययतो रूपसामान्यादनवधारणे तदवच्छेदायोपसर्गविशेषः प्रयुज्यते, यथा प्रत्ययार्थविशेषणपक्षे मनःशब्दादुत्पन्नेन क्यङैवोपसर्गार्थविशिष्टभवत्यर्थाभिधाने सुमनायते, दुर्मनायते, अभिमनायते इति सुदुरभयः प्रयुज्यन्ते। एवं तर्हि हस्तिनाऽतिक्रामत्यतिहस्तयति इत्यादिवत् श्वेताश्वमाचष्टे श्वेतयति, अश्वतरमाचष्टे अश्वयति, गालोडितमाचष्टे गालोडयति, आह्वरकमाचष्टे आह्वरयति, इत्यादावाङ्प्रयोगः प्राप्नोति। नैवम्, अत्राङः सहाभिधायकत्वात्। न हि क्रामतीत्यादिवत् चष्टे इत्यस्यैकाकिनः स्वार्थाभिधाने सामर्थ्यमस्ति। अतो विशेषकत्वमेवैषां न वाचकत्वमिति ॥

अथ [४] सहाभिधायका यथा--प्रस्तुते, प्राणिति, प्रपञ्चते, प्राप्नोति, संग्रामयते, संचष्टे, संरम्भते, संधुक्षयति, अनुरुध्यते, विक्लवते, विलोकते, विश्राणयति, आचष्टे, आशास्ते, आचामति, आतङ्कयति, निद्रायति, नियमयते, अधीते, अध्येति, अभिवादयते, परिष्वजते, उज्जासयति, उत्तंसयति इति ॥

[५] कार्यार्था यथा—विजयते, पराजयते, न्यविक्षत, समगंस्त, अन्वकरोत्, पराकरोत्, विरराम, उपरराम, उद्सिष्यति, उद्सिष्यते, अपस्किरते, प्रतिचस्कार, उपस्कुरुते, ग्लायते, प्राधभीयति, निष्पतति, अभिष्ट्रौति, विषहते, परिष्वजते, विष्वणति, प्रहिणोति, प्रणश्यति, परिणेष्यति, अन्तर्णयति इति ॥

[६] निरर्थका यथा—प्रारभते, प्रलम्बते, प्रसूयते, प्रयच्छति, अपहरति, अपह्नुते, अपत्रपते, अभिषुणोति, निमीलति, निवार्यते, निष्ठीवति, निमज्जति, निखञ्जति, विगाहते, विराजते, विजानाति, विनश्यति, विकत्थते, विदीर्यते, आश्रयति, आश्लिष्यति, संयुज्यते, अध्यागच्छति, पर्यागच्छति इति ॥

प्रादय एव क्रियाविशेषोपजनितसंबन्धावच्छेदहेतवः कर्मप्रवचनीयाः; यदाह--

क्रियाविशेषजन्यानां संबन्धानां प्रकाशने ।
कर्मप्रवचनीयाः स्युर्निमित्तमवधारिताः ॥ इति ।

किं पुनरमीषामवधारणम्? कर्मप्रवचनीयसंज्ञाधिकारे अनुप्रभृतयः शब्दा एकादश, लक्षणाद्योऽर्था द्वाविंशतिरिति; तद्यथा--'अनुर्लक्षणे' 'तृतीयार्थे' 'हीने' (पा. १. ४. ८४. ८५. ८६.) 'उपोऽधिके च' 'अपपरी वर्जने' 'आङ् मर्यादावचने' [पा. १. ४. ८७. ८८. ८९.] लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' [पा. १. ४. ९०.] 'अभिरभागे' [पा. १. ४. ९१.] 'प्रतिः प्रतिनिधिप्रतिदानयोः' [पा. १. ४. ९२.] 'अधिपरी अनर्थकौ' [पा. १. ४. ९३.] 'सुः पूजायाम्' 'अतिरतिक्रमणे च' [पा. १. ४. ९४. ९५.] 'अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु' 'अधिरीश्वरे' [पा. १. ४. ९६. ९७.] 'विभाषा कृञि' [पा. १. ४. ९८.]। एवम्—अनु, उप, अप, परि, आङ्, प्रति, अभि, अधि, सु, अति, अपि, इत्येकादश शब्दाः। हेतुलक्षणम्, सहार्थः, हीनता, आधिक्यम्, वर्जनम्, मर्यादावचनम्, लक्षणम्, इत्थंभूताख्यानम्, भागः, वीप्सा, प्रतिनिधिः, प्रतिदानम्, आनर्थक्यम्, पूजा, आतिक्रमणम्, पदार्थः, संभावना, अन्ववसर्गः, गर्हा, समुच्चयः, स्वाम्यम्, अधिकारः, इति द्वाविंशतिरर्थाः। तत्रानुः सप्तार्थः, प्रतिपरी षडर्थौ, अपिः पञ्चार्थः, अध्यभी त्र्यर्थौ, उपाती द्व्यर्थौ, आङपसव एकार्थाः इति। तेष्वनुः हेतुलक्षणसहार्थहीनतालक्षणेत्थंभूताख्यानभागवीप्सासु कर्मप्रवचनीयः; तद्योगे द्वितीया

यथा—शाकल्यस्य संहितामनु प्रावर्षत्, पर्वतमन्ववसिता सेना, अनुशाकटायनं वैयाकरणाः, वृक्षमनु विद्योतते विद्युत्, साधुर्देवदत्तो मातरमनु, यदत्र मामनु स्यात्, वृक्षं वृक्षमनु तिष्ठति इति ॥

क्रियाया द्योतको नायं न संबन्धस्य वाचकः ।
नापि क्रियापदाक्षेपी संबन्धस्य तु भेदकः ॥ [वाक्यपदीयम् २. २०६.]

तथा हि--शाकल्यस्य संहितामनुप्रावर्षदिति संहिताप्रवर्षणयोर्हेतुफलभूतयोर्लक्ष्यलक्षणभावो निशमयतिक्रियोपजनित इत्यनुना प्रकाश्यते 'शाकल्यस्य संहितामनु निशम्य प्रावर्षत्' इति । एवमन्यत्राप्यवगन्तव्यम् । इत्यनुः सप्तार्थः । लक्षणेत्थंभूताख्यानभागवीप्साप्रतिनिधिप्रतिदानेषु प्रतिः; स चतुर्षु द्वितीयां द्वयोः पञ्चमीमुत्पादयति; यथा--वृक्षं प्रति विद्योतते, साधुर्देवदत्तो मातरं प्रति, यदत्र मां प्रति स्यात्, वृक्षं वृक्षं प्रति सेकः, अभिमन्युरर्जुनतः प्रति, माषानस्मै तिलेभ्यः प्रति प्रयच्छति । लक्षणेत्थंभूताख्यानभागवीप्सावर्जनानर्थक्येषु परिः; सोऽपि चतुर्षु द्वितीयां द्वयोः पञ्चमीमुत्पादयति; यथा—वृक्षं परि विद्योतते, साधुर्देवदत्तो मातरं परि, यदत्र मां परि स्यात्, वृक्षं वृक्षं परि सेकः, परिपरि त्रिगर्तेभ्यो वृष्टो देवः, 'विश्वप्स्निया विश्वतस्परि' [तै. सं. १. ५. ३. ३.] । इति प्रतिपरी षडर्थौ । पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेष्वपिः; तस्यैतेषूपसर्गसंज्ञा बाध्यते; तत्र पदान्तरस्याप्रयुज्यमानस्यार्थः पदार्थः; सर्पिषोऽपि स्यात्, मधुनोऽपि स्यात्; मात्रा बिन्दुः स्तोकमित्यस्यार्थे अपिशब्दो वर्तते । अधिकार्थवचनेन शक्तेरप्रतिघाताविष्करणं संभावना--अपि सिञ्चेन्मूलकसहस्रम्, अपि स्तुयाद्राजानम् इति । कामचारानुज्ञानमन्ववसर्गः, अपि सिञ्च, अपि स्तुहि । निन्दा गर्हा—अपि सिञ्चेत् पलाण्डुम्, अपि स्तुयाद्वृषलम् इति । अनेकक्रियोपनिपातः समुच्चयः; अपि सिञ्च, अपि स्तुहि; सिञ्च च स्तुहि चेत्यर्थः । उपसर्गसंज्ञाबाधनात् षत्वं न भवति । इत्यपिः पञ्चार्थः । अधिरानर्थक्याधिकारस्वाम्येषु कर्मप्रवचनीयः; स आद्ययोः 'गतिर्गतौ' 'तिङि चोदात्तवति' (पा. ८. १. ७०. ७१.) इति गत्युपसर्गसंज्ञाबाधनात् निघातादिकं नानुभवति इति; यथा—कुतोऽध्यागच्छति, यदत्र मामधिकरिष्यति, इति । स्वाम्ये तु द्विधा—अधियोगे सप्तमी भवति कदाचित् स्वामिनः, कदाचित् स्वात्; यथा--अधि ब्रह्मदत्ते पञ्चालाः, अधि पञ्चालेषु ब्रह्मदत्तः । अभिर्लक्षणेत्थंभूताख्यानवीप्सासु द्वितीयामुत्पादयति; यथा—वृक्षमभि विद्योतते, साधुर्देवदत्तो मातरमभि, वृक्षं वृक्षमभि सिञ्चति । इत्यध्यभी त्र्यर्थौ । हीनाधिकार्थयोरुपः; तत्र यथासंख्यं द्वितीयासप्तम्यौ; यथा—उपार्जुनं योद्धारः, उप खार्यां द्रोणः इति । अतिः पूजायामतिक्रमणे च; तत्र पूजा स्तुतिः, निष्पन्नेऽपि फले क्रियाप्रवृत्तिरतिक्रमणम् । यथा—शोभनं स्तुतम् । अति स्तुतं भवता, अति सिक्तमेतद्भवता, इति । उपसर्गसंज्ञाबाधनात् षत्वं न भवति । इत्युपाती द्व्यर्थौ । आङ्मर्यादावचने पञ्चमीमुत्पादयति—आ पाटलिपुत्राद्वृष्टो देवः । वचनग्रहणादभिविधिरपि गृह्यते;

तत्रापीदमेवोदाहरणम् । अपो वर्जने पञ्चमीमुत्पादयति--अप त्रिगर्तेभ्यो वृष्टो देवः । सुः पूजायामुपसर्गसंज्ञां बाधते--सुस्तुतं भवता, सुसिक्तं भवता, इति पत्वं न भवतीति । इत्या-ङुपसव एकार्था इति ॥

अव्ययानि सुबन्ततिङन्तानुकारीणि विभक्तिप्रतिरूपाणि ; तानि प्रत्येकं षोढा—प्रकृत्यर्थानि, प्रत्ययार्थानि, उभयार्थानि, अनुभयार्थानि, प्रकृत्यन्तरार्थानि, प्रत्ययान्तरार्थानि चेति । तेषु सुब-न्तानुकारीणि प्रकृत्यर्थानि यथा—उच्चैः, नीचैः, चिराय, विहायसा इति ; प्रत्ययार्थानि यथा—आरात्, अकस्मात्, एकपदे, प्रगे, इति ; उभयार्थानि यथा—अहम्, शुभम्, पारे, मध्ये इति ; अनुभयार्थानि यथा—ऋते, दिष्ट्या, साक्षात्, अह्नाय इति ; प्रकृत्यन्तरार्थानि यथा—कृतम्, दिवा, दोषा, अन्तरेण, इति ; प्रत्ययान्तरार्थानि यथा—सायम्, स्वयम्, चिरस्य, परस्परस्य इति । तिङन्तानुकारीणि प्रकृत्यर्थानि यथा—मन्ये, शङ्के, अये, आम इति ; प्रत्ययार्थानि यथा—एहि, अपेहि, पश्य, पश्यत इति ; उभयार्थानि यथा—अस्ति, असि, अस्मि, ब्रूहि इति ; अनुभयार्थानि यथा--याति, न याति, वर्तते, न वर्तते इति ; प्रकृत्यन्तरार्थानि यथा—अस्तु, भवतु, पूर्यते, आस इति ; प्रत्ययान्तरार्थानि यथा—आह, स्यात्, स्तुयात्, भूयात् इति ॥

'स्वरादिनिपातमव्ययम्' (पा. १. १. ३७.) इत्यव्ययप्रकरणे 'कृन्मेजन्तः' 'क्त्वातोसुन्क-सुनः' (पा. १. १. ३९. ४०.) 'तद्धितश्चासर्वविभक्तिः' 'अव्ययीभावश्च' (पा. १. १. ३८. ४१.) इति पठ्यते । तत्र आम्, क्त्वा, ल्यप्, तुमुन्, णमुल्, खमुञ् इति कृतः षड् भाषायाम् । ते तु कृतः क्रियारूपाः, क्रियाफलरूपाः, क्रियाविशेषणरूपाः, क्रियावधिरूपाः, क्रियाकर्मरूपाः, क्रियावयवरूपाश्च भवन्ति ; तेषु क्रियारूपा यथा—चकासाञ्चकार, कारयामास, बिभरांबभूव, विदांकुर्वन्तु, अलं कृत्वा, खलु कृत्वा, अलमालप्य, खल्वालप्य, अलं भोक्तुम्, कालो भोक्तुम्, श्रोतुं श्रोत्रम्, द्रष्टुं चक्षुः इति ; क्रियाफलरूपा यथा—भोक्तुं व्रजति, पक्तुमुपतिष्ठते, भोक्तुं भुङ्क्ते, पक्तुं पचति, भोक्तुं ग्लायति, भोक्तुं घटते, भोक्तुं क्षमते, भोक्तुं सहते, भोक्तुमस्ति, भोक्तुं विद्यते, भोक्तुमीष्टे, भोक्तुं प्रभवति इति ; क्रियाविशेषण-रूपा यथा—इत्थंकारम्, अन्यथाकारम्, यथाकारम्, तथाकारम्, उच्चैःकारम्, तिर्यक्कारम्, मुखतःकारम्, नानाभावम्, द्विधाभावम्, तूष्णींभावम्, अन्वग्भावम् इति ; क्रियावधिरूपा यथा—भुक्त्वा व्रजति, अपमित्य याचते, अग्रेभोजं व्रजति, द्व्यहात्यासं गाः पाययति, द्व्यङ्गुलोत्कर्षं खण्डिकाश्छिनत्ति, शय्योत्थायं राजद्वारमेति, कन्यादर्शं वरयति, ब्राह्मणवेदं भोजयति, यावज्जीव-मधीते, चर्मपूरं स्तृणाति, गोष्पदपूरं वृष्टो देवः, चेलक्नोपं वृष्टो देवः इति ; क्रियाकर्मरूपा यथा—शक्नोति भोक्तुम्, धृष्णोति भोक्तुम्, जानाति भोक्तुम्, आरभते भोक्तुम्, पारयति भोक्तुम्, प्रक्रमते भोक्तुम्, लभते भोक्तुम्, अर्हति भोक्तुम्, इच्छति भोक्तुम्, कामयते

भोक्तुम्, एषितुमिच्छति, कमितुं कामयते, इति; क्रियावयवरूपा यथा—मूलकोपदंशं भुङ्क्ते, दण्डोपघातं गाः कालयति, पार्श्वोपपीडं शेते, व्रजोपरोधं गाः सादयति, पाण्युपकर्षमुत्थापयति, केशग्राहं युध्यन्ते, भ्रूविक्षेपं जल्पति, गेहानुप्रवेशमास्ते, नामग्राहमाकारयति, चोरंकारमाक्रोशति, स्वादुंकारं भुङ्क्ते, स्वादूकृत्य भुङ्क्ते इति। क्रियाकर्मावयवरूपाः खल्वपि संभवन्ति; यथा—स्वपोषं पुष्यति, आत्मपोषं पुष्णाति, गोपोषं पुष्यति, रैपोषं पुष्णाति, निमूलकाषं कषति, समूलकाषं कषति, समूलघातं हन्ति, पाणिघातं वेदिमाहन्ति, शुष्कपेषं पिनष्टि, चूर्णपेषं पिनष्टि, रूक्षपेषं पिनष्टि, उदपेषं पिनष्टि, अकृतकारं करोति, जीवग्राहं गृह्णाति, हस्तग्राहं गृह्णाति, हस्तवर्तं वर्तयति, चूडकनाषं नष्टः, सुवर्णनिधायं निहितः, ओदनपाकं पक्वः, क्रौञ्चबन्धं बद्धः, जीवनाशं नश्यति, पुरुषवाहं वहति, ऊर्ध्वशोषं शुष्कः, ऊर्ध्वपूरं पूर्णः, इति। शेषाश्छन्दसि चतुर्विंशतिर्भवन्ति; तद्यथा—एश्, केन्, तवै, के, से, सेन्, असे, असेन्, क्से, कसेन्, अध्यै, अध्यैन्, कध्यै, कध्यैन्, शध्यै, शध्यैन्, तवेङ्, तवेन्, कै, इष्यै, णमुल्, कमुल्, तोसुन्, कसुन्, इति। तेषु कृत्यार्थे एश्केनौ; एश्—'अवचक्षे' (ऋग्वे. ४. ५८. ५.) केन्—नावगाहे। तवै कृत्यार्थे तुमर्थे च, कृत्यार्थे—परिधातवै, परिस्तरितवै; तुमर्थे—सोममिन्द्राय पातवै (ऋग्वे. ३. ४६. ५.) अन्वेतवै (ऋग्वे. ७. ४४. ५.)। कयादयः सप्तदश तुमर्थे; तेषु के—दृशे विश्वाय सूर्यम् (ऋग्वे. १. ५०. १.) विख्ये त्वा हरामि; से—वक्षे रायः, सेन्—ता वामेषे रथानाम् (ऋग्वे. ५. ६६. ३.); असे—क्रत्वे दक्षाय जीवसे (ऋग्वे. १०. ५७. ४.); असेन्—इह क्षयाय जीवसे (ऋग्वे. १०. ५८. १.); क्से—प्रेषे भगाय श्रियसे (ऋग्वे. ५. ५९. ३.); कसेनप्येवंरूपः, स्वरे विशेषः; अध्यै—काममुपाचरध्यै (तै. सं. १. २. ११. १.) अध्यैनप्येवंरूपः, स्वरे विशेषः; कध्यै—इन्द्राग्नी आहुवध्यै (ऋग्वे. ६. ६०. १३.); कध्यैन्—श्रियध्यै; शध्यै—पिबध्यै (ऋग्वे. ९. ९७. २०.); शध्यैन्—सह मादयध्यै; तवेङ्—दशमे मासि सूतवे; तवेन्—सोममिन्द्राय पातवे [ऋग्वे. ८. ६९. १०.]? सुवर्देवेषु गन्तवे [तै.सं. ५. ७. ७. २.] कर्तवे [ऋग्वे. ९. ८६. २०.] हर्तवे; कै—प्रयै देवेभ्यः [ऋग्वे. १. १४२. ६.]; इष्यै—अपामोषधीनां रोहिष्यै [तै. सं. १. ३. १०. २.]; अव्यथिष्यै; रोहणाय चाव्यथनाय चेत्यर्थः। तुमर्थ एव 'शकि णमुल्कमुलौ' [पा. ३. ४. १२]—अग्निं देवा विभाजं नाशक्नुवन्। 'ईश्वरे तोसुन्कसुनौ' (पा. ३. ४. १३.)—ईश्वरोऽभिचरितोः, ईश्वरो विलिखः, ईश्वरोऽवितृदः। तोसुन्कसुनौ भावलक्षणे च; तत्र स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् (पा. ३. ४. १६.) 'सृपितृदोः कसुन्' (पा. ३. ४. १७.) यथा—आसंस्थातोर्वेद्यां सीदन्ति, पुरा सूर्यस्योदेतोराधेयः, पुरा वत्सानामपाकर्तोः, पुरा प्रवदितोरग्नौ होतव्यम्, पुरा प्रचरितोराग्नीध्रे होतव्यम्, आहोतोरप्रमत्तस्तिष्ठति, आतमितोरुपतिष्ठन्ते (तै. ब्रा. १. ६. ९. ८.) आविजनितोः संभवाम (तै. सं. २. ५. १. ५.) पुरा क्रूरस्य विसृपः (तै. सं १. १. ९. ३.), पुरा जत्रुभ्य आतृदः (ऋग्वे. ८. १. १२.)। तद्धितेष्वसर्वविभक्तिषु 'तसिलादयः प्राक् पाशपः, शस्प्रभृतयः प्राक्समासान्तेभ्यः, मान्तः,

कृत्वोऽर्थाः, तसिवती नानाञौ ' इति ; यथा—यतः, तत्र, इह, क्व, एकदा, एतर्हि, अधुना, इदानीम्, सद्यः, परुत्, परारि, ऐषमः, अद्य, परेद्यवि, पूर्वेद्युः, उभयेद्युः, सर्वथा, इत्थम्, पुरस्तात्, प्राक्, अधः, उपरि, उपरिष्टात्, पुरः, पश्चात्, दक्षिणात्, दक्षिणा, दक्षिणाहि, दक्षिणेन, दक्षिणतः, द्विधा, द्वैधम्, ऐकध्यम्, बहुशो देहि, वासुदेवतः प्रति, शुक्लीभवति, अग्निसात् संपद्यते, देवत्रागच्छति, पटपटाकरोति, पचतितराम्, बहुकृत्वो भुङ्क्ते द्विर्भुङ्क्ते, सकृद्भुङ्क्ते, बहुधा भुङ्क्ते, आदितो भवति, ब्राह्मणवद्ब्रवीति, विना देवदत्तम्, नाना देवदत्तात् इति । अव्ययीभावो द्विधा—सत्त्वभूतार्थः, असत्त्वभूतार्थश्च इति । तयोः सत्त्वभूतार्थो यथा—उपकुम्भम्, सुमद्रम्, दुर्यवनम्, निर्मक्षिकम्, निशीतम्, सब्रह्म, बहिर्ग्रामम्, सूपप्रति, मध्येसमुद्रम्, द्विमुनि, पञ्चनदम्, लोहितगङ्गम् इति । असत्त्वभूतार्थो यथा—अधिस्त्रि, प्रत्युरसम्, अनुरथम्, प्रत्यर्थम्, यथाशक्ति, सचक्रम्, यावदमत्रम्, परित्रिगर्तम्, आपाटलिपुत्रम्, अभ्यग्नि, द्विपरि, अनुगङ्गं वाराणसी इति ॥

शब्दस्य तादृप्येणाभिधानमनुकरणं । यदाह—व्यक्ताव्यक्तवर्णपदवाक्यसादृश्योक्तयोऽनुकरणानि ॥

तत्र व्यक्तवर्णसादृश्योक्तिर्यथा—

छिन्नेन पतता वह्नौ यन्मुखेन हठात्कृते ।
स्वेति हेति ह्रेणोक्ते स्वाहासीत् सेष रावणः ॥

व्यक्तपदसादृश्योक्तिर्यथा—

गच्छेति वक्तुमिच्छामि मत्प्रिय त्वत्प्रियैषिणी ।
निर्गच्छति मुखाद्वाणी मा गा इति करोमि किम् ॥

व्यक्तवाक्यसादृश्योक्तिर्यथा—

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं त्वं कौमुदी नयनयोरमृतं त्वमङ्ग ।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां तामेव शान्तमथ वा किमतः परेण ॥

अव्यक्तवर्णसादृश्योक्तिर्यथा—

गतेऽर्धरात्रे परिमन्दमन्दं गर्जन्ति यत्प्रावृषि कालमेघाः ।
अपश्यती [1] वत्समिवेन्दुबिम्बं तं (तत्) शर्वरी गौरिव हुंकरोति ॥

---

[1] अयं पाठः मूलमातृकानुरोधादादृतः, नुम्घटितस्तु वृत्तवैरस्यादुपेक्षितः आगमशास्त्रस्यानित्यतया साधुत्वमस्यास्थेयम् ।

अव्यक्तपदसादृश्योक्तिर्यथा—

चटच्चटिति चर्मणि च्छिमिति चोच्छलच्छोणिते
धगद्धगिति मेदसि स्फुटरवोऽस्थिषु ष्ठागिति ।
पुनातु भवतो हरेरमरवैरिराजोरसि
क्वणत्करजपञ्जरक्रकचकाषजन्मानलः ॥

अव्यक्तवाक्यसादृश्योक्तिर्यथा—

पिपिप्रिय ससस्वयं मुमुमुखासवं देहि मे
तततत्यज दुदुद्रुतं भभभभाजनं काञ्चनम् ।
इति स्खलितजल्पितं मदवशात्कुरङ्गीदृशः
प्रगे हसितहेतवे सहचरीभिरध्यैयत ॥

एतेन यानि साधून्यर्थवन्ति पदानि, यानि च वाक्यानि, यच्चाशक्तिजमसाधु शब्दरूपम्, ये चापभ्रंशाः, ये चानर्थका वर्णाः, याश्चाव्यक्तवर्णपदवाक्योक्तयः, तदनुकरणानां साधुत्वमुपपन्नं भवति । ननु अनुकरणं शिष्टस्य वा दानाध्ययनादेः, अशिष्टाप्रतिषिद्धस्य वा हसितहिक्कितादेः साधुत्वं भवति ; न प्रतिषिद्धस्य ; यो ह्येवमसौ ब्राह्मणं हन्तीति तस्यानुकुर्वन् ब्राह्मणं हन्यात्, सोऽपि मन्ये पतितः स्यात् । नैवम् ; यश्च ब्राह्मणं हन्ति, यश्चानुहन्ति, उभौ तौ हतः ; यस्तु खल्वेवमसौ ब्राह्मणं हन्तीति तस्यानुकुर्वन् कदलीस्तम्भं छिन्द्यान्न स मन्ये पतितः स्यात् इति । न चानुकरणमपशब्दः, अन्यो ह्यसावपशब्दपदार्थकः साधुशब्दः ; न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति, अपशब्द इत्येतस्याप्यपशब्दत्वप्रसङ्गात् । यः पुनरेवमसावपशब्दं प्रयुङ्क्ते, इति तस्यानुकुर्वन्नपशब्दमभिधेयेषु प्रयुङ्क्ते, सोऽपशब्दकार्येव भवति इति ॥

भावकारकाभिधायिनो धातुप्रत्ययाः कृतः ; ते षोढा—लिङ्गिनः, अन्यलिङ्गिनः, स्वलिङ्गिनः, अलिङ्गिनः, शक्त्याद्यपेक्षिणः, अनुप्रयोगाद्यपेक्षिणश्च । तेषु द्रव्यवचना अणादयो लिङ्गिनः, यथा—कुम्भकारः, पङ्कजम्, धात्री, दात्रम्, कारुः, कृकवाकुः, इति । गुणवचना ण्वुलादयोऽन्यलिङ्गिनः, यथा—कारकः, कारिका, कारकम्, दर्शनीयः, दर्शनीया, दर्शनीयम्, इति । उत्पत्तावपेक्षितनियतलिङ्गाः 'स्त्रियां क्तिन्' (पा. ३. ३. ९४.) इत्येवमादयः स्वलिङ्गिनः, यथा—पक्तिः, पचनम्, पाकः, व्रजः, शय्या, सुप्तम्, इति । असत्त्वभूतार्थत्वेना-

नुपगृहीतलिङ्गसंख्याशक्तयस्तुमुनादयोऽलिङ्गिनः, यथा—कालो भोक्तुम्, अलं कृत्वा, खलु प्रहृत्य, नावगाहे, ईश्वरोऽभिचरितोः, ईश्वरो विलिखः, इति। शक्तिहेतुमल्लक्ष्यक्रियाद्यपेक्षाः शत्रादयः शक्त्याद्यपेक्षिणः, यथा—व्रजता कृतम्, क्रियमाणं पश्य, आर्जयन् वसति, चङ्क्रम्यमाणोऽधीते, पश्यन् व्रजति, भोजको व्रजति इति। अपेक्षितानुप्रयोगतद्धिताद्यनुषङ्गा णमुलादयोऽनुप्रयोगाद्यपेक्षिणः, यथा—रैपोषं पुष्यति, चोरंकारमाक्रोशति, कारयाञ्चकार, कृत्रिमम्, व्यावक्रोशी, सांराविणम्, इति॥

भावकारकसंबन्धिस्वार्थाभिधायिनोऽधातुप्रत्ययास्तद्धिताः; ते षोढा—अलोपिनः, लोपिनः, सर्वलोपिनः, आदेशिनः, प्रदेशिनः, अप्रदेशिनश्चेति। तेषु निरनुबन्धा अलोपिनः, यथा—अश्वत्वम्, अश्वकः, अश्वत्थामः, सभ्यः, सख्यम्, देवदत्तरूप्यः इति। सानुबन्धा लोपिनः यथा—ब्राह्मण्यम्, मृत्तिका, दाक्षिः, वैयाकरणः, स्तेयम्, कैदार्यम्, इति; येषां लुग्लुपादिभिः किमपि नावतिष्ठते ते सर्वलोपिनः, यथा—गर्गाः, चरकाः, पञ्चालाः, चञ्चा, गार्गी, सामग्री, इति। येषामायन्नादय आदिश्यन्ते ते आदेशिनः, यथा—ऐतिकायनः, कापेयम्, आत्मनीनम्, अश्वीयम्, क्षत्रियः, शाश्वतिकम्, इति। प्रकृतेरादिमध्यविषयाः प्रदेशिनः, यथा—बहुतृणम्, बहुराजा, सर्वकः, उच्चकैः, त्वयका, पचतकि, इति। तस्या एवान्त्यावयवभूता अप्रदेशिनः, यथा—वाक्त्वचम्, प्रत्युरसम्, केशाकेशि, युवजानिः, सरजसम्, निष्प्रवाणिः, इति॥

पृथगर्थानामेकार्थीभावः समासः; स षोढा—सुबन्ताभ्याम्, तिङन्ताभ्याम्, सुप्तिङन्ताभ्याम्, सुब्धातुभ्याम्, सुबन्तनामभ्याम्, नामभ्यां चेति। तेषु सुबन्ताभ्यां यथा—उपकुम्भम्, राजपुरुषः, नीलोत्पलम्, अष्टाकपालः, चित्रगुः, धवखदिरौ इति। अत्र 'समर्थः पदविधिः' (पा. २. १. १.) इति सामर्थ्ये सति समासः। सामर्थ्यं च संबन्धः। स च द्वयोरुपसर्जनप्रधानभावे भवति; न हि प्रधानयोरुपसर्जनयोरेव वा मिथोऽनपेक्षयोः संबन्धो घटते। प्रधानोपसर्जनभावश्च द्विधा—अभिधीयमानः, प्रतीयमानश्च। अभिधीयमानो व्यतिरेकविभक्तिः, यदा वैयधिकरण्यम्—कुम्भस्य समीपम्, राज्ञः पुरुषः, इति। तत्रोपकुम्भमिति पूर्वपदप्रधानोऽव्ययीभावः; राजपुरुषः इत्युत्तरपदप्रधानस्तत्पुरुषः। प्रधानमविचलितस्वार्थं प्रथमयैवाभिधीयते, उपसर्जनं पुनः प्रधानानुग्रहायाश्रितव्यतिरेकं षष्ठ्यादिभिः। इदं च सुबन्तत्व एव भवति। प्रतीयमानस्तुल्यविभक्तिः यदा सामानाधिकरण्यम्—नीलं च तदुत्पलं च नीलोत्पलम्; अष्टसु कपालेषु संस्कृतोऽष्टाकपालः, इति। अयं च 'विशेषणं विशेष्येण' (पा. २. १. ५७.) इति कर्मधारयः, 'संख्यापूर्वः' 'तद्धितार्थ' (पा. २. १. ५२. ५१.) इति च द्विगुत्वं विशेषणविशेष्यभावेन प्रतीयमानोपसर्जनप्रधानभावयोः सामानाधिकरण्ये स्मर्यते; तच्च तुल्यविभ-

क्तित्वे स्यादिति सुवन्तत्व एव भवति। यदा च चित्रा गावोऽस्येत्यन्यपदार्थपरतया विशेषणविशेष्ययोः समानाधिकरणलक्षणो बहुव्रीहिः, तदाऽप्यभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संवृत्त इति वृत्त्यवस्थायां वाक्यवैपरीत्येन चित्रा गावोऽस्येत्युपसर्जनं समासार्थश्चित्राणां गवामयमिति प्रधानभावमनुभवति; तच्च षष्ठीप्रथमान्तत्वात् सुवन्त एव स्यात्। यदा च धवश्च खदिरश्चेति प्रधानयोर्धवस्य खदिरस्य चेत्यप्रधानयोर्वा क्रियादीन् प्रतीतरेतरयोगे युगपदधिकरणवचनो द्वन्द्वः, तदाऽप्युभयत्र तुल्यविभक्तित्वमन्तरेण प्राधान्यमप्राधान्यं वा न प्रतीयते; तुल्यविभक्तित्वं तु द्वयोः सुवन्तत्व एव भवति। अतश्च सर्वत्र सुवन्तेन सह सुवन्तं समस्यते इति स्मर्यते। तिङन्ताभ्यां यथा--अश्नीतपिबता, खादतमोदता, पचतभृज्जता, उन्मृजावमृजा, आवपनिवपा, एहिरेयाहिरे, इति। अत्र 'आख्यातमाख्यातेन क्रियासातत्ये' इति मयूरव्यंसकादिपाठात् तिङन्तानां समासः स्मर्यते। अश्नीत पिबतेत्यादि यासु क्रियासु सातत्येन विद्यते, ता एवमुच्यन्ते। तन्मध्यपतितश्च तद्ग्रहणेन गृह्यते इत्युदादीनां रे इत्येतस्य चाख्यातत्वं भवति। सुप्तिङन्ताभ्यां यथा--अपचसि, प्रावर्षत्, अनुव्यचलत्, अस्तिक्षीरा, एहिवाणिजा, जहिस्तम्ब, इति। अत्र 'सह सुपा' (पा. २. १. ४.) इत्यत्र तृतीययैव सहार्थस्याक्षेपे, सहग्रहणादतिरिक्ताद्योगविभागाश्रयणेन सुबन्ततिङन्ताभ्यां समासः क्रियते। स च 'नञो नलोपस्तिङ्यवक्षेपे' इति 'उदात्तवता तिङा गतिमता च' इति, 'सुबधिकारेऽस्तिक्षीरादिवचनम्' इति, 'एहीडादयोऽन्यपदार्थे' इति 'जहि कर्मणा बहुलमाभीक्ष्ण्ये समस्यते कर्तारं चाभिदधाति' इत्युपपन्नो भवति। तेनायमर्थः संगच्छते—अवक्षिप्तोऽसि न पचसि त्वमभिहितोऽपि वृषल इति; प्रकर्षेणावर्षत् इति; पश्चाद्विशिष्टं चलनमकरोत् इति; अस्ति क्षीरमस्या इति; एहि वाणिजेत्यामन्त्र्यमाणवाणिजविशिष्टा क्रियेति; जहि जहि स्तम्बमिति कर्ता योऽभिधीयते स एवमुच्यते इति। सुब्धातुभ्यां यथा—संग्रामयते अनुरुध्यते, श्रद्धा, अन्तर्धिः, परमनियौ, प्रतिभुवौ इति। अत्र—'संग्राम युद्धे,' 'अनुरुध कामे' इति समस्तयोरेव पाठः। 'आतश्चोपसर्गे' (पा. ३. ३. १०६.) 'उपसर्गे घोः किः' (पा. ३. ३. ९२.) इत्यङ्किविधाने प्रादिषु श्रदन्तरोरुपसङ्ख्यानम्, 'अचि श्नु धातुभ्रुवां य्वोरियङुवङौ' (पा. ६. ४. ७७.) इत्यादिकार्यसिद्धये क्विवन्तस्य प्रत्ययनामधातुत्वाद्धातुत्वमिति सुब्धातुभ्यां समासो भवति। सुबन्तनामभ्यां यथा—दधिसेक्, चर्मकारः, चर्मक्रीती, धनक्रीता, ब्राह्मणाच्छंसी, सरसिजम्, इति। अत्र 'कुगतिप्रादयः' (पा. २. २. १८.) 'उपपदमतिङ्' (पा. २. २. १९.) इत्यत्रातिङ्ग्रहणेनोभयसूत्रशेषतया व्याख्यायमानेन सुबित्येतस्य निवृत्तिः क्रियते, 'कर्तृकरणे कृता बहुलम्' (पा. २. १. ३२.) इत्यत्र च कर्तृकरणयोः समासविधानादुत्तरपदस्य कृदन्ततायां लब्धायां कृद्ग्रहणादतिरिक्तात् तदन्तावस्थायामेव समासाभ्यनुज्ञाने सुपेत्येतदपि निवर्तते। ततश्च गतिकारकोपपदानां

कृद्भिः सह समासः सुबुत्पत्तेः प्रागेव भवतीत्याख्यातम्; बहुलग्रहणस्य चेष्टसिद्ध्यर्थत्वात्। स क्वचिन्नामभ्यां क्वचित् सुबन्ताभ्यां क्वचिन्नामसुबन्ताभ्यां निश्चीयते। तत्र दधिसेगित्यत्रोत्तरपदस्य 'सात्पदाद्योः' (पा. ८. ३. १११.) इति पदादिनिबन्धनषत्वप्रतिषेधसिद्ध्यै, चर्मकार इत्यत्र तु पूर्वपदस्य पदान्तलक्षणनलोपार्थं सुबन्तता क्रियते। चर्मक्रीतीत्यत्र पूर्वपदं नलोपार्थमेव सुबन्तम्, उत्तरपदं तु प्रातिपदिकं क्रियते; तेन 'क्रीतात् करणपूर्वात्' (पा. ४. १. ५०.) अकारान्तात् इति—ईकारः सिद्धो भवति। सुबुत्पत्तौ तु प्राक् सुबुत्पत्तेरन्तरङ्गलिङ्गसंस्कारनिमित्तष्टाबुत्पद्यमानः क्रीतस्य अकारान्ततां हत्वा ङीपं प्रतिबध्नीयात्। धनक्रीतेत्यत्र 'सा हि तस्य धनक्रीती प्राणेभ्योपि गरीयसी' इति शिष्टप्रयोगदर्शनादुत्तरपदस्य सुबुत्पत्तौ टाबुत्पत्तेराकारान्तत्वान्न ङीष उत्पत्तिः। ब्राह्मणाच्छंसी, सरसिजमित्यत्र पूर्वपदयोः साक्षात् सुपः श्रवणम्; उत्तरपदयोस्तु प्रयोजनाभावाद्विभक्तेरनुत्पत्तिरिति। नामभ्यां यथा—अश्वक्रीती, धनक्रीती, प्रवापिणी, माषवापिणी, असूर्यपश्या राजदाराः, कृतपूर्वी कटम्, इति। अत्र अश्वक्रीती, धनक्रीती, इत्येतयोः प्राग्वदेव ङीषुत्पत्तौ विभक्त्युत्पत्तिमन्तरेणापि पञ्चकप्रातिपदिकार्थपक्षे करणत्वाविरोधः। प्रवापिणी, माषवापिणी इत्यत्र तु प्राक् सुबुत्पत्तेः समासे प्रातिपदिकस्यान्तो नकार इति 'प्रातिपदिकान्तनुम्विभक्तिषु च (पा. ८. ४. ११.) इति णत्वं भवति; सुबन्ताभ्यां तु समासेऽन्तरङ्गत्वान्ङीबुत्पत्तौ ङीबत्र प्रातिपदिकान्तः न नकार इति णत्वं न स्यात्, यथा—गर्गभगिनीति। असूर्यपश्या इत्यत्र नञ्सूर्ययोर्दृशिक्रियया संबन्धात् परस्परमसंबन्धे सामर्थ्याभावाद्विभक्त्यभावः, अत्र हि सूर्यमपि न पश्यन्तीति नञ् सूर्यकर्मिकां दृशिक्रियामपेक्षते, न सूर्यसत्ताम्; 'असूर्यललाटयोर्दृशितपोः' (पा. ३. २. ३६.) इति वचनादसामर्थ्येऽपि नाम्नोरेव समासो भवति। एतेन कृतपूर्वी इत्यपि व्याख्यातम्; अत्रापि हि कृतं पूर्वं कटोऽनेनेति कृतशब्दस्य कटापेक्षायां पूर्वशब्देनासंबन्धादसामर्थ्येऽपि 'पूर्वादिनिः,' 'सपूर्वाच्च' (पा. ५. २. ८६. ८७.) इति वचनात् कृतपूर्वयोरसुबन्तयोरेव समासो भवतीति स्थितम्। उपलक्षणं चेह सुबन्ताभ्यामित्यादिषु द्विवचनम्; तेन यथा द्वाभ्यां तथा त्रिभिर्बहुभिश्च समासो भवति। तत्राव्ययीभावः कर्मधारयश्च द्वाभ्याम्। यथा—अधिस्त्रि, शाकप्रति, पक्वाम्राः, पुरुषव्याघ्रः, इति। षष्ठीलक्षणः कालपरिमाणलक्षणश्च तत्पुरुषो द्वाभ्यां त्रिभिश्च। यथा—राजगवीक्षीरम्, राजगोक्षीरम्, द्व्यहजातः, द्व्यहजातः, इति। अत्र यदा राज्ञो गौः राजगवी तस्याः क्षीरमिति, तदा द्वाभ्याम्, यदा तु राज्ञो गोः क्षीरं राजगोक्षीरमिति, तदा त्रिभिः। तदुक्तम्—'राजगवीक्षीरे द्विसमासप्रसङ्गः, द्विषष्ठीभावात्; सिद्धं तु राजविशिष्टाया गोः क्षीरेणाभिसंबन्धात्' राजगवीक्षीरम्, राजगोक्षीरमिति च। ननु च, गोः क्षीरं गोक्षीरम्, राज्ञो गोक्षीरं राजगोक्षीरमिति द्वितीयपक्षे भविष्यति; नैवम्, अर्थभेदात्; यथैवायं गवि यतते न माहिष्यादेरपि क्षीरमात्रेण तुष्यति, एवं

राजन्यपि यतते—राज्ञो या गौः, तस्या यत् क्षीरमिति; तच्चैवं न सिध्यति; एवं हि यतः कुतश्चिदागतं गोक्षीरमात्रं राज्ञः संबन्धि प्रतीयते। कथं पुनर्गोः क्षीरमप्यपेक्षमाणायाश्च राज्ञा राजानमप्यपेक्षमाणायाश्च क्षीरेण समासः? उच्यते—न गौः प्रधानत्वात् तथा राजानमपेक्षते, यथा उपसर्जनत्वेन गां राजा; क्षीरमप्यविचलितस्वार्थत्वादनौत्सुक्येन न तथा गामपेक्षते, यथोद्भूतसंबन्धव्यतिरेकत्वादौत्सुक्येन गौः क्षीरम्। एवं चानुकूल्ये गमकत्वात् प्रधानसापेक्षत्वे सति समासो भवत्येव; यथा—देवदत्तगुरुकुलम्, राजपुरुषभार्या, इति। तदुक्तम्—'भवति वै प्रधानस्य सापेक्षस्यापि समासः' इति। एवं द्वे अहनी समाहृते द्व्यहः, द्व्यहो जातस्येति यदा समासः तदा द्वाभ्याम्; यदा तु द्वे अहनी जातस्य द्व्यह्नजात इति तदा त्रिभिः। 'सुप् सुपा' इति वचनाद्द्वयोरेव समास इति चेत्, न; 'कालाः परिमाणिना' (पा. २. २. ५.) इति बहुवचननिर्देशात् 'सुप् सुपा' इत्येतस्मिन् गुणपदेऽपि संख्या न विवक्ष्यते; तेन त्रिष्वपि पदेषु समासाभ्यनुज्ञाने, द्विशब्दस्यापि कालसंख्यायकत्वेन कालाभिधायित्वे द्वे अहनी जातस्येति विगृह्य जातेन परिमाणिना द्विशब्दाहःशब्दौ कालाभिधायिनौ समस्येते। पूर्वस्य पदस्योत्तरपदनिमित्तायास्तत्पुरुषसंज्ञायाः प्रवर्तनात् 'न संख्यादेः समाहारे' (पा. ५. ४. ८९.) इति प्रतिषेधाभावात् 'अह्नोऽह्न एतेभ्यः' (पा. ५. ४. ८८.) इति समासान्तसिद्धौ द्व्यह्नजात इति विवक्षितरूपसिद्धिः। अथ राजगोक्षीरमित्यत्रापि कथं न समासान्तः? गोशब्दस्य युगपत् पूर्वोत्तरपदापेक्षायामसामर्थ्यात्। द्व्यह्नजातः इत्यत्रापि तुल्यमिति चेत्, तन्न; उत्तरपदयोग एव द्विगोराम्नानात्। अपि च, द्वे अहनी इति द्वे अपि प्रथमान्ते; राज्ञो गौरिति द्वे अपि षष्ठ्यन्ते; अस्ति च प्रथमान्तषष्ठ्यन्तयोर्विशेषः—प्रथमान्तं ह्यनुपजातव्यतिरेकत्वान्निरौत्सुक्यं नान्यदपेक्षते; षष्ठ्यन्तं पुनरुद्भूतव्यतिरेकत्वात् परोपकारायौत्सुक्येन प्रवर्तमानं नानवाप्योपकार्यं विरमति। एवं च सापेक्षत्वादसामर्थ्ये समासः कथमिति चेत्, गमकत्वात्; यथा—सूर्यमपि न पश्यन्त्यसूर्यंपश्या राजदाराः, न पुनर्गीयन्ते अपुनर्गेयाः श्लोकाः, श्राद्धं न भुङ्क्ते अश्राद्धभोजी ब्राह्मणः, अशूद्रान्नभोजी, एवमलवणभोजी, एकान्नविंशतिः; यथा—अवतप्ते नकुलस्येव स्थितमवतप्तेनकुलस्थितं तवैतदिति। बहुव्रीहिद्वन्द्वौ द्वाभ्यां त्रिभिर्बहुभिश्च यथा—चित्रगुः, कण्ठेकालः, प्लक्षन्यग्रोधौ, पाणिपादम्, पञ्चगवधनः, मत्तबहुमातङ्गम्, शङ्खदुन्दुभिवीणाः, धवखदिरपलाशम्, इति। अत्र 'अनेकमन्यपदार्थे' [पा. २. २. २४.] बहुव्रीहिः, 'चार्थे द्वन्द्वः' [पा. २. २. २९.] इति च स्मृतिः; उक्तं च—

सुसूक्ष्मजटकेशेन सुनताजिनवाससा।
समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिध्यति॥

द्वन्द्वो यावद्भिरारब्धः प्राधान्यं तत्र तावताम् ।
इतरेतरयोगे स्यात् समाहारे तु संहतेः ॥

ननु च, शोभनाः सूक्ष्मा जटाः केशा अस्य, शोभनम् नतमजिनं वासोऽस्य, सञ्जातान्यन्तेषु शितिरन्ध्राण्यस्येति कर्मधारयादिगर्भा एते बहुव्रीहयः; तत्र सुसूक्ष्मजटकेशेन सुनताजिनवाससेत्येतयोर्मध्यपदस्योत्तरपदेन पूर्वपदेन वा कर्मधारयम्, अन्त्यस्य तूत्तरपदेनैव सप्तमीतत्पुरुषं विधाय द्वयोरपि वृत्तौ बहुव्रीहिः कस्मान्न क्रियते । उच्यते—पूर्वयोः पूर्वपदेन कर्मधारयानुपपत्तिः, असामानाधिकरण्यात्; न हि द्वयोरपि विशेषणयोः सामानाधिकरण्यं भवति । उत्तरेण तु 'विशेषणं विशेष्येण' [पा. २. १. ५७.] इति सामानाधिकरण्ये भवति कर्मधारयः; किं तु न तदुत्तरकालमन्यपदार्थे विवक्षितार्थसिद्धिः; तथा हि सति, सूक्ष्मजटासंबन्धनिबन्धनमेव केशानां शोभनत्वमुपलभ्येत न तु स्वाभाविकम्, नतिनिमित्तमेव चाजिनवाससश्चारुत्वं गम्यते न तु नैसर्गिकम् । अन्त्ये पुनरन्तेषु इत्येतस्य सापेक्षत्वादसामर्थ्ये सति नोत्तरपदेन सप्तमीतत्पुरुषः; अन्तेषु शितिरन्ध्राणि इति ह्युक्ते, कस्यान्तेष्वित्यपेक्ष्यं स्यात्; तच्च शित्यर्थे उत्पद्यमाने बहुव्रीहावेवोपपन्नं भवति—सञ्जातान्यन्तेषु सूक्ष्मच्छिद्राण्यस्येति, न पुनस्तत्पुरुषे । ननु च, दृश्यते द्वयोरपि विशेषणत्वे सापेक्षत्वे च समासः; तद्यथा—खञ्जश्चासौ कुब्जश्च खञ्जकुब्जः, भ्रातुर्भार्या भ्रातृभार्या देवदत्तस्येति । उक्तमत्राचार्यैः । किमुक्तम्? कस्य चित् खञ्जो निर्ज्ञातः कस्य चित् कुब्ज इति प्रधानोपसर्जनभावाद्भवत्येव विशेषणविशेष्यभावः; अपि च

संबन्धिशब्दः सापेक्षो नित्यं सर्वः प्रवर्तते ।
स्वार्थवत्सा व्यपेक्षाऽस्य वृत्तावपि न हीयते ॥

यथा पितुः पिता पितामहो देवदत्तस्येति । इह तु सूक्ष्मजट इत्येतदन्यपदार्थ एवाम्नायते; नतमित्येतदपि क्रियाभिधायित्वेन गुणवचनत्वादाश्रितमेव भवति । सु इत्येतत्पुनरव्ययं शोभनार्थे वर्तमानं समस्यते; तस्य चास्तां द्रव्यवचनत्वम्; गुणवचनत्वेऽपि विप्रतिपत्तिः, अव्ययानामसत्त्वार्थवाचित्वात् । केचित् पुनस्तत्रापि विवदन्ते—द्योतका हि किलैते न वाचका इति; समासश्च 'सुप् सुपा' (पा. २. १. ४.) इति द्योतकानामपि भवति । मा भूत् पूर्वयोः कर्मधारयः; अन्त्ये पुनरन्तशब्दस्य संबन्धिशब्दत्वेन भ्रातृभार्यादिवत् कथं न तत्पुरुषः? उच्यते—यद्यपि संबन्धिशब्दाः सापेक्षत्वेऽपि समस्यन्ते, तथाऽपि यत्र संदेहविपर्यासादयो न जायन्ते तत्रैव तदुत्पत्तिः; अत्र त्वन्तशितिरन्ध्राणीत्युक्ते सन्देहः—किमन्तेषु शितिरन्ध्राण्यस्य, उत अन्तशितिनी[तीनि]रन्ध्राणि इति । अथ यदा सुष्ठु सूक्ष्मजटाः केशाः अस्येति

विग्रहः, तदा भवितव्यं पूर्वपदयोः कर्मधारयेण। न भवितव्यम्। किं कारणम्? स्वरे दोषः स्यात्; बहुव्रीहौ पूर्वपदप्रकृतिस्वरं बाधित्वा समासस्यान्त उदात्त इत्यन्तरङ्गत्वादवयवसमासस्वरः प्राप्नोति, तदाह—

सुसूक्ष्मजटकेशादौ समासावयवो यदि।
स्यात्स्यात्तत्रान्तरङ्गत्वाद्बाधकोऽवयवस्वरः॥

न चेष्यते। का पुनरत्र कर्मधारयबाधायामुपपत्तिः? 'विशेषणं विशेष्येण बहुलम्' [पा. २. १. ५७.] इति बहुलग्रहणमेव; उक्तं च—

या सामान्याश्रया संज्ञा विशेषविषया च या।
बहुलग्रहणान्नास्ति प्रवृत्तिरुभयोस्तयोः॥

अतश्च यत्र द्वे अपि विशेषसंज्ञे, तत्रोत्तरपदे नित्यमेव द्विगुर्द्वन्द्वश्च समासो भवति; तद्यथा—पञ्चगवप्रिय इति, छत्रोपानहप्रिय इति। यत्र किञ्चित्सामान्यं कश्चिच्च विशेषः, तत्र विकल्पेन; यथा—राजगवीक्षीरम्, राजगोक्षीरम् इति। यत्रैकतः सामान्यमन्यतो विशेषः, तत्र न भवत्येव; यथा—सुसूक्ष्मजटकेशेन सुनताजिनवाससा इति; अत्र बहुव्रीहिरिति विशेषसंज्ञायामवयवयोः 'विशेषणं विशेष्येण बहुलम्' इति या समाससंज्ञा सा 'सुप्सुपा' इति तत्पुरुषादिभेदापरामर्शेन भवन्ती सामान्यसंज्ञेत्युच्यते। ननु 'द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्' इति महावार्तिककारः; अयमपि च तत्पुरुष एवेति कस्मादिहापि समासो न भवति? उत्तरपदोपादानात् उत्तरपद एवाम्नायेत सोऽत्र तत्पुरुषो ग्रहीतव्यः; यथा द्व्यहजातः, पञ्चगवधनः इति। द्वन्द्वः पुनरनुत्तरपद एवेति बहुव्रीहिविषयेणोत्तरपदेन सर्व एव गृह्यते। किमर्थं पुनरेवमुच्यते यावता बहुलग्रहणेनैव सिद्धम्? समुदायवृत्ताववयवानां मा कदाचिदवृत्तिर्भूदिति। तथापि न वक्तव्यम्; इह द्वौ पक्षौ—वृत्तिपक्षश्च अवृत्तिपक्षश्च; यदा वृत्तिः तदा सर्वेषां वृत्तिः, यदा तु न वृत्तिः तदा सर्वेषामवृत्तिः इति। नैवम्; अस्त्यत्र विशेषः; तथाहि—पञ्चगवप्रिय इत्यादौ नास्य पञ्चसंख्यामात्रं प्रियं नापि गोमात्रम्, किं तर्हि पञ्चसंख्योपलक्षिताः काश्चिदेव गावः, यथा पञ्चाम्राः सप्तर्षयः, इति। तच्च द्विगौ पूर्वमसति दुरुपपादमेव भवति। एतेन छत्रोपानहप्रिय इत्येतदपि व्याख्यातम्; तत्रापि युगपदधिकरणवचनद्वन्द्वमन्तरेण नाभिवाञ्छितसिद्धिः। न ह्यस्योपानन्मात्रमेव प्रियम्, अपि तु छत्रमपि; उपानच्छब्दादेव च परः प्रियशब्दो निशम्यमानः न द्वन्द्वं विना छत्रमुपग्रहीतुं शक्नोति। तस्मादनाक्षेप इति। सुसूक्ष्मजटकेशादिना च मत्तबहुमातङ्गं वनम्

इत्यादावप्यनेकमेव पदमित्युक्तं भवति । अत्रापि मत्तबहवो बहुमातङ्गा इत्यपि न भवति । किं कारणम्? 'बहुगणवतुडति संख्या' [पा. १. १. २३.] इति बहुशब्दस्य संख्यावाचित्वात्, संख्यापूर्वस्य च कर्मधारयस्य द्विगुत्वात्, द्विगोः पुनः तद्धितार्थोत्तरपदसमाहारेष्वेव भावात्, यथा पञ्चकपालः, त्रिलोकहर्म्यम्, पञ्चपूली इति । कथं तर्हि सप्तर्षयः, पञ्चाम्राः इति । 'दिक्संख्ये संज्ञायाम्' [पा. २. १. ५०.] इति संज्ञायामेव तद्भवति । ननु च माभूत्तद्धितार्थः उत्तरपदं वा, तथाऽपि बहुमातङ्गमिति समाहारे भविष्यति—बहवो मातङ्गाः समाहृताः बहुमातङ्गम्; ततश्च मत्तं बहुमातङ्गमस्मिन्वने तन्मत्तबहुमातङ्गं वनमिति बहुव्रीहिर्भविष्यति । उच्यते—अथ समाहार इति कः शब्दार्थः? ननु समाङ्पूर्वाद्धरतेः कर्मणि घञ्—समाह्रियत इति समाहारः । यद्येवं पञ्च कुमार्यः समाहृताः—पञ्चकुमारि, दशकुमारि—इति 'गोस्त्रियोरुपसर्जनस्य [पा. २. १. ४८.]' इति ह्रस्वत्वं न प्राप्नोति । समासार्थस्यानेकत्वात्, 'द्विगुरेकवचनम्' [पा. २. ४. ९.] इत्येतदपि वक्तव्यं भवति । एवं तर्हि भावसाधनो भविष्यति—समाहरणं समाहार इति । अथ भावसाधनेन किमभिधीयते? यत्तदौत्तराधर्यम् । कः पुनः पञ्चगवं पञ्चपूली, इत्यादौ गवादीनां समाहारः? यत्तदार्जनं, क्रयणम्, भिक्षणम्, अवहरणम् वा । यद्येवं विक्षिप्तेषु पूलेषु चरन्तीषु गोषु न सिध्यति । तर्हि समभ्याशीकरणं समाहारः । एवमपि पञ्चग्रामी, षण्णगरी, इत्यादेरनुपपत्तिः । किं कारणम्? अभ्याशीकरणार्थे समाहारशब्दे समिति समन्तादित्यभिविधौ वर्तते, आङाभिमुख्ये; हरतिर्देशान्तरप्रापणे इति । नावश्यं हरतिर्देशान्तरप्रापणे एव वर्तते । किं तर्हि? सादृश्येऽपि—मातुरनुहरति, पितुरनुहरतीति । अथ वा—पञ्चग्रामी षण्णगरीति नेदमियत्येवावतिष्ठते, अवश्यं ह्यसौ ततः किञ्चिदाकाङ्क्षति, क्रियां गुणं वा; यदाकाङ्क्षति तदेकं समाहार इति । अयं तर्हि, भावसाधने सति दोषः—पञ्चपूली आनीयतामिति द्रव्यस्यानयनं न प्राप्नोति । नैष दोषः; तद्यथा गौरनुबन्ध्योऽजोऽग्नीषोमीय इति जातौ चोदितायां तत्रासंभवादालम्भनप्रोक्षणविशसनादीनि द्रव्ये भवन्ति, इहापि भावानयनस्यासंभवाद्द्रव्यस्यानयनं भविष्यति; अव्यतिरेकाद्वा—न हि समूहिभ्यः समाहारलक्षणः समूहो व्यतिरिक्तो भवति । एवं तर्हि बहुमातङ्गमिति समाहारे, एष दोषो भवति—"अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते" इति पञ्चपूलीवदीकारान्तत्वं प्राप्नोति; न वाऽयं पात्रादिषु पठ्यते, येन चतुष्पात्रत्रिभुवनादिवत्तन्निषेधो भविष्यति; नाप्याबन्तः, येन पञ्चखट्वी पञ्चखट्वम् इत्यादिवद्विकल्पोऽवकल्पेत । ननु च द्विगावपीकारो न दृश्यते, यथा एकपुत्रः एकभिक्षेति । नायं द्विगुः । किं तर्हि? "पूर्वकालैकसर्वजरत्पुराण" [पा. २. १. ४९.] इत्यादिना कर्मधारयः । किं च भोः संख्यापूर्वोऽपि द्विगुर्न भवति? बाढम्, तस्य तद्धितार्थोत्तरपदसमाहारेष्वेव भावात् । न चेह तद्धितार्थ उत्तरपदं वा विद्यते; न चैकस्य समाहारः संभवति । यदा तु सामर्थ्यातिशयादेकस्मिन्नपि समूहारोपणं,

तदा भवत्येव, यथा एकापूपी एकशाटीति । किं पुनर्द्विगुसंज्ञा प्रत्ययोत्तरपदयोर्भवति ? एवं तावत् । एतर्हीतरेतराश्रयत्वादप्रसिद्धिः । कथमितरेतराश्रयत्वम् ? द्विगुनिमित्ते प्रत्ययोत्तरपदे प्रत्ययोत्तरपदनिमित्ता च द्विगुसंज्ञेति । एवं तर्हि, अर्थे इति वक्ष्यामि । अर्थे चेत्तद्धितानुत्पत्तिः बहुव्रीहिवत्; तत्र यथा चित्रगुः शबलगुः इति बहुव्रीहिणोक्तत्वान्मत्वर्थस्य मत्वर्थीयो न भवति, एवं द्वैमातुरः पाञ्चनापितिः इत्यादौ तद्धितार्थस्य द्विगुनोक्तत्वात्तद्धितोत्पत्तिर्न प्राप्नोति । यथेच्छसि तथाऽस्तु; अस्तु तावत् प्रत्ययोत्तरपदयोरिति । ननूक्तमितरेतराश्रयत्वादप्रसिद्धिरिति । नैष दोषः; नेदं तुल्यमन्यैरितरेतराश्रयैः, शब्दनित्यत्वात् । ननु च न संज्ञा नित्या; किं तर्हि ? शब्दः । यद्येवं भाविनी संज्ञा विज्ञास्यते; तद्यथा—कश्चित्तन्तुवायमाह, अस्य सूत्रस्य शाटकं वयेति; स पश्यति—यदि शाटको न वातव्यः, अथ वातव्यो न शाटकः, शाटको वातव्यश्चेति विप्रतिषिद्धम्, भाविनी तु खल्वस्य संज्ञाभिप्रेता, स मन्यते—वातव्यं यस्मिन्नुते शाटक इत्येतद्भवतीति । एवमिहापि तस्मिन् द्विगुर्भवति यस्याभिनिर्वृत्तस्य प्रत्ययः उत्तरपदमित्येते संज्ञे भविष्यत इति । अथवा पुनरस्त्वर्थ इति । ननु चोक्तमर्थे चेत्तद्धितानुत्पत्तिः बहुव्रीहिवदिति । नैष दोषः; नावश्यमर्थशब्दोऽभिधेय एव वर्तते; किं तर्हि ? स्यादर्थेऽपि; तद्यथा—दारार्थं भिक्षामहे, जनार्थं भिक्षामहे; दारा नः स्युः, जना नः स्युः, इति । एवमिहापि तद्धितार्थे द्विगुर्भवति, तद्धितः स्यादिति । द्विगोर्वा लुग्वचनं ज्ञापकम्; यदयं "द्विगोर्लुगनपत्ये" (पा. ४. १. ८८.) इति द्विगोस्तद्धितस्य लुकं शास्ति, तज्ज्ञापयति—उत्पद्यते द्विगोस्तद्धित इति । यद्येवं समाहारसमूहयोरविशेषात् समाहारग्रहणमनर्थकम्, "तस्य समूहः" (पा. ४. २. ३७.) इति तद्धितार्थेनैव कृतत्वात्; तथा हि समाहारः समूह इत्यविशिष्टावेतावर्थौ; तत्र समूह इव समाहारेऽपि तद्धितार्थे द्विगुः इत्येव भविष्यति । यदि तद्धितार्थे द्विगुर्भवतीत्युच्यते, तद्धितोत्पत्तिः प्राप्नोति । उत्पद्यताम्; लुग्भविष्यति । लुक्कृतानि प्राप्नुवन्ति । कानि पुनस्तानि ? पञ्चपूली दशपूली इति; 'न तद्धितलुकि' (पा. ४. १. २२.) इति ङीप्प्रतिषेधः प्राप्नोति; पञ्चगवं दशगवमिति 'गोरतद्धितलुकि' इति टच् न प्राप्नोति । नैष दोषः; अविशेषेण द्विगोः ङीप् भवतीत्युक्त्वा अपरिमाणबिस्ताचितकम्बल्येभ्यः समाहारे इति वक्ष्यामि; अविशेषेण च गोष्टच् भवतीत्युक्त्वा द्विगोः समाहारे इति वक्ष्यामि; तदुभयमपि नियमार्थं भविष्यति समाहार एव नान्यत्रेति । एवं तर्हि, अभिधानार्थं समाहारग्रहणम्; समाहारेणाभिधानं यथा स्यात् न तद्धितार्थेन । यदि स्यात् को दोषः स्यात् ? तद्धितोत्पत्तिः प्रसज्येत । प्रसज्यताम्; लुग्भविष्यति । लुक्कृतानि प्राप्नुवन्ति । सर्वाणि परिहृतानि । न सर्वाणि परिहृतानि; पञ्चकुमारि दशकुमारीति "लुक् तद्धितलुकि" (पा. १. २. ४९.) इति ङीपो लुक् प्रसज्यत इति । ननु च यदि तद्धितार्थे द्विगुः इत्युच्यते पञ्चखट्वः दशखट्वः इति

मत्वर्थेऽपि द्विगुसंज्ञायां "द्विगोः" (पा. ४. १. २१.) इतीकारः प्राप्नोति। बहुव्रीहिसंज्ञया द्विगुसंज्ञाया बाधितत्वान्न भविष्यति; समानाधिकरणानां मत्वर्थे बहुव्रीहिर्भवति। यद्युत्तरपदे द्विगुरित्युच्यते, उत्तरपदोक्तिर्वक्तव्या। इयमुच्यते—"उत्तरपदेन परिमाणिना द्विगोः समासवचनम्"; द्वौ मासौ जातस्य द्विमासजातः, द्वे अहनी जातस्य द्व्यहजात इति। किमुच्यते परिमाणिनैवेति, न पुनरन्यत्रापि; तद्यथा—पञ्चगवप्रियः पञ्चगवधन इति। अन्यत्र समुदायस्य बहुव्रीहित्वादुत्तरपदं प्रसिद्धमेव; तथा हि—"अनेकमन्यपदार्थे" (पा. २. २. २४.) समस्यते, बहुव्रीहिश्च समासो भवति। अथ द्वन्द्वस्य का वार्ता? द्वन्द्वोऽग्रतो विशेषेण व्याकरिष्यत इति। अथ बहुभिर्बहुव्रीहिः—

'चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य'। इति। (वेणीसंहारम् १.२१.)

तत्र चञ्चद्भ्यां भुजाभ्यां भ्रमितायाश्चण्डाया गदायाः अभिघातेन संचूर्णितमूरुयुगलमस्येति विग्रहः। न चैतद्वाच्यं समानाधिकरणानामेव बहुव्रीहिः; "सप्तमीविशेषणे बहुव्रीहौ" (पा. २. २. ३५.) इति ज्ञापकेन वैयधिकरण्येऽपि बहुव्रीहेः स्मरणात्। एतेन सर्वपदप्रधानो द्वन्द्वोऽपि व्याख्यातः; यथा—

'सूर्यानलानिलहिमांशुधनेशशक्रप्रेताधिनाथवरुणाः करुणास्पदं नः।' इति॥

ननु च अन्यपदार्थे बहुव्रीहिः स्मर्यते; तत्र चित्रगुर्देवदत्तः इति देवदत्तादेरनुप्रयोगो न प्राप्नोति; न हि चैत्रादिशब्दप्रयोगादवधृतेषु चैत्रादिषु पुनश्चैत्रादिश्रुतयः प्रयुज्यन्ते। नैवम्; चित्रगुशब्दः चित्रगवीनां स्वामिसामान्यमभिधत्ते; तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः। चित्रगुः कः? देवदत्त इति; यत्र त्वसाधारणविशेषणादिभिर्विशेष एव समासः तत्रानुप्रयोगो न भवत्येव, यथा—त्रिलोचनः, शूलपाणिरिति। एवं तर्हि, सामान्यवचनानामनुप्रयोगस्याप्राप्तिः; यथा—चित्रगु सर्वम्, चित्रगु विश्वम्, इति। सामान्यमपि यथा विशेषः; तथा हि—यथा चित्रगुशब्दादिप्रयोगे विशेषान्तराणां निवृत्तिः, तथा सर्वादिशब्दप्रयोगे विशेषाणां निवृत्तिः प्रतीयते। यदि वा, चित्रा गावोऽस्य देवदत्तस्येति षष्ठ्यर्थस्य समासेनाभिधानात् षष्ठी नानुप्रयुज्यते; संबन्धी तु न समासोपादान इत्यनुप्रयुज्यते। एवं तर्हि, विभक्त्यर्थाभिधायिनो बहुव्रीहिपदस्य देवदत्तादिभिर्द्रव्यवचनैः सामानाधिकरण्यं न प्राप्नोति। मतुब्लोपाद्भविष्यति। नैवम्; मतुपोऽपि संबन्धार्थत्वात् द्रव्यवचनैरसामानाधिकरण्यमेव। न च बहुव्रीहेः विभक्त्यर्थाभिधायिनो मतुप्प्रत्ययो विधातुं शक्यते; स हि प्रथमासमर्थादस्त्युपाधिर्विधीयते; न च विभक्त्यर्थवृत्तेर्बहुव्रीहिपदस्यास्त्यादिक्रियाभिः सामानाधिकरण्येन संबन्धो भवति। अथ, अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्न इति सामानाधि-

करण्यमुपपत्स्यते । तन्न ; अभिहितोऽप्यसौ यतो यत्रेत्यादिवन्न स्वरूपं हास्यति । एवं तर्हि, यथा—जातौ पदार्थे जातेः कार्यमुच्यमानमसंभवात् तत्सहचरितासु व्यक्तिषु निविशते, तथा बहुव्रीह्यर्थे संबन्धे सामानाधिकरण्यक्रियायोगादिकार्यं प्रयुज्यमानं तदाश्रये भविष्यति ; एवं च सोऽयमित्युपचरितसंबन्धेषु संबन्धिषु बहुव्रीहिपदैरभिधीयमानेषु, शुक्लादिविशेषणानामिवाश्रयतो लिङ्गवचनान्यपि न विरोत्स्यन्ते । यदि वा, अन्यपदार्थे इत्यर्थग्रहणसामर्थ्यात् सद्रव्यस्य सलिङ्गस्य ससङ्ख्यस्य चोपादानं भविष्यति, न विभक्त्यर्थमात्रस्य । कथं पुनरर्थशब्दोपादानादयमर्थो लभ्यते ? श्रूयताम्—अन्यपद इतीयत्युच्यमाने पदे वृत्त्यसंभवात् पदसहचरितां यां कांचिदर्थमात्रां पदशब्दो लक्षयेत् ; पदत्वस्य वा निमित्तत्वेन प्रत्यासन्नोपकारिणं विभक्त्यर्थं प्रत्याययेत् ; सोऽयमेवं सिद्धे समीहिते, यदर्थग्रहणं करोति तेनैतत् ज्ञापयति—यावानर्थश्रुतेः पदविषयोऽर्थः प्रतीयते, तावान् सर्वोऽपि त्यागनिमित्ताभावादुपादीयत इति । अपि च, पदमर्थस्य परिच्छेदायोपादीयते ; अर्था हि प्रकृत्यादीनां सामान्येन प्रसक्ताः पदेनावच्छिद्यन्ते पदावधिकोऽर्थ उपादेय इति ; तत्र यथा वाक्यार्थस्यानाश्रयणमाधिक्यात् तथा पदार्थैकदेशस्यापि, न्यूनत्वात् । तदेवमर्थग्रहणसामर्थ्यात् सलिङ्गः ससङ्ख्यः सद्रव्यश्च समर्थः पदार्थ उपादीयते । ननु च बहुव्रीहिणा समस्तपदार्थाभिधाने यथा संबन्धाभिधायिका षष्ठी न प्रयुज्यते, तथा संख्याभिधायिनः स्वादयः लिङ्गाभिधायिनष्टाबादयो वा न प्रयुज्येरन् । उच्यते—एकादिपदैरिव वृत्तिपदैरभिहिताऽपि न संख्या संख्याकार्यं विहनिष्यति ; न हि षष्ठ्यादिविधान इव वचनविधावनभिहिताधिकारो विद्यते, कर्मादयश्च कारकविशेषाः प्रत्याययितव्या[1] इत्यवश्यविधेया द्वितीयादयः ; प्रथमा तु वचनग्रहणसामर्थ्यात् न केवला प्रकृतिः प्रयोक्तव्या इति समयाद्वा प्राथमिककल्पिकी भविष्यति । स्यादेतत् ; यथा अभिहिता एकत्वादयो वचनव्यवस्थानिमित्तं तथाऽभिहितः संबन्धोऽपि षष्ठीनिमित्तं भवति । तदयुक्तम्, अनभिहिताधिकारात् । अपि च, संबन्धोपसर्जनं प्रातिपदिकार्थो वृत्तिशब्देनाभिधीयते ; न चायं षष्ठीविषयः, तस्याः प्रातिपदिकार्थोपसर्जने संबन्धे विधानात् । टाबादयस्तु स्वार्थिकत्वादभिहितेऽपि लिङ्गे भवन्ति ; तदुक्तम्—'सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात् स्वार्थे टाबादयः' इति (महाभाष्यम् ४. १. १. १.) । यदि वान्य एव वाक्यार्थो वृत्त्यर्थात् ; तथा हि—चित्रा गावोऽस्येत्यन्यपदार्थोपसर्जनाश्चित्रगव्यो वाक्येनाभिधीयन्ते ; चित्रगुरिति पुनर्वृत्तौ गवार्थोपसर्जनस्वामी प्रतीयते ; तत्र यदा निर्ज्ञातपराधीनतानां चित्रगवीनां स्वामिविशेषावच्छेदायान्यपदार्थ उपादीयते अस्यैता गाव इति, तदा बहुव्रीहिर्न भवति ; यदा तु ताश्चित्रा गावः स्वामिनो विशेषाभिधानाय प्रत्यवमृश्यन्ते—चित्रगवीनामासामयं स्वामीति, तदा बहुव्रीहिर्भवति—चित्रगुः शबलगुरिति ; तामेव च स्वामिविशेषणतां स्फुटमुपदर्शयन्तो निदर्शयन्ति—यस्य चित्रा गावः स चित्रगुः, यस्य शबलाः स शबलगुरिति । उपलक्षणं चात्र षष्ठी ; तेन

कर्मकर्तृप्रवचनेनाप्रथमाया अपि बहुव्रीहिर्वक्तव्यः--ऊढो रथोऽनेन ऊढरथोऽनड्वान्, उद्धृतः ओदनः अस्याः उद्धृतौदना स्थाली, उपहृतः पशुः अस्मै उपहृतपशू रुद्रः, आरूढो वानरोऽमुम् आरूढवानरो वृक्षः, प्राप्ता अतिथयोऽस्मिन् प्राप्तातिथिर्ग्रामः, सिद्धः साधकोऽनया सिद्धसाधका विद्येति। अथ अप्रथमाया इति किमर्थम्? इह माभूत्—वृष्टे देवे गत इति। अथेह कस्मान्न भवति--वृष्टे देवे गतं पश्येति? बहिरङ्गाऽत्राप्रथमा। यद्येवं षष्ठ्याद्यन्तरङ्गत्वे चित्रगोर्देवदत्तस्येत्यादौ पुनः षष्ठ्यादयो न स्युः। बाह्यं संबन्धिनमपेक्ष्य भविष्यन्ति। अथ, यथा चित्रगुप्रभृतिभ्यः षष्ठ्यादयः, तथा यतो यत्रेत्यादिभ्यः पञ्चमीसप्तम्यादयोऽपि कस्मान्न भवन्ति? उच्यते--तसिल्त्रलादिभिः पञ्चमीसप्तम्यादीनामभिहितोऽर्थोऽनन्तर्भूतः। चित्रगुप्रभृतिषु तु बहुव्रीहिणाभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्न इति। अथेह बहुव्रीहिः कस्मान्न भवति—पञ्चभिर्भुक्तमस्य? बहुव्रीहिः समानाधिकरणानामेवेति स्मरणात्। यद्येवम्, अस्तिक्षीरा, उच्चैर्मुखः, अभार्यः, प्रपर्णः, उष्ट्रमुखः, चन्द्रवदना, केशचूडः, सुवर्णालङ्कारः, चन्द्रशेखरः, शूलपाणिः, कण्ठेकालः, उरसिलोमेति बहुव्रीहिसंज्ञा न प्राप्नोति; तथा हि—आद्येषु चतुर्षु पूर्वपदमव्ययम्, तस्यासत्त्ववाचित्वात् सत्त्वभूतैः क्षीरादिभिः सह सामानाधिकरण्यं नास्ति; मध्यमेष्वपि विशेषणविशेष्यभावानुपपत्तेर्न सामानाधिकरण्यं घटते; अन्त्येषु तु सप्तम्यन्तप्रथमान्तयोरसामानाधिकरण्यं व्यक्तमेवेति। नैवम्, एतेष्वपि सामानाधिकरण्योपपत्तेः। तत्रास्तीति निपातो विभक्तिप्रतिरूप इति कालं पुरुषं संख्यां साधनं च न व्यभिचरति; उच्चैःशब्दस्यापि सत्त्ववचनत्वं दृश्यते—'किं पुनर्यस्तथोच्चैः' इति; अत एव एताभ्यामस्तितोच्चैस्त्वमिति भावप्रत्यया अपि; अभार्य इत्यादिषु दध्योदनादिवन्मध्यमपदलोपो व्यवस्थितविभाषया वृत्तिविषये द्रष्टव्यः; तेनायमर्थः संपद्यते—अस्ति क्षीरमस्याः अस्तिक्षीरा गौः, उच्चैर्मुखमस्य उच्चैर्मुखो मैत्रेयः, अविद्यमाना भार्या अस्य अभार्यः अविद्यमानभार्यो वा, प्रपतितानि पर्णानि अस्य प्रपर्णः, प्रपतितपर्णो वा। उष्ट्रमुखः चन्द्रवदना इत्येतयोस्तु उष्ट्रचन्द्रशब्दौ भूयोऽवयवसामान्ययोगातिशयादभेदोपचारेण मुखविशेषणं भवन्तौ गौणीं वृत्तिमनुभवतः। ननु किमुष्ट्रमुखयोर्मिथः सादृश्यम्? उष्ट्रशब्देनेहोष्ट्रमुखमभिधीयते; अवयवेऽप्यवयविवदुपचारो द्रष्टव्य इति। केशचूडः सुवर्णालङ्कारः इत्येतयोस्तु केशसंघाते केशशब्दो वर्तते, सुवर्णविकारे तु सुवर्णशब्दः, कारणे कार्योपचारात्। चन्द्रशेखरः शूलपाणिः इत्यत्र चन्द्रशूलोपलक्षितौ शेखरपाणी चन्द्रशूलशब्दाभिधेयौ; यथा—कुन्तान् प्रवेशय, यष्टीः प्रवेशयेति। कण्ठेकालः उरसिलोमा इत्येतयोस्तु कण्ठे स्थिताः कालाः अस्य, उरसि जातानि लोमान्यस्येति पदान्तरमध्याह्रियते; यथा—द्वारं द्वारम् इत्युक्ते अपाव्रियतां संव्रियतां वेति। एतेन 'सुबधिकारे अस्तिक्षीरेत्युपसंख्यानम्' 'अव्ययानां बहुव्रीहिर्वक्तव्यः' 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' 'समुदायविकारषष्ठ्याश्च' 'प्रादिभ्यो धातुजस्य वा' (महाभाष्यम् २. २. २४.) इत्यपि न वक्तव्यं भवति। ननु परिगणनार्थमप्येतदवश्यं

वक्तव्यम्, नैवम्; क्रियमाणेऽपि हि परिगणने यत्राभिधानं नास्ति न तत्र समानाधिकरणानामपि बहुव्रीहिः; तद्यथा—पञ्च भुक्तवन्तोऽस्येति। एवं तर्हि मत्वर्थग्रहणं करिष्यते—समानाधिकरणानां मत्वर्थे बहुव्रीहिर्भवतीति; तथाऽपि, ऊढो रथोऽनेन ऊढरथोऽनड्वान्, दक्षिणस्याश्च पूर्वस्याश्च दिशो यदन्तरालं सा दक्षिणपूर्वा, पुत्रेण सह सपुत्रः, केशेषु केशेषु च गृहीत्वा प्रवृत्तं युद्धं केशाकेशि, दण्डैश्च दण्डैश्च प्रहृत्य दण्डादण्डि, त्रिर्दशैते त्रिदशाः, इत्येवमादिभिरव्याप्तिरेव। तस्मात्सुदूरमपि गत्वाऽभिधानमेवाश्रयितव्यम्; अभिधानलक्षणा हि कृत्तद्धितसमासा इति कृतं परिगणनेन। अथ त्रिदशा इति कोऽस्य विग्रहः? त्रिर्दशैते त्रिदशा इति। 'संख्यासमासे सुजन्तस्य संख्येयप्रसिद्धिः इति; न हि सुजन्ता संख्याऽस्ति। अस्तु तर्ह्येवं विग्रहः—त्रयो दशत एते त्रिदशा इति। एवमप्यत्कारान्तस्य संख्येयप्रसिद्धिः; न ह्यत्कारान्ता संख्याऽस्ति। अस्तु तर्ह्ययमेव विग्रहः—त्रिर्दशैते त्रिदशा इति। ननु चोक्तं संख्यासमासे सुजन्तस्य संख्येयप्रसिद्धिरिति। नैष दोषः; सुजन्तस्य संख्येयप्रसिद्धिः; न चात्र समासे सुचं पश्यामः। किं तर्हि? वाक्ये। कुतः पुनरेतद्वाक्ये सुच् दृश्यते? अभिहितत्वात्; अभिहितः सुजर्थः। केन? समासेन। किं च भोः सुजर्थे समास उच्यते? नैवम्; सामर्थ्यादिह सुजर्थो गम्यते। कथम्? यावता संख्या संख्यया संख्यायते, स च क्रियाभ्यावृत्त्यर्थ उक्तः समासेनेति कृत्वा सुज् न भविष्यति' (महाभाष्यम् २. २. २५.)॥

प्रकृतिः प्रातिपदिकरूपाऽप्येषोपवर्णिता।
स्वरूपं प्रत्ययादीनां पृथक् पृथगथोच्यते॥

तत्र प्रतीयते अनेनार्थ इति प्रत्ययः; स त्रिधा—धातुप्रत्ययः, प्रत्ययप्रत्ययः, प्रातिपदिकप्रत्यय इति। तेषु सनादयः, तिबादयः, तुमुनादयः, तव्यादयः, ण्वुलादयः, उणादयश्चेति धातुप्रत्ययभेदाः। तत्र इच्छाप्रयोजकव्यापारादिक्रियासु क्रियासमभिहारादिषु च ये विधीयमानाः क्रियावचनत्वात् भूवादिवदेव प्रत्ययान्तरमपेक्षन्ते ते सनादयः; यथा—चिकीर्षति, अध्यापयति, पापच्यते, गोपायति, ऋतीयते, कामयते, इति। क्रियाप्रधानाः कर्तृकर्मणोः क्रियायां च ये विहिताः साध्यरूपापन्नक्रियाभिधायित्वेन प्रत्ययान्तरं नापेक्षन्ते ते तिबादयः; यथा—व्रजति देवदत्तः, पच्यते ओदनः, रज्यति वस्त्रम्, लूयते केदारः, चोरस्य रुजति, आस्यते युष्माभिः इति। अनुपात्तक्रमक्रियाभिधायिनोऽसत्त्वभूतार्थाः साध्यभावे ये विधीयन्ते ते तुमुनादयः; यथा—पक्तुमिच्छति, भुक्त्वा व्रजति, अधीत्य स्नाति, पायंपायमास्ते, चोरंकारमाक्रोशति, चकासाञ्चकार इति। प्रायेण भावकर्मणोः कर्त्रादिषु च ये विधीयन्ते ते तव्यादयः; यथा गन्तव्यं भवता, करणीयः कटः, कृतो भवता, लूयमानः केदारः, दुर्गमो मार्गः, वास्तव्यो लोक इति। प्रायेण कर्तरि कर्मादिषु च ये विधीयन्ते ते ण्वुलादयः;

यथा पाचकः पुमान्, सोमं पवमानः, पचन्यवागूम्, कन्यामलङ्करिष्णुः, पादहारकः पङ्कः, प्रियंकरणं शीलम्, इति। सर्वेकारकेषु सिद्धभावे च ये विधीयमानाः प्रायेण द्रव्यवचनत्वं लभन्ते ते उणादयः; यथा—शीतो वायुः, वत्सला धात्री, तीक्ष्णं दात्रम्, वृद्ध उपाध्यायः; रम्यः प्रासादः, पाको वर्तत इति। यदादयः, घादयः, मवादयः, फगादयः, युजादयः, ढगादयश्चेति प्रत्ययप्रत्ययभेदाः। तेषु भवापत्यस्वार्थमत्वर्थादिषु सुबन्तेभ्यो य उत्पद्यन्ते ते यदादयः, यथा—अश्वत्थः, पूर्वाह्णेतनम्, चिरंतनम्, आमुष्यायणः, त्वयका, शुभंयुः इति। प्रकर्षापकर्षकुत्साप्रशंसादिषु तिङन्तेभ्यो य उत्पद्यन्ते ते घादयः, यथा—पचतितराम्, गच्छतितमाम्, जल्पतिकल्पम्, स्पृशतिदेश्यम्, पचतकि, पचतिरूपम्, इति। निवृत्तस्वार्थमत्वर्थादिषु कृद्भ्यो य उत्पद्यन्ते ते मवादयः; यथा—कृत्रिमम्, पाकिमम्, सांराविणम्, व्यावक्रोशी, जित्वरी, श्येनंपाता इति। जीवद्वंश्यप्रशस्तकुत्सितस्वार्थादिषु अपत्यादितद्धितान्तेभ्यो य उत्पद्यन्ते ते फगादयः; यथा—गार्ग्यायणः, दाक्षायणः, वार्ष्यायणीयः, वार्ष्यायणिकः, आभिजित्यः, कौञ्जायन्यः इति। सिद्धभावताच्छील्योपाधिकर्त्रादिषु णिजादिधातुप्रत्ययान्तेभ्यो य उत्पद्यन्ते ते युजादयः; यथा—कारणा, अटाट्या, यायजूकः, सासहिः, यायावरः, चिकीर्षुः इति। अपत्याद्यर्थस्वार्थशक्तिसंख्यादिषु स्त्रीप्रत्ययान्तेभ्यो य उत्पद्यन्ते ते ढगादयः; यथा—गाङ्गेयः, यौवतेयः, वाराणसेयः, सुवधूकः, नद्याम्, खट्वायाम्, युवतयः, इति। टाबादयः, स्वादयः, तसिलादयः, कादयः, अणादयः, क्यजादयश्चेति प्रातिपदिकप्रत्ययभेदाः। तेषु प्रकृतिलिङ्गाभिधायिनः प्रातिपदिकाद्य उत्पद्यन्ते ते टाबादयः; यथा—खट्वा, सुदामा, कारीषगन्ध्या, ब्रह्मबन्धूः, कुमारी, युवतिः, इति। प्रकृत्यर्थसंख्याभिधायिनः प्रातिपदिकादेव य उत्पद्यन्ते ते स्वादयः, यथा—कुण्डं, कुण्डे, कुण्डाभ्याम्, कुण्डेभ्यः, कुण्डयोः, कुण्डेषु, इति। शक्तिमात्राभिधायिनः सोपाधिशक्त्यभिधायिनो वा सुबन्तप्रातिपदिकात् स्वार्थादिषु य उत्पद्यन्ते ते तसिलादयः; यथा—यतः, यत्र, कदा, पुरस्तात्, बहुशः, पुरुत्रा वसतीति। कुत्साप्रशंसातिशयानतिशयाद्युपाधेरनुपाधेश्च सुबन्तादेव प्रातिपदिकात् स्वार्थादिषु य उत्पद्यन्ते ते कादयः; यथा—अश्वकः, युष्मकाभिः, वैयाकरणरूपः, पटुतरः, कुटीरः, तार्तीयीकम्, इति। समर्थप्रातिपदिकात् संबन्धिकारकभावेषु य उत्पद्यन्ते ते अणादयः, यथा—औपगवः, तावकीनः, आक्षिकः, वामदेव्यम्, ब्राह्मणत्वम्, पौरोहित्यम्, इति। कर्मादिकारकोपहितक्रियेच्छाचारव्यर्थादिषु समर्थादेव प्रातिपदिकाद्य उत्पद्यन्ते ते क्यजादयः; यथा—चित्रीयते, पुत्रकाम्यति, श्येनायते, लोहितायति, कण्डूयते, मुण्डयति, इति॥

प्रकृतिप्रत्ययानामुपसर्गोपग्रहागमलोपवर्णविकारविकरणादिरूपः संस्कारः उपस्कारः। स च त्रिधा—प्रकृत्युपस्कारः, प्रत्ययोपस्कारः, उभयोपस्कारश्चेति। ते पुनर्भूषणसमवायाध्याहारवैकृतयत्नप्रतियत्नभेदात् प्रत्येकं षट्प्रकारा भवन्ति। तत्र प्रकृतेर्भूषणरूपा निरर्थकोपसर्गस्वार्थि-

कर्बेकलिपकाद्यः ; यथा—अध्यागच्छति, पर्यागच्छति, प्रलम्बते, निखञति इति ; यावकः, षाड्गुण्यम्, औपयिकम्, मानसम्, इति ; आली, मूढ्री, कमण्डलूः, चञ्चूः, इति । समवायरूपाः सार्थकोपसर्गसन्क्यङादयः, यथा—आशास्ते, प्रतिष्ठते, सुमनायते, दुर्मनायते, इति ; जुगुप्सते, गोपायते, ऋतीयते, कामयते, इति ; पुत्रीयति, पुत्रकाम्यति, श्येनायते, मुण्डयति इति । अध्याहाररूपाः सहाभिधायकोपसर्गद्विर्वचनसुडागमादयः ; यथा—अधीते, अध्येति, अनुरुध्यते, संग्रामयते, इति ; जञ्जप्यते, संपनीपद्यते, अरार्यते, उन्दिदिषति इति ; उपस्कुरुते, अपप्तत्, आस्थत्, मध्वस्याति, इति । वैकृतरूपाः वर्णव्यत्ययविपर्ययापायादयः ; यथा—निपिञ्चति, प्रणयति, यन्ति, उशन्ति इति ; तरुः, सिंहः, सिकताः, सक्तवः इति ; सन्ति, घ्नन्ति, घ्नन्ति, समगत, इति । यत्नरूपाः उपचयप्रसवसंवृत्यादयः ; यथा—यौति, मेद्यति, दीव्यति, निगूहति इति ; कीर्यते, पूर्वते, सौधातकिः, स्वायंभुवम्, इति ; आस्त, आस्ते अवोचत्, घटयति, इति । प्रतियत्नरूपाः विशेषादेशविधिनिषेधादयः ; यथा—आह, अघसत्, वध्यात्, अध्यगीष्महि, इति ; जप्यः, पित्र्यम्, गव्यम्, नाव्यम्, इति ; तितउः, प्रउगम्, कोकूयते, कथयति, इति ॥

प्रत्ययस्य भूषणरूपाः इडसुगीकक्कादयः ; यथा—सहिता, वरिता, भ्रुवै, भ्रूणाम्, इति ; देवासः, पारयामसि, तारिषत्, भवाति, इति ; तार्तीयीकम्, पीत्वाय, त्वयका, पचतकि, इति । समवायरूपाः स्यसिच्नुश्नीयुडादयः, यथा—करिष्यति, अकरिष्यत्, वक्ता, ब्रवीति, इति ; अपाक्षीत्, अपीपचत्, अशिषत्, अलिक्षत्, इति ; कृषीष्ट, कुर्यात्, कुर्वीत, करवामहै, इति । अध्याहाररूपाः प्रत्ययार्थविशेषकोपसर्गमयरवादयः ; यथा—सुमनायते, दुर्मनायते, अभिमनायते, अभिषेणयति, इति ; कृत्रिमम्, सांराविणम्, व्यावहासी, कौञ्जायन्यः, इति ; पचतितराम्, पचमानः, सर्वेषां, वृक्षाणाम्, इति । वैकृतरूपा आदेशसर्वादेशप्रत्ययादेशादयः ; यथा—गार्ग्यायणः, चान्द्रमसायनिः, गौधेरः, कौलेयकः, इति ; पवनः, पावकः, वृक्षस्य, वृक्षैः, इति ; वेद, विवेद, विद्वान्, विद्धि, इति । यत्नरूपा लुग्लुम्पनविलुम्पनादयः ; यथा—पचत्, जुहोति, पञ्चालाः, दधि, इति ; ददृशे, अद्राक्षीत्, कारकः, कामण्डलेयः, इति ; अग्निचित्, शुभंयाः, मूलखाः, अश्वति, इति । प्रतियत्नरूपा विशेषादेशविधिनिषेधादयः ; यथा—तस्थौ, वेद, प्रशाधि, जीवतात् इति ; उदपादि, राष्ट्रियः, आग्नेयः, स्त्रैणम्, इति ; सुभ्रूः, सुप्रेयसी, व्यतिहसन्ति, व्यतिगच्छन्ति इति । उभयोर्भूषणरूपा युष्मत्प्रभृतिप्रयोगादयः ; यथा—त्वं पचसि, युवां पचथः, यूयं पचथ, अहं पचामि, आवां पचावः, वयं पचामः, वायुर्वाति, देवो वर्षति, भज्यते शाखा स्वयमेव, अवकिरते हस्ती स्वयमेव, भूषयते कन्या स्वयमेव, ब्रूते कथा स्वयमेवेति । समवायरूपा विकरणादयः ; यथा—भवति, चोरयति, दीव्यति, सुनोति, तुदति, तनोति, रुणद्धि, क्रीणाति, स्वयं नमते, स्वयं दुग्धे, तप्यते तपः, लूयते

केदारः इति। अध्याहाररूपाः द्विरुक्त्यादयः, यथा—पायं पायं, पचतिपचति, ग्रामो ग्रामो रमणीयः, मूले मूले स्थूलाः, अग्रे अग्रे सूक्ष्माः, पूर्वं पूर्वं पुष्यति, प्रथमं प्रथमं पच्यते, ज्येष्ठं ज्येष्ठमुपवेशय, माषं माषं देहि, उपर्युपर्यास्ते, अहिरहिः बुध्यस्व इति। वैकृतरूपा वांनादयः; यथा—ग्रामो वां, ग्रामो नौ ग्रामो वः, ग्रामो नः, ग्रामस्ते, ग्रामो मे, ग्रामस्त्वा रक्षतु, ग्रामो मा रक्षतु, हैयङ्गवीनम्, मातुलः, क्षत्रियः, श्रोत्रियः इति। यत्नरूपा अनुप्रयोगादयः; यथा—अग्निसात् संपद्यते, भस्मसाद्भवति, ब्राह्मणसात् स्यात्, देवत्रा करोति; मर्त्यत्रा गच्छति, मनुष्यत्रा वसति, शुक्लीभवति, पटपटाकरोति, चकासांचकार, कारयामास, बिभरांबभूव, विदांकुर्वन्तु इति। प्रतियत्नरूपा विध्यनुप्रयोगादयः; यथा—रैपोषं पुष्यति, समूलकाषं कषति, जीवग्राहं गृह्णाति, पुरुषवाहं वहति, ऊर्ध्वशोषं शुष्कः, चूडकनाशं नष्टः, ओदनपाकं पक्वः, सुवर्णनिधायं निहितः, लुनीहि लुनीहीत्येवायं लुनाति, अधीष्वाधीष्वेत्येवायमधीते, राष्ट्रमट मठमट दूरमटेत्येवायमटति, सक्तून् पिब धानाः खाद ओदनं भुङ्क्ष्वेत्येवायमभ्यवहरति, इति। उपस्कारविशेष एव प्रकृतिसमीपोच्चारितं पदमुपपदम्, तत् त्रिधा—तिङुपपदम्, कृदुपपदम्, सुबुपपदं च। तेषु प्रथमं क्रियारूपम्, कारकरूपम्, नामरूपम्, अव्ययरूपम्, निपातरूपम्, उपसर्गरूपं च। तेषु क्रियारूपं यथा—एहि मन्ये रथेन यास्यसि, न मर्षयामि यत्तत्रभवान् वृषलं याजयेत्। कारकरूपं यथा—अश्वेन संचरते, दास्या संप्रयच्छते। नामरूपं यथा—कालो यद्भुञ्जीत भवान्, समयो यद्भुञ्जीत भवान्, वेला यद्भुञ्जीत भवान्। अव्ययरूपं यथा—कथं नाम तत्रभवान् वृषलं याजयेत्, नमते दण्डः स्वयमेव। निपातरूपं यथा—यावद्भुङ्क्ते, पुरा व्रजति। उपसर्गरूपं यथा—पराक्रमते, पराजयते इति। द्वितीयमपि क्रियारूपम्, कारकरूपम्, नामरूपम्, अव्ययरूपम्, निपातरूपम्, उपसर्गरूपं च। तेषु क्रियारूपं यथा—भोक्तुं व्रजति, भोजको व्रजति, गोदायो व्रजति, कर्तुमिच्छति इति। कारकरूपं यथा—कुम्भकारः, उत्तानशयः, शय्योत्थायम्, मूलकोपदंशम्, इति। नामरूपं यथा—कालो भोक्तुम्, समयो भोक्तुम्, ब्रह्मभूयम्, ब्रह्मोद्यम् इति। अव्ययरूपं यथा—दिवाकरः, दोषाकरः, मृषोद्यम्, ईषत्पानः, इति। निपातरूपं यथा—अलं कृत्वा, खलु कृत्वा, यावद्वेदम्, अन्यथाकारम् इति। उपसर्गरूपं यथा—प्रजवी, प्रसवी, विकत्थी, निराकरिष्णुः इति। तृतीयं क्रियारूपम्, कारकरूपम्, नामरूपम्, अव्ययरूपम्, निपातरूपम्, कर्मप्रवचनीयरूपं चेति। तेषु क्रियारूपं यथा—न त्वां तृणाय मन्ये, संतापाय प्रभवति, गोषु दुह्यमानासु गतः, क्रोशतः प्राव्राजीदिति। कारकरूपं यथा—

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥

केशेषु प्रसितः, ब्राह्मणेषु भुञ्जानेषु वृषला आसते, वृषलेष्वासीनेषु ब्राह्मणा भुञ्जते, इति। **नामरूपं यथा—गवां स्वामी, अन्नस्य हेतोर्वसति, पित्रा सदृशः, शिवं प्रजाभ्यः** इति। **अव्ययरूपं यथा—समया ग्रामम्, सह च्छात्रेण, नमो देवेभ्यः, दक्षिणाहि ग्रामात्** इति। **निपातरूपं यथा—हे देवदत्त, हा देवदत्तम्, विना विष्णुमित्रेण, ऋते यज्ञदत्तात्** इति। **कर्मप्रवचनीयरूपं यथा—वृक्षमनु विद्योतते, उपार्जुनं योद्धारः, अधि ब्रह्मदत्ते पञ्चालाः, अधि पञ्चालेषु ब्रह्मदत्त** इति॥

प्रकृतिप्रत्ययात्रेवमुपस्कारश्च दर्शितः।
क्रमादुपपदस्यापि स्वरूपमुपवर्णितम्॥

अव्ययानि निपाताश्च गतयश्च निरूपिताः।
कर्मप्रवचनीयाश्च सोपसर्गाः प्रकाशिताः॥

न केवलेह प्रकृतिः प्रयुज्यते
न केवलाः सुप्तिङ्ङणक्यजादयः।
भवत्युपस्कार इहापृथग्द्वयो-
र्द्वयार्थमेवोपपदं प्रयुज्यते॥

॥ इति महाराजाधिराज श्रीभोजदेवविरचिते शृङ्गारप्रकाशे प्रकृत्यादिप्रकाशो नाम प्रथमः प्रकाशः॥

द्वितीयः प्रातिपदिकादिप्रकाशः

प्रातिपदिकं त्रिधा—विभक्तावयवम्, अविभक्तावयवम्, अनुकरणं च। तत्र विभक्तावयवं त्रिधा—कृद्रूपम्, तद्धितरूपम्, समासरूपं च। तेषु भावकारकाभिधायिनो धातुप्रत्ययाः कृतः। तत्र धात्वर्थ एवापूर्वापरीभूतो भावः; यदाह—

कालानुपाति यद्रूपं धात्वर्थस्य क्रियेति तत्।
परितो यत् परिच्छिन्नं तद्भाव इति कथ्यते॥

स इह षोढा संभवति—सिद्धः, साध्यः, सिद्धासमाप्तः, साध्यासमाप्तः, सिद्धसाध्यः, साध्यसिद्धश्चेति। तेषु उद्भूतप्रत्ययांशत्वेन क्रियानुद्रेकात् सत्त्वभूतत्वे लिङ्गसंख्याद्युपग्राही 'कर्तृकर्मणोः कृति' (पा. २. ३. ६५.) इति संबन्धविभक्तेर्निमित्तं सिद्धः; यथा—आश्चर्यमिदमोदनस्य च पाको ब्राह्मणानां च प्रादुर्भावः, भेदिका काष्ठानां देवदत्तस्य, चिकीर्षा यज्ञदत्तस्य कटस्य इति। अत्र उभयप्राप्तौ कर्मण्येव इति नियमे उभयोः प्राप्तिर्यस्मिन् कृति इति व्याख्यानात्, अकाकारयोश्च नियमप्रतिषेधात्, कर्तर्यपि षष्ठ्येव भवन्ती भावस्य सिद्धतां द्योतयति। उद्भूतप्रकृत्यंशत्वेन क्रियोद्रेकादसत्त्वभूतत्वे लिङ्गसंख्याद्यनुपग्राही कर्तृकर्मणोः कारकविभक्तेरेव निमित्तं साध्यः; यथा—ओदनं भोक्तुं याति, स्वाध्यायमधीत्य स्नापयति, पयः पायं पायमास्ते इति। अत एव 'न लोक' (पा. २. ३. ६९.) इत्यादिना षष्ठी निषिध्यते। सिद्ध एव तद्धितानुबन्धी सिद्धासमाप्तः; यथा—व्यावक्रोशी, साङ्कूटिनम्, कृत्रिमम् इति। अत्र यथा आभिजित्यः, कौञ्जायन्यः इत्यादावणाद्यभिहितोऽप्यपत्यार्थः, तैत्तिरीयाः छागलेयिनः इत्यादौ छणाद्यभिहितोऽपि प्रोक्तार्थः, स्वार्थिकाध्येतृवेदितृविषयतद्धितोत्पत्तिमन्तरेण न समाप्यते, तथा व्यतिहाराभिविध्युपाधिको णजिनुणुक्तः शुद्धश्च कृत्यभिहितः सिद्धोऽपि भावः स्वार्थिकनिवृत्तार्थीयतद्धितोत्पत्तिमन्तरेण न समाप्यत इति सिद्धासमाप्तो भवति। साध्य एवानुप्रयोगानुबन्धी साध्यासमाप्तः; यथा—चकासाञ्चकार, विदाङ्कुर्वन्तु, रैपोषं पुष्यति इति। अत्र यथा शुक्लीभवति, पटपटाकरोति, इत्यादावभूततद्भावादिषु च्व्याद्यन्तम्, लुनीहि लुनीहीत्येवायं लुनाति, राष्ट्रमट मठमट दूरमटेत्येवायमटति, इत्यादिषु क्रियासमभिहारादिषु लोडन्तम् अनभिव्यक्तपदार्थकत्वादसमाप्तं स्वार्थाभिव्यक्तये कृभ्वाद्यनुप्रयोगं यथाविध्यनुप्रयोगं चापेक्षते, तथा आमन्तं णमुलन्तं चानाभिव्यक्तपदार्थकत्वादसमाप्तं साध्यरूपमेव स्वार्थाभिव्यक्तये कृभ्वाद्यनुप्रयोगं यथाविध्यनुप्रयोगं

चापेक्षत इत्येतदुक्तो भावः साध्यासमाप्तो भवति । तदाह—'आम इव णमुलोऽप्यसमाप्तार्थत्वाच्चादिवदनुप्रयोगः सिद्ध एव यथाविध्यर्थं तु वचनं कषादिषु यथाविध्यनुप्रयोगः' इति । तेन चकासांचकार इत्यादिनाऽयमर्थो भवति—चकास्ति स्म, विदन्तु, रायः पुष्यन्नमुं पुष्यति, इति । अत एव क्रियाविशेषणेनैव सिद्धमिति न केचित् णमुल्प्रकरणमारभन्ते । ननु च क्रियाविशेषणानां कर्मता नपुंसकता च; कथं च पुषेरेव पुषिः कर्म भवति? न ह्यात्मनैवात्मा व्याप्यते; न हि सुशिक्षितोऽपि वटुः स्वं स्कन्धमारोढुं शक्नोति । नैवम्; नागरकं वृत्तं वर्तेत, विश्वजिता यजेत, इत्यादौ सामान्यविशेषयोरनैकात्म्येन व्याप्त्यवच्छेदयोरुपलम्भात् सामान्यपुषेरेवावयवपुषिः कर्म भवति । न च क्रियाविशेषणानां कर्मतैवेति नियमः; क्रिया हि यथा साध्यमानत्वात् कर्म, तथोत्पद्यमानत्वात् कर्त्र्यपि भवति; ततश्चोभयथाऽपि क्रियाविशेषणानि योज्यन्ते—रैपोषं कृत्वा पुष्यति, रैपोषं यथा भवत्येवं पुष्यतीति । सिद्ध एव साध्यधर्मयोगी सिद्धसाध्यः; यथा—आश्चर्यो गवां दोहोऽशिक्षितेनागोपालेन, साधु खलु पयसः पानं यज्ञदत्तेन, विचित्रा हि सूत्रस्य कृतिः पाणिनिना, इति; अत्र उभयप्राप्तौ कर्मण्येव षष्ठीति कर्तरि तृतीयाम्नानात् सिद्धोऽप्ययं विवक्षातः साध्योऽपि भवतीति ज्ञायते । अन्ये त्वन्यथा सिद्धसाध्यं वर्णयन्ति—उष्ट्रासिकामास्ते, पञ्च वारान् भुङ्क्ते, पञ्च प्रयोगान् पचति इति । अत्रोष्ट्रासिकावारप्रयोगाणां क्रियाविशेषावृत्त्यनुष्ठानरूपत्वेनापृथग्भावात् क्रियाभिख्याप्यानां द्वितीयादर्शनादभेदविवक्षातः सिद्धानामपि क्रियावदेव साध्यत्वमवगम्यते; तदाह—

तत्स्वभावविशेषत्वाद्व्याप्या नोष्ट्रासिकाऽनया ।
साध्यत्वे त्वासनैकात्म्यात् फलतः कर्म कथ्यते ॥

सोऽयमित्यभिसंबन्धादभेदे धर्मधर्मिणोः ।
क्रियाया इव साध्यत्वं वारादीनां न दुष्यति ॥

तेन उष्ट्रासिकामास्ते इत्यादीनामयमर्थो भवति—उष्ट्रवदास्ते, पञ्चावृत्ति भुजिक्रियां करोति, पञ्च पाकान्निर्वर्तयति इति । साध्य एव सिद्धधर्मयोगी साध्यसिद्धः; यथा—कर्तव्यं भवतः, कार्यं भवतः इति । अत्र 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' (पा. २. ३. ६९.) इति लादीनां साध्यार्थाभिधायित्वात् कर्तृकर्मणोः षष्ठीनिषेधे, 'कृत्यानां कर्तरि वा' 'क्तस्य च वर्तमाने' (पा. २. ३. ७१. ६७.); नपुंसके भावे उपसंख्यानम्' इत्यादिभिः पुनः षष्ठीविधानात् पक्षे विवक्षातः सिद्धार्थाभिधायित्वमवगम्यत इत्येतदुक्तो भावः साध्यसिद्धो भवति । न चात्र कृत्यानां निषेधो न श्रूयते, यतः खलर्थतृनामित्यत्र खलर्थेत्यनेन कृत्यकखलर्थाः

शतृशानच्चानशश्च संगृह्यन्ते ; तृन्नित्यनेन पुनस्तृन्नेवेति । अत एव निष्ठादिभावस्येव कृत्यभावस्य कर्मण्यपि षष्ठी न भवति ; यथा—

गतमस्तं यथाऽर्केण यथाऽभ्युदितमिन्दुना ।
तथा मानेन शैथिल्यमागन्तव्यं मृगीदृशः ॥

कथं पुनः सकर्मकात् भावप्रत्ययः? तेन ह्यकर्मकाद्भवितव्यम् ; यदाह 'लः कर्मणि च भावे चाकर्मकेभ्यः' (पा. ३. ४. ६९.) 'तयोरेव कृत्यक्तखलर्थाः' (पा. ३. ४. ७०) ; न हि भवति कृतं कटं देवदत्तेनेति । उच्यते—नैतदन्तरङ्गं द्रव्यकर्म, अपि तु 'कालाध्वभावगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इति बहिरङ्गेषु कालादिकर्मसु गन्तव्यलक्षणं गत्यर्थकर्म ; बहिरङ्गता च 'कालाध्वनोरत्यन्तसंयोगे' (पा. २. ३. ५.) इत्यनेन द्वितीयाविधानेन, भावस्य च कालादभेदेन, गन्तव्यस्य तु 'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ' (पा. २. ३. १२.) इति पुनर्द्वितीयाग्रहणेन ज्ञायते ; अन्यथा हि कर्मणि द्वितीयायाः सिद्धत्वात् गत्यर्थकर्मणि चतुर्थी चेत्येव ब्रूयात् । यस्यैव च द्रव्यकर्मणोऽन्तरङ्गस्याभावेनाकर्मकः, तस्यैव भावेन सकर्मको भवति ; अतो विद्यमानमपि कालादिकर्म नाकर्मकव्यपदेशं विघ्नयति । अन्ये त्वन्यथा साध्यसिद्धं वर्णयन्ति—उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्ते, यवाग्वाः पाकाय व्रजति इति । अत्र आसिकाशायिकयोराख्याताभिहितक्रियात्मकत्वात् पाकस्य व्रजिक्रियासाध्यत्वात्, सत्यपि साध्यत्वे लिङ्गसंख्यासंबन्धिविभक्तियोगाद्विवक्षातः सिद्धत्वमपि गम्यत इत्ययं साध्यसिद्धो भवति । तथाऽपि उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्ते, इत्यमूभ्यां सामान्यविशेषोपचरितरूपो भावात्मैव प्रत्याय्यते ; स आख्याताभ्यां सामान्यरूपेण, ण्वुलन्ताभ्यां विशेषरूपेण । बहुवचनं तु कुत्सातिशयार्थम् ; या हि नामोष्ट्रस्य कुत्सावत्यो बहुप्रकारजुषो बह्व्यः आसिकाः, याश्च हतानामतिशयवत्यस्तथाभूता एव भूयस्यः शायिकाः प्रतीताः, ताभिः विशेषरूपाभिरियमासिका शायिका च उपमानोपमेयसंबन्धजनितभेदाभेदपरिग्रहाल्लकारेणापि सामान्यविशेषभावेन कुत्सातिशयार्थं बहुत्वेनैव प्रत्याय्यते, बहुत्वेन विना सामान्यविशेषभावानुपपत्तेः ; तेनोष्ट्रासिका इवासनानि हतशायिका इव शयनानि क्रियन्ते भवन्तीति वा वाक्यार्थो भवति । नन्वेवमुष्ट्रासिकादीनां वारप्रयोगादीनां च कर्मतेव नपुंसकताऽपि प्राप्नोति ; यथा—मृदु पचति, प्रशस्तं पचतीति । उच्यते—त्रिधा खलु क्रियाविशेषणं भवति—बाह्यम्, आभ्यन्तरम्, बाह्याभ्यन्तरं च ; तत्र बाह्यं धर्मरूपं वारादि ; आभ्यन्तरं विशेषरूपमुष्ट्रासिकादि, बाह्याभ्यन्तरं गुणरूपं मृद्वादि । तेषु बाह्यं सोऽयमित्यभिसंबन्धादभेदोपचारेणाविचलितस्वरूपमेव प्रधानं विशिंषत् कथमिव स्वलिङ्गं जह्यात्? आभ्यन्तरं तु विशेषांशपरिग्रहादाविष्टलिङ्गसंख्यं कथमिव वाऽन्यलिङ्गं गृह्णीयात्? बाह्याभ्यन्तरं तु गुणत्वात् स्वलिङ्गविरहे 'गुणवचना-

नामाश्रयतो लिङ्गवचनानि' (महाभाष्यम् १. २. ६४.) इति विशेष्यलिङ्गग्राह्येव भवति ; तत्र साध्यैकस्वभावत्वादलिङ्गसंख्यायाः क्रियाया विशेषणत्वे मृद्वादीनां नपुंसकत्वमेव न्याय्यम् । उष्ट्रासिकावारादीनां तु नित्यस्त्रीलिङ्गत्वाद्विशेषांशापरिग्रहात् क्रियाविशेषणत्वेऽपि न नपुंसकलिङ्गता । अथ पाकाय व्रजति, एधेभ्यो व्रजति, इति क्रिया रन्धनाय स्थालीतिवत् तादर्थ्यचतुर्थ्यन्तः सिद्ध एव कस्मान्न विज्ञायते ? नैवम्, 'भाववचनाश्च' (पा. ३. ३. ११.) इति तादर्थ्ये एव प्रत्ययोत्पत्तेः, 'तुमर्थाच्च भाववचनात्' (पा. २. ३. १५.) इति स्वार्थे एव चतुर्थीविधानात् । किमर्थं पुनरिदम् ? भावे हि घञादयः सिद्धा एव, तादर्थ्ये चतुर्थी । क्रियार्थोपपदेन तुमुनाऽस्मिन् विषये घञादयो मा बाधिषत ; वासरूपविधिश्चात्र तुमुन्ण्वुलाविति ण्वुल्ग्रहणान्नावतरति । अथ यथैधानाहर्तुं व्रजति एधेभ्यो व्रजतीति 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (पा. २. ३. १४.) इति चतुर्थी, तथा पाकं कर्तुं व्रजति पाकाय व्रजतीति यदि भवेत्, को दोषः स्यात् ? न कश्चित् ; किं त्वेतत् पृच्छामि—स पाकः सिद्धः साध्यो वा ? यदि सिद्धः किं कर्तुं व्रजति ? अथ साध्यः, क्रियार्थोपपदेषु तुमुना घञादयो बाध्यन्ते । अथ तुमर्थत्वेन साध्याभिधायिनश्चतुर्थ्यन्तत्वेन चासत्त्वभूतार्थाः पाकायेत्यादिषु घञादयः, कथं यवाग्वा इत्यादेः संबन्धविभक्तेर्निमित्तं भवति ? शब्दशक्तिरेषा यत् कस्यचिदेव केनचित्, केनचिदेव कस्यचित्संबन्धः ; तद्यथा—अभिन्नेऽप्यर्थे प्रजागरिताऽपररात्रानिति तृनो बाह्यकर्मोपसर्गकर्मयोगात् जायते, न जागरूक इत्युक्तस्य ; ऊरीकरोति पाकादिकमित्यूर्यादीनामेकानेकविशेषस्थया करोतिक्रियया भवति संबन्धः, न तदर्थविषयैः पचादिभिः ; सूर्यमपि न पश्यन्ति असूर्यंपश्या राजदारा इति व्यवहितामपि सूर्यकर्मिकां दृशिक्रियां नञ् निषेधति, न सूर्यसत्ताम् ; एवं न पुनर्गीयन्ते अपुनर्गेयाः श्लोकाः, श्राद्धं न भुङ्क्ते अश्राद्धभोजी ब्राह्मण इति । तथा लवणं न भुङ्क्ते अलवणभोजी भिक्षुः इत्यसूर्यंपश्यादिवदसामर्थ्येऽपि नञ्समासो दृश्यते ; न त्वकिंचित्कुर्वाण इति ; एवं माषं हरमाणः, अगाधादुत्सृत इति । अपि च, पयः पायं पायं, पयः पीत्वा पीत्वा, गेहमनुप्रवेशमनुप्रवेशम्, गेहमनुप्रविश्यानुप्रविश्य, इत्याभीक्ष्ण्यवीप्सयोः पदद्विर्वचनं प्रयोजयन्ति णमुलादयः, न पापच्यते, द्विशो देहीति यङ्शसादयः ; लोलूयत इति द्विर्वचनमन्तरेणापि क्रियासमभिहारमवगमयति यङन्तम्, न लुनीहि लुनीहीति लोडन्तम् ; कृतपूर्वी कटम्, अधीती व्याकरणम्, इति वृत्तिवशेनोज्झितकर्माभिधानशक्तयः कर्मविभक्तिं न विघ्नयन्ति निष्ठादयः ; ग्रामं गन्तुमनाः, कटं कर्तुकाम इति निवृत्तिच्छिन्ना अपि कर्मणि द्वितीयामेव प्रयोजयन्ति तुमुनादयः ; उभयप्राप्तौ कर्मण्येवेति नियमेऽपि विचित्रा सूत्रस्य कृतिः पाणिनेः इति, शब्दानामनुशासनमाचार्यस्य इति, समासाय कर्तरि संबन्धविभक्तिमप्युपाददते क्तिनादयः, साध्यार्थाभिधायिनोऽसत्त्वभूतार्था अपि यवाग्वाः पाकायेति कर्मणि संबन्धविभक्त्यैव संबध्यन्ते घञादय इति तदुक्तभावः साध्यसिद्धो भवति ॥

क्रियानिमित्तं कारकम्; तदपि षोढा—कर्ता, कर्म, करणम्, संप्रदानम्, अपादानम्, अधिकरणं चेति। तत्र कर्ता—स्वतन्त्रः, हेतुः, कर्मकर्ता च; तेषु क्रियायाः स्वेच्छया करणादीनि यः प्रयुङ्क्ते न तु तैः प्रयुज्यते, स स्वतन्त्रः; यथा—पुत्रपौत्रस्य दर्शकः, पुरां भेत्तेति। तमेव क्रियाप्रवृत्तं यः प्रयुङ्क्ते स हेतुः; यथा—राजानं योधितवान् राजयुध्वा धनुष्मान्, नखानि मोचयन्ति नखमुचानि धनूंषीति। कर्मैव स्वातन्त्र्येण विवक्षितं कर्मकर्ता; यथा—स्वयमेव पच्यन्ते पचेलिमा माषाः, स्वयमेव भज्यन्ते भङ्गुराणि काष्ठानि इति। कर्म—निर्वर्त्यं, विकार्यं, प्राप्यं च; तेषु यदसज्जन्यते, सद्वा प्रकाश्यते, तन्निर्वर्त्यम्; यथा—कर्तव्यः कटः, उच्चार्यः शब्दः, इति। यस्य प्रकृत्युच्छेदो गुणान्तरं वोत्पद्यते तद्विकार्यम्; यथा—भुक्त ओदनः; लूयमानः केदारः, इति। क्रियाकृतविशेषानवगतौ कर्तुः क्रिययाऽनास्थितमास्थितं वा यदाप्यते तत् प्राप्यम्; यथा—दुर्दर्शः प्रभुः, सुयानो मार्ग इति। करणं—बाह्यम्, आभ्यन्तरं, बाह्याभ्यन्तरं च; तेषु कर्तुः शरीराद्बहिरुपलभ्यमानं बाह्यम्; यथा—आशितंभवं भक्तम्, धृतोदकः करकः, इति। तद्विपरीतमाभ्यन्तरम्; यथा—प्रियंकरणं शीलम्, वशीकरणं प्रेम, इति। उभयगुणयोगि बाह्याभ्यन्तरम्; यथा—दर्शनं चक्षुः, संवननं साम इति। संप्रदानम्—ददातिकर्माप्यं, कर्ममात्राप्यं, क्रियाप्यं च; तेषु सम्यक् प्रदीयते अस्मै इत्यन्वर्थसंज्ञाया विषयो ददातिकर्माप्यम्; यथा—दीयतेऽस्मै दानीयो ब्राह्मणः; देवा देयासुरस्मै देवदायो डिम्भः, इति। 'कर्मणा यमभिप्रैति स संप्रदानम्' (पा. १. ४. ३२.) इति पारिभाषिकसंज्ञाविषयः कर्ममात्राप्यम्; यथा—दाश्यतेऽस्मै देयमिति दाशः कैवर्तः, गां हन्ति आगतायेति गोघ्नः अतिथिः इति। कर्मशब्देन क्रियाया अप्युपादानात् क्रियया यदाप्यते तत् क्रियाप्यम्; यथा—श्लाघन्तेऽस्मै जना इति श्लाघ्यो राजा, स्पृहयन्त्यस्मै लोकाः स्पृहणीयो विभव इति। अपादानम्—निर्दिष्टविषयम्, उपात्तविषयम्; अपेक्षितक्रियं च; तत्र 'ध्रुवमपायेऽपादानम्' (पा. १. ४. १४.) इति निर्दिष्टविषयम्; यथा—प्रपतनो गिरिः, प्रस्रवणः शैलः इति। भीत्रार्थादियोगोक्तमुपात्तविषयम्; यथा—अवधिः पर्वतः, मर्यादा समुद्रः इति। अधिकरणम्—वैषयिकम्, औपश्लेषिकम्, नैमित्तिकं च; तेषु विविधमनेकप्रकारं जातिगुणक्रियाद्रव्यादिभिः सिनोतीति विषयो देशकालादिः; विषय एव वैषयिकम्; यथा—निपिबन्त्यस्मिन् गवादय इति निपानं जलाशयः, राजानो धीयन्तेऽस्यां राजधानी नगरम् इति। उपश्लेषोऽवष्टम्भः, तस्मै प्रभवत्यौपश्लेषिकम्; यथा—इषवो धीयन्ते अस्मिन् इषुधिः उपासङ्गम्, शेरतेऽस्यां शय्या पर्यङ्कः। निमित्तमेव नैमित्तिकम्, यथा—रज्यन्तेऽस्मिन् सामाजिकमनांसि इति रङ्गः प्रेक्षा, प्रसीदन्ति अस्मिन् नयनमनांसि इति प्रासादः सौधम् इति। तदेतदुभयमपि—शुद्धम्, सङ्कीर्णम्, उपाधिमत्, रूढिमत्, संबन्धि, अनुबन्धि चेति षोढा विप्रथते। तत्र अर्थान्तरैरसंस्पर्शः शुद्धिः; सा भावानां यथा—ओदनस्य पाकः,

अलं कृत्वा, खलु स्थित्वा इति ; कारकाणां यथा—अपां स्रष्टा, वर्षशतस्य पूरकः, सोमं पवमान इति । संपर्कः सङ्करः ; स भावानां यथा—कालो भोक्तुम्, अलं भोक्तुम्, भोजं भोजं व्रजतीति ; कारकाणां यथा—गमनमर्हति गम्या योषित्, जेतुं शक्यते जय्यः शत्रुः, पक्तुं व्रजति, पाचको व्रजतीति । बाह्यमाभ्यन्तरमुभयं वा शाखोपाखं विशेषणमुपाधिः ; स भावानां यथा—भवतः शायिका, उपसरो गवाम्, समजः पशूनामिति । कारकाणां यथा—तुन्दपरिमृजोऽलसः, स्तम्बेरमो हस्ती, हतिहरिः पशुः इति । गुणवचनत्वे द्रव्यवचनत्वरूढिः ; सा भावानां यथा—मृगया, वासना, परिव्रज्येति ; कारकाणां यथा—कुम्भकारः, पङ्कजम् अमावास्येति । नियोगतः प्रतियोग्यपेक्षः संबन्धः ; स भावानां यथा—भुक्त्वा व्रजति, भोक्तुमिच्छति, अप्राप्य नदीं पर्वत इति ; कारकाणां यथा—चङ्क्रम्यमाणोऽधीते, अधीयानो वसति, गोदायो व्रजति । अनुषङ्गोऽनुबन्धः ; स भावानां यथा—सांराविणं वर्तते, रैपोषं पुष्यति, चकासांचकार इति ; कारकाणां यथा—अग्निष्टोमयाजी, उष्ट्रक्रोशशतं दायी इति । अथैतदभिधाने त्रिप्रकाराः कृतो भवन्ति—भाववचनाः, कारकवचनाः, भावकारकवचनाश्च । तेषु अथुजादयः, ण्वुलादयः, णजादयः, तुमुनादयः, सयादयः, णमुलादयश्च भाववचनाः ; ण्वुलादयः, अणादयः, उणादयः, क्विनादयः, शत्रादयः, तृनादयश्च कारकवचनाः ; तव्यादयः, तवायादयः, क्तादयः, खलादयः, लुडादयः, घञादयश्च भावकारकवचनाः । तत्र भाववचनेष्वनुपाधौ सिद्धभावे अथुजादयः ; यथा—नन्दथुः, यज्ञः, स्वप्नः, क्रिया, कण्डूया, व्यज्या इति । अत्रैव रोगाद्युपाधिमति ण्वुलादयः ; यथा—अरोचको बाधते, प्रवाहिकातः करोति, भवत आसिका, इक्षुभक्षिकां मे धारयसि, कां त्वं कारिमकार्षीः, अकरणिस्ते वृषल इति । सिद्धासमाप्ते णजादयः ; यथा—व्यावक्रोशी वर्तते, व्यावहासीं कुर्वन्ति, साङ्कूटिनं वर्तते, सांराविणं कुर्वन्ति, करणेन निर्वृत्तं कृत्रिमम्, पाकेन निर्वृत्तं पक्त्रिमं इति । साध्यरूपे तुमुनादयः ; यथा—भोक्तुं व्रजति, भोक्तुं जानाति, भुक्त्वा व्रजति, अपमित्य याचते, स्वादुङ्कारं भुङ्क्ते, चोरङ्कारमाक्रोशति । तुमर्थ एव छन्दोविषये सयादयः ; यथा—वक्षे रायस्त्वा, दृशे विश्वाय सूर्यम्, अग्निं देवा विभाजं नाशक्नुवन्, ईश्वरोऽभिचरितोः, ईश्वरो विलिखः इति । स्वाध्यायसमाप्ते णमुलादयः ; यथा—समूलकाषं कषति, रैपोषं पुष्यति, चकासांचकार, बिभरांबभूव, चकासामास, विदांकुर्वन्तु इति। कारकवचनेष्वनुद्रिक्तक्रियांशाः कर्तर्येव ण्वुलादयः ; यथा—कारकः, स्रष्टा, नन्दनः, प्रियः, यज्वा, जरन्निति । सोपपदाः कर्त्रादिष्वणादयः ; यथा—काण्डलावः, पादहारकः, सुभगंकरणम्, गोघ्नः, शंभुः, गोष्ठः इति । निरुपपदा रूढिमन्त उणादयः ; यथा—कारुः, दात्रम्, धात्री, दासः, भीष्मः इति । उभयेऽपि लोपवन्तः क्विनादयः ; यथा—घृतस्पृक्, सदृक्, अर्थभाक्, शुभंयुः, प्राङ्, युङ् इति । कर्तर्येवोद्रिक्तक्रियांशाः शत्रादयः ; यथा—यवागूं पचन्, सोमं पवमानः, आशितं दाश्वान्, वेदमनूचानः, भुक्तवानोदनम्, ग्रामं गमी इति । त एव

ताच्छील्याद्युपाधिमन्तस्तृनादयः ; यथा—जागरितापररात्राः, मुण्डयितारः श्राविष्ठायनाः, वधूमूढाम्, अलंकरिष्णुः, कतीह कवचमुद्वहमानाः, शतं दायी, एधानाहारको व्रजति इति। भावकारकवचनेषूद्रिक्तानुद्रिक्तक्रियांशाः तव्यादयः ; यथा—कर्तव्यं भवता, करणीयं भवता, कार्यः कटो भवतः, कृत्यः कटो भवतः, वास्तव्यो भवान्, ब्रह्मभूयं भवतः इति। त एव छन्दोविषयास्तवायादयः ; यथा—परिधातवै, परिस्तरितवै, अवचक्षे, अवगाहे, दिदृक्षेण्यः, कर्तुं हविः इति। उद्रिक्तक्रियांशाः क्तादयः ; यथा—भुक्तं भवता, भुज्यमानं भवता, भोक्ष्यमाणं भवता, भुक्तमोदनम्, भुक्त ओदनो भवता, एवं भोक्ष्यमाणः इति। त एव व्यक्तकालाः खलादयः ; यथा—स्वाढ्यंभवं भवता, सूत्थानं भवता, प्राशितंभवं भवता, दुराढ्यंभवं भवता, ईषत्पानः सोमो भवतः, आशितंभवं भक्तम् इति। अनुद्रिक्तक्रियांशाः प्रायो गुणवचना ल्युडादयः ; यथा—व्यासस्य वचनं, पाणिनेरुक्तिः, छात्रस्य हसितं, इध्मानां व्रश्चनं, जनानां भक्तिः, राज्ञां मत इति। त एव प्रायो द्रव्यवचना घञादयः ; यथा—पर्यायः क्रियाणां, विपर्यायः कालस्य, संग्रहः शास्त्राणां, अधीतः स्वाध्यायः, अधिगत उपायः, श्रेयानुपाध्यायः इति॥

भावकारकसंबन्धिस्वार्थाभिधायिनोऽधातुप्रत्ययास्तद्धिताः। तत्र भावो द्विधा—अन्तरङ्गः, बहिरङ्गश्चेति। तयोः शब्दस्यार्थे प्रवृत्तिनिमित्तमन्तरङ्गः, यदाह—'यस्य गुणस्य हि भावाद्द्रव्ये शब्दनिवेशः, स तस्य भावः ; तदभिधाने त्वतलौ।' तस्योपसंग्रहाय संग्रहकारः पठति—

'शब्दे तां जातिं शब्दमेवार्थजातौ जातिः शुक्लादौ द्रव्यशब्दे गुणं तम्।
कृत्तत्संयोगं योगि चाभिन्नरूपं वाच्यं वाच्येषु त्वादयो बोधयन्ति॥'

ततः स षोढा भिद्यते—जातिः, गुणः, स्वरूपं, संबन्धः, संहतिः, अभिन्नरूपं इति। तेषु जातिर्यथा—गोत्वं, शुक्लत्वं, मानुष्यकं, स्त्रैणं, पौंस्नं, ब्राह्मण्यं इति। गुणो यथा—शुक्लत्वं, शीघ्रता, म्रदिमा, माधुर्यं, आर्जवम्, वैदग्ध्यं इति। स्वरूपं यथा—डित्थत्वं, आकाशत्वं, चन्द्रत्वं, सूर्यत्वं, दिक्त्वं, तदात्वं इति। संबन्धो यथा—पाचकत्वं, काण्डलावत्वं, दण्डित्वं, औपगवत्वं, राजपुरुषत्वं, पुरुषव्याघ्रत्वं इति। संहतिर्यथा—धवखदिरत्वं, नरसिंहत्वं, शुक्लकृष्णत्वं, कृष्णशारत्वं, नीलोत्पलत्वं, गौरखादिरत्वं इति। अभिन्नरूपं यथा—सत्त्वं, विद्यमानत्वं, गर्गत्वं, पञ्चालत्वं, पदार्थत्वं, पङ्कजत्वं इति॥ ननु च,

जातिगुणाज्जातिगुणे धवखदिरादेः स्वजातिसंघाते।
डित्थादौ च स्वरूपे कृत्तत्संयोगे तु संबन्धे॥

त्वादयः इति स्मृतिः ; कथमभिन्नरूपादावपि भवति ? उच्यते— 'कृत्तद्धितसमासेषु संबन्धाभिधानमन्यत्र रूढ्यभिन्नरूपाव्यभिचरितसंबन्धेभ्यः' । अत एवोक्तं— 'कृत्तत्संयोगं योगिना भिन्नरूपं' इति ॥

अवधेरपि वाच्यत्वं त्वादीनामिष्यते बुधैः ।
गोत्वाद्धि गौरिति ज्ञानमभिधानंच जायते ॥

ते ह्येवमाहुः— 'तस्य भावस्त्वतलौ' भवतोऽस्मादभिधानप्रत्ययाविति भावः । तदसत् ; न हि गोत्वं गौरिति ज्ञानस्योत्पत्तावपादानतां जनयत् 'जनिकर्तुः प्रकृतिः' 'भुवः प्रभवो वा' भवति ; यथा—शृङ्गाच्छरो जायते, हिमवतो गङ्गा प्रभवतीति । ज्ञानं त्वात्मन एव जायते, मनसैवोद्भवति ; तदाह— 'व्यापकादप्यात्मनो युगपत् ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ; नाहमद्राक्षं, नाहमश्रौषं, नाहमज्ञासिषं, अन्यत्र मे मनोऽभूदिति' । निमित्तत्वं तु गौरिति ज्ञानोत्पत्तौ शब्दस्येव गोत्वादेरपीष्यत एव । तत्र यथा समवायिनः श्वैत्यात् श्वैत्यबुद्धेः श्वेते श्वैत्यबुद्धिः, तथा समवायिनो गोत्वाद्गोत्वबुद्धेः गवि गोत्वबुद्धिः ; ते परस्परं कार्यकारणभूते इति । अभिधानं तु शब्दः ; स च येनोच्चारितेनार्थः प्रतीयते । तस्यापि न गोत्वमवधिर्भवति । शब्दो ह्याकाशादेव जायते, मुखादेव प्रभवति ; न गोत्वादेः । तदाहुः—'मुखे हि शब्दमुपलभामहे भूमावर्थम्' इति । यदाऽपि नित्यः शब्द इति मतं तदाऽपि शब्दस्य गोत्वादयो वाच्याः विशेष्याः प्रत्याय्या एव भवन्ति । तत्र च शब्दस्य गोत्वादीनां वाच्यत्वे वा कर्मतैव, नावधित्वम् । प्रत्याय्यत्वे तु विपरिणामविपरिवर्तपक्षयोर्वक्ष्यमाणन्यायेन प्रत्युत शब्दस्यैवावधित्वम् । अध्यासस्तु सादृश्यादुपाधेरुपाधिसादृश्याभ्यां वा संभवति ; यथा— शुक्तिकादौ रजतादेः, स्फटिकादौ रक्तादेः, प्रतिबिम्बादौ मुखादेरिति । तत्र यो यदध्यास्यते, यो यदध्यास्ते वा, स तस्याधिकरणं कर्म वा स्यात्, न त्वेवावधिः ; गोत्वं निमित्तमुपादाय गोशब्दो गामध्यास्ते गवि वाऽध्यास्यते । तदिष्यत एव 'यस्य गुणस्य हि भावात् द्रव्यं शब्दनिवेशः तदभिधाने त्वतलौ' इति ॥

धात्वर्थरूपः कृदभिधेयो बहिरङ्गः ; सोऽपि षोढा—भावरूपः, कारकरूपः, संबन्धिरूपः, भावविशिष्टः, कारकविशिष्टः, संबन्धिविशिष्टश्चेति । तत्र प्रवृत्तिनिमित्ततुल्यो भावरूपः— ब्राह्मणस्य कर्म ब्राह्मण्यं, पुरोहितस्य कर्म पौरोहित्यं, स्तेनस्य स्तेयं, सख्युः सख्यं, दूतस्य दूत्यं, वणिजो वाणिज्यमिति । कारकैस्तुल्यकक्ष्यः कारकरूपः ; यथा—राजानमर्हति राजवद्वृत्तं, आप्रयोजनकालं भवति आकालिकी प्रवृत्तिः, श्येनस्येव पातोऽस्यां वर्तते-श्येनंपाता क्रिया, दण्डः प्रहरणमस्यां क्रीडायां-दाण्डा, महिमा अस्त्यस्यां महिमिनी समस्या, वटकं प्रकृतमस्यां वटकमयी यात्रेति । रूढे द्रव्यभूतः संबन्धिरूपः ; यथा—चाषाणां समूहः चाषं, नाट्यानामाम्नायो

नाट्यं, भृग्वङ्गिरसां विवाहो भृग्वङ्गिरसिका, काकोलूकस्य वैरं काकोलूकिका, अश्वीनां संघातो अविकटः, तेषामेव विस्तारोऽविपटः इति । अतर्कितोपनतचित्रीकरणादिसदृशो भावविशिष्टः ; यथा—काकस्य चागमनं यादृच्छिकं, तालस्य च पातः, तेन तालेन पतता काकस्य वधः ; एवमेव देवदत्तस्य चागमनं दस्यूनां चोपनिपातः, तैश्च तस्य वधः ; तत्र यो देवदत्तस्य दस्यूनां च समागमः स काकतालसमागम इवेत्येक उपमार्थः, यश्च देवदत्तवधः स काकवध इवेति द्वितीय उपमार्थः, तत्र प्रथमः समासार्थः काकतालमिति, द्वितीयः प्रत्ययार्थः काकतालीयमिति ; समासश्चायमस्मादेव ज्ञापकात् ; यदाह—समासाच्च तद्विषयादाकस्मिक इवार्थे च्छो भवति ; तद्विषयादित्यत्र हि तदित्यनेन 'इवे प्रतिकृतौ' इतीवार्थः परामृश्यते। एवमजाकृपाणीयं, अन्धकवर्तकीयं, घुणाक्षरीयं, अर्धजरतीयं, गोमयपायसीयं इति । कारकावच्छिन्नः कारकविशिष्टः ; यथा—मतस्य करणं मत्यं, पीलूनां पाकः पीलुकुणः, जनस्य जल्पो जन्यः, शिवस्य भवनं शिवतातिः, नासिकाया अवनतिः अवटीटं, धने कामः धनकः इति । संबन्धिनाऽवच्छिन्नः संबन्धिविशिष्टः ; यथा—हल्यः काषः, सौधः संकोचः, पौरुषेयो वधः, आथर्वण आम्नायः, वैदो घोषः, छान्दोग्यो धर्मः इति । उपाधिरपि संबन्ध्येव भवति, यथा—गार्गिकया विकत्थते, काठिकयाऽधिक्षिपति, गार्गिकामन्ववेतः, गार्गिकामवगतवान्, काठिकामवगतवान् इति । धात्वर्थोऽपि भाव एव ; क्रियाऽपि ह्युपमानेन परीता परिच्छिन्ना साध्यसिद्धभावो भवति । स त्रिधा—भावकारकः, कारकविशिष्टः, संबन्धिविशिष्टश्चेति । तेषु भावविशिष्टो यथा—ब्राह्मणेन तुल्यमधीते–ब्राह्मणवत्, राज्ञा सदृशं वर्तते–राजवत्, जडस्य तुल्यं ब्रूते जडवत्, सूर्य इव प्रकाशते सूर्यवत्, पिता यथा पालयति पितृवत्, गुरुरिवानुशास्ति गुरुवदिति । अत्र ब्राह्मणादिस्थास्वध्ययनादिक्रियासु साहचर्याद्वृत्तिः, जातिद्रव्ययोरन्यतरेण क्रियायाः सादृश्यानुपपत्तेः । यदाह—'तेन तुल्यं क्रिया चेद्वतिः ; तेनेति तृतीयासमर्थात् तुल्यमित्येतस्मिन्नर्थे वतिप्रत्ययो भवति यत्तुल्यं क्रिया चेत् सा भवति ; अर्थपरं चैतत् ; तेन सदृशेत्यादिप्रयोगेष्वतृतीयान्तादपि भवति । कारकविशिष्टो यथा—राज्ञेव व्यवहृतमनेन राजवत्, देवमिव भवन्तं पश्यामि देववत्, असिनेव दात्रेण च्छिनत्ति असिवत्, ब्राह्मणायेव यदा देवदत्ताय ददाति ब्राह्मणवत्, पर्वतादिवासनादवरोहति पर्वतवत्, पितरीव गुरावाचरति पितृवत् । अत्र पुनरिदमेव सूत्रमन्यथा व्याख्यायते—तेन कारकविशेषेण तुल्यं यथा भवति । एवं चेत् क्रिया भवति भावोत्पन्ने विहितप्रत्यये कदाचित् प्रत्ययमुखेन क्रियाविशेषणं भवति, कदाचित् प्रकृतिमुखेन ; यथा—तीव्रः पाकः, तीव्रं पाकं इति । संबन्धिविशिष्टो यथा—ब्राह्मणस्येवाध्ययनमस्य ब्राह्मणवत्, राज्ञ इव रौद्रं वृत्तमस्य राजवत् ; जडस्य सदृशं वचनमस्य जडवत्, सूर्यस्येव प्रकाशोऽस्य सूर्यवत्, पितुर्यथा पालनमस्य पितृवत्, गुरोस्तुल्यमनुशासनमस्य गुरुवत् इति । अत्र तु 'तत्र तस्येव' इत्यनेन वतिः । ननु च 'तेन तुल्यं' इत्यनेनैव सिद्धे किमर्थं 'तत्र तस्येव' इति सूत्रारम्भः ? द्रव्यगुणयोस्तुल्ययोः प्रत्ययो न लभ्यः इति ; यथा—

मथुरायामिव पाटलिपुत्रे प्रासादाः मथुरावत्, ब्राह्मणस्येव क्षत्रियस्य शुक्ला दन्ताः ब्राह्मणवत् इति । यद्येवं पूर्वसूत्रे क्रियाग्रहणं न करिष्यते, साहचर्याच्च क्रियायामिव द्रव्यगुणयोः प्रातिपदिकं वर्तिष्यते ; ततश्च मैत्रेयतुल्या गावश्चैत्रस्य, ब्राह्मणेन तुल्या दन्ता क्षत्रियस्य इति विगृह्य पूर्वसूत्रेणैव वतिः सेत्स्यतीति । तदसत्; एवं हि गवयेन तुल्योऽनड्वान् इत्यत्रापि प्रत्ययः प्रसजेत् ; इवार्थे तु प्रत्यये सप्तमीषष्ठ्यन्ताभ्यामेव विधीयमाने गवय इवानड्वान् इत्यत्र प्रत्ययप्रसङ्गो न स्यात् ; सप्तम्यन्तषष्ठ्यन्तयोर्हि बाह्यं संबन्धिनमपेक्ष्य इवशब्दप्रयोगो भवति, न पुनरिवार्थापेक्षयैव ; इवशब्दो हि उपमानोपमेयभावलक्षणसंबन्धद्योतकः, न तु संबन्धिरूपाभिधायी । तस्माद्गवयेन तुल्योऽनड्वान् इत्यत्र मा भूत् प्रत्ययप्रसङ्ग इति पूर्वसूत्रे क्रियाग्रहणम् । तस्मिंश्च कृते द्रव्यगुणयोस्तुल्ययोः प्रत्ययो न स्यादिति सप्तमीषष्ठ्यन्ताभ्यामिवार्थे 'तत्र तस्येव' (पा. ५. १. ११६.) इति वतिर्विधीयते । अथ 'तदर्हम्' (पा. ५. १. ११७) इति किमर्थम् ?

अर्हतो या क्रिया कर्तुस्तत्रापि वतिरिष्यते ।
उपमानाविवक्षायां तद्विधानं न लभ्यते ॥

उपमानोपमेयत्वमन्यस्यान्येन वा सह ।
अवस्थाभेदभिन्नत्वादेकस्याप्यात्मनैव वा ॥

तत्रान्यस्यान्येन यथा—अवैयाकरणोऽप्ययं वैयाकरणवद्ब्रूते, योषिदप्येषा पुंवद्वक्तीति ; अवस्थाभेदभिन्नत्वादेकस्याप्यात्मनो यथा—वैयाकरणः केनचिदुच्यते—वैयाकरणवद्ब्रूहीति ; योषिदप्युच्यते— स्त्रीवद्वदेति । वैयाकरणोऽप्यवज्ञया कदाचिदवैयाकरणवद्ब्रूते ; श्रूयते हि— यर्वाणस्तर्वाणा नाम साक्षात्कृतधर्माण ऋषयो बभूवुः । ते हि 'अन्तर्वेद्यामेव न म्लेच्छितव्यम्, अतोऽन्यत्रावज्ञया' इति यद्वा नस्तद्वा न इति वक्तव्ये यर्वाणस्तर्वाण इत्यूचुः । योषिदपि कदाचिदाश्रितप्रागल्भ्यात् पुंवद्वक्ति, यथोच्यते—

सरस्वतीव कर्णाटी विजयाङ्का जयत्यसौ ।
या वैदर्भगिरां भूमिः कालिदासादनन्तरम् ॥

अस्यौपम्यद्वयस्यापि विवक्षातोऽपरिग्रहे ।
वतिः कथमिवार्थीय इति (मत्वा) यमुच्यते ॥

तत्र राजवद्वृत्तमित्यत्र यदैवंविधार्थविवक्षा—पृथ्वादिना राज्ञा तुल्यं वृत्तमनेन राज्ञा राजवद्वृत्तं राज्ञेति, तदाद्येनैव सूत्रेण सिद्धः प्रत्ययः । यदा त्वेतादृशी विवक्षा—राज्ञ इव पृथोरस्य

वृत्तं राजवद्वृत्तं राज्ञ इति, तदा द्वितीयसूत्रेण । यदा त्विदं वृत्तं राजानमेवार्हति नान्यमित्युपमानोपमेयभावाभावे राजवद्वृत्तमिति प्रयोगः, तदा 'तदर्हम्' (पा. ५. १. ११६) इत्यनेन वतिर्विधीयत इति नानर्थकः सूत्रारम्भः ॥

अन्ये तु— 'तेन तुल्यं क्रिया चेद्वतिः' (पा. ५. १. ११५.) इत्यत्र द्वितीयव्याख्यानपक्षे क्रियायाः क्रिया विशेषणं न संभवतीति कारकविशिष्टभावपक्षं 'तदर्हम्' (पा. ५. १. ११७) इत्यनेन संवाहयति ; राजानमर्हति यद्व्यवहरणं, देवमर्हति यद्दर्शनं, असिमर्हति यच्छेदनं, ब्राह्मणमर्हति यद्दानं, पर्वतमर्हति यदवरोहणं, पितरमर्हति यत् पारतन्त्र्यम् ; तदुच्यते राजवत्, देववत्, असिवत्, ब्राह्मणवत्, पर्वतवत्, पितृवत् इति । राज्ञेव व्यवहृतमित्यादिभिस्तु तस्यार्थः प्रदर्शित इति ॥

कारकमपि भाववदेवान्तरङ्गं बहिरङ्गं च ; तयोराख्याताभिधेयमन्तरङ्गं, अनाख्याताभिधेयं बहिरङ्गम् ; कर्ता हेतुकर्ता, कर्मकर्ता, कर्म चेति, करणं संप्रदानमपादानमधिकरणं चेति । तत्रान्तरङ्गभेदेषु कर्ता शुद्धः, मिश्रः, संकीर्णश्च । तेषु क्रियाकारकान्तरासंपृक्तः शुद्धः ; यथा— इष्टमनेन इष्टी यज्ञी, कृतः पूर्वं कटोऽनेन कृतपूर्वी कटमिति । क्रियान्तरसंपृक्तो मिश्रः ; यथा— व्याकरणं वेत्ति अधीते वा वैयाकरणः, शश्वद्भवः शाश्वतिकः इति । क्रियाकारकान्तरसंपृक्तः संकीर्णः ; यथा—शालायां प्रवेशमर्हति शालीनः अधृष्टः ; कूपे प्रक्षेपणमर्हति इति कौपीनमकार्यम् । हेतुः— आत्मस्थक्रियः, परस्थक्रियः, परात्मस्थक्रियश्चेति । तेषु आत्मस्थक्रियो यथा—पारायणं वर्तयति पारायणिकः ; चान्द्रायणं वर्तयति चान्द्रायणिक इति । परस्थक्रियो यथा—वातं शमयति वातिकं तैलं ; पित्तं शमयति पैत्तिकमिति । परात्मस्थक्रियो यथा—यथामुखं दर्शयते यथामुखीन आदर्शः, संमुखं दर्शयते संमुखीनः प्रेयान् इति । कर्मकर्ता—अनुद्रिक्तकर्मांशः, उद्रिक्तकर्मांशः, अनुद्रिक्तोद्रिक्तकर्मांशश्चेति त्रिधा । तेष्वनुद्रिक्तकर्मांशो यथा—अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं धनं, पाकेन निर्वृत्तं पाकिमं, माणिकं इति । उद्रिक्तकर्मांशो यथा—वसन्ते पच्यन्ते वासन्त्यः कुन्दलताः, षष्टिरात्रेण पच्यन्ते षाष्टिकाः शालय इति । अनुद्रिक्तोद्रिक्तकर्मांशो यथा—वशं गतो वश्यः, शीर्षच्छेदमर्हति शीर्षच्छेद्य इति । कर्म—निर्वर्त्यं, विकार्यं, प्राप्यं च । तेषु यदसज्जन्यते, सद्वा प्रकाश्यते, तन्निर्वर्त्यम् ; यथा—उरसा निर्मितः औरसः पुत्रः, पाणिनिना प्रोक्तं पाणिनीयं व्याकरणं इति । यस्य प्रकृत्युच्छेदो गुणान्तरं वा विधीयते तद्विकार्यम् ; यथा—विषेण वध्यः विष्यः शत्रुः, कुसुम्भेन रक्तं कौसुम्भं वस्त्रमिति । आस्थितमनास्थितं वा क्रियया यदाप्तुमिष्यते तत् प्राप्यम् ; यथा—नावा तार्यः नाव्यो ह्रदः, अयानयं नेयः अयानयीनः शार इति । ननु च शारोऽप्यास्थितः कस्मान्न भवति ?

त्यागरूपं प्रहातव्येऽप्यर्थे (प्राप्ये) संसर्गदर्शनम् ।
आस्थितं कर्म यत्तत्र द्वैरूप्यं भजते क्रिया ॥

यथा—पन्थानं गच्छति, गर्तमुत्तरतीति । शास्तु प्राप्य एव ; यथा—अजां नयति ग्रामं, (ग्रामं) वहति भारम् इति । नन्वेवं ग्रामस्य प्राप्यता प्राप्नोति, नाजादेः ; कः पुनराह न प्राप्नोतीति ; किंतु अकथितत्वेन तत्र क्रियाव्याप्यत्वेनाद्वितीयैव, न प्रत्ययान्तरम्—गां दोग्धि पयः, पौरवं गां याचते इति । बहिरङ्गभेदेषु करणं—बाह्यं, आभ्यन्तरं, बाह्याभ्यन्तरं च । तेषु बाह्यं यथा—सुपां व्याख्यानः सौपः, ललाटस्य भूषणं ललाटिका । आभ्यन्तरं यथा—मतस्य करणं मत्यं, चतुर्णां पूरणश्चतुर्थः इति । बाह्याभ्यन्तरं यथा—समिध आधीयन्तेऽनेन सामिधेन्यो मन्त्रः, (स एव) हृदयस्य बन्धनः हृद्य इति । संप्रदानम्—ददातिकर्माप्यं, कर्ममात्राप्यं, क्रियाप्यं च । संप्रदीयते भोजनादिकमस्मै इत्यन्वर्थसंज्ञकं ददातिकर्माप्यं ; यथा—अग्रभोजनं नियुक्तमस्मै दीयते आग्रभोजनिकः, पञ्चास्मै वृद्धिर्वा, आयो वा, लाभो वा, शुल्कं वा, उपदा वा दीयन्ते पञ्चकः पुरुष इति । 'कर्मणा यमभिप्रैति स संप्रदानम्' (पा. १. ४. ३२.) इति पारिभाषिकसंज्ञकं कर्ममात्राप्यं ; यथा—राष्ट्रमस्मै निर्दिश्यते राष्ट्रियो राजन्यः, कलिं कुर्वन्त्यस्मै कालेयं गन्धद्रव्यं इति । कर्मशब्देन क्रियाया अप्यभिधानात् क्रिययाऽपि यमभिप्रैति स संप्रदानमिति क्रियाप्यम् ; यथा—अलङ्कर्मास्मै निर्दिश्यते अलङ्कर्मीणः अन्यूनः, न षडक्षाणि अस्मै भवन्ति अषडक्षीणो मन्त्र इति । अपादानं—निर्दिष्टविषयं, उपात्तविषयं, अपेक्षितक्रियं च । तेषु 'ध्रुवमपायेऽपादानम्' (पा. १. ४. २४.) इति निर्दिष्टविषयम् ; यथा—अग्निः पतति अस्मात् आग्नेयः ग्रावा, नद्यः स्यन्दन्ते अस्मात् नादेयः शैल इति । भीत्रार्थादियोगोक्तमुपात्तविषयम् ; यथा—कुक्षिं रक्षन्ति अस्मात् कौक्षेयकः कृपाणः, मुद्गा भवन्त्यस्मात् मौद्गीनं क्षेत्रं इति । अवधिमात्रार्थमपेक्षितक्रियम् ; यथा—कर्णस्य मूलं कर्णजाहं, पक्षस्य मूलं पक्षतिः इति । अधिकरणं—वैषयिकं, औपश्लेषिकं, नैमित्तिकं च । तेषु विविधमनेकप्रकारं जातिक्रियागुणद्रव्यादिभिः सिनोतीति विषयः देशकालादिः ; विषय एव वैषयिकः ; यथा—गावः सन्त्यस्मिन् गोमान् देशः, पौषी पौर्णमास्यस्मिन् पौषो मास इति । उपश्लेषोऽवष्टम्भः, तस्मै प्रभवति औपश्लेषिकं ; यथा—दण्डिनोऽस्यां सन्ति दण्डिमती शाला, विंशतिरिहाधिका विंशं शतमिति । निमित्तमेव नैमित्तिकं ; यथा—पूर्णो मासोऽस्यां पौर्णमासी (ति), परिखात्रस्यात् परिखेयो देश इति । कारकं च अन्तरङ्गबहिरङ्गभेदाद् द्विरूपमपि प्रकृत्युपाधेः कारकविशिष्टं, अकारकविशिष्टं, संबन्धविशिष्टं, निपातविशिष्टं चेति चतुर्धा निर्धार्यते । तेषु कर्म कर्मविशिष्टं यथा—अयानयं नेय अयानयीनः शारः ; करणविशिष्टं यथा—चक्षुषा गृह्यते चाक्षुषं रूपं ; अधिकरणविशिष्टं यथा—स्रुघ्ने कृतो वा, लब्धो वा, क्रीतो वा स्रौघ्नः ; अपादानविशिष्टं यथा—तन्त्रादचिरापहृतः तन्त्रकः पट इति ; कर्तृविशिष्टं यथा—अश्वैरुह्यते आश्वो रथः ; कर्तृविशेषणमपि कर्तैव ; चतुर्भिरुह्यते चातुरं शकटं ; अपिच—

कौमारी सा भवेद्भार्या यां कुमारः प्रपत्स्यते ।
प्रपद्यते कुमारी यं स कौमारो मतः पतिः ॥

संप्रदानविशिष्टं तु कारकं नास्ति । कर्ता कर्मविशिष्टो यथा—आद्यमनेनाद्य भुक्तं आद्धिकः ; क्रियाविशेषणमितिशब्दोपसंहारं च कर्मैव ; तद्विशिष्टो यथा—प्रतिकूलं वर्तते प्रातिकूलिकं, माशब्द इत्याह माशब्दिक इति ; करणविशिष्टो यथा—अक्षैर्दीव्यति आक्षिकः ; अधिकरणविशिष्टो यथा—प्रावृषिकः, प्रावृषि भवः प्रावृषेण्यः ; अपादानविशिष्टो यथा—पितुरागतं पित्र्यं धनं इति । कर्तृविशिष्टः कर्ता नास्ति । करणं कर्मविशिष्टं यथा—ग्रीवाया भूषणं ग्रैवेयं रुक्मदाम । एवं संप्रदानमपि यथा—मांसमेभ्यो नियुक्तं दीयते मांसिकाः पितरः । अपादानं कर्तृविशिष्टं यथा—व्रीहयो भवन्त्यस्मात् व्रैहेयं क्षेत्रम् । एवमधिकरणमपि यथा—शर्कराः सन्ति अस्मिन् शर्करिलो देशः । तदेव कर्मविशिष्टं यथा—पद्मस्मिन् दृश्यं पद्मः कर्दमः ; करणविशिष्टमपि यथा—दण्डः प्रहरणमस्यां दाण्डा क्रीडा इति । करणादयोऽस्य विशिष्टा न विद्यन्ते । कर्मकर्त्रोरेवाकारकसंबन्धिनिपातैर्विशेषणयोगः । स कर्मणोऽकारकेण यथा—मासाय भूतो मासिकः, संवत्सरमधीष्टः सांवत्सरिक इति ; कर्तुर्यथा—संतापाय प्रभवति सांतापिकः, वर्षं भूतो भावी वा वार्षिक इति । कर्मणः संबन्धिना यथा—वाक्यपदे अधिकृत्य कृतो ग्रन्थः वाक्यपदीयः, कलापिषु उद्दिश्यमानकलापेषु देयमृणं कालापकं इति ; कर्तुर्यथा—तित्तिरिणा प्रोक्तं विदन्ति अधीयते वा तैत्तिरीयाः, पूर्वं कृतं भुक्तं पीतं वा एभिः पूर्विण इति । कर्मणो निपातेन यथा—यथाकथाच क्रियते याथाकथ्यमिदं, बहिः दृश्यते बाह्यं इति ; कर्तुर्यथा—आराद्भवः आरातीयः, साक्षाद्द्रष्टा साक्षी इति ।

ननु क्रिययाऽपि कर्मणः कर्तुर्वा विशेषणयोगः संभवति ; तद्यथा—पाकेन निर्वृत्तं पाकिमं, अपमित्यापमित्यकं, याचितेन याचितकं इति ; यथा च सुस्नातं पृच्छति सौस्नातिकः, प्रभूतमाह प्राभूतिकः, कृतः (तं) पूर्वमनेन कटः कृतपूर्वी कटं इति । उच्यते—क्रियाऽपि प्राकृतं कर्मैव ; अतस्तद्विशिष्टयोरपि कर्मकर्त्रोः कर्म(कर्तृ)विशिष्टत्वमेव भवति । ननु च निर्वृत्तमित्येतस्य कथं कर्मता ? इदं ह्यनुद्रिक्तकर्मांशे कर्तरि (कर्तरि वा) प्रयुज्यमानं दृश्यते । नैवम्, अन्तर्भूतण्यर्थत्वेनास्य सकर्मकत्वमपि मन्यन्ते ; तथा च कात्यायनः—

'उत्तारणाय जगतः प्रपितामहेन तस्मात्पदात्त्वमसि रज्जुरिव प्रवृत्ता ।'

मल्लनागोऽप्याह—'नागरकवृत्तं वर्तेत' इति । अथ कृतपूर्वी कटं इति कथम् ? न ह्यनेन प्रयोगेणापि भवितव्यम् । किं कारणम् ? द्वितीयया तावत् नोत्पत्तव्यम् । तत् कुतः ? केनाभि-

हितम् । प्रत्ययेनापि नोत्पत्तव्यम् । किं कारणम् ? असामर्थ्यात् । कथमसामर्थ्यम् ? सापेक्षमसमर्थं भवतीति । उच्यते—नायं कर्मणि क्तः ; अपि तु भावे । भावसाधनेन च कृतशब्देन योच्यते क्रिया तयेप्सितं कटादि कर्मानभिहितमेवेति । तत्र यथा ग्रामं गतो देवदत्त इति धातुनिष्ठाभ्यामभिधीयमानयोः क्रियाकर्त्रोः ग्रामादिकर्मभिरभिसंबन्धो भवति, एवं कृतपूर्वीति कृतशब्देन तद्धितेन वाऽभिधीयमानयोः क्रियाकर्त्रोः कटादिकर्मभिरभिसंबन्धो भवति ; तथा हि—कृतं पूर्वमनेनेत्यस्मिन्नर्थे कृतपूर्विशब्दस्तद्धितान्तो वर्तते ; तेन च पूर्वं कृतवानित्ययमर्थः संपद्यते ; एवं च सापेक्षत्वाभावान्नास्त्यसामर्थ्यम् ; अस्ति च करोतिवाच्यक्रियापेक्षं कटस्य कर्मत्वमिति तद्धितद्वितीयोत्पत्त्योर्नानुत्पत्तिः । तदुक्तम्—

अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
संबध्यते क्रिया तद्वत् कृतपूर्वादिषु स्थिता ॥ इति ॥

यदा तु कृतः पूर्वं कटोऽनेनेति विग्रहः, तदाऽपि न दोषः ; यतः यद्यपि कृतादिशब्दाः कर्मणि व्युत्पाद्यमानाः सामानाधिकरण्यात् कटादिकर्मविशेषं निर्भुञ्जते, तथाऽपि नेत्थंभूता एव प्रत्ययमुत्पादयन्ति, वृत्तीनां विशेषप्रत्यायनासामर्थ्यात् ; अतो वृत्तिविषयेऽनपेक्षितविशेषकर्मान्तर्भूतकर्मसामान्योऽन्य एव कृतशब्दो भवति । अविवक्षितकर्माणोऽन्तर्भूतकर्माणश्चाकर्मका एव जायन्ते ; यथा—'तस्माद्दीक्षितो न ददाति न पचति न जुहोति' इति । एवमकर्मकत्वेऽन्तर्भावाभिधाय्येव ; तच्चानपेक्षत्वात् सामर्थ्ये सति प्रत्ययमुत्पादयति । प्रत्ययार्थश्च कर्ता क्रियया प्रकृत्यर्थेन यदीप्सति तत् कर्मानभिहितं प्रत्ययेन ; ततो द्वितीया भवति । तदुक्तं भाष्ये—'योऽसौ कृतकटयोरभिसंबन्धः स उत्पन्ने निवर्तते ; अस्ति च करोतेः कटेन सामर्थ्यमिति द्वितीया भविष्यति कृतपूर्वी कटमिति' । हरिरप्याह--

विशेषकर्मसंबन्धे विनिर्भुक्ते कटा (कृता) दिभिः ।
विशेषनिरपेक्षोऽन्यः कट (कृत) शब्दोऽवकल्पते ॥

अकर्मकत्वे सत्येवं क्तान्तं भावाभिधायि यत् ।
तेन क्रियावता कर्त्रा योगो भवति कर्मणाम् ॥ इति ॥

यदि वा शास्त्रप्रक्रियाभ्यासबाधितमतीनामेवायमभिमानः—वाक्यार्थे वृत्तयो भवन्तीति । परमार्थतस्तु—वृत्तिवाक्ययोरन्यत्वमेव मन्यन्ते, अर्थविप्रकर्षात् । यथा हि—वाक्ये यः कटादिकर्मसंबन्धः स वृत्तौ नास्ति, तस्यान्तर्भूतकर्मणः कृतशब्दस्य भावाभिधायित्वात् ; तदुक्तम्—

विशेषः श्रूयमाणोऽपि प्रधानेषु गुणेषु वा ।
शब्दान्तरत्वाद्वाक्येषु वृत्तौ नित्यं न विद्यते ॥

भाष्यकारोऽप्याह— 'नेदमुभयं युगपद्भवति वाक्यं च प्रत्ययश्च ; यदा वाक्यं न तदा प्रत्ययः, यदा प्रत्ययः सामान्येन तदा वृत्तिः, तत्रावश्यं विशेषार्थिना विशेषणोऽनुप्रयोक्तव्यः कृतपूर्वी कटमिति ' एवमधीतमनेन, अधीतं व्याकरणमनेन इति वा अधीती व्याकरणे इत्यपि व्याख्यातम् ।

संबन्धी द्विधा—प्रधानं गुणभूतश्च । तयोः प्रथमान्ताभिधेयः प्रधानम् ; स त्रिधा—द्रव्यरूपः, गुणरूपः, अभिन्नरूपश्च । तेषु 'तस्यापत्यम्' (पा. ४.१.९२.) इत्यादिराश्रयवचनो द्रव्यरूपः ; स द्विधा—निरपेक्षः, सापेक्षरूपश्च । तयोः निरपेक्षो यथा—वसिष्ठस्यापत्यं वासिष्ठः, पाणिनेः शिष्यः पाणिनीयः, पञ्चालानां राजा पाञ्चालः, पृथिव्याः ईश्वरः पार्थिवः, पाटलायाः पुष्पं पाटलं, जम्ब्वाः फलं जाम्बवम् इति । सापेक्षो यथा—पितुः पिता पितामहः, पितुर्भ्राता पितृव्यः, मातुर्भ्राता मातुलः, भ्रातुरपत्यं भ्रातृव्यः, स्वसुः स्वस्रीय इति । 'तस्येदं' (पा. ४.१.१२०) इत्यादिराश्रित-[वचनः] गुणवचनो गुणरूपः ; स द्विधा—षष्ठीविशेष्यः, अषष्ठीविशेष्यश्च । तयोः षष्ठीविशेष्यो यथा—युष्माकमियं गौः यौष्माकी गौः, देवदत्तस्य भूतपूर्वो देवदत्तरूप्यः राजा, पुत्रस्य निमित्तं पुत्रीयः संयोगः, विदिशाया अदूरभवं वैदिशं नगरं, मूर्वायाः विकारः मौर्वं भस्म, दूर्वाया अवयवः दौर्वः काण्डः इति । अषष्ठीविशेष्यो यथा—वत्सेभ्यो हितो वत्सीयो गोधुक्, अङ्गारेभ्य इमानि अङ्गारीयाणि काष्ठानि, शरणे साधुः शरण्यो राजा, आकर्षे कुशलः आकर्षको धूर्तः, पुष्पैः वित्तः पुष्पचणः चम्पकः, सूर्येणैकादिक् सौरी बलाका इति । प्रकृत्यैकच्छायोऽभिन्नरूपः ; स द्विधा—लिङ्गसंख्यानुपग्राही, लिङ्गसंख्योपग्राही च । तयोर्लुगभिधेयो लिङ्गसंख्यानुपग्राही ; यथा—गर्गस्यापत्यानि गर्गाः, पञ्चालस्य राजानः पञ्चालाः, अत्रेः अपत्यानि अत्रयः, कुसुम्भ्याः पुष्पं कुसुम्भं, बदर्याः फलं बदरं, लवणेन संसृष्टः लवणः सूपः इति । लुबभिधेयो लिङ्गसंख्योपग्राही ; यथा—पञ्चालानां निवासः पञ्चाला जनपदः, वरणाः सन्त्यस्मिन् वरणा नगरी, शिरीषाणामदूरभवः शिरीषो ग्रामः । किंच गोदौ नाम ह्रदौ, तयोरदूरभवो ग्रामः गोदौः ; हरीतक्यादिषु पुनः व्यक्तिमेवोपगृह्णाति, न वचनम्—हरीतक्याः फलानि हरीतक्यः ; खलतिकादिषु वचनमेव, न व्यक्तिं—खलतिको नामाद्रिः, तस्यादूरभवानि खलतिकं वनानि इति । ननु च वसिष्ठस्यापत्यमित्यादौ भिन्नाधिकरणत्वात् द्वयमेवाश्रयते पितरं पुत्रं च ; तथाहि—उभयमपि संबन्धादभ्यधिकं प्रतीयते—पितुश्चामी पुत्राः स्वमिति ; तत् कथमेकस्मादेव षष्ठी तद्धितो वा ? उच्यते—यद्यप्ययमुभयाधिकरणः, तथाऽप्येक एव ; भेदे हि नोभयाधिकरण एकः स्यात्, संबन्धद्वयप्रसङ्गात् । सोऽयमेकोऽनेकाश्रयः, एकश्चैव विभक्त्योच्यते, एकस्मादेव तद्धितोत्पत्तिर्भवति । एवमपि पितुरेव

षष्ठीति नियमो न स्यात् । कः पुनराह नियम इति ; यावता मातुः पिता मातामह इत्यपि भवति । कुतः पुनरिदं यदेकदा तु स्वामिनोऽन्यदा तु स्वस्माद्विभक्तिः तद्धितो वेति ? संबन्धस्य पदन्यासातिरेकात् । नियोगतो हि पितापुत्रयोरेकस्य प्राधान्यमन्यस्योपसर्जनत्वं, तुल्यत्वे संबन्धाभावात् । तत्र न प्रधानं पुत्रादि गुणानुरोधेन प्रवर्तितुमर्हति ; उपसर्जनं तु पित्रादि यथा प्रधानानुग्रहः तथाऽऽत्मानं निर्वर्तयति, स्वरूपावस्थितौ प्रधानार्थासिद्धेः । अतोऽप्रधाने संबन्धस्याधिकः पदन्यासः । तत्र षष्ठी तद्धितोत्पत्तिर्वा भवति । सा चैकत्वात् संबन्धस्य पुत्रगतमप्येनमभिधत्ते । यदा तु मातुः पिता मातामहः इति विवक्षातः प्राधान्यविपर्ययः, तदा अपत्यादुत्पन्नया षष्ठ्या द्विष्ठोऽप्यसावभिहित इति न सा तद्धितो वा पितृशब्दात् ; तदुक्तम्—

द्विष्ठोऽप्यसौ परार्थत्वाद्गुणेषु व्यतिरिच्यते ।
तत्राभिधीयमानश्च प्रधानेऽप्युपयुज्यते ॥ इति ॥

एवं 'तेनैकदिक्' (पा. ४.३.११२) 'तदर्थं विकृतेः प्रकृतौ' (पा. ५.१.१२) 'तस्य निमित्तम्' (पा. ५.१.३८) 'तेन वित्तश्चुञ्चुप्चणपौ' (पा. ५.२.२६) 'तस्मै हितम्' वतुप्प्रकरणे 'युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम्' इत्यादिषु सहार्थतादर्थ्यवित्तहितलक्षणोपपदपरिशेषादयः संबन्धविशेषाः षष्ठ्यन्ता अपि द्विष्ठत्वादेकविभक्तिवाच्यत्वेनावगन्तव्याः । ननु च तृतीयादीनां व्यतिरेकविभक्तित्वात् षष्ठीवदेव भवतु, संबन्धाभिधानसामर्थ्यात् ; प्रथमायाः पुनरव्यतिरिक्तप्रातिपदिकार्थाभिधायिन्याः कथमिवैतदुपपद्यते—त्वामिव त्वावान्, अहमिव मावान् इति । अत्रैके वर्णयन्ति—त्वावतः पुरुवसो, यज्ञं विप्रस्य मावतः, न त्वावानन्यो दिव्यो न पार्थिव इति प्रथमान्तायाः प्रकृतेः प्रधानभूतेऽपि संबन्धिनि प्रयोगदर्शनात् प्रत्ययोऽवगम्यते । अन्ये त्वाहुः—त्वमिव त्वावान्, अहमिव मावान् इत्युपमानमत्र प्रथमान्तं प्रकृत्यर्थः, उपमेयं प्रत्ययार्थः । न तत्र तावदवच्छेदकत्वादुपमानं प्रधानम् । अवच्छेदकादप्युपमानात् षष्ठी नोत्पद्यते, व्यतिरेकहेतोरसंभवात् ; इवशब्दो ह्यसत्त्वभूताभिधायित्वान्न व्यतिरेकाभिधायकः ; सादृश्यद्योतको ह्यसौ । अन्यश्च न कश्चिदिह व्यतिरेकहेतुः श्रूयते । अतश्च गौरिव गवयः इत्यादाविवात्र षष्ठ्या अभावः ; व्यतिरेकहेतौ तु सतीवशब्दप्रयोगे उपमानात् षष्ठ्युत्पद्यते—देवदत्तस्येव यज्ञदत्तस्य दन्ता इति । तदुक्तम्—

इवशब्दप्रयोगे तु बाह्यात् संबन्धिनो विना ।
नाधिक्यमुपमानेऽस्ति द्योतकः स प्रयुज्यते ॥

मा भूत् षष्ठी ; प्रथमयाऽपि न भवितव्यमेव, उपमानस्यावच्छेदकत्वेनाप्याधिक्यात् । कः पुनराह—अनधिक एव प्रातिपदिकार्थे प्रथमेति ; पाटलिपुत्राद्राजकं सप्त योजनानि, सप्तसु वा

योजनेषु इत्यध्वनः प्रथमा सप्तमी च स्मर्यते ; संबोधने च प्रथमैव विधीयते ; धिक् देवदत्तं, हा देवदत्तं, इति च द्वितीयाविषये प्रथमाप्रयोगो दृश्यते ; यथा—

'हा धिक्कष्टमनिष्टमस्तकरुणः कोऽयं विधेः प्रक्रमः ।'
'कन्यान्तःपुरमेव हा प्रविशति क्रुद्धो मुनिर्भार्गवः ॥' इति ॥

षष्ठ्यन्ताभिधेयो गुणभूतः ; स त्रिधा—भावविशिष्टः, कारकविशिष्टः, संबन्धिविशिष्टश्च । तेषु भावेनावच्छिन्नो भावविशिष्टः ; स द्विधा—मुख्येन, उपाधिना च । तयोर्मुख्येन यथा—कृषिरस्यास्तीति कृषीवलः, मायावी, आमयावी, दयालुः, श्रद्धालुः इति । उपाधिना यथा—मृदङ्गो वाद्यत इति शिल्पमस्य मार्दङ्गिकः, अपूपाः क्रियन्त इति शिल्पमस्य आपूपिकः, मासं ब्रह्मचर्यमस्य भिक्षोः मासिकः, अस्ति परलोक इति मतिरस्य साधोः आस्तिकः, नास्ति नरकादिकमिति मतिरस्यासाधोः स नास्तिकः, दिष्टमेव प्रभवतीति मतिरस्य जिगीषोः दैष्टिकः इति । कारकेणावच्छिन्नः कारकविशिष्टः ; स द्विधा—स्वतन्त्रेण, अस्वतन्त्रेण च । तयोः स्वतन्त्रेण यथा—धनमस्यास्तीति धनवान् वदान्यः, पञ्चमोऽस्य मासो जातस्य वर्तते पञ्चमो बालकः, प्रासादोऽस्य स्यात् प्रासादीयं दारु, तारकाः संजाता अस्य तारकितं नभः, समयः प्राप्तोऽस्य सामयिकं कर्म, एकमन्यत् कर्माध्ययने वृत्तमस्य ऐकान्यिकः इति । अस्वतन्त्रेण यथा—लवणं पण्यमस्य लावणिकः, वासुदेवे भक्तिरस्य वासुदेवकः, धनुः प्रहरणमस्य धानुष्कः, प्रस्थः परिमाणमस्य प्रास्थिकः, सलातुरोऽस्याभिजनः सालातुरीयः, ग्रामो निवासोऽस्य ग्रामीणः इति । संबन्धिनावच्छिन्नः संबन्धिविशिष्टः ; स द्विधा—विशेष्येण, विशेषणेन च । तयोः विशेष्येण यथा—अपूपा हिता एषां आपूपिकाः अवन्तयः, मूलमाबर्हि एषां मूल्या माषाः, बृहत्यादिरस्य बार्हतः प्रगाथः, कालः प्रकृष्टोऽस्य कालिकमृणम् ; किंच निशासंबन्धाध्ययनमपि निशा, तदस्य सोढं नैशः, एवं प्रादोषिक इति । विशेषणेन यथा—इन्द्रो देवता अस्य ऐन्द्रं हविः, संशप्तकाः योद्धारोऽस्य सांशप्तकः संग्रामः, विनयः प्रयोजनमस्यां वैनयिकी विद्या, देवदत्तो ग्रामणीरस्य दैवदत्तकः सङ्घः, पञ्च अवयवाः अस्यां पञ्चतयी गतिः, पञ्च अस्य भृतिर्वस्नो वा पञ्चकः पदार्थः इति । ननु च 'तस्यापत्यम्' इत्यादौ उपगोरपत्यं औपगवः इति 'समर्थानां प्रथमाद्वा' (पा. ४. १. ८२) इत्यधिकारात् षष्ठ्यन्ता प्रकृतिरपत्यवतो गुणभूतस्य वाचिका ; प्रथमान्तं तु प्रधानभूतमपत्यं प्रत्ययार्थ एव । 'तस्येदम्' (पा. ४.३.१२०) इत्यादावपि प्रधानं संबन्धि तद्धितवाच्यमित्युपपद्यते । 'साऽस्य देवता' (पा. ४.२.२४) इत्यादौ तु इन्द्रो देवता अस्य ऐन्द्रं हविः इति पूर्वोक्तादेवाधिकारात् सेति प्रथमान्ता प्रकृतिरिन्द्रादिदेवतावाचिका प्रधानम् ; गुणभूतस्तु संबन्धी पुरोडाशादिरस्येत्यनेनाप्रधानभूतसंबन्धिवाचकत्वेन निर्दिष्टः प्रत्ययार्थः । तत्कथमिवायं विपर्यस्तः प्रधानगुणभाव उपपन्नो भवति ? उच्यते—गुणभूतोऽपि संबन्धी बुद्ध्यन्तरेणाप्रधानभावात् प्रत्या-

व्यासादितप्रधानभावः प्रत्ययार्थत्वेन प्रदर्श्यते । अत एव इन्द्रो देवता अस्येत्येतावानेव विग्रहो न कार्यः ; वृत्तिसमानार्थेन हि तेन भवितव्यम् । न चैतावतो वृत्तिसमानार्थता ; वृत्तौ हि इन्द्रादिदेवतावच्छिन्नं पुरोडाशाद्यवगम्यते, वाक्ये तु पुरोडाशाद्यवच्छिन्नेन्द्रादिदेवतेति । अयं तु विग्रहो वृत्त्या समानार्थः—इन्द्रो देवता अस्य तदिदमिन्द्रस्वाम्यवच्छिन्नमैन्द्रं हविः इति । तदिदमुक्तम्—

अनन्तरोक्तः संबन्धी प्रतिपद्य प्रधानताम् ।
बुद्ध्यन्तरपरामर्शाद्वाच्यतां प्रतिपद्यते ॥
प्रकृत्यर्थविशिष्टो हि प्रत्ययार्थोऽभिधानभाक् ।
न्यायः स नतः[1] सास्येत्यधिकारसमाश्रयात् ॥

एवं 'सोऽस्यादिरिति छन्दसः प्रगाथेषु' इत्यादावपि गुणभूतः संबन्धी तद्धिताभिधेयो बोद्धव्यः । यत्र तु गुणभूतः संबन्धी प्रत्ययार्थः तत्र न प्रधानम् ; यत्र प्रधानं तत्र न गुणभूतः ; कुतः पुनरिदं ज्ञायते ? आचार्यप्रवृत्तिर्ज्ञापयति—यदयं निवासनिवासवत्संबन्धे उभयमाह— 'तस्य निवासः' (पा. ४. २. ६९) 'सोऽस्य निवासः' (पा. ४. ३. ८९) इति ।

ननु च अपत्यापत्यवत्संबन्धेऽप्युभयं संभाव्यते—माता अपत्यमस्य मातामहः, पिताऽपत्यमस्य पितामहः इति । नैवम् ; पितुः पिता पितामहः, मातुः पिता मातामहः इति करिष्यते । तथाऽपि हृदयस्य बन्धनं शृङ्खलमस्य बन्धनं करभे, इति कथम् ? नान्योत्र बन्धनशब्दः संबन्धिवचनः— यथा हि बन्धनमित्यनेन दामोच्यते । नैवम् ; बन्धनमित्यनेन संज्ञाशब्दोपाश्रयः शृङ्खलकः करभ इति । एवं च निवासतद्वतोरपि शेषषष्ठ्यभ्युपगमत्वे कर्तृविशिष्टमधिकरणं वाच्यम्—शिबीनां निवासः शैबः इति ; अपरत्र अधिकरणविशिष्टः कर्ता—ग्रामो निवासोऽस्य सोऽयं ग्राम्यः इति । ननु च ग्रामशब्दोऽयं समूहवचनः ; तद्यथा— 'अश्वग्रामविधौ कृती न समरेष्वस्यास्ति तुल्यः पुमान्' 'न रुणत्सीन्द्रियग्रामम्' इति । किं चातः ? समूहश्च समूह्यपेक्ष इति सापेक्षत्वादसामर्थ्ये तद्धितोत्पत्तिर्न भवति । न च सामान्येन समूहाद्भविष्यतीति वाच्यम्, तावत्येवार्थे तस्यापरिसमाप्तेर्दुरधिगमाभिधाने च सामर्थ्याभावात् । न च यथा देवदत्तस्य मातुः पिता मातामहो देवदत्तस्य, विष्णुमित्रस्य गुरोः कुलं गुरुकुलं विष्णुमित्रस्येति सापेक्षस्यापि तद्धितः समासो वा भवति, एवमस्यापि भविष्यतीति वाच्यम् ; न ह्ययं संबन्धिशब्दः । संबन्धिशब्दानामेव च सापेक्षाणां वृत्तयो भवन्ति ; यदाह—

संबन्धिशब्दः सापेक्षो नित्यं सर्वः प्रवर्तते ।
स्वार्थवत् सा व्यपेक्षाऽस्य वृत्तावपि न हीयते ॥

[1] मूलमातृकाकोशेऽप्येवमेवात्र वर्णलोपः उपलभ्यते । परंतु, 'न्यायस्ससम्मतः सास्येत्यधिकारसमाश्रयात् ।' इति पाठेनात्र भवितव्यमिति प्रतिभाति ॥

अन्येषां तु सविशेषणानां न वृत्तिः, वृत्तानां वा न विशेषणमित्येव ; न हि भवति ऋद्धस्य राज्ञः पुरुषः ऋद्धराजपुरुष इति ; नापि ब्राह्मणानां ग्रामो निवासोऽस्य ब्राह्मणानां ग्राम्योऽयमिति। कथं तर्हि राज्ञः पुरुषः शोभनो राजपुरुषः शोभनः इति ? भवति वै प्रधानस्य सापेक्षस्यापि वृत्तिः। कथं तर्हि ग्रामो निवासोऽस्येति ग्रामस्य विशेष्यत्वात् प्राधान्ये सापेक्षस्यापि वृत्तिर्न भवति ? अनन्तरोक्तन्यायेनात्र षष्ठ्यर्थस्य प्राधान्यात् । ननु, अयमपि संबन्धिशब्दः कस्मान्न भवति ? समूहार्थमात्र एव वृत्त्यपरिसमाप्तेः । तर्हि न भवितव्यमेव ग्रामशब्दान्निवासनिवासवत्संबन्धे तद्धितेन ? न भवितव्यम् ; यथा—अव्युत्पन्नजनसमूहास्पदार्थोऽयमुपचारवृत्त्या भवति ; दृश्यते तात्स्थ्यात् तद्वदुपचारः, यथा मञ्चाः क्रोशन्तीति ; यदि वा ग्रामशब्दोयं बह्वर्थः ; यथा—अस्ति शालासमुदाये—ग्रामो दग्ध इति ; जनपदसमुदाये– ग्राम आगत इति ; अस्ति वाटपरिक्षेपे—ग्रामं प्रविष्ट इति ; सारण्यके ससीमके सस्थण्डिलके च भूप्रदेशे—ग्रामो लब्ध इति ; अस्ति अव्युत्पन्नजनसमूहास्पदे—'शूद्रकर्षकप्राये जनपदं निवेशयेत् ; तत्र अष्टशतग्राममध्ये प्रधानं स्थापनीयम् ; स नागराणां निवासो नगरमिति ।' तत्र अव्युत्पन्नजनसमूहास्पदे यो ग्रामशब्दो वर्तते, ततो भवितव्यं तद्धितेन—ग्रामो निवासः अस्येति सोऽयं ग्राम्यः ग्रामीणः इति ॥

अथ स्वार्थिकाः। तेऽपि द्विधा—असत्त्वभूतार्थाः, सत्त्वभूतार्थाश्च। उभयेऽपि प्रत्येकं षोढा—वाचकाः, द्योतकाः, विशेषकाः, सहाभिधायकाः, सार्थकाः, निरर्थकाश्चेति । तत्र असत्त्वभूतार्थेषु शक्तिमात्राभिधायिनो वाचकाः ; यथा—तत आगतः, तत्र वसति, पुरस्तादागतः, पुरस्ताद्वसति, देवत्रा गच्छति, मनुष्यत्रा तिष्ठति इति । पदार्थगतकुत्साप्रशंसाद्यभिव्यञ्जकाः द्योतकाः ; यथा—कुत्सितं पचति पचतकि, प्रशस्तं पचति पचतिरूपं, ईषदसमाप्तं पचति पचतिकल्पं, प्रकृष्टं पचति पचतितराम् ; एवं नितरां, अतीवतरां इति । वाचकत्वे द्योतकत्वे वा मङ्गलवीप्साद्यधिकार्थाभिधायिनो विशेषकाः ; यथा—बहुभ्यो देहि बहुशो देहि इति । अल्पं देहि अल्पशो देहि इति, द्वाभ्यां द्वाभ्यां देहि द्विशो देहि, माषं माषं देहि माषशो देहि, एवं कस्मिन् काले कदा, केन प्रकारेण कथमिति । अनुप्रयोगाद्यपेक्षिणः सहाभिधायकाः ; यथा—अनग्निरग्निः संपद्यते अग्निसात्संपद्यते, देवाय देयं करोति देवत्राकरोति । एवं तं भवन्तं ततो भवन्तं, एतेन दीर्घायुषा अत्र दीर्घायुषा, असौ आयुष्मते इहायुष्मते, कस्य देवानां प्रियस्य क्व देवानां प्रियस्य इति । गतिसंज्ञादिकार्यनिमित्तभूताः सार्थकाः ; यथा—शुक्लीकृत्य, पटपटायते, द्वेधाकारं, अभितो ग्रामं, विना देवदत्तेन, दक्षिणाहि ग्रामात् इति । शब्दोपचयादिमात्रहेतवो निरर्थकाः ; यथा—उरसि प्रत्येव प्रत्युरसं, आत्मन्यध्येव अध्यात्मं, गिरिमन्वेव अनुगिरं, उच्चैरेव उच्चकैः, त्वयैव त्वयका, अस्माभिरेव अस्माकाभिः इति । एवमन्येऽपि—देवा अर्जुनतोऽभवन्, पूर्वतो ग्रामस्य, ग्रामंपूर्वेण, पुरस्ताद्रमणीयं, ऐकध्यं करोति, पञ्चकृत्वः पचति इत्यादयः असत्त्वभूतार्थाः स्वार्थिकेषु यथायोगमवगन्तव्याः। अन्ये तु– वतिमपि शक्त्यभिधायिषु विशेषकस्वार्थिकेषु वर्णयन्ति ; यथा—राज्ञेव व्यवहृतमनेन

राजवत्, देवमिव भवन्तं पश्यामि देववत् इत्याद्युदाहृतं पुरस्तात्। एवं च सूत्रं व्याचक्षते—तेन तुल्यम् इत्येतस्मिन्नर्थे वतिर्भवति यत्तुल्यं क्रिया चेत् सा भवति। क्रियेत्यनेन क्रियानिमित्तभूताः शक्तय उच्यन्ते। न चैतद्वाच्यम्—एवं सति क्रिया न संगृहीता भवति; यतः क्रियाऽपि कारकमेव; यथोच्यते—

> क्रियामन्ये तु मन्यन्ते क्वचिदप्यनपाश्रिताम्।
> साधनैकार्थभावित्वे प्रवृत्तिमनपायिनीम्॥
>
> सामान्यभूता सा पूर्वं धात्वर्थैः प्रविभज्यते।
> ततो व्यापाररूपेण साध्ये च व्यवतिष्ठते॥
>
> प्रकृतिः साधनानां सा प्रथमं तच्च कारकम्।
> शक्तिरेवाधिकरणे स्रोतोवदुपकर्षति॥
>
> अपूर्वं कालशक्तिं वा क्रियां वा कालमेव वा।
> तमेवंलक्षणं भावं केचिदाहुः कथंचन॥ इति॥

तत्र तस्येवेत्यस्य च प्रयोजनमुपन्यस्तं पुरस्तात्–द्रव्यगुणयोस्तुल्ययोः प्रत्ययो न लभ्यत इति। नन्वेवं सति देवदत्त इव स्थूलः, यज्ञदत्त इव गोमान्, इत्यत्र प्रत्ययो न प्राप्नोति, सप्तमी षष्ठ्यन्तत्वयोरभावात्। अत्रापि क्रियाग्रहणाद्भविष्यति। कथं पुनः क्रियाशब्देन गुण उच्यते? क्रियापूर्वकत्वात्; स्थूलगुणयोगाद्धि स्थूलो भवति, गोसंबन्धाच्च गोमान् इति। नन्वेवं सति क्रियाग्रहणमपि न कर्तव्यम्; प्रवर्ततामविशेषेणैव तेन तुल्यं इत्येतस्मिन्नर्थे वतिः। 'तत्र तस्येव' इत्यनेन च नार्थः सूत्रारम्भेण। 'तदर्हम्' इत्येतदप्युपमानान्न व्यतिरिच्यते; यद्धि वृत्तं राजानमर्हति तद्राजसदृशमेव भवति। एवं च तेन तुल्यमित्येवावतिष्ठते। तथा चाह चन्द्रगोमी–'इवे वतिः' इति। नन्वेवं सति गौरिव गवय इत्यत्रापि वतिः प्राप्नोति। नैवम्; उपमायां वतिः, नोपमाने। यद्यपि वतिशब्देनोभयमपि द्योत्यते, तथाऽप्यन्यदेवौपम्यम्, अन्यदेवोपमानम्; भूयोऽवयवसादृश्यस्य योगो ह्युपमा; यथा—चन्द्र इव मुखम्। सदृशात् सदृशप्रतिपत्तिरुपमानम्; यथा—गौरिव गवय इति॥

सत्त्वभूतार्थभेदेषु लिङ्गविशेषाद्यभिधायिनो वाचकाः; यथा—देव एव देवता, देवतैव दैवतं, उपधिरेव औपधेयं, भाग एव भागधेयं, उपाय एव औपयिकं, चत्वार एव वर्णाः चातुर्वर्ण्यं इति। कुत्साप्रशंसाद्यभिव्यंजका द्योतकाः; यथा—कुत्सितो वैयाकरणः वैयाकरणपाशः,

प्रशस्ता मृत् मृत्स्ना, तनुः उक्षा उक्षतरः, लघुः कुटी कुटीरकः, ईषदसमाप्तः आढ्यः आढ्यकल्पः, भूतपूर्वो राजा राजचरः इति। वाचकत्वे द्योतकत्वे वा व्याहृतत्वाद्यर्थविशेषव्यक्तिहेतवः विशेषकाः; यथा—व्याहृतार्था वागेव वाचिकम्, उपदेशरूपं कर्मैव कार्मणम्, असहाय एक एव एकाकी, अश्व इवायमश्वकः, कुशाग्रमिव कुशाग्रीया बुद्धिः, शिलेव शैलेयं दधि इति। प्रकृतिविशेषेभ्यो नित्यमुपजायमानाः सहाभिधायकाः; यथा—करीषगन्धेरपत्यं कारीषगन्ध्या, अभिजितोऽपत्यमाभिजित्यः, कुञ्जस्यापत्यं कौञ्जायन्यः, परस्परं विविध आक्रोशो व्याक्रोशी, समन्ताद्रावः सांराविणं, राज्ञामायत्तं राजाधीनम् इति। 'लुपि युक्तवद्व्यक्तिवचने' (पा. १.२.५१) इति कार्यार्थाः सार्थकाः; यथा—चञ्चा रमणीयम्, वधिका दर्शनीयः, वासुदेवः प्रतिमा, बलदेवश्चित्रं, देवपथः आकाशरेखा, हंसपथः क्रौञ्चं इति। शब्दोपचयादिमात्रहेतवः निरर्थकाः; यथा—प्रज्ञ एव प्राज्ञः, विनय एव वैनयिकः, मृदेव मृत्तिका, सूर एव सूर्यः, नामैव नामधेयं, देवानां राजैव देवराजः इति। एवं कतरः, कतमः, पटुतरः, पटुतमः, पटिष्ठः, पटीयान् इत्यादयोऽपि सत्त्वभूताः स्वार्थाः स्वार्थिकेषु यथायोगमवगन्तव्याः। किं पुनरमी पदप्रकृतयः प्रातिपदिकप्रकृतयो वा? कुतस्ते संशयः? उभयथोपलम्भात्; तथा ह्येषां युष्मकाभिः, कदा, तर्हीत्यादौ प्रातिपदिकप्रकृतित्वम्; भिन्दकि, त्वयकि, मयकि इत्यादौ पदप्रकृतित्वमुपलभ्यते। ततश्च यावकः, अश्वकः, उच्चकैः इत्यादौ संदेहः; न संदेहः; स्वार्थद्रव्यलिङ्गसंख्याशक्तिमात्राभिधानेन प्रातिपदिकात् स्वार्थादिनिमित्तकुत्साप्रशंसानुकम्पातिशयपरिसमाप्त्यधिकार्थद्योतनेन पदादेव स्वार्थिकोत्पत्तिर्भवतीति। स्वार्थाद्यभिधानेन हि परिसमाप्तार्थं पदं स्वार्थादिनिमित्तकैः कुत्सादिभिः संबन्धमुत्सहते; तदाह—

कुत्साप्रशंसातिशयैः समाप्तार्थं तु युज्यते।
पदं स्वार्थादयः सर्वे यस्मात्कुत्सादिहेतवः॥

यद्यपि स्वार्थाद्यन्यतमनिबन्धनाः क्वचित् कुत्सादयो भवेयुः, तथाऽपि तत्साकल्यार्थं पदादेव कादयः उत्पाद्याः। तत्र अन्यतमनिबन्धनाः कुत्सादयो यथा—

किं द्वारि दैवहतिके सहकारकेण संवर्धितेन विषवृक्षक एष पापः।
यस्मिन्मनागपि विकासविकारभाजि भीमा भवन्ति मदनज्वरसंनिपाताः॥

अत्र हि दैवहतशब्देन लब्धायां नीत्युपाधौ सर्वथैवानुकम्प्यमानतायां, सहकारसंवर्धननिबन्धनत्वमेवास्याः कृपा द्योत्यते—एवं नाम त्वं दैवोपहताऽसि, यत् सहकारच्छद्मानं विषपादपं द्वारि संवर्धयसि इति। विषपादपशब्देन लब्धायां सहकारस्य सर्वथैव कुत्सायां, पादपविकासकाले कामिनामसह्यस्मरज्वरसंनिपातहेतुकत्वमेवास्याः कप्रत्ययेन प्रत्याय्यते। तदुक्तम्—

कुत्सितत्वेन कुत्स्यो वा न सम्यग्वा विकुत्सितः ।
स्वशब्दाभिहिते केन विशिष्टोऽर्थः प्रतीयते ॥

न च सांप्रतिकी कुत्सा शब्दाभेदे प्रतीयते ।
पूज्यते कुत्सितत्वेपि प्रशस्तत्वेऽपि कुत्स्यते ॥

तद्यथा—

एक इह जीवलोके जीवतिरूपं नृरूपपशुरूपः ।
यः प्रेमपाशपाशे मृग इव न मृगीदृशां पतति ॥

स्वार्थादिसाकल्यनिबन्धनाः कुत्सानुकम्पातिशयप्रशंसादयो यथा—कुत्सितकः, अनुकम्पितकः, प्रकृष्टतरः, प्रशस्यरूपः इति । अत्र हि—

देवदत्तादिकुत्सायां वर्तते कुत्सितश्रुतिः ।
कुत्सितस्था तु या कुत्सा तदर्थे को विधीयते ॥

प्रकृष्ट इति शुक्लादिप्रकर्षस्याभिधायकः ।
प्रकृष्टस्य प्रकर्षे तु तरबादिर्विधीयते ॥

एवमनुकम्पाप्रशंसयोरपि वाच्यमिति । अनुकाभिकाभीकादयोऽपि स्वार्थिकप्रत्ययान्ता एव । तेषामन्वादिभिर्हि क्रियाविशेषः कश्चिदाक्षिप्यते ; तत्र च कामयते इत्यादौ प्रत्ययो भवन् स्वार्थे एव भवति । ननु च 'अनुकाभिकाभीकः कमिता' इत्यत्र अनुकामयतेऽसौ इत्यनुकः, अभिकामयतेऽसौ इत्यभिकः, अभीको वेति वृत्तिसमानार्थवाक्यकल्पनायां धातोः पूर्वमुपसर्गेण संबन्धः, साधनेन वा ? किं चातः ? यद्युपसर्गेण, प्रकृत्यर्थो वक्तव्यः, अनुकामयते, अभिकामयते इत्यर्थे प्रत्ययस्यैवोत्पादात् । अथ साधनेन, पश्चादुपसर्गयोगो न घटते ; न ह्यसत्त्ववचना अन्वादयः सत्त्वभूतार्थवचनैः सह संबन्धमुत्सहन्ते । यथेच्छसि तथाऽस्तु । अस्तु तावत् कमेः प्रथममुपसर्गेणैव संबन्धः । ननु चोक्तं प्रकृत्यर्थो वक्तव्य इति । स नास्ति पृथक्, प्रत्ययार्थविशेषणभूतस्यैवान्वादेः प्रकृतिभावात्; यथा 'भृशादिभ्यो भुव्यच्वेः' इत्यत्र मनस्वी सुष्ठु भवति सुमनायते, दुर्मनायते, अभि-अभिमनायते इति सुदुरभीनां प्रत्ययार्थभवने विशेषणत्वेऽपि प्रकृतिभावः । ननु असुमनाः सुमना भवतीति प्रकृत्यर्थविशेषणत्वमपि सुदुरभीनां कस्मान्न भवति ? तथा सति स्वमनायत, दुरमनायत, इत्यडागमः स्वादीनां पूर्वतः प्राप्नोति ; यथा—असंग्रामयतेति । तत्र संग्रामयतेः

सोपसर्गस्यैव चुरादिषु पाठ इति चेत्, इहापि तद् समानम्; भृशादिषु हि सुमनस्, दुर्मनस्, अभिमनस् इति प्रकृतयः पठ्यन्ते । यद्येवं, अन्वरुध्यतेतिवत् स भविष्यति । नैवम्; यद्यपि 'अनो रुध कामे' इति दिवादिषु पठ्यते, तथाऽपि यथा अरुध्यतेति दृश्यते नैवममनायतेति । तर्हि प्रत्ययार्थविशेषणपक्षे, यथा श्येन इवाचरति श्येनायते इत्यत्र आङः प्रयोग उक्तार्थत्वान्न भवति; एवं सुमनायत इत्यादौ स्वादीनामपि न भवेत् । नैवम्; तत्र हि आङर्थ एव प्रत्ययार्थविशेषणम्, इह तु तत्र स्वादीनामर्थाः; ततश्च मनायत इत्युक्ते न ज्ञायते सुष्ठु दुष्ठु अभि वा मनस्वी भवतीति स्वादयः प्रयुज्यन्ते; यथा 'पुच्छभाण्डचीवराण्णिङ्' (पा. ३. १. २०) इत्यत्र 'पुच्छादुदसने व्यसने पर्यसने च' इति पुच्छमुदस्यति उत्पुच्छयते, व्यस्यति विपुच्छयते, पर्यस्यति परिपुच्छयते इति, एवं अनुकामयते अनुकः, अभिकामयते अभिकः, अभीको वेति । अस्तु वा पूर्वं कमेः साधनेन संबन्धः । ननु चोक्तम्—पश्चादुपसर्गयोगो न घटत इति । निपाता अन्वादयो भविष्यन्ति—अनुरूपः कमिता अनुकः, अभिरूपः अभिकः, अभीको वेति । तथाऽपि, अनुकोऽनुकमिता, अभिकोऽभिकमिता इति वक्तव्यं स्यात्; यथा— 'उत्क उन्मनाः' इति । नैवम्, सामान्येनापि विशेषाभिधानं दृश्यते; तद्यथा— 'गम्लृ सृप्लृ गतौ' इत्यत्र हि गच्छतीति गौः, सर्पतीति सर्पः इति गमनसर्पणयोर्यद्यपि महान् विशेषः तथाऽपि गतावित्यविशेषेण निर्दिश्यते । एतेन 'नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः' (पा. ५. २. ३१.) इत्याद्यपि व्याख्यातम्; अत्र हि नासिकायाः अवटीटनं, अवनमनं, अवभ्रंशः इति नतिविशेषा नते इत्यनेन सामान्यशब्देनाभिधीयन्त इति । उपसर्गतो वा न दोषः; अनुरूपं कामयते, अभिरूपं कामयत इति क्रियाभागमात्रेणैव संबन्धादन्वादयः प्रत्ययार्थं विशिषन्तः प्रकृतिभावं लप्स्यन्ते; यथा—सुमनायते, विपुच्छयते इति । विषम उपन्यासः; तत्र हि मनःपुच्छादिकायाः प्रकृतेः श्रवणं विद्यते; इह तु तद्गन्धोऽपि नास्ति; यतः परः प्रत्ययः उत्पद्येत । नैवम्; इयान्, इयत्, अधुना इत्यादावपि प्रकृतेरश्रवणात् । तत्र प्रत्ययनिमित्ता प्रकृतेर्निवृत्तिः इति चेत्, इहापि निपातननिमित्ता भविष्यति । कश्चैवमाह प्रकृतेः पर एव प्रत्ययो भवतीति ? 'अव्ययसर्वनाम्नामकच् प्राक् टेः' 'विभाषा सुपो बहुच् पुरस्तात्तु पूर्वस्य' (पा. ५. ३. ७१, ६८) समासान्ताश्च सर्वे टजादयः भवन्ति । अपि च, प्रकृतिः प्रत्ययः इति रूपसिद्धिमात्रमेतत् । इदं तु अर्थवत्त्वम्—अयं शब्दोऽस्मिन्नर्थे साधुर्भवतीति । स च क्वचिदेवमुच्यते— 'अनुकाभिकाभीकः कमिता' (पा. ५. २. ७४) इति; क्वचिद्वा 'नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः' इति; क्वचिदुत्कर्षः 'अनुपद्यन्वेष्टा' (पा. ५. २. ९०) इति; क्वचित् 'श्रोत्रियश्छन्दोऽधीते' 'क्षेत्रियच् परक्षेत्रे चिकित्स्यते (स्यः)' (पा. ५.२.८४, ९२) इति; क्वचित् 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' (पा. ५. २. ३४) 'अल्पभूतिलोमाभङ्गाभ्यो रजसि कटच्' इति; क्वचित् 'अवेः संघाते कटच्' 'दुग्धे सोढजूढमरीसचः' इति; क्वचित् 'पशुनामभ्यः स्थाने गोष्ठच्' 'द्वित्वे गोयुगच्', 'षट्त्वे षड्गवच्' इति; क्वचित् 'भवने क्षेत्रे शाकटशाकिनौ'

'स्नेहे तैलच्' इति ; क्वचित् 'निष्फलतिलात्पिञ्जपेजौ' 'वाचो व्याहृतार्थायां ठक्' इति ; क्वचित्, रूढितोऽर्थमनिर्दिश्यैव 'वेः शालच्छङ्कटचौ' 'संप्रोदश्च कटच्' 'अवात्कुटारच्च' 'नेर्बिडज्बिरीसचौ' 'इनच्पिटच्चिकचि च' (पा. ५. २. २८, २९, ३०, ३२, ३३) कच्चिकादेशश्च, इति । ननु च धातुः प्रथमं साधनेन संबध्यते, पश्चादुपसर्गेण ; तत्कथमुच्यते ? यथेच्छसि तथाऽस्तु, विशेष्यं हि पूर्वसिद्धं विशेषणसंबन्धमनुभवति ; विशेष्यश्च धात्वर्थः, क्रियारूप उपसर्गाणां, उक्तं च—'क्रियावचनो धातुः' इति ; क्रिया च साध्यमुच्यते ; साध्यं च साधनसंबन्धमन्तरेण न स्यात् । तदुक्तम्—

प्रयोगार्हेषु सिद्धस्सन्भेत्तव्योऽर्थो विशिष्यते । प्राक् च साधनसंबन्धात्क्रिया नैवोपजायते ॥
(वाक्यपदीयम्, २-१८५)

तत्र, भाविसंबन्धयोग्यतासमाश्रयणात् । इदं चावश्यमभ्युपगन्तव्यम् ; अन्यथा हि क्रियावचनो धातुः इत्यपि न स्यात् । न च 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (पा. ३. १. ७) इति सन उत्पत्तिः ; तदाह—

धातोस्साधनयोगस्य भाविनः प्रक्रमाद्यथा । धातुत्वं कर्मभावश्च तथाऽन्यदपि दृश्यताम् ॥
(वाक्यपदीयम् २-१८६)

यदि च धातोः पूर्वमुपसर्गेण संबन्धो न स्यात्, कथमुच्यते 'विपराभ्यां जेः' (पा. १.३.१९) 'अधिशीङ्स्थासां कर्म' (पा. १.४.४६) इति ? ननु पूर्वमुपसर्गसंबन्धः क्वोपयुज्यते ? साधनसंबन्धमन्तरेण तद्विशेषानभिव्यक्तेः । नैवम्, फलकाले बीजसंस्कारस्येव तस्योपयोगात् ; तदुक्तं—

बीजकालेषु संबद्धा यथा लाक्षारसादयः । वर्णादिपरिणामेन फलानामुपकुर्वते ॥
बुद्धिस्थादभिसंबन्धात्तथा धातूपसर्गयोः । अभ्यन्तरीकृतो भेदः पदकाले प्रकाशते ॥
अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम् । धातूपसर्गयोः शास्त्रे धातुरेव हि तादृशः ॥
क्रियाविशेषाः संघातैः प्रक्रम्यन्ते क्वचित्तयोः । तथा हि संग्रामयतेः सोपसर्गादटो विधिः ॥
(वाक्यपदीयम्.)

अतः अनुकामयते इत्यादौ धातोः प्रथममुपसर्गेण साधनेन वा संबन्धे न दोष इति । उपसर्गाणां क्रियाविशेषणत्वे त्रयी गतिः—वाचकत्वं, द्योतकत्वं, सहाभिधायकत्वं च ; यथोच्यते—

स वाचको विशेषाणां संभवात् द्योतकोऽपि वा । शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते॥

तत्र यदा वाचकत्वं तदा धातोः प्रथममुपसर्गेण संबन्धः ; यथा—प्रतिष्ठते, निराकरोति इति। यदा द्योतकत्वं तदा साधनेन ; यथा—प्रपचति, निकर्षति इति । यदा सहाभिधायकत्वं तदा धातूपसर्गयोस्तुल्यकालं साधनेन संबन्धः ; यथा—अधीते, अध्येति इति । तदुक्तम्—

स्वादिभिः केवलैर्यत्र गमनादि न गम्यते । तत्रानुमानात् द्विविधात्तद्धर्मा प्रादिरुच्यते ॥
क्वचित्संभाविनो भेदाः केवलैरभिदर्शिताः । उपसर्गेण संबन्धे व्यज्यन्ते प्रपरादिना ॥
यदाऽभिधानसामर्थ्यं धातोर्नैकाकिनस्तदा । धातूपसर्गौ संभूय समर्थावर्थमाहतुः ॥ इति ॥
(वाक्यपदीयम्)

ननु च, प्रथमतः साधनसंबन्धे प्रपचतीत्यत्र प्रकृष्टः पचतीति स्यात्, न तु प्रकृष्टं पचतीति। तन्न, साधु पचतीत्यादावपि समानदोषत्वात् तत्र क्रियाविशेषणत्वात् क्रियामात्रेणैव संबन्ध इति चेत्, इहापि स एवार्थः । कथं च प्रादयश्चादिवदसत्त्ववचनाः क्रियाविशेषकाः कर्तृविशेषणं भवेयुः ? 'उपसर्गाः क्रियायोगे' (पा. २. ४. ५९) इति वचनात् । कथं पुनरसत्त्ववचनाश्चादयो भवन्ति ? उच्यते—

तेषामुच्चावचार्थत्वात् सर्वसंबन्धदर्शनात् । अन्यतन्त्रतयोद्भूतेरसत्त्वार्थत्वमुच्यते ॥

अथ किममी वाचकाः, उत द्योतकाः इति । तत्रैके वर्णयन्ति—

'तत्प्रयोगावसेयत्वाद्वाच्यस्तेषां स गम्यते । समुच्चयादिरर्थात्मा यथाऽन्येषां गवादिकः ॥'

अन्ये त्वाहुः—

'षष्ठ्यभावादसत्त्वोक्तेरेकानुक्तेः परस्थितेः । गुणभावात्स्मृतेश्चैषां द्योतकत्वं सुनिश्चितम् ॥'

इति ॥ तदेतदग्रतः प्रातिपदिकार्थनिर्णये निश्चेष्यत इति नेह प्रतन्यते ॥

अथ पृथगर्थानामेकार्थीभावः समासः । स त्रिधा—प्राकृतः, वैकृतः, शेषश्च । तेषु समस्तपदानामव्ययीभावादिसंज्ञानिमित्तं पूर्वपदप्रधानादिका प्रकृतिः ; तत्र भवः प्राकृतः । स चतुर्धा—अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः, द्वन्द्वः इति । तेषु पूर्वपदप्रधानोऽव्ययीभावः । स त्रिधा—अव्ययानां, अनव्ययानां, कर्मप्रवचनीयानां च । तत्र अव्ययानां यथा—अधिस्त्रि, उपकुम्भम्, अतितैसृकं, ससखि, यावदमत्रं, बहिर्ग्रामं इति । अनव्ययानां यथा—अग्रेवणं, मध्यन्दिनं, चतुर्दश, द्विमुनि, पारेगङ्गं, मध्येसमुद्रं इति । कर्मप्रवचनीयानां यथा—अपत्रिगर्तं, परित्रिगर्तं, आप्रपदं, आपाटलिपुत्रं, अनुवनं, अनुगङ्गं इति । उत्तरपदार्थप्रधानस्तत्पुरुषः । सोऽपि त्रिधा—व्यधिकरणः, समानाधिकरणः, द्विगुश्च ; तत्र व्यधिकरणो यथा—राजपुरुषः, कष्टश्रितः, शङ्कुला-

खण्डः, धान्यार्थः, यूपदारु, वृकभयम्, कुम्भीपाकः इति ; समानाधिकरणो यथा—नीलोत्पलं, एकपुरुषः, केवलान्नम्, पापकुलालः, अब्राह्मणः, ईषत्कडारः इति ; द्विगुर्यथा—द्वैमातुरः, पाञ्चनापितिः, पञ्चगवधनः, त्रिलोकहर्म्यं, पञ्चपूली, चतुःपात्रं इति । अन्यपदार्थप्रधानो बहुव्रीहिः ; स त्रिधा—प्रधानसंबन्ध्यर्थः, अप्रधानसंबन्ध्यर्थः, कारकार्थश्च ; तेषु प्रधानसंबन्ध्यर्थो यथा—दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा, एवं दक्षिणापरा, सहाग्निना वर्तते साग्निः, सवंशपुत्रः, केशेषु केशेषु गृहीत्वेदं युद्धं प्रवर्तते केशाकेशि, दण्डैश्च दण्डैश्च प्रहृत्य दण्डादण्डि, इति । प्रथमान्तमिह प्रधानमन्यपदार्थः । अप्रधानसंबन्ध्यर्थो यथा—चित्रा गावः अस्य चित्रगुः, अर्धं तृतीयमेषां अर्धतृतीयाः, अविद्यमाना भार्या अस्य अभार्यः, उष्ट्रस्येव मुखमस्य उष्ट्रमुखः, कण्ठे स्थिताः कालाः अस्य कण्ठेकालः, केशसंहारः चूडा अस्य केशचूडः इति । षष्ठ्यन्तमिहाप्रधानमन्यपदार्थः । कारकार्थो यथा—आरूढो वानरो यं स आरूढवानरो वृक्षः, ऊढो रथोऽनेन ऊढरथोऽनड्वान्, एवं क्षुण्णव्रीहि मुसलम्, उपहृतपशू रुद्रः, उद्धृतौदना स्थाली, मत्तबहुमातङ्गं वनं इति । अत्र द्वितीयादिवाच्यं कर्मादिकारकं समासार्थः । उभयपदार्थप्रधानो द्वन्द्वः ; स त्रिधा—इतरेतरविषयः, समाहारविषयः, उभयविषयश्च ; तत्र भेदविवक्षायामितरेतरयोगः ; यथा—धवखदिरौ, मातापितरौ, दधिपयसी, शिववैश्रवणौ, गोऽश्वौ, दशेमे मार्दङ्गिकपाणविकाः इति । अभेदविवक्षायां समाहारः ; यथा—पाणिपादं, रथिकाश्वारोहं, तक्षायस्कारं, गवाश्वं, प्रत्यष्ठात् कठकौथुमं, उदगात् कठकालापं इति । विभाषितैकवद्भाव उभयविषयः ; यथा—अश्ववडवौ, अश्ववडवं, हंसचक्रवाकाः, हंसचक्रवाकम् । धवखदिरपलाशाः, धवखदिरपलाशं इति ।

प्रकृतेरन्यथात्वं विकृतिः, तत्र भवः वैकृतः । सोऽपि चतुर्धा—प्राधान्यविपरीतः, सामर्थ्यविपरीतः, वाक्याधिकारार्थः, अर्थान्तरगामी च । तेषु प्राधान्यविपर्ययस्त्रिधा—पूर्वपदार्थप्राधान्यविपर्ययः, उत्तरपदार्थप्राधान्यविपर्ययः, अन्यपदार्थप्राधान्यविपर्ययश्चेति । तत्र पूर्वपदार्थप्राधान्यविपर्ययोऽव्ययीभावो यथा—शाकप्रति, अक्षपरि, तिष्ठद्गु, उन्मत्तगङ्गं, पञ्चनदं, सप्तगोदावरं इति । उत्तरपदार्थप्राधान्यविपर्ययस्तत्पुरुषो यथा—राजदन्तः, पूर्वकायः, प्राप्तजीविकः, गोगर्भिणी, अश्वमतल्लिका, गोवृन्दारकः इति । अन्यपदार्थप्राधान्यविपर्ययो बहुव्रीहिर्यथा—द्वौ वा त्रयो वा द्वित्राः, एवं पञ्चषाः, आसन्नो दशानां आसन्नदशः, एवमदूरदशः, एवं द्विर्दश द्विदशाः, एवं त्रिदशा इति । सामर्थ्यविपर्ययस्त्रिधा—पदासामर्थ्यात्, वाक्यासामर्थ्यात्, वृत्त्यसामर्थ्यात् ; तत्र पदासामर्थ्यं सापेक्षत्वे यथा—देवदत्तस्य गुरुकुलं, ग्रामं गन्तुकामः, ज्ञातचित्तः कान्तया, निवेदितात्मा गुरुभ्यः, कृतप्रस्थानो नगरात्, निष्पन्नबुद्धिः शास्त्रेषु इति ; वाक्यासामर्थ्यमस्वपदविग्रहे यथा—ब्राह्मणेभ्योऽयं ब्राह्मणार्थः सूपः, ब्राह्मणार्था यवागूः, मासो जातस्य मासजातः, एवं संवत्सरजातः, द्वे अहनी जातस्य द्व्यहजातः, एवं द्व्यह्नजातः इति ; वृत्त्यसामर्थ्यं संबन्धे यथा—सूर्यमपि न पश्यन्ति असूर्यपश्या राजदाराः, पुनर्न गीयन्ते अपुनर्गेयाः श्लोकाः, श्राद्धं न भुङ्क्ते

अश्राद्धभोजी ब्राह्मणः, एवमलवणभोजी भिक्षुः इति, तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः, एवं तीर्थकाकः इति। अर्थाधिक्यं त्रिधा—विशेषणस्य, विशेष्यस्य, समुदायस्य च; विशेषणस्य यथा—वर्षशतमायुरस्य शतायुः, जनसहस्रं बिभर्ति सहस्रंभरः, अश्रेणयः श्रेणयः कृताः श्रेणीकृताः, अपण्डितः पण्डित उक्तः पण्डितोक्तः, शस्त्रीव श्यामा शस्त्रीश्यामा, पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः इति; विशेष्यस्य यथा—घृतेन पूर्णो घटः घृतघटः, अश्वैर्युक्तो रथः अश्वरथः, दध्नोपसिक्त ओदनः दध्योदनः, गुडेन मिश्रा धानाः गुडधानाः, अक्षेषु प्रसक्तो धूर्तः अक्षधूर्तः, शाकप्रधानः पार्थिवः शाकपार्थिवः इति; समुदायस्य यथा—श्वभिः लेह्यः कूपः श्वलेह्यः कूपः, काकैः पेया नदी काकपेया नदी, खट्वायामारूढः खट्वारूढो जाल्मः, पात्र एव समिताः पात्रेसमिताः, एवं किंराजा यो न रक्षति, किंगौः यो न वहति इति; अत्र पूर्वयोरतिशयः, शेषेषु क्षेपः समुदायस्य प्रतीयते। अर्थान्तरगमनं त्रिधा—पूर्वार्थस्य त्यागात्, अत्यागात्, त्यागात्यागाभ्यां च; तत्र पूर्वार्थस्य त्यागो यथा—तैलपायिका, शक्रगोपः, अश्वकर्णः, पञ्चाङ्गुलः, करवीरः, पुंनागः इति; अत्यागो यथा—कृष्णसर्पः, लोहितशाली, कालशाकः, गौरखरः, नरसिंहः, दन्तलेखः इति; त्यागात्यागौ यथा—सप्त पर्णान्यस्य पर्वणि पर्वणि इति सप्तपर्णः, अष्ट पदानि अस्य पङ्क्तौ पङ्क्तौ इति अष्टापदम्, शतं पत्राणामस्याः पुष्पे पुष्पे इति शतपत्रिका, दर्शने दर्शने नवैव मालिका अस्या नवमालिका, नक्तमिव मालायामस्य नक्तमालः, कृता माला अस्य पुष्पैः इति कृतमालः इति॥

उदाहृतप्रकाराभ्यामन्यः शेषः; स चतुर्धा—सूत्रशेषः, असूत्रशेषः, ज्ञापकशेषः, एकशेषश्चेति। तेषु सूत्रशेषस्त्रिधा—गणोक्तः, वार्तिकोक्तः, सामान्योक्तश्च; तत्र 'तिष्ठद्गुप्रभृतीनि' (पा. २.१.१७) 'पात्रे समितादयः' (पा. २.१.४८) 'मयूरव्यंसकादयः' (पा. २.१.७२) इति गणोक्तः; यथा—आयतीगवं, समभूमि, उदुम्बरमशकम्, पिण्डीसूरः, अहंपूर्विका, आहोपुरुषिका इति; 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' 'गमिगाम्यादिकृतापकृतानामुपसंख्यानम्' 'अव्ययानां बहुव्रीहिः वक्तव्यः' इति वार्तिकोक्तः; यथा—निष्कौशाम्बिः, ओदनबुभुक्षुः, क्रयाक्रयिका, पुटापुटिका, उच्चैर्मुखः, अस्तिक्षीरा इति; 'सुप्सुपा' (पा. २.१.४) 'पूर्वादिनिः' 'सपूर्वाच्च' (पा ५.२.८६, ८७) 'कुशाग्राच्छः' 'समासाच्च तद्विषयात्' (पा. ५.३.१०५, १०६) इति सामान्योक्तः; यथा—परश्शता राजानः, परस्सहस्रा शरदः, पुनरुत्स्यूतं वासः, पुनर्नवं पयः, कृतपूर्वी कटं, काकतालीयो न्यायोऽयं इति। असूत्रशेषस्त्रिधा—नामविषयः, कृद्विषयः, तद्धितविषयश्च; 'अपरस्पराः क्रियासातत्ये', 'पारस्करप्रभृतीनि च संज्ञायाम्' (पा. ६.१.१४४, १५७) 'पृषोदरादीनि यथोपदिष्टम्' (पा. ६.३.१०९) इत्यादिर्नामविषयः; यथा—अपरस्पराः सार्था गच्छन्ति, आश्चर्यं वर्तते, पारस्करो मुनिः, कास्तीरं नगरं, पृषोदरः कश्चिन्मयूरः पक्षी इति; 'उपपदमतिङ्' 'कुगतिप्रादयः' (पा. २.२.१९, १८) 'कर्तृकरणे कृता बहुलम्' (पा. २.१.३२) इत्यादिः कृद्विषयः; यथा—कुम्भकारः, पङ्कजं, ऊरीकृत्य, प्रजवी, अश्वक्रीती; 'द्विगोर्लुगनपत्ये' (पा. ४.१-

८८) 'तिककितवादिभ्यो द्वन्द्वे' (पा. २.४.६८) 'समासान्ताः' (पा. ५.४.६८) इत्यादिस्तद्धितविषयः ; यथा—पञ्चसु कपालेषु संस्कृतः पञ्चकपालः, तैकायनयश्च कैतवायनयश्च तिककितवाः, उपशरदम्, देवराजः, महोक्षः, मृगनेत्रा रात्रयः इति । ज्ञापकशेषस्त्रिधा—विधिज्ञापितः, निषेधज्ञापितः, प्रयोगज्ञापितश्च । तत्र 'कोः कत्तत्पुरुषे', 'ईषदर्थेऽपि' (पा. ६.३.१०१, १०५) 'नञो नलोपस्तिङ्यवक्षेपे च' 'कारकेऽन्यस्य दुक्' 'व्यतिहारे सर्वाश्रीनां सुब्बहुलम्' 'संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ' (पा. ६. ३. ११०) 'दायाद्यं दायादे' (पा. ६. २. ५) इत्यादिको विधिज्ञापितः ; यथा—कदुष्णं, अपचसि, अन्यत्कारकः, अन्योऽन्यम्, सायाह्नः, विद्यादायादः इति । 'अलुगुत्तरपदे', 'पञ्चम्याः स्तोकादिभ्यः', 'आत्मनः पूरणे तृतीयायाः' 'वैयाकरणाख्यायां पराचतुर्थ्याः' [पा. ६. ३. १, २, ६, ७] 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु यथासंख्यमलुग्वक्तव्यः', 'षष्ठ्याः अदसः फक्फिञोः', 'अपो योनियन्मतुषु सप्तम्याः' इत्यादिः निषेधज्ञापितः ; यथा—ब्राह्मणाच्छंसी, आत्मनातृतीयः, परस्मैपदम्, पश्यतोहरः, आमुष्यकुलिका, अप्सुयोनिः इति । 'जनिकर्तुः प्रकृतिः' 'तत्प्रयोजको हेतुः' [पा. १.४.३०, ५५] 'अपोनप्त्रपान्नप्तृभ्यां घः' [पा. ४.२.२७] 'यथातथाचान्तः', 'वर्तमानसामीप्ये वर्तमानवद्वा' [पा. ३. ३-१३१] 'अपरस्पराः क्रियासातत्ये' [पा. ६.१.१४४] इत्यादिः प्रयोगज्ञापितः ; यथा—भूतहर्ता, दण्डनायकः, तनूनपात्, याथातथ्यं, यत्नगौरवं, क्रियासाफल्यं इति । एकशेषस्त्रिधा—सरूपाणां, असरूपाणां, सरूपासरूपाणां च । तत्र सरूपाणां भिन्नार्थानामभिन्नार्थानां भिन्नाभिन्नार्थानां च ; भिन्नार्थानां यथा—अक्षौ, माषौ, पक्षौ, पादौ, गावौ ; अभिन्नार्थानां यथा—वृक्षौ, प्लक्षौ इति ; भिन्नाभिन्नार्थानां यथा—अश्विनौ, पुष्पवन्तौ, गावौ, सारस्वतौ, युवां, यूयं इति । असरूपाणां सर्वनाम्नां, संबन्धिनां, सहचारिणां च ; सर्वनाम्नां यथा—स च देवदत्तश्च तौ, एतौ च यज्ञदत्तश्च एते, अयं च त्वं च युवाम्, अमू च त्वं च यूयं, त्वं चाहं च आवां, स च आवां च वयं इति ; संबन्धिनां यथा—माता च पिता च पितरौ, स्वसा च भ्राता च भ्रातरौ, पुत्रश्च दुहिता च पुत्रौ, पिता च मातामहादयश्च पितरः, भ्रातरौ च स्वसारश्च भ्रातरः, पुत्राश्च दुहितरौ च पुत्राः इति ; सहचारिणां यथा—दस्रश्च नासत्यश्च दस्रौ, देवदत्तश्च विष्णुमित्रश्च विष्णुमित्रौ, शौण्डश्च धूर्तादयश्च शौण्डाः, अर्धर्चश्च गोमयादयश्च अर्धर्चाः, पुरोडाशश्च धानादयश्च पुरोडाशाः, छत्री च पदात्यादयश्च छत्रिणः ; सरूपासरूपाणां भिन्नशब्दानां, भिन्नवचनानां, भिन्नलिङ्गानां च ; भिन्नशब्दानां यथा–गार्ग्यश्च गार्ग्यायणी च गार्ग्यौ, वात्स्यश्च वात्स्यायनश्च वात्स्यौ, प्रथमश्च प्रथमानन्तरश्च प्रथमौ, भीमश्च भीमसेनश्च भीमौ, वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ, श्रीमांश्च लक्ष्मीवांश्च श्रीमन्तौ इति ; भिन्नवचनानां यथा—देवश्च दत्तश्च देवदत्तौ, तौ च देवदत्तश्च देवदत्ताः ; एवं विष्णुमित्राः ; कृष्णश्च सारश्च कृष्णसारौ, तौ च सारश्च कृष्णसाराः ; एवं नीललोहिताः ; अपारश्च पारश्च अपारपारौ, तौ च पारपारश्च पारपाराः ; एवमपारपाराः इति ;

भिन्नलिङ्गानां यथा—कुक्कुटश्च कुक्कुटी च कुक्कुटौ, श्वशुरश्च श्वश्रूश्च श्वशुरौ, गावश्च गावश्च गावः इमाः, वत्सकाश्च वत्सिकाश्च वत्सिका इमे, अश्वाश्च अश्वाश्च अश्वा एते, शुक्लश्च शुक्ला च शुक्लं च तदिदं शुक्लम्, तानीमानि शुक्लानि इति। कथं पुनरेकशेषः समासविशेषो भवति ? संक्षेपाभिधाने सति द्वन्द्वसमानार्थत्वात्; तथा हि–असरूपाणां द्वन्द्वः, सरूपासरूपाणामेकशेष इति। कोऽनयोः समानोऽर्थः ? येयं युगपदधिकरणवचनता– पदार्थानां सहविवक्षेत्यर्थः; तदाह—

अनुस्यूतेव भेदाभ्यामेका प्रख्योपजायते। यस्यां सहविवक्षां तामाहुर्द्वन्द्वैकशेषयोः॥

इति। तत्र यदा प्रयोगैकतया बुद्ध्याऽनेकमर्थमवगत्य यथावगतमेवाभिधातुमध्यवस्यते, तदैकज्ञानावच्छेदानिरूपितभेदस्यास्य भागशोऽभिधानासंभवादवयवशब्दाः संघातविषया विज्ञायन्ते; तद्यथा—धवखदिरौ वृक्षौ इति। यद्येवम्, यथा धवखदिरपलाशमिति द्वन्द्वस्य समूहार्थत्वादेकवचनम्, एवमेकशेषस्यापि प्राप्नोति। नैवम्; द्वन्द्वः समाहारेतरेतरयोगयोः, एकशेषः पुनरितरेतरयोग एव; तस्य हि समाहारपक्षे भिन्नार्थप्रतिपादकानेकशब्दनिवृत्तौ वचनमपि यद्यनेकार्थं न भवेत् केनानेकार्थः प्रतीयेत ? न हि वृक्ष इत्युक्ते वृक्षश्च वृक्षश्च वृक्षश्चेति कश्चिदप्यवैति; तस्मादाम्नातोऽपि द्वन्द्वसमानार्थतया समाहार एकशेषोऽनभिधानादप्रयोगार्ह एवेति विज्ञायते। द्वन्द्वे तु यद्यपि एकवचनान्नानेकार्थावगतिः, तथाऽपि अनेकशब्दश्रुतिनिबन्धनाऽसौ भविष्यतीति समाहारेऽपि न दोषः। एकशेषेऽपि यत्रानेकाभिधानसामर्थ्यं कथंचिद्भवति, भवत्येव तत्र समाहारैकवचनम्; यथा—शुक्लं वस्त्रं शुक्ला शाटी शुक्लः पटः इति तदिदं शुक्लमिति। यथा तर्ह्येकस्यैव शब्दस्यानेकार्थाभिधानसामर्थ्यादेकशेषे शब्दान्तराणां निवृत्तिः, एवं द्वन्द्वेऽपि कस्मान्न भवति ? यदि भवेत्, एकशेषादविशेषः प्रसज्येत। समाहार एकवचनं विशेष इति चेत् अनेकार्थो न गम्येत; न हि पलाशमित्युक्ते धवश्च खदिरश्च पलाशश्चेति कश्चिदप्यवैति। अथ, यथा पितरौ भ्रातरावित्यादिषु शब्दान्तरनिवृत्तावपि तदर्थोऽवगम्यते तथा प्लक्षन्यग्रोधौ धवखदिरावित्यादिषु द्वन्द्वेष्वपि कस्मान्न भवति ? उच्यते—शब्दशक्तिरेषा भवति हि कश्चिदेकोऽपि शब्दो द्वयोरभिधायकः; यथा—रोदसीशब्दो द्यावापृथिव्योः; कौचित् पुनर्द्वावेवैकमर्थमभिदधाते; यथा–अधीते, अध्येति इति। अत एव शब्दशक्तिदर्शी मुनिः केषुचिदेवं विरूपेष्वेकशेषमारभते— 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' (पा. १.२.६८) 'पिता मात्रा' (पा. १.२.७०) इति; अन्येषु तु द्वन्द्वमेवाभ्यनुजानाति॥

ननु च, 'चार्थे द्वन्द्वः' (पा. २.२.२९) स्मर्यते; स यथा समाहारेतरेतरयोगयोः, तथा समुच्चयान्वाचययोरपि प्राप्नोति। नैवम्, समुच्चयान्वाचययोः पदानामसामर्थ्यात्। कथमसामर्थ्यम् ? सापेक्षमसमर्थं भवतीति; तथाहि—गौश्चाश्वश्च गच्छतीत्यादिरेकक्रियापेक्षः समुच्चयः, भिक्षामट गां चानयेत्यादिरनेकक्रियापेक्षः अन्वाचयः; एवं च बाह्यार्थापेक्षया पदानां परस्परमसामर्थ्यम्;

समर्थश्च पदविधिर्भवति । समाहारेतरेतरयोगयोस्तु समूहत्वात् समूहस्य च समूहिरूपत्वादवयवानां सति सामर्थ्ये समासो भवत्येव ; यथा—धवखदिरपलाशं, धवखदिरपलाशाः इति । एवं तर्हि समूहस्यैकत्वात् समाहारवदितरेतरयोगेऽप्येकवचनमेव प्राप्नोति । नैवम्, समाहार एव परस्परानुप्रवेशादिव समधिगताभेदानामुपसर्जनीकृतावयवः समुदायोऽभ्यनुज्ञायते, यस्यानभिव्यक्तावयवत्वादेकवचनमिव नपुंसकत्वमपि प्राप्नोति ; इतरेतरयोगः पुनरवयवभेदानुयातः सङ्घातः, तस्य प्रत्येकवर्तिपदैरभिधीयमानत्वात् समुदायसंख्यानिबन्धनैकवचनमवयवेभ्यः प्रस्तूयते । तत्र यथा पचतीत्यादौ अधिश्रयणादिक्रियाकलापः प्रत्यवयवं परिसमाप्यते, तथा समुदायार्थोऽपि प्रतिपदं साकल्येन परिसमाप्यते । ततः एकैकस्य पदस्य समुदायनिबन्धनः संस्कारो भवति । कथं पुनः धवादयो निर्धारितार्थभेदाः पदान्तरस्यार्थमभिधातुं क्षमन्ते ? प्रवृत्तिनिवृत्तिसमारोपात् ; यथोक्तं—'यदि प्लक्षरतीति प्लक्षः, न्यग्रोधोऽप्येवम्, यदि न्यग्रोहतीति न्यग्रोधः प्लक्षोऽप्येवं' इति । साहचर्यादिवशेन वा परस्पररूपापत्तिः ; यथा—'सप्तमी शौण्डैः', 'अर्धर्चाः पुंसि', ते विष्णुमित्राः, छत्रिणो गच्छन्तीति । तत्र यथा शौण्डार्धर्चादयः बहुवचनान्यथानुपपत्तिसमभिगम्यान् सहचारिणो भिन्नरूपान् धूर्तगोमयादीनुपाददते, तथा धवादिशब्दाः प्रतीतार्थभेदाः साहचर्यादिनिमित्तानुरोधेन खदिरादीनुपाददते । तथा हि—एकवृत्तिपदावरोधप्रतीतसाहचर्यौ धवखदिरौ ; अत एव तयोरेव प्रत्यवयवनिवेशाद्बहुवचनं न भवति । कथं पुनर्धवादीनामर्थान्तराभिधानं शक्यमध्यवसातुम् ? यावता लोकः पदसमुदायादर्थसमुदायमवैति, नावयवात् । यदप्युक्तम्—प्रवृत्तिनिवृत्तिसमारोपादिति, तदप्यसारम् ; न हि प्लक्षरतीति व्युत्पत्त्या न्यग्रोधः प्लक्षः, नापि न्यग्रोहतीति व्युत्पत्त्या प्लक्षो न्यग्रोधो भवति ; रूढानां हि धर्मनियमाय यथाकथंचित् व्युत्पत्तिः क्रियते, न तु व्युत्पत्तिवशेन रूढयोऽवतिष्ठन्ते । नापि प्रकृतिप्रत्ययवदन्वयव्यतिरेकसमधिगम्या धवादीनां समुदायार्थता । यदप्युच्यते—शौण्डार्धर्चादिवत् धवशब्दः साहचर्यादिलक्षणया खदिरमुपादत्ते इति, तदपि न सम्यक् ; सति श्रुत्यर्थसंभवे लक्षणाया अयोगात् ; न च खदिरार्थो धूर्तगोमयादिवल्लक्षयितव्यः, तस्य खदिरशब्देनैव साक्षादभिधानात् । एवं तर्हि, यदा धवखदिरादयः समुदायाः प्रविभागेनान्वाचिख्यासिताः, तदा तमेव समुदायं प्रत्याय्यतयाऽभिसंधायावयवा उपादीयन्ते, न त्ववयवार्थप्रतिपादनाभिप्रायेण । अतस्तस्यां युगपदधिकरणवचनतायां समीहितायां समुदायपरत्वादवयवप्रयोगस्य, तेषामवयवानां प्रत्येकमनेकार्थत्वमुच्यते । किं पुनः प्रयोक्तुरभिप्रायमनुरुध्यन्ते शब्दाः ? येन तदभिसंधानात् समुदायमाभिदध्युः । नेत्याह ; अन्यत्राप्यवयवाभिधायिनां शब्दानामवयवमुखेन समुदायाभिधानसामर्थ्यं दृश्यते ; यथा—सुरभि कुवलयं, यन्मधुरं राजतनं इति ; यदि हि सुरभिमधुरशब्दौ गन्धरसमात्राभिधायिनावपि गन्धरसादिसमुदायान् कुसुमफलविशेषादीनवयवमुखेन नाचक्षते, कुवलयादिभिः सह सामानाधिकरण्यं विरुध्येत । सत्यमेतत् ; अस्ति समुदायाभिधानसामर्थ्यमवयवशब्दानाम्, किं तु सुरभि कुवलयं इत्यादौ सामानाधिकरण्येन तदवधार्यते ;

द्वन्द्वे तु निबन्धनमशक्यमवधारयितुमिति तस्यानुपपत्तिः। नैवम्, समुदायाभिधानस्य प्रक्रान्तत्वात्। यद्येवं पट्वीमृद्व्याविति समानाधिकरणलक्षणः पुंवद्भावः प्राप्नोति। उच्यते ; अथेह कस्मान्न भवति दर्शनीयाया माता दर्शनीयामाता ? अथ मतमेतत्—प्राक् समासाद्यत्र सामानाधिकरण्यम्, इहापि न दोषो भवति ; न हि प्राक् समासात् सामानाधिकरण्यमत्र विद्यते। ननु च वाक्येऽपि समुदायप्रक्रमेणैवावयवपदानां प्रयोगात्, कथमुच्यते प्राक् समासात् सामानाधिकरण्यं नास्तीति ? समुदायप्रक्रमस्य निर्निबन्धनत्वेनाप्रतीयमानत्वात् ; कुवलयादिशब्दसामानाधिकरण्यं हि सुरभिप्रभृतीनामसमासेऽपि समुदायतानिबन्धनम् ; इह त्वेकार्थीभावः समुदायाभिधाने निमित्तमिति वाक्ये सामानाधिकरण्याप्रसिद्धिः। एवमपि, विप्रतिषिद्धेषु युगपदधिकरणवचनताया अनुपपत्तिः ; यथा—सुखदुःखे, जननमरणे, शीतोष्णे इति ; सुखादिप्रतिघातेन हि दुःखादयः, दुःखादिप्रतिघातेन च सुखादय इति। नैवम् ; सर्व एव शब्दा विप्रतिषिद्धाः ; प्लक्षन्यग्रोधावित्यत्रापि हि प्लक्षशब्दः प्रयुज्यमानः प्लक्षार्थं संप्रत्याययति, न्यग्रोधार्थं निवर्तयति ; न्यग्रोधशब्दः प्रयुज्यमानो न्यग्रोधार्थं प्रत्याययति, प्लक्षार्थं निवर्तयति। तत्र चेद्युक्ता युगपदधिकरणवचनता दृश्यते, इहापि युक्तं दृश्यताम्। एवमपि शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानं प्राप्नोति। ततः किम् ? युगपदधिकरणवचनताया अनुपपत्तिः—प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधा इति ; यथैव हि शब्दानां पौर्वापर्यं तद्वदर्थानामपि स्यात्। नैवम् ; एवं सति, द्विवचनबहुवचनयोरप्यनुपपत्तिः ; प्लक्षशब्दो हि सार्थको निवृत्तः, न्यग्रोधशब्द उपस्थितः ; स चैक एकार्थ इति तस्मादेकवचनमेव प्राप्नोति। विग्रहे खल्वपि युगपदधिकरणवचनता दृश्यते, किं पुनः समासे ; तद्यथा—'द्यावा ह क्षामा', 'द्यावा चिदस्मै पृथिवी सन्नमेते' (ऋ. ७.६.११, २.६.९) इति। समुदायात् सिद्धमिति चेत्, तन्न, समुदायस्यैकार्थत्वात्। एकार्था हि समुदाया भवन्ति ; तद्यथा—शतं यूथं वनमिति। नायमेकार्थः ; किं तर्हि ? द्व्यर्थो बह्वर्थश्च ; प्लक्षोऽपि द्व्यर्थः, न्यग्रोधोऽपि द्व्यर्थः। यद्येवमनेकार्थत्वात् 'बहुषु बहुवचनम्' (पा. १.४.२१) इति बहुवचनं प्राप्नोति। तन्न, बहुत्वाभावात् ; याभ्यामेवात्रैको द्व्यर्थस्ताभ्यामेवापरोऽपि। यद्येवमन्यवाचकेन शब्देनान्यस्य वचनं नोपपद्यते। एवं तर्हि प्लक्षस्य न्यग्रोधत्वात् न्यग्रोधस्य च प्लक्षत्वात् स्वशब्देनैवाभिधानं भविष्यतीति। कथं पुनः प्लक्षोऽपि न्यग्रोधः, न्यग्रोधोऽपि प्लक्षः स्यात् ? यावता कारणाद्द्रव्ये शब्दसंनिवेशो भवति। कारणाद्द्रव्ये शब्दसंनिवेश इति चेत्, कारणमुक्तं पुरस्तात्- यदि प्रक्षरतीति प्लक्षः न्यग्रोधेऽप्येतद्भवति, यदि न्यङ्रोहतीति न्यग्रोधः, प्लक्षेप्येतद्भविष्यतीति। दर्शनं वै हेतुः, न च न्यग्रोधे प्लक्षशब्दो दृश्यते। दर्शनं हेतुरिति चेत्, तुल्यमेतद्भवति ; प्लक्षेऽपि न्यग्रोधशब्दो दृश्यते। नन्वेतद्ब्रवीमि—नैष लोके संप्रत्ययोऽस्ति, न हि प्लक्ष आनीयतामित्युक्ते न्यग्रोध आनीयते। द्वन्द्वविषयमेवैतद्द्रष्टव्यम् ; युक्तं पुनर्यन्नियतविषया नाम शब्दाः स्युः ? बाढं युक्तम्, अन्यत्रापि दर्शनात् ; तद्यथा—समानेऽपि रक्ते वर्णे गौर्लोहित इति भवति, अश्वः शोण इति ; समाने शुक्ले

वर्णे गौः श्वेत इति भवति, अश्वः कर्क इति। यदि तर्हि प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्षः, एकेनैवोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः। अनुक्तः प्लक्षेण न्यग्रोध इति कृत्वा न्यग्रोधशब्दः प्रयुज्यते। कथमनुक्तः ? यदिदानीमेवोक्तं प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्ष इति। सहभूतावन्योऽन्यस्यार्थमाहतुः, न पृथग्भूतौ। किं पुनः कारणम् ? शब्दशक्तेः स्वभावः ; प्रतिनियता हि वृत्तिवाक्ययोः शब्दानामभिधानशक्तिः ; तद्यथा—शस्त्रीश्यामा देवदत्तेति। 'उपमानानि सामान्यवचनैः' (पा. २.१.५५) इति समासे शस्त्रीशब्देनावाच्छिद्यमानविशेषावरुद्धः श्यामाशब्दो यद्यपि न सामान्यवचनः, तथाऽप्यसौ देवदत्तायामुपमीयमानायां वर्तते शस्त्रीव श्यामा देवदत्तेति ; तदिदमुक्तम्—'प्रागभिसंबन्धाद्यः सामान्यवचनः' इति समासमभिसंबन्धशब्देन दर्शयति ; यतस्तत्र विनिवृत्तविशेषान्तराकांक्षाणि यथासमीहितविशेषावरुद्धानि पदानि। सोऽयं वृत्तिवाक्ययोर्विशेषः। किं च, निष्कौशाम्बिः, निर्वाराणसिरिति भेदे सति निरादीनां न क्रान्ताद्यर्थसंभवः। अपि च, गौरखरवदरण्यम्, लोहितशालिमान् ग्राम इति। 'प्राग्वृत्तेर्जातिवाचित्वं न च गौरखरादिषु।' यथा—स्निग्धकिसलयमरण्यं, मत्तमातङ्गं वनमिति। 'वृत्तिरन्यपदार्थे या तस्या वाक्येष्वसंभवः॥'

एवं च प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधाः इति द्वन्द्वेऽपि सहभूतयोरेवान्यार्थाभिधानं भविष्यति, न पृथग्भूतयोरिति। अथवा, इह कौचित् प्लक्षन्यग्रोधौ प्राथमकल्पिकौ ; कौचित् क्रियया गुणेन वा प्लक्ष इवायं प्लक्षः, न्यग्रोध इवायं न्यग्रोध इति। तत्र प्लक्षावित्युक्ते संदेहः स्यात्—किमिमौ प्लक्षावेव, आहोस्वित् न्यग्रोधावेव, अथवा प्लक्षन्यग्रोधाविति। तत्रासंदेहार्थो न्यग्रोधशब्दः प्रयुज्यते। सेयं युगपदधिकरणवचनता दुःखा दुरुपपादा च। यदपि चास्या ज्ञापकं 'द्यावा ह क्षामा' इति, तदपि छान्दसम्। इदं तर्हि ज्ञापकमस्तु 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' 'पूर्ववदश्ववडवौ' (पा. २.४.२६, २७)। यदि ह्यत्र कुक्कुटमयूर्यौ इत्यादिषु सहविवक्षा न स्यात्, अनर्थकः सूत्रारम्भः स्यात्। ननु च, तत्पुरुषस्योत्तरपदार्थप्रधानत्वात्तत्र परवल्लिङ्गतातिदेशोऽनर्थकः। नानर्थकः, तत्पुरुषस्य क्वचित् पूर्वपदार्थप्रधानत्वात् ; यथा—अर्धं पिप्पल्याः अर्धपिप्पली, पूर्वं कायस्य पूर्वकायः, उत्तरं शरीरस्य उत्तरशरीरं इति। यद्येवं, प्राप्तो जीविकां प्राप्तजीविकः, निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः, अलं कुमार्यै अलंकुमारिः इत्यत्रापि परवल्लिङ्गता प्राप्नोति। एवं तर्हि, द्वन्द्वेन सह निर्देशाच्चार्थविषयोऽत्र तत्पुरुषो गृह्यते ; यथा—क्रयाक्रयिका, पुटापुटिका, फलाफलिकेति, अश्वमतल्लिका, कुमारीतल्लजकः, गोप्रकाण्डं इति। अत्र हि, यथा धवश्च खदिरश्चेति युगपदधिकरणवचनतायां, तथा समानाधिकरणतायामपि विशेषणविशेष्यभावेन संमूर्छन्ताविवान्योन्यमर्थौ भवतः। तथा हि—प्रयोजनवत्तया महत्त्वाश्रयश्चासावल्पमूल्यत्वेन लघुत्वात् क्रयिका चेत्युपपद्यते, नीलोत्पलादिवद्विशेषणविशेष्यभावः। एवं फलाफलिका, पुटापुटिकेति। अश्वमतल्लिकेत्यत्राश्वशब्दः प्रवर्तमानः सर्वाश्वावग्रहरूपेण प्रवर्तते ; मतल्लिकाशब्दः प्रशंसावचनः प्रवर्तमानो विशिष्टावग्रहरूपेणावच्छिनत्ति। यदि वा, मतल्लिकेत्येतत् प्रशंसावचनं न्यूनाधिकभावमनपेक्ष्य

प्रवर्तमानमनेनैव धर्मेण सर्वयोग्यं सत् अश्व इत्यनेन विशिष्टायां योग्यतायां नियम्यते । ततो यथा—शुक्लः कृष्णश्चायं मृगः सारङ्गः शबल इति वा, तथा अश्वमतल्लिकेत्येतदुभयरूपोऽर्थ इत्युभयमुभयेन संनिवेश्यते । एवं कुमारीतल्लजकः, गोप्रकाण्ड इति । यद्येवं, अर्धपिप्पलीत्यादिषु षष्ठीसमासापवादेषु परवल्लिङ्गता न प्राप्नोति । नैवम्, तत्रापि अर्धं च तत् पिप्पली चार्धपिप्पलीति, पूर्वश्चासौ कायश्च पूर्वकाय इति सामानाधिकरण्यमेव परमार्थः । अत एव यत्र सामानाधिकरण्यस्यासंभवः, तत्र षष्ठीसमास एव भवति; यथा—वेद्यर्धं दक्षिणं मेरोः, खरार्धं, चूडिकार्धं, पणार्धं इति । न च अर्धादीनामेवैष नियमः, यतोऽन्यत्रापि सामानाधिकरण्यस्य विवक्षाऽविवक्षाभ्यामुभयथा तत्पुरुषो भवति; तद्यथा—अग्रहस्तः, हस्ताग्रं, तलपादः, पादतलं इति ॥

ननु च, 'चार्थे द्वन्द्वः' (पा. २.२.२९) इत्युच्यते; चश्चाव्ययम्, तेन समासस्याव्ययसंज्ञा प्राप्नोति; नैष दोषः; पाठेनाव्ययसंज्ञा क्रियते; न च समासस्तत्र पठ्यते । मा भूदपाठे संज्ञा, तथाऽप्यभिधेयवल्लिङ्गवचनानि भवन्ति; यश्चेहार्थोऽभिधीयते, न तस्य लिङ्गसंख्याभ्यां योगोऽस्ति। नेदं वाचनिकम्—अलिङ्गता, असंख्यता च। किं तर्हि? स्वाभाविकमेतत् । तद्यथा—समानमीहमानानामधीयानानां च केचिदर्थेन युज्यन्ते, अपरे न; न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिश्शक्यं भवितुम्, कश्चिद्वाऽनर्थक इति सर्वैरनर्थकैः । तत्र किमस्माभिः शक्यं कर्तुम्; यत्प्राक् समासाच्चार्थस्य लिङ्गसंख्याभ्यां योगो नास्ति, समासे च भवति; स्वाभाविकमेतत् । अथवा, आश्रयतो लिङ्गवचनानि भविष्यन्ति, यथा गुणवचनेषु । गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति । तद्यथा, शुक्लं वस्त्रं, शुक्ला शाटी, शुक्लः कम्बलः, शुक्लौ कम्बलौ, शुक्लाः कम्बलाः इति । यदसौ द्रव्यं श्रितो भवति समासस्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि भविष्यति । अथेह कस्मान्न भवति—याज्ञिकश्चायं वैयाकरणश्च, कठश्चायं बह्वृचश्च, औक्थिकश्चायं मीमांसकश्चेति? शेष इति वर्तते, अशेषत्वान्न भविष्यति । यदि शेष इति वर्तते—"उपास्नातं स्थूलसिक्तं तूष्णींगङ्गं महाह्रदम् । द्रोणं चेदशको गन्तुं मा त्वा ताप्सीं कृताकृते ॥" इत्येतन्न सिध्यति । नैष दोषः; अन्यद्धि कृतमन्यदकृतम् । चार्थे द्वन्द्ववचने असमासेऽपि चार्थसंप्रत्ययादनिष्टं प्राप्नोति — "अहरहर्नयमानो गामश्वं पुरुषं पशुम् । वैवस्वतो न तृप्यति सुराया इव दुर्मदी॥" 'इन्द्रस्त्वष्टा वरुणो वायुरादित्यः' इति । नैष दोषः; इह 'चे द्वन्द्वः' इतीयता सिद्धम्; कथं पुनश्चे नायं वृत्तिः स्यात्? शब्दो ह्येषः; शब्देऽसंभवादर्थे कार्यं विज्ञास्यते । सोऽयमेवं सिद्धे सति यदर्थग्रहणं करोति, तस्यैतत्प्रयोजनम्; यथैवं विज्ञायेत—चकृतेऽर्थे चार्थ इति । कः पुनः चकृतोऽर्थः? समुच्चयः, अन्वाचयः, इतरेतरयोगः, समाहार इति । तत्र द्वयोः सापेक्षत्वात् समासो न भवति, द्वयोस्तु भवतीति प्रतिपादितं पुरस्तात् । ननु चैवम्, चकृतोऽर्थश्चार्थ इति पक्षे प्लक्षन्यग्रोधावित्यत्र प्लक्षश्च न्यग्रोधश्चेति विग्रहः प्राप्नोति; यावता प्लक्षश्च न्यग्रोधश्चेदप्युक्ते गम्यत एतत्—प्लक्षोऽपि न्यग्रोधसहायः, न्यग्रोधोऽपि प्लक्षसहाय इति । तत्र को दोषः स्यात्?

प्लक्षौ च न्यग्रोधौ चेति यदुक्तं तन्न घटते । युगपदधिकरणवचनताप्रदर्शनमात्रपरमेतत्, न त्वयमेव परमार्थः । एवं हि क्रियमाणे एकश्च विंशतिश्च एकविंशतिः, द्वौ च विंशतिश्च द्वाविंशतिरिति द्विवचनं बहुवचनं च प्राप्नोति । किं पुनरेकविंशतिरित्यादयो द्वन्द्वाः ? बाढम् । एकाधिका विंशतिरिति पक्षे हि संख्यास्वरो न प्राप्नोति ; स हि शतसहस्रमिति षष्ठीसमासे मा भूदिति द्वन्द्व एवाभ्यनुज्ञायते । यद्येवमितरेतरयोगपक्षे द्विवचनम्, समाहारपक्षे नपुंसकत्वं प्राप्नोति । नैवम् ; 'लिङ्गमशिष्यं लोकाश्रयत्वात्' इति समाहारेऽपि नपुंसकत्वं न भविष्यति । अथ द्वादशेत्यत्रापि समाहारः कस्मान्न भवति ? आ दशभ्यः संख्याः संख्येय एव वर्तन्ते ; अतः उद्भूतावयवसमुदायतायामितरेतरयोग एव प्राप्नोति ; यथा 'अधिकरणैतावत्त्वे च' (पा. २.४.१५) दशेमे मार्दङ्गिकपाणविका इति ॥

तदेतत् कृत्तद्धितसमासभेदाद्विभक्तावयवं त्रिधा प्रातिपदिकमभिहितम् । अथाविभक्तावयवमुच्यते । तदपि त्रिधा—नामरूपं, अव्ययरूपं, निपातरूपं च । तत्रानपेक्षितशब्दव्युत्पत्तीनि सत्त्वभूतार्थाभिधायीनि च नामानि । तानि त्रिधा—एकार्थानि, अनेकार्थानि, एकानेकार्थानि चेति ; तत्र, एकार्थानि यथा—वृक्षः, कुण्डम्, कुमारी, डित्थः, शुक्लः, शीघ्रः, इन्द्रः, शक्रः, पुरन्दरः, कोष्ठः, कुसूलः इति । अनेकार्थानि यथा—अक्षाः, माषाः, पादाः, अवयः, हरयः, गावः, भूतयः, पुण्डरीकं, पुष्करं, साम, ललाम इति । एकानेकार्थानि यथा—दस्रौ, नासत्यौ, पुष्पवन्तौ, उभौ, रोदसी, रोदस्यौ, दाराः, वर्षाः, आपः, वनं, पङ्क्तिः, सेना इति । प्रायेणालिङ्गसंख्याशक्तीन्यव्ययानि ; तान्यपि त्रिधा—द्रव्यवचनानि, गुणवचनानि, संबन्धवचनानि चेति ; तेषु द्रव्यवचनानि यथा—स्वः, प्रातर्, दिवा, दोषा, नक्तं, सायं, विहायसा, भूः, शम्, शंयोः, मयः इति ; गुणवचनानि यथा—उच्चैः, नीचैः, सुष्ठु, अपष्ठु, मुधा, अद्धा, मृषा, मिथ्या, अलं, बलवत्, पृथक्, विष्वक् इति । संबन्धवचनानि यथा—समया, निकषा, बहिः, अन्तः, अन्तरेण, ऋते, आरात्, युगपत् साकं, सार्धं, अमा, सह इति । असत्त्ववचनाश्चादयो निपाताः । तेऽपि त्रिधैव—स्वतन्त्राः, परतन्त्राः, विशेषपरतन्त्राश्च ; तेष्वस्त्यादयः स्वतन्त्राः ; यथा—अस्ति, असि, अस्मि, एहि, ब्रूहि, मृदुहि, मन्ये, जाने, पश्य, पश्यत, स्यात् इति । कर्मप्रवचनीयाश्चादयः परतन्त्राः—वृक्षमनु विद्योतते, उपार्जुनं योद्धारः, अप त्रिगर्तेभ्यो वृष्टो देवः, अभिमन्युरर्जुनतः प्रति, यदत्र मां प्रति स्यात्, अधि ब्रह्मदत्ते पञ्चालाः, अहं च त्वं च वृत्रहन्, (ऋ. ६.४.२३) 'वायुर्वा त्वा मनुर्वा त्वा' (तै. सं. १.७.७.२) 'अहमेव पशूनामीशे', सरोजमिव ते मुखम्, 'न नूनमस्ति नो श्वः' (ऋ. २.४.१०) 'कश्चिदेकाकी चरति' (तै. सं. ७.४.१८.१) इति । गतिप्रादयो विशेषपरतन्त्राः ; यथा—प्रकरोति, पराकरोति, ऊरीकरोति, गुलुगुधाकरोति, कारिकाकरोति, खाट्करोति, पटपटाकरोति, तिरस्करोति, पुरस्करोति, श्रद्धा, अन्तर्धिः इति ॥

अथानुकरणम् । तदपि त्रिधैव—साध्वनुकरणं, असाध्वनुकरणं, अव्यक्तानुकरणं च । तत्र

प्रथमं सार्थकं, निरर्थकं च । तयोः सार्थकं यथा—द्विः पचत्वित्याह, अग्नी इत्याह, पचतीत्याह; अत्र सार्थकत्वात् ‘तिङ्ङतिङः’, (पा. ८.१.२८) इति निघातः ‘ईदूदेद्द्विवचनम्’ (पा. १.१.११) इति प्रगृह्यत्वम्, ‘तिङन्तत्वादप्रातिपदिकत्वे सुबुत्पत्तिश्च न भवतीति । निरर्थकं यथा—‘सुः पूजायाम्’ ‘अपिः पदार्थसंभावनाऽन्ववसर्गगर्हासमुच्चयेषु’, (पा. १.४.९४, ९६) ‘चः समुच्चये’; अत्रार्थस्यानुकरणात् स्वस्वरूपत्वाच्च प्रातिपदिकत्वे सुपः श्रवणं भवतीति । द्वितीयम्—अशक्तिजं, अपभ्रंशश्च; तत्राशक्तिजं यथा—अहो ऋतक इति वक्तव्ये शक्तिवैकल्यात् अहो लृतक इत्याह; अपभ्रंशो यथा—हेरयो हेरय इति वक्तव्ये, असुरा हेलयो हेलय इति वदन्तः पराबभूवुः । तृतीयं—निरुल्लेखं, सोल्लेखं च; तयोः निरुल्लेखं यथा–पटत्पटदिति करोति, पटपटायते । सोल्लेखं यथा—तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्दाद इति; दास्यत, दत्त, दयध्वमिति तदेतत्त्रयं शिक्षेत्—दमं दानं दयामिति ॥

प्रत्ययविशेष एव शक्तिसंख्याविभागकृद्विभक्तिः । सा त्रिधा–तिङ्विभक्तिः, सुब्विभक्तिः, अव्ययविभक्तिश्च । तासु तिङ्विभक्तिः षोढा–परस्मैपदविभक्तिः, आत्मनेपदविभक्तिः, सार्वधातुकविभक्तिः, आर्धधातुकविभक्तिः, व्यक्तकालविभक्ति, अव्यक्तकालविभक्तिश्च; तासु परस्मैपदविभक्तिः यथा—पचति, पचतः, पचन्ति; आत्मनेपदविभक्तिर्यथा—पच्यते, पच्येते, पच्यन्ते; सार्वधातुकविभक्तिर्यथा—व्यपच्यत, व्यपच्येतां, व्यपच्यन्त; आर्धधातुकविभक्तिर्यथा—पपाच, पक्ता, पक्षीष्ट; व्यक्तकालविभक्तिर्यथा—अपाक्षीत्, अपचत्, पक्ष्यते; अव्यक्तकालविभक्तिर्यथा—पचतु, पचेत्, अपक्ष्यत इति । सुब्विभक्तिरपि षोढा—कारकविभक्तिः, संबन्धविभक्तिः, शेषविभक्तिः, उपपदविभक्तिः, प्रधानविभक्तिः, संबोधनविभक्तिश्च; तासु कारकविभक्तिर्यथा—कटं करोति, दात्रेण लुनाति, ब्राह्मणाय ददाति; संबन्धविभक्तिर्यथा—विद्यया यज्ञः, यूपाय दारु, गवां कृष्णा संपन्नक्षीरतमा इति; शेषविभक्तिर्यथा—मातुः स्मरति, वृक्षस्य पर्णं पतति, माणवकस्य पितरं पन्थानं पृच्छति; उपपदविभक्तिर्यथा–वृक्षं प्रति विद्योतते विद्युत्, नमो देवेभ्यः, ऋते देवदत्तात्; प्रधानविभक्तिर्यथा—देवदत्तः पचति, चैत्रेण पच्यते, वीरः पुरुषः इति; संबोधनविभक्तिर्यथा—हे देवदत्त, व्रजामि देवदत्त, आगच्छ देवदत्त इति । तद्धितप्रत्ययविशेषोऽव्ययविभक्तिः । सा द्विधा—विभक्तिकार्यवती, अविभक्तिकार्यवती च । विभक्तिकार्यवती ‘प्राग्दिशो विभक्तिः’ (पा. ५.३.१) इति । सा त्रिधा—विभक्त्यादेशरूपा, प्रत्ययादेशरूपा, प्रत्ययरूपा च; तासु विभक्त्यादेशरूपा यथा—‘पञ्चम्यास्तसिल्’ ‘सप्तम्यास्त्रल्’, ‘इदमो हः’, ‘किमोऽत्’, (पा. ५. ३. ७, १०, ११, १२) भवान्दीर्घायुरायुष्मान्देवानांप्रिय एतैर्योगे तेऽन्यासां चेति; यथा—सर्वस्मात्, सर्वतः, यस्मिन्, यत्र, तं भवन्तम्, ततो भवन्तं, एतेन दीर्घायुषा अत्र दीर्घायुषा, इहायुष्मते अस्मै आयुष्मते, कस्य देवानां प्रियस्य क्व देवानां प्रियस्य इति; प्रत्ययादेशरूपा ‘तसेश्च’ (पा. ५.३.८) तसिः । स च ‘प्रतियोगे पञ्चम्यास्तसिः’ ‘अपादाने चाहीयरुहोः’, ‘अतिग्रहाव्यथनक्षेपेष्वकर्तरि

तृतीयायाः', 'षष्ठ्या व्याश्रये (पा. ५.४.४४, ४५, ४६, ४८) 'आद्यादिभ्यश्च सर्वविभक्तिः, इति ; यथा—अभिमन्युरर्जुनतः प्रति, शैलतोऽवतरति, शीलतोऽतिगृह्यते, देवा अर्जुनतोऽभवन्; आदौ आदितः, प्रमाणेन प्रमाणतः इति ; प्रत्ययरूपा–'सर्वैकान्यकिंयत्तदः काले दा' 'इदमोर्हिल्', (पा. ५.३.१५, १६), 'प्रकारवचने थाल्' 'था हेतौ च च्छन्दसि', 'इदमस्थमुः', 'किमश्च' (पा. ५.३.२३, २६, २४, २५) इति ; यथा—सर्वदा, एतर्हि; सर्वथा, प्रकथा, इत्थं, कथं इति। अविभक्तिकार्योऽपि त्रिधा—शब्दोक्ता, अर्थोक्ता, प्रयोगोक्ता च ; तासु शब्दोक्ता यथा— 'सप्तमी-पञ्चमीप्रथमाभ्योस्तातिः', (पा. ५.३.२७) 'देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्' (पा. ५.४.५६) इति ; यथा—पुरस्ताद्वसति, पुरस्तादागतः, पुरस्ताद्रमणीयं, देवत्रा गच्छति, मनुष्यत्रा वसति, पुरुषत्राभिनिविशते इति ; अर्थोक्ता 'बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्', 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (पा. ५.४.४२, १७) इति ; यथा—बहु देहि बहुशो देहि, बहुभ्यो देहि बहुशो देहि, द्वौ द्वौ देहि द्विशो देहि, द्वाभ्यां द्वाभ्यां देहि द्विशो देहि, माषं माषं देहि माषशो देहि, पञ्च वारान् देहि पञ्चकृत्वो देहि इति। प्रयोगोक्ता– 'तेन तुल्यं क्रिया चेद्वतिः', 'तत्र तस्येव' (पा. ५.१.११५, ११६)। यथा—अग्निना तुल्यमयं वर्तते अग्निवत्, देवमिव भवन्तं पश्यामि देववत्, ब्राह्मणेन तुल्यमस्मै दीयते ब्राह्मणवत्, व्याघ्रेण तुल्यमस्माद्बिभेति व्याघ्रवत्, मधुरायामिव पाटलिपुत्रे प्रासादाः मधुरावत्, श्रोत्रियस्येवास्य शुक्ला दन्ता श्रोत्रियवत्। तद्धित-विभक्तिरिति वक्तव्ये अव्ययग्रहणम्, अधिस्त्रि, प्रत्युरसं, पारेगङ्गं, पुरा, साक्षात् इत्येवमादीना-मुपसंग्रहणार्थमिति ॥

'प्रथमानिर्दिष्टं समास उपसर्जनम्' 'एकविभक्ति चापूर्वनिपाते' (पा. १.२.४३, ४४)। तत् त्रिधा—विशेष्यरूपं, विशेषणरूपं, तुल्यरूपं च ; तत्र विशेष्यरूपं यथा—पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः, पूजितोऽश्वः अश्वकुञ्जरः, गर्भिणी गौः गोगर्भिणी, स्तोकोऽग्निः अग्निस्तोकः, कायस्य पूर्वः पूर्वकायः, अर्धं पिप्पल्याः अर्धपिप्पली इति ; विशेषणरूपं यथा—राज्ञः पुरुषः राजपुरुषः, दन्तानां राजा राजदन्तः, कष्टं श्रितः कष्टश्रितः, जीविकामापन्नः आपन्नजीविकः, नीलमुत्पलं नीलोत्पलं, उत्तमः पुरुषः पुरुषोत्तमः इति ; तुल्यरूपं यथा—शस्त्रीव श्यामा शस्त्रीश्यामा, खञ्जश्चासौ कुब्जश्चेति खञ्जकुब्जः, निर्गतः कौशाम्ब्याः निष्कौशाम्बिः, चित्रा गावोऽस्य चित्रगुः, अर्धं तृतीयमेषां अर्धतृतीयाः, के सब्रह्मचारिणोऽस्य किंसब्रह्मचारी इति । ननु च, अर्धं तृतीय-मेषामिति अन्यपदार्थो नोपपद्यते। स हि तत्र स्यात्, यत्र येषां पदानां समासः, ततोऽन्यस्य पदस्यार्थो भवति । नैष दोषः। अवयवेन विग्रहः, समुदायः समासार्थः । नन्वेवं सति, 'असिद्वितीयोऽनुससार पाण्डवम्' 'सङ्कर्षणद्वितीयस्य बलं कृष्णस्य वर्धताम्'। इत्यादिषु द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति । नैवम्, असिर्द्वितीयो यस्येत्यन्यपदार्थेनैक एवोच्यते । यथा– 'जनार्दनस्त्वात्मचतुर्थ एव' इति । यदि वा, द्वितीयशब्दोऽयमस्ति तीयान्तः संख्यापूरणः ; अस्ति

चाव्युत्पन्नः सहायवाची, तस्येह ग्रहणम्—असिद्वितीयः असिसहाय इत्यर्थः । आत्मचतुर्थ इति कोऽयं समासः ? नन्वन्यपदार्थः—आत्मा चतुर्थः अस्येति । आत्मना चतुर्थ इति तत्पुरुषः कस्मान्न भवति ? 'आत्मनश्च पूरणे' (पा. ६.३.६) इति तृतीयाया अलुक्प्रसङ्गात् । यद्येवम्, अलुक् न वक्तव्यः ; आत्मना चतुर्थ इति वाक्यं भविष्यति ; आत्मचतुर्थ इति च वृत्तिः ; न चात्मचतुर्थ इत्युक्ते बहुव्रीहौ तत्पुरुषे वाऽर्थभेदो विद्यते, उभयथाऽपि चतुस्संख्योपलक्षितसमुदायप्रतीतेः । नैवम् ; एवं सति, राज्ञः सखा राजसखः इत्यप्युक्ते संबन्धादेतद्गन्तव्यम्—नूनं राजाऽस्य सखा ; राजसखेति चोक्ते गन्तव्यमेतत्—राज्ञस्सखाऽयमिति । ततश्च बहुव्रीहितत्पुरुषयोरन्यतरो न प्राप्नोति । नैवम् ; अस्त्यत्र विशेषः—तत्पुरुषे समासान्तो भवति ; यथा—'स्वस्ति सोमसखाय ते' बहुव्रीहौ न भवति ; यथा—'वृत्रं जहि मरुत्सखे' इति । इहापि तर्ह्यस्ति विशेषः—तत्पुरुषे आत्मनाचतुर्थसाध्यमेतत् ; बहुव्रीहावात्मचतुर्थसाध्यमेतदिति । अपि च, अन्यथाजातीयः प्रत्यक्षेणार्थसंप्रत्ययः, अन्यथाजातीयः खल्वनुमानेन भवति ; तत्रायं राज्ञस्सखा, आत्मना चतुर्थ इति प्रत्यक्षेण ; संबन्धस्योभयनिष्ठत्वात् नूनं राजाऽप्यस्य सखा, आत्माऽप्यस्य चतुर्थ इत्यनुमानेन । एवं बहुव्रीहावपि द्रष्टव्यम् । अथ यथाऽऽत्मचतुर्थ समुदायस्यैकार्थत्वादेकवचनम्, एवमर्धतृतीया इत्यत्रापि कस्मान्न भवति ? अन्येऽपि ह्येकार्था एव समुदाया भवन्ति ; तद्यथा—शतं, यूथं, वनमिति । विषम उपन्यासः ; आत्मचतुर्थ इत्यत्र हि बहुव्रीहिणोपसर्जनीकृतप्रतीयमानपरसंख्येयसमानाधिकरणात्मचतुर्थशब्दशक्त्यभिधेयो जनार्दन एकोऽस्येत्यन्यपदस्यार्थः प्रतिपाद्यते ; इह तु अर्धतृतीयशब्दशक्त्यभिधेयास्त्रयः संख्येयाः । तत्र यद्येकवचनं वाक्ये वृत्तौ वा भवति, केषां तदर्धं तृतीयं भवति ? नन्वेवमपि, अर्धतृतीया द्रोणा इति द्रोणशब्दः समुदाये वृत्तो नार्धे वर्तते । नैष दोषः ; समुदायेषु वृत्ताः शब्दाः अवयवेष्वपि वर्तन्ते ; तद्यथा—पूर्वे पञ्चालाः, उत्तराः कुरवः इति । अथ, द्वौ द्रोणावर्धाढकं च कर्तव्यमर्धतृतीया द्रोणा इति । न कर्तव्यम् । समुदाये शब्दाः प्रवृत्ताः तेष्ववयवेषु वर्तन्ते, योऽवयवस्तं समुदायं न व्यभिचरति ; यथा—द्रोणार्धं द्रोणं, आढकार्धमाढकमिति । यद्यर्धं तृतीयमनयोरिति विग्रहः क्रियते, को दोषः स्यात् ? षष्ठ्यर्थो नोपपद्यते ; किं हि द्वयोस्तृतीयमर्धं भवति ? भवानपि पृष्टो व्याचष्टाम् । अथेह देवदत्तस्य भ्रातेति कः संबन्धार्थः ? एकस्मात् प्रादुर्भाव इति चेत्, वार्त्तं तत् ; तद्यथा—सार्थिकानामेकप्रतिश्रयद्विजानां प्रातरुत्थाय विप्रतिष्ठमानानां न कश्चित्परस्परमभिसंबन्धो भवति एवंजातीयकं भ्रातृत्वं नाम ; तत्र चेद्युक्तः षष्ठ्यर्थो दृश्यते, इहापि युक्तो दृश्यताम् ; द्वयोर्ह्यनुजन्मा तृतीयो भवति । दृश्यते चान्यत्रापि द्वयोस्तृतीयेन संबन्धः ; तद्यथा—

निसर्गभिन्नास्पदमेकसंस्थमस्मिन्द्वयं श्रीश्च सरस्वती च ।
कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि तयोस्तृतीया ॥ इति ॥

नन्वेवम्, अर्धतृतीया आनीयन्तामित्यर्धानयनं न प्राप्नोति, बहुवचनं च नोपपद्यते । नैष

दोषः; भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि; तद्यथा—शुक्लवाससमानय, लोहितोष्णीषाः ऋत्विजः प्रचरन्तीति तद्गुण आनीयते, तद्गुणाश्च प्रचरन्ति। बहुवचनं तु द्वित्रादिवदुपपद्यत इति; तत्र यथा आनीयन्तामिति त्रयाणामिव द्वयोरप्यानयनपक्षे बहुवचनमुपपन्नं भवति, तथेहापि भविष्यति। विषम उपन्यासः; तत्र हि द्वौ वेत्युक्ते त्रयो वेति गम्यते, त्रयो वेत्युक्ते द्वौ वेति गम्यते; सैषा समानाधिकरणपदार्थपञ्चकाधिष्ठाना वाक्; तत्र युक्तं बहुवचनम्; इह त्वर्धं तृतीयमनयोरित्युक्ते यद्यपि गम्यते त्रयाणां पूरणस्तृतीयो भवतीति, तथाऽपि समासेऽन्यपदार्थ-परतया द्वयोरेवाभिधानाद्बहुवचनस्य नोत्पत्तिः। तद्गुणसंविज्ञानमपि समासाभिधानपक्ष एवोपपद्यते; समासश्च सामर्थ्ये सति भवति; सामर्थ्यं च वृत्तिवाक्ययोरैकार्थ्यम्; तच्च तदोपजायते, यदि वृत्ताविव वाक्येऽपि समासार्थस्य बहुवचनं भवति।

अथ किंसब्रह्मचारीति कोऽयं समासः? के सब्रह्मचारिणोऽस्येति। कः सब्रह्मचारीति कर्मधारयः कस्मान्न भवति? भवति, यदि क्षेपो गम्यते, यथा—किंराजा यो न रक्षति, किंगौः यो न वहति। केषां सब्रह्मचारीति तत्पुरुषस्तर्हि भवतु। कठ इति प्रतिवचनं नोपपद्यते; न ह्यन्यत् पृष्टेनान्यदाख्येयम्; अतः कठानामिति प्रतिवक्तव्यं भवति। बहुव्रीहावप्येतत्तुल्यमेव; तत्रापि के सब्रह्मचारिणोऽस्येति बहुवचनप्रश्ने कठ इति नैकवचनेनोत्तरं भवति। नैष दोषः; अग्नौ करवाणीति न्यायेन भविष्यति; तद्यथा—कश्चिदाह-अग्नौ करवाणीति, तत्र कुर्विति तत्कर्तर्यनुज्ञाते कर्माप्यनुज्ञातं भवति; अपर आह—अग्नौ करिष्ये; तत्र क्रियतामिति कर्मण्यनुज्ञाते कर्ताप्यनुज्ञातो भवति। एवं तथैव के सब्रह्मचारिणोऽस्येत्युक्ते कठा इति प्रत्युक्ते संबन्धादेतद्गम्यते अयमपि कठः; तथा कठ इत्यप्युक्ते संबन्धादेतदवगन्तव्यम्—तेऽपि कठाः। समासेन तु प्रति-निर्देष्टुमशक्यम्, उपसर्जनं हि तत्र ते भवन्तीति॥

ऐकपद्यं समासः। स त्रिधा—उपश्लिष्टक्रियः, गमितक्रियः, अक्रियश्च। तेषूपश्लिष्टक्रियो द्विधा—उभयस्थक्रियः, अन्यतरस्थक्रियश्च; तयोरुभयस्थक्रियो यथा—कृताकृतं, क्लिष्टाक्लिशितं, स्नातानुलिप्तः, भ्रष्टलुञ्चितः, कृष्टातिकृष्टं, क्रयाक्रयिका इति; अन्यतरस्थक्रियो यथा—भोज्योष्णं, प्रातजीविकः, आहिताग्निः, कष्टश्रितः, काकपेया, इध्मप्रव्रश्चनः इति। गमितक्रियो द्विधा—उभयकारकः, अन्यतरकारकश्च। तयोरुभयकारको यथा—दध्नोपसृष्ट ओदनः दध्योदनः, गुडेन मिश्रा धाना गुडधानाः, शष्कुलया कृतः खण्डः शष्कुलाखण्डः, अक्षेषु प्रसक्तः शौण्डः अक्षशौण्डः, कण्ठे स्थितः कालो यस्य कण्ठेकालः, पञ्चसु कपालेषु संस्कृतः पञ्चकपालः इति। अन्यतरकारको यथा—प्रगत आचार्यः प्राचार्यः, अतिक्रान्तो मालामतिमालः, अवक्रुष्टः कोकिलया अवकोकिलः, परिग्लानोऽध्ययनाय पर्यध्ययनः, निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः, प्रपतितानि पलाशान्यस्य प्रपलाशः इति। अक्रियोद्विधा—वस्तुरूपः, अवस्तुरूपश्च। तयोर्वस्तुरूपो यथा—उपकुम्भं, त्रिभुवनं,

नीलोत्पलं, राजपुरुषः, चित्रगुः, धवखदिरौ इति । अवस्तुरूपो यथा—अधिस्त्रि, प्रत्युरसं, यथाशक्ति, यावदमत्रं, पारेगङ्गं, मध्येसमुद्रं इति । अयं तु उपश्लिष्टक्रियो गमितक्रियश्च भवति । यथा—

आयतीगवमागच्छत्यातिष्ठद्गूपतिष्ठते । निकुच्य कर्णौ शार्दूलोऽपोह्य पुच्छौ प्रधावति ॥

यथा च—

शलाकापर्यभिद्यूतं चतुष्पर्यक्षपर्ययि । विपर्यस्ते विधौ पश्य तलादेरपि जायते ॥

केशाकेशि, बाहूबाहवि, दण्डादण्डि, मुष्टीमुष्टि इत्यपि गमितक्रियमसत्त्वरूपं केचित् । यथा—

रोषावेशादाभिमुख्येन कौचिन्नामग्राहं रंहसैवोपजातौ ।
भित्वा हेती मल्लवन्मुष्टिघातैर्घ्नन्तौ बाहूबाहवि व्यासजेताम् ॥

केचित्पुनरस्य वस्तुरूपत्वं ब्रुवते । यथा—

दण्डादण्डि न कुर्वन्ति न कचाकचि कोकिलाः । तथाऽपि जितमेवाभिर्वाग्भिरेव जगत्त्रयम् ॥

इति । कुतः पुनरेतत् यदेकदा दण्ड्यादण्ड्यादयः सत्त्वरूपाः, अन्यदा त्वसत्त्वरूपा इति ? 'तत्र तेनेदमिति सरूपे' (पा. २.२.२७) सूत्रस्य व्याख्यानभेदात् । तत्रास्य सूत्रस्यायमर्थः—द्वे समानाकृती शब्दरूपे अन्यपदार्थे समस्येते—तत्रेति तेनेति च । कः पुनरिहान्यपदार्थः ? केचिदाहुः—इतिशब्दस्य प्रकारवाचित्वादित्थमिति ; केचित्पुनः—इदमित्थमिति । तत्र पूर्वस्मिन् पक्षेऽसत्त्वरूपता, इतिशब्दस्यासत्त्ववाचित्वात्; उत्तरस्मिन सत्त्वरूपता, इदमिति सर्वनाम्ना वस्तुरूपपरामर्शात् । कः पुनः इहेतिशब्दार्थः ? योऽसौ तत्रेत्यधिकरणे तेनेति करणे वा इदमर्थानुयायिनी इतिकर्तव्यतारूपा क्रिया, तत्र गृहीत्वा तेन प्रहृत्य इत्यादिकः सर्वनामार्थो यत्तदिति तदिति व्यपदेशार्हग्रहणप्रहरणादिकायाः क्रियायाः साध्यं युद्धादि । तदाह चन्द्रगोमी— 'तत्र गृहीत्वा तेन प्रहृत्य युद्धे सरूपं सुप्सुपैकार्थं भवति ' इति । किमेतद्वक्तव्यम् ? न वक्तव्यम् । कथमनुच्यमानं गम्यते ? 'सरूप' इत्येकशेषापवादेन द्वयोरधिकरणयोः करणयोश्च तुल्यकालनिर्देशात् । न हि द्वयोस्तुल्यबलयोः प्रतियोगिनोर्व्यापारमन्तरेण द्वयोरधिकरणयोः करणयोर्वा तुल्यकालनिर्देशो भवति । तथाऽपि युद्धादिनियमो न लभ्यते । कः पुनराह—नियम इति ? युद्धग्रहणादेरन्यत्रापि प्रयोगात् । हस्ते हस्ते च गृहीत्वा मित्राय पुत्रं समर्पयति हस्ताहस्ति, गालिभिश्च गालिभिश्च निर्भर्त्स्य प्रवृत्तः परिहासो गालीगालि इति ॥

ननु च, अन्यपदार्थे बहुव्रीहिरित्युच्यमाने विस्पष्टपटुर्वेटुः, पुनरुत्स्यूतं वासः, परश्शताः शरदः, इति सामान्यसमासानाम् ; स्वयंधौतौ पादौ, सामिभुक्तमन्नं, श्रेणीकृताः पत्तयः, इति

तद्यथा—अवकुष्टं कोकिलया अवकोकिलं, परिग्लानोऽध्ययनाय पर्यध्ययनः, निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः इति । अथ कथं शस्त्रीश्यामादय उपपन्नसमासा उपपद्यन्ते ? 'उपमानानि सामान्यवचनैः' (पा. २.१.५५.) इत्यादिभिः । यद्येवम्, 'इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च' इति न वक्तव्यम्, वाससी इव, कन्ये इव, इत्यादिप्रयोगाणां 'उपमानानि सामान्यवचनैः' इत्यनेनैव सिद्धेः ; विभक्त्यलोपमात्रं पुनरलुक्प्रकरणे वक्तव्यं भवति । उच्यते—नायमिव शब्दः सामान्यवाची, अपि तु सामान्यद्योतकः, तद्यथा—नेत्रे नीलोत्पले इत्युक्ते तदाकारकान्त्यादयः प्रतीयन्ते । शस्त्रीश्यामेत्यादिषु साक्षात् सामान्यवचनः श्यामाशब्दः प्रयुज्यते । अथ, अवतप्तेनकुलस्थितमित्यत्र कथम् ? न ह्ययमुपमायां, अपि तु क्षेपे । उपमानेनात्र क्षेपो गम्यते—अवतप्ते नकुलस्येव स्थितं तवैतच्चापलमिति ; यथाऽवतप्ते नकुलश्चिरस्थाता न भवति, तद्वत् कार्यमारभ्य यश्चिरं तत्र नावतिष्ठते स एवमुच्यते—अवतप्ते नकुलस्थितं तवैतदिति । एतेन कूपमण्डूक इत्यपि व्याख्यातम् ; यथा कूपमण्डूकः कूपाद्बहिरनिस्सरन् देशान्तरव्यवहारं न जानाति, तथाऽयं स्वगेहाद्बहिरनिःसरन् न देशान्तरव्यवहारवेदी ; स एवमुच्यते—कूपमण्डूकोऽयमिति । अथ राजवल्लभेत्यादयः कथं षष्ठीसमासाः ? यतो राजवल्लभेत्ययं बहुव्रीहिः कस्मान्न भवति—राजा वल्लभोऽस्याः इति ? अचेतनत्वेन वल्लभ्या वाल्लभ्यायोगात् । राज्ञस्तु वल्लभेति भवति । तत्र राजा निर्ज्ञातस्वार्थः, स्वभावतः सामान्यात् प्रच्युतः, सामान्ये व्यवस्थितस्योपकर्तुमशक्तेः ; संबन्धिसामान्यापेक्षः, संबन्धिविशेषापेक्षो वा, संबन्ध्यन्तरस्य व्यवच्छेदार्थं प्रवृत्तेः, उभयाधिष्ठानत्वे सत्यपि संबन्धस्य परार्थमुपादानादुद्भूतसंबन्धप्रवृत्तिः, उपजातप्रातिपदिकार्थव्यतिरेकः, आत्मनि संबन्धोपभोगात् प्रधानेऽप्युपयुज्यमानसंबन्धषष्ठ्यन्त उपादीयते । प्रधानानि चानिर्ज्ञातार्थानि प्रथमयैव विभक्त्या युज्यन्ते ; तद्यथा—'क पुनरिदं पठितम् ? भ्राजा नाम श्लोकाः' इति । ततश्च वल्लभाशब्दोऽनिर्ज्ञातार्थत्वादात्मव्यपदेशाय स्वार्थादप्रच्युतः स्वभावतो विशेषवृत्तिः, सत्यप्यर्थित्वे गुणानामेवोपलम्भात् ; परत इदंकारं लिप्समानो निर्ज्ञातार्थेन संबन्धिना स्वार्थविशेषे नियम्यमान उपरतौत्सुक्यः औदासीन्येन प्रवर्तते । तत्र भेदाधिष्ठानस्य संबन्धस्य वाचिका षष्ठी, पदान्तराभिधेये संबन्धिन्याकाङ्क्षावता गुणपदेन विशेष्यमाणा गुणपदस्था श्रूयते, विशेषविषयत्वात्समासस्य । गुणाश्च स्वार्थोपसर्जनप्रधानार्थोपपादिनो भेदे विनिवर्तमाने भेदाधिष्ठानं संबन्धमभ्यन्तरीकृत्य प्रवर्तन्ते । तत्र राजवल्लभेति संबन्धे प्रातिपदिकार्थतामापाद्यमाने तद्विषया षष्ठी, स्वभावतो निवृत्ता कार्यार्थं सामान्येन प्रसक्ता 'सुपो धातुप्रातिपदिकयोः' (पा. २.४.७१) इति शास्त्राद्विनिवर्तमाने वाऽन्वाख्यायते । अथ वरप्रदेया कन्येति कोऽयं समासः ? षष्ठीतत्पुरुष एव ; यथा—देवदेयं पुष्पं, ब्राह्मणदेयं धनमिति । नन्वेवम्, एते चतुर्थीसमासाः कस्मान्न भवन्ति ? 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' (पा. २.१.३६) इति तदर्थादिष्वेव तत्समाम्नानात् । तादर्थ्य एव हि तर्हि समासा भवन्तु ; यद्धि यस्मै प्रदीयते तदर्थमेव तद्भवति । नैवम् । न तादर्थ्यमात्रे चतुर्थी समस्यते । यथा—अवहननायोलूखलम् । अपि तु प्रकृतिविकारतादर्थ्ये । यथा—यूपरूपाया विकृतेः

प्रकृतिभूतं दारु यूपदार्विति । ननु च नात्र प्रकृतिविकारग्रहणमस्ति ; दृश्यते चाप्रकृतिविकारभावेऽपि, अश्वघासः, श्वश्रूसुरं, 'अथातो धर्मजिज्ञासा' इति चतुर्थीसमासः ; तत्कथमुच्यते प्रकृतिविकारतादर्थ्ये एव चतुर्थ्यास्सामर्थ्यमिति ? आचार्यप्रवृत्तिर्ज्ञापयति यदयं बलिरक्षितग्रहणं करोति—यथाजातीयकानां च समासे बलिरक्षितग्रहणमपुनरुक्तं भवति, तथाजातीयकानां समासः। विकृतीनामेव चतुर्थ्यन्तानां प्रकृतिभिस्सह समासे बलिरक्षितग्रहणमपुनरुक्तं भवति, न तादर्थ्यमात्रे। अश्वघासादयस्तु षष्ठीसमासा भविष्यन्ति। यद्धि यदर्थं भवति, अयमपि तत्राभिसंबन्धः—तस्येदमिति। तद्यथा—गुरोरिदं यद्गुर्वर्थमिति। तादर्थ्यमपि संबन्धविशेषः ; विशेषे चावश्यमेव सामान्यं संभवति। न चैतत्कर्मादिष्वपि न दृश्यते—माषाणामश्नीयात्, श्रुतं ते सर्वमेवैतत् इति। ननु च वरप्रदेया कन्येति यदि ददातिप्रयोगेऽपि न संप्रदानम्, संप्रदानेऽपि न चतुर्थी, कोऽन्यः तयोर्विशेषो भविष्यति ? कः पुनराह—नात्र संप्रदानम् ; संप्रदान एवैषा चतुर्थ्यर्थे षष्ठी ; दृश्यते हि संप्रदानादौ षष्ठीचतुर्थ्योरविशेषेण प्रयोगः ; तद्यथा— 'हिमवतो हस्ती' 'पुरुषमृगश्चन्द्रमसे' (तै. सं. ५.५.११, १५) 'न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति' (बृ. २.४.५) चिराय दृष्टः, चिररात्राय दृष्टः, 'रोचते मम घृतं सह मुद्गैः शालयो दधिशरं क्रमुकाश्च' 'शृतमेव ममापि रोचते शृतशीतं च सशर्करं पयः' इति। अथ माসजातोऽयमिति किंप्रधानोऽयं समासः ? उत्तरपदार्थप्रधानः। सधर्मणाऽनेनान्यैरुत्तरपदार्थप्रधानैर्भवितव्यम्। अन्येषु चोत्तरपदार्थप्रधानेषु यैवासावन्तवर्तिनी विभक्तिस्तस्याः समासेऽपि श्रवणं भवति ; तद्यथा—राज्ञः पुरुषो राजपुरुषः इति। इह पुनर्वाक्ये षष्ठी, समासे प्रथमा। केनैतदेवं भवति ? योऽसौ मासजातयोरभिसंबन्धः स समासे निवर्तते, अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्न इति, तत्र 'प्रातिपदिकार्थे प्रथमा' इति प्रथमा भवति। न तर्हीदानीमिदं भवति–मासजातस्येति। बाह्यं संबन्धिनमपेक्ष्य भविष्यति। ननु च 'कालाः परिमाणिना' (पा. २.२.५) इत्यनेनायं समासः। न च जातस्य मासः परिमाणं, अपि तु त्रिंशद्रात्रस्य ; यथा—द्रोणो बदराणां देवदत्तस्येति न देवदत्तस्य द्रोणः परिमाणं, अपि तु बदराणाम् ; तदाह— 'कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देशः' इति। किं पुनर्भवान् कालं मन्यते ? येन मूर्तीनामुपचया अपचयाश्च लक्ष्यन्ते। तस्यैव तर्हि कयाचित् क्रियया युक्तस्याहरिति भवति, रात्रिरिति च। कया क्रियया ? आदित्यगत्या। तयैवाऽसकृदावृत्तया मास इति च भवति, संवत्सर इति च भवति। यद्येवं भवति जातस्य मासः परिमाणं, किं तु मासो जातस्येतिवत् मासौ जातस्य मासा जातस्येति प्राप्नोति। नैवं, मासजातः इत्युक्ते द्वित्वादिसंख्याविशेषस्यानुपलम्भात्। यत्र तूपलब्धेर्निमित्तमस्ति तत्र भवत्येव ; यथा—द्वौ मासौ जातस्य द्विमासजातः, एवं त्रिमासजातः इति। कथं पुनः कारकाणां समास इत्युपपन्नं भवति ? तेषां हि क्रिययैवाभिसंबन्धः ; न च क्रियावाचिनः सुबन्तत्वमस्ति। सुबन्तयोरेवान्तर्भूतक्रियाविशेषयोर्भविष्यतीति चेत्, नैवम् ; द्रव्याणां क्रियोपजनितस्संबन्धः शेषविषयो भवति, न

कारकविषयः। स्वभावसिद्धं हि द्रव्यं सिद्धवदभिधीयमानं द्रव्यान्तरं प्रत्यात्मप्रतिलम्भे निराकांक्षं न कर्मादिभावं भजते। न च समासप्रकरणे कारकाणि समस्यन्ते इति वचनमस्ति। उच्यते—मा भूद्वचनम्; अर्थतस्तु गम्यते; यदाह—द्वितीया श्रितादिभिः समस्यते; कष्टं श्रितः कष्टश्रितः इति। तत्र श्रित इत्युपात्तक्रियाविशेषपरिच्छिन्नः कर्ता, अभ्यन्तरीकृतसाध्यसाधनसंबन्धक्रियान्तरसंबन्धार्हः स्वाश्रयविषयासु बाह्यासु क्रियासु शक्त्यन्तरैरपि विरुद्धैकार्थसमवायः कष्टादीन्युपसर्जनीभूतया श्रयतिक्रिययाऽपेक्षते। ततश्च श्रयतिक्रियया संबन्धात् कष्टे कर्मत्वमिति श्रयणक्रियापूर्वकः कष्टश्रितयोरभिसंबन्धो भवति। तस्मिन् स्ववृत्त्यवयवार्थशक्त्यनुगृहीतेऽर्थान्तरे प्रादुर्भूते तदभिधायी शब्दस्समाससंज्ञां लभते। एवं वृकाद्भीतो वृकभीत इत्यत्रापि 'पञ्चमी भयेन' (पा. २.१.३७) इति वृकस्य भये 'भीत्रार्थानां भयहेतुः' (पा. १.४.२५) इत्यपादानत्वात् सति सामर्थ्ये, अभ्यन्तरीकृतक्रियाकारकसंबन्धः समुदायः समाससंज्ञां लभते। ननु च, न वृकस्य भीतं प्रत्यपादानत्वं, अपि तु भयं भीतिरित्येतानि। उच्यते—यथा मासो जातस्येति मासाख्यः क्रियाकलापः प्रथमकुक्षिगर्भवियोगाख्यस्य जन्मनोऽवधिभावेन परिच्छेदको भवति, जन्मप्रतिलब्धां वा सत्तां समावृत्य जातमपेक्षते, तथेहापि वृकादित्ययमपादानशब्दो भयमात्रस्यैवावच्छेदको भविष्यति, न भीतस्य। यदि वा, यथा कष्टश्रित इत्यत्रोपात्तश्रयतिक्रियासंबन्धात् कष्टे कर्मत्वमिति श्रयणक्रियापूर्वकं कष्टेन संबध्यते, तथेहाप्युपात्तभयक्रियावच्छिन्नः कर्ता भयक्रियासंबन्धाद्वृकस्यापादानत्वमिति भयक्रियापूर्वकं वृकेन संभत्स्यत इति। भवतु यत्रोपसर्जनीभूताया अपि क्रियायाः श्रवणम्; यत्र तु क्रिया न श्रूयते तत्र कथं शङ्कुलाखण्ड इति? प्रतीयमाना भविष्यति; तथा हि—शङ्कुलाखण्डः इत्युक्ते कृत इति प्रतीयते; तदेतद्द्योतयन्नाह—'तृतीया तत्कृतेन गुणवचनेन' इति। न्यायसिद्धत्वाद्वचनानर्थक्यमिति चेत्, न; वचनस्य नियमार्थत्वात्—यत्रैव कृत इत्यादि गम्यते तत्रैव समासः, अन्यत्र मा भूदिति। एवं च गम्यमानकरोतिक्रियोपगृहीतकरणकर्तृतृतीयान्तेन शङ्कुलादिना खण्डादीनां गुणमुक्तवतां मतुब्लोपादिना द्रव्यवचनानां तृतीयान्तार्थकृतत्वे सति सामर्थ्यमवसीयते; न तूक्तवैपरीत्ये; यथा—अक्ष्णा काणः, पादेन खञ्जः इति। तदेवमाक्षिप्तकरोतिक्रियावच्छिन्नः क्रियान्तरसंबन्धार्हः खण्डशब्दार्थो गम्यमानोपसर्जनीभूतया करोतिक्रियया शङ्कुलादीनपेक्षमाणः करणभूतैः कर्तृभूतैर्वा शङ्कुलादिभिस्संबध्यते। तद्वचनश्च समुदायोऽभ्यन्तरीभूतक्रियाकारकसंबन्धः समाससंज्ञो भवति। अथेह कस्मान्न भवति—दध्ना पटुः घृतेन पटुरिति? असामर्थ्यात्। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवति; न हि दध्नः पटुना सामर्थ्यम्। किं तर्हि? भुजिना—दध्ना भुङ्क्ते पटुरिति। इहापि तर्हि न प्राप्नोति—शङ्कुलया खण्ड इति; अत्रापि न शङ्कुलायाः खण्डेन सामर्थ्यम्? किं तर्हि? करोतिना—शङ्कुलया कृतः खण्ड इति। तत्कृतेनेति वचनाद्भविष्यति। वचनादिति चेत्, अथेह गुणवचनेनेत्युच्यमाने कथं मतुब्लोपाद्द्रव्यवचनेन खण्डादिनेति प्रतीयते? वचनग्रहणात्; इह तृतीया तत्कृतेन गुणेनेति सिद्धे यद्वचनग्रहणं करोति तस्यैतत् प्रयोजनम्,

एवं यथा विज्ञायेत—गुणमुक्तवान् गुणवचनः, खण्डगुणवान् खण्डः, पाण्डुगुणवान् पाण्डुः इति । यद्येवं, नार्थस्तत्कृतग्रहणेन भवति ; भवति हि शष्कुलायाः खण्डेन सामर्थ्यम् ; असामर्थ्यादिह न भविष्यति—दध्ना पटुरिति । इदं तर्हि तत्कृतस्य प्रयोजनं—द्रव्यवचनैः कारकसमासे तदनुरूपा क्रिया अभ्याहर्तव्येति ; तद्यथा—अक्षेषु प्रसक्तः शौण्डः अक्षशौण्ड इति । अथ द्रव्यवचनैस्तत्कृतसमासे गुणवचनेनेत्यपि किमर्थम् ? इह मा भूत्—धान्येन धनवान्, गोभिर्वपावान् इति ॥

अथ, अश्राद्धभोजीति कोऽयं समासः ? असमर्थनञ्तत्पुरुषः । किं पुनरिहासामर्थ्यम् ? पूर्वोत्तरपदयोर्मिथोऽनपेक्षा ; तथा हि—अश्राद्धभोजीति भुजिक्रियया नञः संबन्धः, न श्राद्धेन ; न हि तस्यायं नियमः—नश्राद्धं भोक्तव्यमिति । अपि तु—श्राद्धं न भोक्तव्यमिति । यत्र हि वर्तिपदार्थसमवायिनी क्रियाऽभिधीयमाना प्रतीयमाना वा स्वभावतो निवृत्ता नञा द्योत्यते—अपाचकः, अब्राह्मणः इति, तत्रैव सामर्थ्यम् । यत्र तु बाह्यक्रियया नञः संबन्धस्तत्रासामर्थ्यमेव ; यथा—सूर्यमपि न पश्यन्ति असूर्यपश्या राजदाराः, न पुनर्गीयन्ते अपुनर्गेयाः श्लोकाः, लवणं न भुङ्क्ते अलवणभोजी भिक्षुरिति । नन्वेवं, अवयवार्थव्यतिरिक्तसमुदायार्थाभावेऽर्थवत्त्वाभावात् कथं प्रातिपदिकसंज्ञा ? समासग्रहणादिति चेत्, अनर्थके कृतार्थत्वान्नियमानुपपत्तिः ; ततश्चार्थवतो वाक्यस्यापि प्रातिपदिकत्वप्रसङ्गः । ननु च, 'असूर्यललाटयोर्दृशितपोः' (पा. ३.२.३६) इत्यनेनासमर्थनञ्समासानां साधुत्वे ज्ञापिते, अ किंचित्कुर्वाणः, अ मार्ष हरमाणः, अ गाधादुत्सृष्टः इत्यादीनामपि मा भूत् समास इत्यसूर्यपश्यादयश्चत्वार एवासमर्थसमासाः परिगण्यन्ते ; परिगणनसामर्थ्यादेव प्रातिपदिकसंज्ञाऽपि भविष्यति ; तथाऽप्यनर्थकत्वादाश्रयाभावे संख्याकर्माद्यभावे तेषां वाचिका द्योतिका वाऽपि विभक्तयो नोत्पद्येरन् । नैवम् ; समुदायस्तावदानर्थक्येऽपि 'न केवला प्रकृतिः प्रयोक्तव्या' इति नियमादवश्यमेवाव्ययादिवद्विभक्तिमात्रमपेक्षते ; अवयवस्त्वर्थवत्त्वात् संख्याकर्मादेराश्रयत्वेन तां विशिष्टामेवाङ्गीकरोति ; ततश्च यथाऽऽतुरानातुरयोरेकभोजनप्रतिपत्तावातुराणां भोजनमनातुरोऽपि प्रतिपद्यते, तथाऽवयवार्थानुग्रहार्थकोऽपि समुदायो विभक्तिविशेषमेव प्रतिपत्स्यत इति न कश्चिद्दोषः । ननु, असत्येकार्थीभावे व्यपेक्षाधर्माः कथं न निवर्तन्ते ? के पुनस्ते ? विशेषणयोगः, समुच्चयः, संख्याविशेष इति । तत्र ब्राह्मणस्य शोभनं, श्राद्धं न भुङ्क्ते इति विशेषणयोगः, श्राद्धं न भुङ्क्ते बलिमामन्त्रणं चेति समुच्चयः, श्राद्धं श्राद्धानि वा भुङ्क्ते इति संख्याविशेषयोगः । ते च वाक्य एवोपलभ्यन्ते, न त्वश्राद्धभोजीति वृत्तौ ; नह्यश्राद्धभोजी ब्राह्मणस्य शोभनमित्यादि । तत्कथमुच्यते—नास्त्यत्रैकार्थीभाव इति ? नैवम् ; अश्राद्धशब्दो ह्यत्रासमर्थः, न त्वश्राद्धभोजिशब्दः ; अश्राद्धभोजिविषयाश्चैते विशेषणायोगादयः प्रतीयन्ते, नाश्राद्धविषया इति । ननु च, यद्यश्राद्धशब्दः समुदायार्थाभावादनर्थकः, अश्राद्धभोजिशब्दोऽप्यर्थवदनर्थकसंघातत्वादनर्थकः प्राप्नोति । अस्त्वानर्थक्यम् । वाक्यविषयास्तु धर्मा भविष्यन्ति तच्चानर्थक्यमपि परिहर्तव्यम् ; इदं च परिह्रियते—शब्दशक्तिरेषा यद्भिन्नेऽप्यर्थे केनचिच्छब्देनाभिधीयमाने

विशेषणादियोगो भवति केनचिन्न भवति, तत्र वाक्येऽसमर्थसमासपदानामविद्यमानमपि वृत्तौ शब्दान्तरत्वादस्त्येकार्थाभिधायित्वमिति । ननु च, यद्यसामर्थ्येऽपि वचनात्समासः—किमद्य ते वस्त्रं नीलं उत्पलमालि कर्णे ; नेह कश्चित्पुरुषः व्याघ्रस्सरति पल्लीम् ; पश्य सखि कष्टं श्रितः प्रियो मे गुरुकुलम् ; किं ते शङ्कुलया खण्डो देवदत्त उपलेन ; गच्छ त्वं यूपाय दारु शोभनं शैले ; निवर्तस्व वृकात् भयं देवदत्तस्य यज्ञदत्तात् ; भार्या राज्ञः पुरुषो देवदत्तस्य ; सक्तः त्वमक्षेषु शौण्डः पिबति पानागारे इत्यादावपि समासः प्राप्नोति ; स तर्ह्यत्रापि वचनात् 'विशेषणं विशेष्येण', 'द्वितीया श्रितादिभिः', 'तृतीया तत्कृतेन', चतुर्थी तदर्थेन', 'पञ्चमी भयेन' 'षष्ठी सुबन्तेन', 'सप्तमी शौण्डादिभिः' समस्यत इति । विषम उपन्यासः ; परिगणनादीन्यसामर्थ्य एव समासार्थमारभ्यन्ते । यथा—कृतपूर्वी कटमित्याद्यर्थं 'पूर्वादिनिः' 'सपूर्वाच्च' (पा. ५.२.८६, ८७) इति । 'विशेषणं विशेष्येण' इत्येवमादीनि तु 'समर्थः पदविधिः' (पा. २.१.१.) इति सामर्थ्ये सत्युपादीयन्ते । सामर्थ्यविषयप्रदर्शनार्थमेव च 'विशेषणं विशेष्येण' इति प्रथमायां सामानाधिकरण्यम्, द्वितीयायां श्रितादिनियमः, तृतीयायां तत्कृतादिवचनं, चतुर्थ्यां प्रकृतिविकारभावः, पञ्चम्यां भयादिपरिगणनं, षष्ठ्यां पूरणादिनिषेधः, सप्तम्यां शौण्डादिनिर्देशः इत्युपपद्यते । तेन यत्र विशेषणादिषु सामानाधिकरण्यादेरभावः, तत्रासामर्थ्यात् समासो न भवति ॥

अब्राह्मणोऽयमिति कोऽयं समासः ? समर्थनञ्तत्पुरुषः । किंप्रधानोऽयम् ? उत्तरपदार्थप्रधानः । अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति । नैष दोषः ; इदं तावदयं प्रष्टव्यः—अथेह राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं कस्मान्न भवति ? राजाऽत्र विशेषकः प्रयुज्यते, तेन राजविशिष्टस्यानयनं भविष्यति । इहापि नञ् विशेषकः प्रयुज्यते, तेन नञ् विशिष्टस्यानयनं भविष्यति । कः पुनरसौ ? निवृत्तपदार्थकः । यदा पुनरस्य पदार्थो निवर्तते, तदा किं स्वाभाविकी निवृत्तिः ? आहोस्विद्वाचनिकी ? किं चातः ? यदि स्वाभाविकी, किं नञ् प्रयुज्यमानः करोति । तर्हि वाचनिकी भविष्यति ; किंच प्रतिकीलवत् । तत्र यथा कील आहन्यमानः प्रतिकीलं निवर्तयति, एवं नञ् प्रयुज्यमानः पदार्थं निवर्तयति । यद्येतन्नञो माहात्म्यं स्यात्, न जातुचिद्राजानो हस्त्यश्वं बिभृयुः, नेत्येव ब्रूयुः । एवं तर्हि स्वाभाविकी निवृत्तिः, नञ्निमित्ता तूपलब्धिः । तद्यथा—संतमसान्धकारे द्रव्याणां प्रदीपनिमित्तं दर्शनं, न च तेषां प्रदीपो निवर्तको भवति । यदि पुनरयं निवृत्तपदार्थको नञ्, किमर्थं ब्राह्मणशब्दः प्रयुज्यते ? एवं यथा विज्ञायेत—अस्य पदस्यार्थो निवृत्त इति । नेति ह्युक्ते संदेहः स्यात्—कस्य पदार्थो निवर्तत इति ; तत्रासंदेहार्थं ब्राह्मणशब्दः प्रयुज्यते । यदि वा, सर्वे एते शब्दा अवयवेष्वपि वर्तन्ते—ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्र इति ॥

'तपः श्रुतं च योनिश्च तत्र ब्राह्मणकारणम् ।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः ॥'

तथा गौरः कपिलः पिङ्गलकेश इत्येतानप्यान्तरान् ब्राह्मण्ये गुणान् ब्रुवति । समुदायेषु च वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते ; तद्यथा—पूर्वे पञ्चालाः, उत्तराः कुरव इति । एवमयं समुदाये ब्राह्मणशब्दो वृत्तोऽवयवेऽपि वर्तते गुणे जातौ च । गुणे तावत्—अब्राह्मणोऽयं यस्तिष्ठन् मूत्रयतीति, अब्राह्मणोऽयं गच्छन् भक्षयतीति । अपि च, कालं कल्माषं माषराशिवर्णमापण आसीनं दृष्ट्वाऽध्यवस्यति—नायं ब्राह्मणः ; अब्राह्मणोऽयमिति निर्ज्ञातं तस्य भवति ; गुणकृता चार्थस्य निवृत्तिः । अथ जातौ—जातिहीने संदेहाद्दुरुपदेशाद्वाऽन्यो ब्राह्मणशब्दः प्रवर्तते । संदेहात्तावत्—गौरमयं शुच्याचारं पिङ्गलं कपिलकेशं दृष्ट्वाऽध्यवस्यति—ब्राह्मणोऽयमिति ; ततः पश्चादुपलभते—नायं ब्राह्मणः ; अब्राह्मणोऽयमिति निर्ज्ञातं तस्य भवति । अत्र संदेहाच्च ब्राह्मणशब्दो वर्तते ; जातिकृता चार्थस्य निवृत्तिः । अथ दुरुपदेशात्—दुरुपदिष्टमस्य भवति—अमुष्मिन्नवकाशे ब्राह्मणमानयेति । स तत्र गत्वा यं पश्यति तमध्यवस्यति—ब्राह्मणोऽयमिति । ततः पश्चादुपलभते—नायं ब्राह्मणः, अब्राह्मणोऽयमिति । तत्र दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते ; जातिकृता चार्थस्य निवृत्तिः । ननु च, नञ्व्यवच्छेदाय ब्राह्मणादिशब्दप्रयोगे समासस्य पूर्वपदप्रधानता प्राप्नोति ; नैवम्, अव्ययसंज्ञाप्रसङ्गात् ; अव्ययं ह्यस्य पूर्वपदम् । नैष दोषः ; पाटेनाव्ययसंज्ञा क्रियते । न च नञ्समासस्तत्र पठ्यते । मा भूदव्ययेषु पाठः । तथाऽप्यभिधेयवल्लिङ्गवचनानि भवन्ति ; यश्चेहार्थोऽभिधीयते न तस्य लिङ्गसङ्ख्याभ्यां योगोऽस्ति । नेदं वाचनिकम्—अलिङ्गता, असङ्ख्यता वा । किं तर्हि ? स्वाभाविकमेतत् । तत्र किमस्माभिश्शक्यं वक्तुं-यन्नञः प्राक् समासाल्लिङ्गसङ्ख्याभ्यां योगो नास्ति, समासे च भवति । यदि वा, गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्ति । यदसौ द्रव्यं श्रितो भवति गुणः समासो वा, तस्य यल्लिङ्गं वचनं च तत् गुणस्यैव समासस्यापि भवति । उच्यते ; इह त्रयी गतिः—कदाचिन्नञर्थेनोत्तरपदार्थो विशेष्यते, कदाचिन्नञर्थ उत्तरपदार्थेन, कदाचिन्नञर्थोत्तरपदार्थाभ्यामन्यः पदार्थ इति । तत्र यदा नञर्थोत्तरपदार्थाभ्यामन्यपदार्थो विशेष्यते तदा 'समानाधिकरणानां बहुव्रीहिः' । नञर्थश्च विशेष्यो भवतीति षट् समासार्थभेदा जायन्ते—अत्यन्ताभावः, अनत्यन्ताभावः, अन्यतराभावः, तादात्म्याभावः, संबन्धाभावः, प्रध्वंसाभावश्चेति । यथा—अरूपो वायुः, अनुदरा कन्या, अकिंचनः पुमान्, अपिशाचः कुड्यः, अघटं भूतलं, अनङ्गः कामः, इति । यदा तूत्तरपदार्थेन नञर्थो विशेष्यते, तदा पूर्वपदार्थप्रधानस्तत्पुरुषः ; नञर्थोपाधेश्च षट् समासार्थभेदा जायन्ते—प्रागभावः, सामर्थ्याभावः, आवश्यकताभावः, इतरेतराभावः, सत्ताभावः, भावाभावः, इति ; यथा—अनुत्पन्नो घटः, अप्रधृष्यस्सुभटः, अभूषितः कान्तः, अवर्षा हेमन्तः, असत् शशविषाणम्, अनुद्भिन्नः प्रवालः, इति । यदा तु नञर्थेनोत्तरपदार्थो विशेष्यते, तदा उत्तरपदार्थप्रधानस्तत्पुरुषः । पदार्थस्य च नञर्थोपाधेः षट् समासभेदा जायन्ते । यथा—तदभावः, तदन्यः, तत्सदृशः, तद्विरुद्धः, तदपकृष्टः, तदुत्कृष्टः, इति । यथा—अनन्यः, अनग्निः, अब्राह्मणः, असितः, अमनुष्यः, अमानुषः, इति । ननु च, अन्यपदार्थतत्पुरुषयोरन्यत्रापि

नञ्समासो दृश्यते ; यथा—मक्षिकाणामभावः अमक्षिकमिति । नायं नञ्समासः ; किं तर्हि ? 'अव्ययं विभक्ति' इत्यादिनाऽव्ययमभावार्थे समस्यते ; अव्ययीभावश्च समासो भवति ; यथा—निवातं, निशीतं, इति । किं पुनरमी नञ्समासार्था अन्यपदार्थादिषु व्यवतिष्ठन्ते उत संप्लवन्ते ? केचिद्व्यवतिष्ठन्ते प्रध्वंसाभावादयः ; तद्यथा—

भवेदभीष्ममद्रोणं धृतराष्ट्रबलं कथम् । यदि तत्तुल्यकक्ष्योऽत्र भवान् धुर्यो न युज्यते ॥

यथा च—अनुदरा कन्या, अलोमिका एडकेति । केचित्तु संप्लवन्ते प्रागभावादयः ; तद्यथा—

अजन्मा पुरुषस्तावदपुमान् पशुरेव वा । यावल्लीलावतीवक्त्रवीक्षितार्थं न बुध्यते ॥

यथा च—अनेके, अनेकः इति । ननु च, एकशब्दो बह्वर्थः ; तद्यथा—'एकः कोऽपि स कुम्भसंभवमुनिः' इत्युत्कर्षार्थः ; तत्रैके तावदाहुरिति पक्षान्तरार्थः ; एक एवायमावयोः स्वभावः इति तुल्यार्थः । नैकः शयीतेत्यसहायार्थः । एकमेवेदं शब्दब्रह्मेत्यभेदार्थः । एकः, द्वौ, बहव इति संख्यार्थः । तत्कस्येह ग्रहणम् ? संख्यार्थस्य । उत्कर्षादीनां कस्मान्न भवति ? अनभिधानात् ; तद्यथा—अमित्र इत्युक्ते पूर्वपदार्थप्रधानतत्पुरुषे शत्रुरेव प्रतीयते, न त्वसूर्यः । एवं अनेके इत्युक्ते बहव एव प्रतीयन्ते, न पुनरनुत्कर्षादिमन्तः । एतेन तत्पुरुषस्योत्तरपदप्राधान्ये सत्यनेक इत्यपि व्याख्यातम् । कथं पुनरेकस्य प्रतिषेधे बहूनां संप्रत्ययः स्यात् ? प्रसज्यायं क्रियागुणौ ततः पश्चान्निवृत्तिं करोति ; तद्यथा—आसय भोजय शायय अनेकं इति । स्यादेतत्, यत्र क्रियागुणौ प्रसज्येते ; यत्र तु खलु न प्रसज्येते तत्र तु कथम्—अनेकास्तिष्ठन्तीति ? भवत्येवंजातीयकेष्वपि एकस्य प्रतिषेधे बहूनां संप्रत्ययः ; तद्यथा—न न एकं प्रियम्, न न एकं सुखम् इति ॥

प्रकृतिप्रत्ययौ त्रेधा त्रिधोपस्कारभक्तयः । त्रिधैवोपपदप्रातिपदिकानां विभक्तयः ॥

त्रिधोपसर्जनं त्रेधा समास इति कीर्तितः । प्रतिपादकशब्दोऽयमथान्वाख्येय उच्यते ॥

पदमिह त्रिविधं प्रतिपाद्यते त्रिविधमेव हि वाक्यमथ त्रिधा ।
व्यवहृतिः खलु शब्दनिबन्धना यदनयोरुभयोः प्रतितिष्ठति ॥

इति महाराजाधिराज श्रीभोजदेवविरचिते शृङ्गारप्रकाशे प्रातिपदिकादिप्रकाशो नाम द्वितीयः प्रकाशः ॥

तृतीयः प्रकृत्यादिशब्दप्रकाशः

तत्र पद्यतेऽनेनार्थ इति पदम् । तत्त्रिधा—क्रियारूपं, कारकरूपं, उपस्काररूपं च । तेषु साध्यार्थाभिधायि क्रियारूपं, साधनार्थाभिधायि कारकरूपं, साध्यसाधनयोर्भूषणादिभूतमुपस्काररूपम् । तेषां प्रत्येकं षड्भेदत्वात्पदस्याष्टादश भेदा भवन्ति । तेषु भावपदं, कर्तृपदं, कर्मपदं, भावकर्मपदं, भावकर्तृपदं, कर्मकर्तृपदं चेति क्रियारूपपदभेदाः । तेषु भावपदं यथा—पच्यते, अपाचि, पक्ष्यते देवदत्तेन. आस्यते, आसि, आसिष्यते भवता. भिद्यते, अभेदि, भेत्स्यते कुसूलेन, श्रायते, अश्रायि, श्रायिष्यते यवाग्वा. एवं श्रायिषीष्ट, शश्रे, आश्रायिष्यतौदनेन । घानिषीष्ट, जघ्ने, अघानिष्यत हस्तिना. ग्राहिषीष्ट, जगृहे, अग्राहिष्यत ग्राहेण. दर्शिषीष्ट, ददृशे, अदर्शिष्यत प्रेयसेति । कर्मपदं यथा—पच्यते ओदनस्सूदेन, आस्यते मासो भृतकेन, गम्यते ग्रामः पान्थेन, सुप्यते क्रोशश्शिशुना, अकारि कटः कुशलेन, अरोधि गौर्गोपालकेन, अदोहि धेनुर्वल्लवेन, अतारि पृथिवी राज्ञा, अन्ववातत कितवः कर्मणा, अनुबभूवे कम्बलः करेण, पक्ष्यते यवागूर्भिषजा, अलाभ्सिष्ट भिक्षा तापसेन । एवं करिष्यते कारिता कारिषीष्ट कटः, घानिष्यते घानिता अघानिषीष्ट शत्रुः, ग्राहिष्यते ग्राहिता ग्राहिषीष्ट ग्रन्थः, दर्शिष्यते दर्शिता दर्शिषीष्ट प्रेयानिति । कर्तृपदं यथा—पचति चैत्रः, आस्ते मैत्रः, तपति सुवर्णं सुवर्णकारः, तप्यते तपस्तापसः, सृजति मालां मालिकः, सृजते धर्मं धार्मिकः, उदसर्जि स्वं वदान्यः, उदपादि सत्यं भूपः, पारिपारयन्ते वृक्षं कर्णकाः, शोषयते व्रीहीनातपः, संयुज्यते गृहमेधी भार्यया, पच्यते सलोहितं फलमुदुम्बरः, तथा अदीपि अदीपिष्ट वह्निः, अजनि अजनिष्ट धूमः, अबोधि अबुद्ध प्रसुप्तः, अपूरिष्ट कामः, अतायि अतायिष्ट धर्मः, आप्यायि आप्यायिष्ट लोकः, इति । भावकर्मपदं यथा—इच्छामि भुञ्जीत भवान्, इच्छामि भुङ्क्तं भवान्, कामये यत् स भुञ्जीत, प्रार्थये यदि स भुञ्जीत, संभावयामि भुञ्जीत भवान्, समर्थयामि भोक्ष्यते भवान्, श्रद्दधे नाभुक्त भवान्, अवकल्पयामि नाभोक्ष्यते भवान्, न श्रद्दधे ननु भवान् वृषलं याजयेत्, नावकल्पयामि तत्रभवान् वृषलं याजयिष्यति, न मर्षयामि तत्रभवान् वृषलमयाजिष्यत्, विगर्हे अपि तत्रभवान् वृषलं याजयति, स्मरसि देवदत्त काश्मीरेषु वत्स्याम, अभिजानासि कलिङ्गेषु यदवसाम, अभिजानासि कलिङ्गेषु शश्वदवसाम, स्मरसि काश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे, अभिजानासि कलिङ्गेष्ववसाम तत्रौदनमभुञ्ज्महि, स्मरसि यत् काश्मीरेषु वत्स्याम यत्तत्रौदनं भोक्ष्यामहे, अभिजानासि यत्कलिङ्गेष्ववसाम यत्तत्रौदनमभुञ्ज्महि, एहि मन्ये रथेन यास्यसि जाने सुप्तो विहायसा गच्छामि, पश्य मृगो धावति, इह पश्यामः, कर्मणि द्विवचनबहुवचनान्युदाह्रियन्ते इति । भावकर्तृपदं यथा—चोरस्य रुजति, चोरस्यामयति, चोरस्य बाधते, चोरस्य

पीडयति, चोरस्य दहति, चोरस्यातङ्कयति, चोरस्य स्पृशति, चोरस्य शोषयति, चोरस्य मर्दयति, चोरस्य मोटयति, चोरं ज्वरयति, चोरं संतापयति। तथा—भरति पचति पक्ष्यति, भरत्यपाक्षीत्, भवेदपि भवेत्, स्यात् अपि स्यात्, नास्ति रमे, अयूयुजस्त्वमसि, असि त्वमीशिषे, अस्ति गच्छामो वयम्, अस्त्यत्र कांचिद्वां पश्यति, असि भवतु गम्यते, भवतु साधयाम इति। कर्मकर्तृपदं यथा—रज्यति वस्त्रं स्वयमेव, कुथ्यति पादस्स्वयमेव, अवकिरते हस्ती, अवाकीर्ष्ट वा स्वयमेव, ग्रथ्नीते माला, अग्रथिष्ट वा स्वयमेव, चिकीर्षते कटः, अचिकीर्षत वा स्वयमेव, उच्छ्रयते दण्डः, उदशिश्रियत वा स्वयमेव, ब्रूते तथा अवोचत वा स्वयमेव, प्रस्नुते गौः प्रास्नोष्ट वा स्वयमेव, आहते गौः अवधिष्ट वा स्वयमेव, अनुरुद्ध गौस्स्वयमेव, अकृतकटः स्वयमेवेति।

अन्ये पुनरमीषामपि कर्मकर्तृत्वं मन्यन्ते। भिद्यते कुसूलं स्वयमेव, भिद्यते रज्जुस्स्वयमेव, लूयते केदारस्स्वयमेव, पच्यते फलं स्वयमेव, भज्यते काष्ठं स्वयमेव, कुथ्यते पादस्स्वयमेव, अदोहि गौस्स्वयमेव, अरोधि गौस्स्वयमेव, अहावि हविस्स्वयमेव। तथा, भूषयते कन्या स्वयमेव, मण्डयते कन्या स्वयमेव, दोहयते गौस्स्वयमेव, आरोहयते हस्ती स्वयमेव, दधयते राजा स्वयमेव, अभिवादयते गुरुः स्वयमेव, लावयते केदारः स्वयमेव, पाचयते ओदनस्स्वयमेव, भेदयते कुसूलः स्वयमेव, गणयति गणः स्वयमेव, स्मरयति वनगुल्मः स्वयमेव, इति।

आहुश्च 'कर्मवत् कर्मणा तुल्यक्रियः' (पा. ३.१.८७), कर्मवद्भावे यगात्मनेपदचिण् भावाः प्रयोजनं अचः कर्मकर्तरि चिण्वदाहुश्च 'नरुधः' (पा. ३.१.६४), 'नदुहस्नु नमां यक् चिणौ' (पा. ३.१.८९) 'यक् चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानम्' (वा. १८८१) 'भूषाकर्मकिरादीति णिश्रन्थिग्रन्थिब्रूआत्मनेपदाकर्मकाणामुपसंख्यानम्' (वा. १८८२)। तत्तु सम्यक् तथा हि—भिद्यते कुसूलः स्वयमेव, अकारि कटः स्वयमेवेत्यादिषु कर्मण्येव यक् चिणौ स्वयं शब्दात्तु कर्मकर्तृकत्वप्रतीतिः, अरोधि गौः स्वयमेवेति। रुधेरपि कर्मविवक्षायां चिण् भवत्येव, अरोधि गौर्गोपालकेनेति। यदा तु गोरात्मनेपद एव कर्मकर्तृत्वं तदा अरोधि गौरात्मनैवेति भवति। य एवार्थ आत्मनैवेति स एव स्वयमेवेति। अरोधीति चोक्ते नाश्रुते कर्तृवाचिनि पदान्तरे कर्मकर्तृत्वं गम्यते। तस्मादिहापि कर्मण्येव णिच्। भूषयते कन्या स्वयमेवेत्यादिषु तु 'णेरणौ यत्कर्मणौ चेत् स कर्ता नाध्याने' (पा. १.३.६७) इति फलवति कर्तर्येवात्मनेपदम्। कुतस्त्या तर्ह्येतेषु कर्मकर्तृताप्रसिद्धिः। श्रूयतां कर्मपदेषु तावत्,

क्रियमाणं तु यत्कर्म स्वयमेव प्रसिध्यति।
सुकरं स्वैर्गुणैः कर्तुः कर्मकर्तेति तं विदुः॥

कर्तृपदेषु भूतपूर्वकत्वात् तद्वदुपचार इति। तथाहि, कन्यादयो लावण्यातिशयादिभिः आत्मभूषायै प्रसाधनादीन् प्रयुञ्जते च। माघादयो महाकवयः,

"अकुञ्चितप्रेमनिरूपितक्रमं करेणुरारोहयते निषादिनम् ।
ससंततं दर्शयते गतस्मयः कृताधिपत्यामिव साधुबन्धुताम् ॥"

इति फलमनयोः सुखासिकालोकरञ्जनं च । अन्यथैको हास्तिपकैः पीड्येत, द्वितीयो दुर्दर्श इति नाभिगम्येत अचेतनेष्वपि, क्रियाफलविवक्षायां तु दृश्यते–परिवारयन्ते वृक्षं कण्टकाः, शोषयते व्रीहीनातप इति । एतेन करणेन तुल्यक्रियः कर्ता कर्मवद्भवतीत्यपि न वक्तव्यं भवति । परिवारयन्ति कण्टकैर्वृक्षं मनुष्याः, परिवारयन्ते कण्टकाः स्वयमेवेति । तथा दुहिपच्योः सकर्मकयोः कर्ता बहुलं कर्मवद्भवतीति न वक्तव्यम् । दुग्धे गौः पयः स्वयमेव ; पयो मुञ्चतीति गम्यते । तस्मादुदुम्बरस्सलोहितं फलं पच्यते इति कर्मतैव क्रियाविशेषणविवक्षिता । उदुम्बर-शब्दोऽत्र फलवृत्तिः, उदुम्बरं तत् कालेन पच्यते सलोहितगुणं यथा भवति लोहितेन पाकेन संबध्यते इति यावत् ; कर्तृत्वविवक्षायां च पचत्यात्मानमिति । तथा युजेः ज्यत् कर्तरि च वक्तव्यम् । मासं युज्यते ब्रह्मचारीति । कर्तृत्वविवक्षायां दैवादिकत्वम् न सेत्स्यति । कर्मण्यविवक्षायां तु कर्मत्वं, यथा कर्तृत्वं तु स्वयं शब्देन गम्यते । इत्यलमतिप्रसङ्गेन ।

कृदन्तमपि खलु क्रियारूपं विद्यते तत्र भावो यथा—इह तैः यातं, आसितं, इह तैर्भुक्तं, इह तैः पीतं, कृतं भवता, प्रसुप्तं भवता, सुकृतं भवता, सुसिक्तं भवता, भूतं भवता, भविष्यमाणं भवता, हूयमानं भवता, भवितव्यं भवता, भवनीयं भवता, भव्यं भवता, अवश्यं भाव्यं भवता, आदर्शितं भवं भवता, ईषदाढ्यं दुराढ्यं स्वाढ्यं भवं भवता, ईषदुत्थानं भवता, सुस्नावं भवता इति । कर्म यथा—प्रकृतः कटो भवता, कृतः क्रियमाणः करिष्यमाणो भवता, खलु कटः कर्तव्यः, कृत्यः करणीयः कार्यः ईषत्कार्यः ईषत्करः क्रियार्थो भवता, ईषदाढ्यंकरः स्वाढ्यंकरः ईषत्पानस्सोमो भवता, सुपानः दुष्पानः दुश्शासनोऽरिभिर्भवान्, सुयोधनः दुर्योधनः दुर्मर्षणः दुर्धर्षणः ईषल्लभ्यो जनैर्भवान्, सुलभः दुर्दर्श इति । कर्ता यथा—कृतवान् कटं, उपेयिवान् ग्रामं, विद्वान् व्याकरणं, अधीयन् पारायणं, धारयन्नुपनिषदं, द्विषन्नितिहासं, कुर्वन् कटं, कटं कुर्वाणः, विदिता जनापवादान्, प्रजागरितापररात्रान्, कन्यामलंकरिष्णुः, दिवमुत्पतिष्णुः, ग्राममकामुकः, योषामाभिलाषुकः, ओदनं बुभुक्षुः, श्रियमाशंसुः, ददिर्गाः पविस्सोऽयम, अवन्दायी, शतंदायी, ग्रामंगामी, ग्रामतां गामी, कटं कारको व्रजति, ओदनं पाचको व्रजतीति । भावकर्म यथा—क्रियाः क्रियन्ते, विधयो विधीयन्ते, उष्ट्रासिका आस्यन्ते, हतशायिकाश्शय्यन्ते, अर्हति भवानिक्षुभक्षिकां, इक्षुभक्षिकां मे धारयसि, व्यावहासीं विदधते, सांकोटिनं कुर्वन्ति, उत्सवमामन्त्रये, समाजमामन्त्रये, आमन्त्रणमामन्त्रये, मन्त्रणं निमन्त्रये, कां त्वं कारिमकार्षीः, कां कारिकां कां कृतिकां क्रियां कां कृत्यां, किं कृतं सर्वां कारिमकार्षं, सर्वां कारिकां सर्वां कृतिं सर्वां क्रियां सर्वां कृत्यां सर्वं कृतमिति ।

भावकर्ता यथा—ब्रह्मभूयं वर्तते, ब्रह्महत्या न भवति, पाको वर्तते, त्यागो भवति, सांराविणं वर्तते, आखूत्थो भवति, अन्वेषणा वर्तते, व्यावभाषी भवति, समजः पशूनां, उदजः पशूनां, गवामुपसरः, क्रतूनां पर्यायः, भवतः आसिका, भवतः शायिका, अभ्यूषखादिका वर्तते, इक्षुभक्षिका उदपादि, शिरोर्तिर्वर्तते, प्रवाहिका न भवति, शिरोरोगश्शिरो बाधते, अरोचको न भवति, निग्रहस्ते, अवग्रहस्ते, अजननिस्ते, अभवन्तिस्ते वृषल भूयादिति। कर्मकर्ता यथा—स्वयं धौतौ पादौ, स्वयं विलीनमाज्यं, अकृष्टपच्याश्शालयः, पचेलिमाः माषाः, भिदेलिमानि काष्ठानि, भिदुराभूः, भिदुराराज्ञः, भङ्गुरं काष्ठं, आरोहयमाणो हस्ती, लूयमानः केदारः, ब्रुवाणा कथा, भूषमाणा कन्या, ग्रथ्नाना स्रक्, श्रन्थनाना स्रक्, चिकीर्षमाणः कटः, अवकिरमाणो हस्ती, नममाणो दण्डः, उच्छ्रायमाणो दण्डः, दुहाना धेनुः, प्रस्नुवाना धेनुः, रुन्धाना गौः, आघ्नाना गौः, रज्यद्वस्त्रं, कुष्यन् पाद इति।

अन्ये पुनरमीषामपि कर्मकर्तृत्वं मन्यन्ते। प्रकृतः कटं भवान् प्रकृतः कटो भवता, यातः पन्थानं भवान् यातः पन्थानं भवता, आसीनो मासं भवान् आसीनो मासो भवता, भुङ्क्ते ओदनं भवान् भुङ्क्ते ओदनो भवता, अधिशयीत खट्वां भवान् अधिशयिता खट्वा भवता, आरूढो वृक्षं भवान् आरूढो वृक्षो भवता, आश्लिष्टः प्रियां भवान् आश्लिष्टा प्रिया भवता, उपस्थितस्सूर्यं भवान् उपस्थितस्सूर्यो भवता, उपासितोऽग्निं भवान् उपासितोऽग्निर्भवता, अनूषितो गुरुं भवान् अनूषितो गुरुर्भवता, अनुजातो माणवको माणविकां अनुजाता माणविका माणविकेन, अनुजीर्णो वृषलं देवदत्तः अनुजीर्णा वृषली देवदत्तेन इति तन्न सम्यग्वाक्यभेदात्। ननु च भवान् आक्षेपलब्धः कर्ता न तिङ् वाच्यः ; तत्कथमुच्यते कर्तृपदं, भावकर्तृपदं कर्मकर्तृपदंचेति। तथा हि, अवयवव्यतिरेकाभ्यां शब्दस्याभिधानशक्तिः कल्प्येत। भावनाक्षेपेण च प्रतीयते ; कर्तरि न तत्र प्रत्ययस्यान्वयव्यतिरेकौ कल्प्येते, यथा जात्याक्षेपेण व्यक्तेः प्रतीतौ न तां प्रति शब्दस्य वाचकशक्तिकल्पनोपपत्तिमती। कथं पुनः कर्तुरनभिधाने प्रत्ययस्य वचनपुरुषभेदो युज्येत ? यथैव नात्मनेपदेषु, जात्यभिधानपक्षे जातेरलिङ्गसङ्ख्याया अपि तदाधारव्यक्त्याश्रयाणि लिङ्गवचनानि प्रवर्तन्ते तथैव भावनायाः अभेदेऽपि तथा कर्त्राश्रयो वचनपुरुषभेदः प्रपत्स्यतीति।

न च कर्तरि लकारः स्मर्यते इति वाच्यम् ; यतः 'कर्तरि कृत्' (पा. ३.४.६७) 'लः कर्मणि च भावेऽचाकर्मकेभ्यः' (पा. ३.४.६९) 'वर्तमाने लट्' (पा. ३.१.१२३)। लस्य तिबादयः। 'तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः', 'तान्येकवचनद्विवचनबहुवचनान्येकशः', 'युष्मदि .... मध्यमः', 'अस्मद्युत्तमः', 'शेषे प्रथमः' (पा. १.४.१०१, १०२, १०६, १०७, १०८) 'भावकर्मणोरात्मनेपदम्', 'शेषात्कर्तरि परस्मैपदम्' (पा. १.३.१३, ७८) इत्यादिवाक्यानां 'द्व्येकयोर्द्विवचनैकवचने', 'बहुषु बहुवचनम्' (पा. १.४.२२, २१) इति संख्याविधानेन

सद्वैकार्थविवक्षयात्वेकवाक्यता व्याख्याता । एको हि पचतीत्यादिशब्दस्त्रैव्याक्रियते । तत्रैष वाक्यार्थो भवति । कर्तुरेकवचनत्वे एकवचनं क्तिपित्यादि, कर्तृवचनं तिबित्यादि, कर्तुर्बहुवचनत्वे बहुवचनं झीत्यादि ; एवं च भावनाक्षिप्तकर्तृसंख्यायामेव लकारः स्मर्यते, न कर्तरि । उच्यते ; यदि भावनाक्षिप्तकर्तृसंख्या लकारेणोच्यते, देवदत्तेनास्यते इति भावाभिधायिनोऽपि कर्तृसंख्यायामेवाभिधानं प्राप्नोति ; उभयत्रापिकर्तृसद्भावात् । येनैव हि निमित्तेन पचतीत्यादौ कर्मसंख्याभिधेयमासादयति तेनैव प्रयोगान्तरेऽप्यासादयेत् । कथं च कर्तर्यभिधीयमाने तद्विशिष्टसंख्याभिधानं युक्तम् ।

अथ संख्यामात्रमभिधीयते न विशेषः ; तर्हि पुरुषादिभेदप्रतीतेरनुपपत्तिः तद्विशिष्टाभिधानं च तदभिधानपुरस्सरमेव न्याय्यं ; नागृहीतविशेषणे विशेष्यबुद्धिर्वर्तत इति न्यायात् । न च शब्देनासंस्पृश्यमानोऽपि कर्ता सन्निधिमात्रेण संख्यां विशेषयितुमुत्सहते संख्याया धर्मरूपत्वाद्धर्मिणा कर्तुरवच्छेदकत्वेन संस्पर्शो युज्यते । करणादीनामपि सान्निध्यधर्मित्वात् तथात्वोपपत्तेः । किञ्च लकारेणाभिहितयोर्भावनासंख्ययोरुत्तरः कालः भावनाक्षिप्तः कर्ता लभ्यते । ततोऽस्य पूर्वभावात् भावनासमकालमभिहितया संख्यया अविशेषात् सर्वकारकाणामवच्छेदः प्राप्नोति । पश्चाच्च कर्ताक्षिप्तः कथं भावनासमकालमभिहितां संख्यामात्मनि निरुन्ध्यात् । अथ संख्यावद्भावनाप्रतीतिसमकालमेव कर्ता प्रतीयते ; न तर्ह्याक्षेपलभ्यः । अपि तु संख्यावल्लकारेणाभिधीयत एवेति । किञ्च देवदत्तादिपदेन पचतीत्यादे स्सामानाधिकरण्यदर्शनात् । संख्यावान् कर्तैव लकारेणाभिधीयते । यदि पुनः कर्तुस्संख्यानमेकत्वादिकं लकारो ब्रूयात् तदा देवदत्तस्य पचतीत्येवं प्रयोगः स्यात् यथा देवदत्तस्यैकत्वमिति । अथ न संख्यानमुच्यते लकारेण, किन्तु संख्येय एव देवदत्तादिरभिधीयते । देवदत्तः पचतीत्येकत्वसंख्यावच्छिन्नः पाकं करोतीत्यर्थः । एवं च, संख्येयेऽभिधीयमाने कर्तैवाभिहितो भवति ।

न च कर्त्रभिधानेऽपि शक्तेः कारकत्वात् समानाधिकरणानुपपत्तिरिति वाच्यम् । शक्तिर्हि लकारेणाप्यभिधीयमाना गुणद्रव्यपरतन्त्रैवाभिधीयते । यथा—शुक्लः पटः, शुक्ला शाटीति । अपिच भवन्तोऽपि कर्मलकारवाच्यत्वं मन्यन्ते । तदनुपपन्नम् । यथैव द्विभावनाक्षेपलभ्यत्वात् कर्तुरवाच्यत्वं तथा कर्मणोऽपि भवितुमर्हति । अथानाक्षेपात्कर्मणो वाच्यत्वम् । एवं च सति कर्तुरपि तथात्वोपपत्तिः । न हि क्रियाक्षेपे कर्तृकर्मणोर्विशेषमुपलभामहे । यथैव हि कर्त्रा विना क्रिया न प्रतीयते एवं कर्मणाऽपि । न सर्वत्र कर्मसंबन्ध इति चेत्, तत्रास्ति । तत्र कथम् । अथ कर्मणोऽपि क्रियाक्षेपलभ्यत्वात् तद्गताऽपि संख्यैवोच्यते लकारेण । कथमिदानीं कर्तृकर्मानभिधायको लकारः क्वचित् कर्तृगतां संख्यामभिधत्ते ; क्वचित्कर्मगतामिति विशेषो भवति । न च विशेषणं नास्तीति वाच्यम् । यतः पचतीत्यत्र उल्लसितेन कर्तृरूपत्वेन पच्यत इत्यत्र रूपगृहीतकर्मनिष्ठत्वेन प्रतीतिरुत्पद्यते । किञ्च लकारेण कर्तृकर्मणोरनभिधाने देवदत्तः पचतीत्यनभिहिते

कर्तरि तृतीया । ओदनः पच्यत इति कर्मणि द्वितीया प्राप्नोति । अथैवमुच्यते कर्तृकर्मसंख्ययोरभिहितत्वान्न भविष्यतो विभक्ती कृदन्तेषु तर्ह्यनिष्टप्राप्तिः संख्यायाः कृत्यभिधानात् । तत्र पक्व ओदन इति द्वितीया, पक्ता देवदत्त इति तृतीया प्राप्नोति ।

ननु चोभयं विभक्त्यर्थः संख्याकर्मादयश्च । तत्र यथा आख्यातेषु सङ्ख्याया अभिहितत्वात् कर्तृकर्मणोर्द्वितीयातृतीये न भवतः, तथा कृदन्तेषु कारकस्याभिहितत्वात् सङ्ख्या सङ्ख्याया द्वितीयादयो न भविष्यन्ति । स्यादेतत् । यद्यभिहिते प्रतिषेधस्स्यात्, अनभिहिते त्वयं विधिः सामर्थ्यैकवाक्यताभ्यां पर्युदासाश्रयणात् । तत्र तिङन्तेषु संख्याभिधानेऽप्यनभिहितत्वात् सङ्ख्यायाः कारकविभक्तयः प्राप्नुवन्ति । अपिच देवदत्तः पचन्, देवदत्तः पचमानः इति शतृशानचोः कर्तरि च सङ्ख्याया अप्यनभिधानात् तृतीया न प्राप्नोति । अथ शतृशानज्यं कर्तुरनभिधानमाश्रियते तिङः किमपराद्धम्? तस्याऽपि लादेशत्वाच्छतृशानचोः कृत्वात्कर्तरिकृदिति (पा. ३.४.६७) वचनात् कर्तुरभिधानादिति चेत् कर्मणः कथमोदनं पच्यमान इति । अथ स्थानिनो लकारस्य कर्मणि विधानात् तदादेशत्वाच्च शानचः कर्माभिधानं भविष्यति । तथाहि । 'लः कर्मणि च भावे चाकर्मकेभ्यः' (३.४.६९) इति 'भावकर्मणोरात्मनेपदं' (१.३.१३) इतिवा कर्मणि लकारो विधीयते । एवं सति यत्रापि तिङोऽपि विधीयते तत्रापि कर्मणि प्राप्नोति । ततश्च कर्तर्यपि केनापवार्यते तत्राऽपि कर्तरि कृत् । 'शेषात् कर्तरि परस्मैपदं' (१.३.७८) इति कर्तरि लकारोऽपि विधीयते । तदुक्तम्—

आत्मनेपदरूपेण सर्वत्रैव हि कर्मणि । लकारस्स्यात् तथैवाऽयं कर्तर्यपि भवेन्नकिम् ॥

नच कर्तरि या कर्मणि या सङ्ख्या तत्र तिङो भवन्तीत्याश्रयितुमुचितम् । न हि 'लः कर्मणि च भावे चाकर्मकेभ्यः' (३.४.६९) इत्यस्य 'द्व्येकयोर्द्विवचनैकवचने', 'बहुषु बहुवचनं' (१.४.२२, २१) इत्यनेनैकवाक्यत्वं विद्यते, भावेऽपि लकारस्य विधानात् । न च भावस्य साध्यत्वेन संख्यायोगोऽस्ति । नापि स्वौजसित्यादेर्विभक्तिविधानस्य संख्याविधानेन सहैकवाक्यत्वं असंख्येभ्योऽप्यव्ययेभ्यस्सुबुत्पत्तेः । आह च महावार्तिककारः—सुप्तिङोरविशेषविधानात् दृष्टविप्रयोगत्वाच्च नियमार्थं वचनम् ।

महाभाष्यकारोऽप्याह—सुप्तिङोऽविशेषेणोत्पद्यन्ते ; उत्पन्नानां नियम इति । तस्मान्न कर्तृकर्मसंख्यायां लकारविधिः, अपितु कर्तृकर्मणोरेवेत्यभ्युपगन्तव्यम् । कथं पुनस्सर्वकारकसन्निधाने लकारेण कर्तृकर्मणोरेवाभिधानम् । उच्यते, तयोरेव प्राधान्यात् तत्र कर्तुः प्राधान्यं करणादीनां तदधीनवृत्तित्वात् कर्मणस्तु तदर्थत्वमेव तत्प्रवृत्तेः । यद्वा कर्तृकर्मव्यापाराभिधायिनो धातोः पर उपजायमानो लकारः कर्तृकर्मणी एवाभिदधाति । अथ कथं कर्तृकर्मवत् कालादिकमपि नाभिदधाति विषयभेदात् । तथाहि ; षडर्थाः तिङन्तेन प्रतीयन्ते—क्रिया, कालः,

उपग्रहः, कारकं, पुरुषः, संख्येति । तेषु क्रियाकालात्मनेपदनिमित्तानि प्रकृतिरभिधत्ते ; प्रत्ययः साधनं संख्यां पुरुषं च । तत्र प्रकृत्यभिधेयेषु क्रिया प्रधानं, कालोपग्रहौ विशेषणम् । प्रत्ययाभिधेयेषु साधनं प्रधानं, संख्यापुरुषौ विशेषणम् । कथं पुनः संख्या कारकस्यैव विशेषणं, न क्रियाकालोपग्रहपुरुषाणाम् ।

उच्यते क्रियायास्साध्यत्वेनापरिनिष्पन्नत्वात् कालस्य च क्रियातो व्यतिरेकात् व्यतिरेकेऽपि वा क्रियावच्छेदकत्वेनोपसर्जनत्वात् । उपग्रहस्यापि गन्धनादेः क्रियाकर्मत्वेनापरिनिष्ठितत्वे अनिदन्तानिर्देश्यत्वादसंबन्धस्संख्यायाः पुरुषस्तु प्रथमादिसाधनमेव, नान्यः कश्चित् । अतः कारकेणैव संख्याभिसंबध्यते, न क्रियादिभिरिति । तदेवं तिङ्वाच्यत्वेन कर्तुः कर्तृपदं, भावकर्तृपदं, कर्मकर्तृपदं चेति यदुक्तं, तदनुपपन्नमेवेति । कर्तृपदं, कर्मपदं, करणपदं, संप्रदानपदं, अपादानपदं, अधिकरणपदञ्चेति कारकरूपभेदाः । तत्र कर्त्रादयः कारकप्रस्तावेऽग्रतः प्रपञ्चयिष्यन्ते ; इह तु संबन्धाविच्छेदाय लेशत उदाहियन्ते । तेषां कर्ता त्रिधा—स्वतन्त्रोऽस्वतन्त्रः कर्मकर्ताचेति । तत्र क्रियायां स्वेच्छया यः करणादिकारकाणि प्रयुङ्क्ते नतु तैः प्रयुज्यते सः स्वतन्त्रः । स द्विधा—स्वविभक्तिवाच्यः, परविभक्तिवाच्यश्चेति । तयोस्स्वविभक्तिवाच्यो यथा—

मानभङ्गपटुना सुरतेच्छां तन्वता प्रथयता दृशि रागम् ।
लेभिरे सपदि भावयतान्तर्योषितः प्रणयिनेव मदेन ॥

परविभक्तिवाच्यो यथा—

चारुता वपुरभूषयदासां तामनूननवयौवनयोगः ।
तं पुनर्मकरकेतनलक्ष्मीस्तां मदो दयितसङ्गमभूषः ॥

योऽन्यप्रयुक्तः क्रियासु व्याप्रियते सोऽस्वतन्त्रः । सोऽपि द्विधा—उद्भूतव्यापारोऽनुद्भूतव्यापारश्च । तयोरुद्भूतव्यापारो यथा—

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां जनाधिपः ।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥

अनुद्भूतव्यापारो यथा—

चित्तनिर्वृति विधायि विविक्तं मन्मथो मधुमदश्शशिभासः ।
सङ्गतं च दयितैः स्म नयन्ति प्रेम कामपि भुवं प्रमदानाम् ॥

कर्मकर्ताऽपि द्विधैव । उद्रिक्तकर्मांशः, अनुद्रिक्तकर्मांशश्च । तयोरुद्रिक्तकर्मांशो यथा—

तत्तदुच्छ्वसितपीतमैन्दवं सोढुमक्षममिव प्रभारसम् ।
मुक्तषट्पदविरावमञ्जसा भिद्यते कुमुदमानिबन्धनात् ॥

अनुद्रिक्तकर्मांशो यथा—

उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ॥

कर्तुः क्रिययाऽनन्यार्थया यदाप्यते तत्कर्म । तदपि त्रिधा—निर्वर्त्यं, विकार्यं, प्राप्यञ्च । तेषु निर्वर्त्यं द्विधा— "यदसज्जायते सद्वा जन्मना तत्प्रकाश्यते ॥" तयोः प्रथमं यथा–

अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः । उत्पादयति लोकस्य प्रीतिं मलयमारुतः ॥

द्वितीयं यथा—

सन्तमेव चिरमप्रकृतत्वादप्रकाशितमदिद्युतदङ्के ।
विभ्रमो मधुमदः प्रमदानां धातुलीनमुपसर्ग इवार्थम् ॥

विकार्यमपि द्विधा । प्रकृत्युच्छेदात् गुणान्तराधानाच्च । तत्र प्रथमं यथा—

क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत् स वह्निः भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥

द्वितीयं यथा—

तां पुलोमतनयालकोचितैः पारिजातकुसुमैः प्रसाधयन् ।
नन्दने चिरमयुग्मलोचन स्सस्पृहं सुरवधूभिरैक्ष्यत ॥

प्राप्यमपि द्विधैव । कथितमकथितञ्च । तत्र यत्कृत्यक्तखलर्थादिभिराभिधीयते तत्कथितं, यत्तैर्नाभिधीयते तदकथितं । तयोराद्यं यथा—

निपीयमानस्तबका शिलीमुखैरशोकयष्टिश्चलबालपल्लवा ।
विडम्बयन्ती ददृशे वधूजनैरमन्ददष्टोष्ठकरावधूननम् ॥

द्वितीयं यथा—

तामस्मदर्थे युष्माभिर्याचितव्यो हिमाचलः ।
विक्रियायै न कल्पन्ते सम्बन्धास्सदनुष्ठिताः ॥

क्रियासिद्धौ साधकतमत्वेन यदव्यवहितं व्याप्रियते तत्करणम्। तदपि त्रिधा—बाह्य-माभ्यन्तरं बाह्याभ्यन्तरञ्च। तेषु बाह्यं द्विधा—व्यवधायकमव्यवधायकञ्च। तयोराद्यं यथा—

धूपोष्मणा त्याजितमार्द्रभावं केशान्तमन्तःकुसुमं तदीयम्।
पर्यक्षिपत्काचिदुदारबन्धं दूर्वावता पाण्डुमधूकदाम्ना॥

द्वितीयं यथा—

वैदर्भनिर्दिष्टमसौ कुमारः क्लृप्तेन सोपानपथेन मञ्चम्।
शिलाविभङ्गैर्मृगराजशाव स्तुङ्गं नगोत्सङ्गमिवारुरोह॥

आभ्यन्तरमपि द्विधा—कर्तुर्भिन्नमभिन्नञ्च। तयोर्भिन्नं यथा—

शिलाघनै र्नाकसदामुरस्थलैः बृहन्निवेशैश्च वधूपयोधरैः।
तटान्तनीतेन विभिन्नवीचिना रुषेव भेजे कलुषत्वमम्भसा॥

द्वितीयं यथा—

प्रयुक्तसत्कारविशेषमात्मना नमां परं संप्रतिपत्तुमर्हसि।
यतस्सतां सन्नतगात्रि सङ्गतं मनीषिभि स्साप्तपदीनमुच्यते॥

बाह्याभ्यन्तरमपि द्विधा—बहिर्मुखमन्तर्मुखञ्च। तयोराद्यं यथा—

गतया पुनः प्रतिगवाक्षगवं दधती रतेन भृशमुत्सुकताम्।
मुहुरन्तरालभवमस्तगिरे स्सवितुश्च योषिदमिमीत दृशा॥

द्वितीयं यथा—

बिभ्रतौ मधुरतामतिमात्रं रागिभिर्युगपदेव पपाते।
आननैर्मधुरसो विकसद्भि र्नासिकाभिरसितोत्पलगन्धः॥

क्रियाकार्यत्वेनावधीरितं कर्मणा क्रियया वा संयोगः यदनुभवति तत्संप्रदानम्। तत्त्रिधा—ददातिकर्मव्याप्यं, कर्ममात्रव्याप्यं, क्रियाव्याप्यं चेति। तेषु ददातिकर्मव्याप्यं द्विधा—स्वत्वस्याऽनिवृत्तौ निवृत्तौ च। तयोराद्यं यथा—

चुम्बनादलकचूर्णरूषितं शंकरोपि नयनं ललाटजम्।
उच्छ्वसत्कमलगन्धये ददौ पार्वतीवदनगन्धवाहिने॥

द्वितीयं यथा—

दातुं वा प्रभवसि मामन्यस्मै हर्तुमेव वा दासम् ।
नाऽहं पुनस्तथात्वं यथाहि मां शङ्कसे भीरु ॥

क्रियाकर्मव्याप्यं द्विधा—ददात्यर्थविषयं च । तत्र प्रथमं यथा—

श्रीमल्लताभवनमोषधयः प्रदीपा श्शय्या नवानि हरिचन्दनपल्लवानि ।
अस्मिन्नतिश्रमनुदश्च सरोजवातास्स्मर्तुं दिशन्ति न दिवस्सुरसुन्दरीभ्यः ॥

द्वितीयं यथा—

शशंस तस्मै प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम् ।
प्रवेशयामास च भर्तुरेनां भ्रूक्षेपमात्रानुमतप्रवेशाम् ॥

क्रियाव्याप्यमपि द्विधैव । पारिभाषिकमपारिभाषिकञ्च । तयोः प्रथमं यथा—

न स्रजो रुरुचिरे रमणीभ्यश्चन्दनानि विरहे मदिरा वा ।
साधनेष्वभिरतेरुपधत्ते रम्यतां प्रियसमागम एव ॥

द्वितीयं यथा—

इत्थं विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ ।
प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय ॥

तत्र कर्त्रा कर्मणा वा क्रियाजन्यमेव ध्रौव्येण यद्विगाहमवगाहते तदपादानम् । तत्त्रिधा—निर्दिष्टविषयमुपात्तविषयमपेक्षितक्रियञ्च । तेषु निर्दिष्टविषयं यथा— उज्झितं अनुज्झितं च । तयोराद्यं यथा—

स्वेदानुविद्धार्द्रनखक्षताङ्के सन्दष्टभूयिष्ठशिखाकपोले ।
च्युतं न कर्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात ॥

द्वितीयं यथा—

औषसातपभयादपलीनं वासरच्छविविरामपटीयः ।
सन्निपत्य शनकैरिव निम्नादन्धकारमुदवाप समानि ॥

उपात्तविषयमपि द्विधा । हेयमुपादेयञ्च । तयोराद्यं यथा—

करौ धुनाना नवपल्लवाकृती वृथा कृथा मानिनि मापरिश्रमम् ।
उपेयुषी कल्पलताभिशङ्कया कथं नु वित्रस्यति षट्पदावली ॥

द्वितीयं यथा—

अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती ।
पश्चिमाद्यामिनीयामात् प्रसादमिव चेतना ॥

अपेक्षितक्रियमपि द्विधैव । सामान्यापेक्षं विशेषापेक्षं च । तयोराद्यं यथा—

मा पुनस्तमभिसारसरमागस्कारिणं मदविमोहितचेताः ।
योषिदित्यभिललाष न हालां दुस्त्यजः खलु सुखादपि मानः ॥

द्वितीयं यथा—

कुतो भवानध्वनि चित्रकूटात् दृष्टस्त्वया श्रीललितप्रभावः ।
किं तेन मुग्धे मदनोत्सवेऽस्मिन् कामं त्वया वेश्मनि लेखयामि ॥

कर्त्रा कर्मणा व्यवहितं क्रियाधारोऽधिकरणम् । तत्रिधा—वैषयिकं, औपश्लेषिकं नैमित्तिकं च । तेषु वैषयिकं द्विधा । तयोराद्यं यथा—

कदळीप्रकाण्डरुचिरोरु तरौ जघनस्थलीपरिसरे महती ।
रशनाकलापगुणेन वधू र्मकरध्वजद्विरदमाकलयन् ॥

द्वितीयं यथा—

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिः व्यसनं श्रुतेः प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

औपश्लेषिकमपि द्विधा—एकदेशिकमभिव्यापकं च । तयोराद्यं यथा—

स्पर्शभाजि त्रिगदच्छविचारौ कल्पिते मृगदृशां सुरताय ।
सन्नतिं दधति पेतुरजस्रं दृष्टयः प्रियतमे शयने च ॥

द्वितीयं यथा—

रागकान्तनयनेषु नितान्तं विद्रुमारुणकपोलतलेषु ।
सर्वथाऽपि ददृशे वनितानां दर्पणेष्विव मुखेषु मदश्रीः ॥

नैमित्तिकमपि द्विधैव शुद्धं सङ्कीर्णं च । तयोराद्यं यथा—

क....एधूमंधारे अरे अब्भुत्तणमग्गिणो समप्पिहिइ ।

मुहकमळ चुम्बणाळेह धम्मि पासंठिएदि अरे ॥

द्वितीयं यथा—

इहाधीतो पूर्वं धृतधरणिभारः कमठराडपांनाथेनास्माद्गिरिशितशरण्येन पठिताः ।

ततः प्राप्ता दूरीकृततपनतापैर्जलधरैस्सतां दुःखोपघ्नं सततमुपकारोपनिषदः ॥

प्रवृत्तप्रयोजकस्तु निमित्तविशेषो हेतुः कर्ता च भवति । सोऽपि त्रिधा–प्रेरकोऽनुकूलः प्रत्यायकश्च । तत्र प्रेरको द्विधा—व्यवहितोऽव्यवहितश्च । तयोर्व्यवहितो यथा—

सा चूर्णगौरं रघुनन्दनस्य धात्रीकराभ्यां करभोपमोरूः ।

आसञ्जयामास यथाप्रदेशं कण्ठे गुणं मूर्तमिवानुरागम् ॥

अव्यवहितो यथा—

सावशेषपदमुक्तमुपेक्षा स्रस्तमाल्यवसनाभरणेषु ।

गन्तुमुत्थितमकारणतस्स्म द्योतयन्ति मदविभ्रममासाम् ॥

अनुकूलोऽपि द्विधा—सिद्धः साध्यश्च । सिद्धो यथा—

गेहाजिरेषु नवशालिकणावपातगन्धानुभावसुभगेषु कृषीवलानाम् ।

आनन्दयन्ति मुसलोल्लसनावधूतपाणिस्खलद्वलयपद्धतयो वधूट्यः § ॥

साध्यो यथा—

सुण्णम्मि गिरिं गामे वणमहि सविता अभङ्ग वइवेढे ।

गहवइ धूआदं सण मणोहरो मंप सा वेइ ॥

प्रत्यायको द्विधा । अदृष्टप्रयोज्यक्रियो दृष्टप्रयोज्यक्रियश्च । तयोः कंसं घातयति, पुष्पेण चन्द्रं योजयतीत्यादिरदृष्टप्रयोजनक्रियः । स यथा—

शैलैस्सन्धयति स्म वानरहृतैर्वाल्मीकिरम्भोनिधिं ।

व्यासः पार्थशरैस्तथापि न तयोरत्युक्तिरुद्भाव्यते ॥

वागर्थौ च तुलाधृताविव तथाप्यस्मत्प्रबन्धानयं ।

लोको दूषयितुं प्रसारितमुखस्तुभ्यं प्रतिष्ठे नमः ॥

---

§ वधूभ्यः इति पाठभेदः ।

वाराणस्यां रात्रीः विवासयति, माहिष्मत्यां सूर्यमुद्गमयति, इत्यादिर्दृष्टप्रयोज्यक्रियः। स यथा—

विपुलतरनितम्बाभोगरुद्धेरमण्या शयितुमनधिगच्छञ्जीवितेशोऽवकाशम्।
रतिपरिचयनश्यन्नैद्रतन्द्रः कथंचिद्गमयति शयनीये शर्वरीं किं करोतु॥

कथं पुनः कंसं घातयति कथकः, बलिं बन्धयति गाथक इत्यादौ प्रयोजकव्यापारेण णिजुत्पत्तिरुच्यते।

शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान्।
प्रत्यक्षमिव कंसादीन् साधकत्वेन मन्यते॥

तेषां चोत्पत्तिप्रभृत्याविनाशात् समृद्धिमाचक्षाणः परानपि तथैव प्रत्याययति। तथा हि। वक्तारो भवन्ति, गच्छ हन्यते कंसः, किं गतेन हतः कंस इति। एवं रात्रिं विवासयतीत्यादावपि तथा प्रत्यायनमवगन्तव्यम्। अयं च सूत्राणामारम्भपक्षे न्यायः; सूत्रारम्भपक्षे तु आख्यानात् कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकमित्युदाहृतं पुरस्तात्।

अथायं णिजर्थो धात्वर्थत्वेनावाच्छिद्यमानः किं साक्षादवच्छिद्यते? एवं भवितुमर्हति। न ह्यन्यदिहोपलभ्यते तदनुपपन्नम्। क्रियोऽसाध्यत्वेन स्वसाधनापेक्षया परस्परेण सम्बन्धः। अस्तु तर्हि कर्तुर्व्यवधानेनायुक्तं चैतत्। धात्वर्थो हि कर्तृव्यापाररूपः, सोऽनुपलभ्यमानमपि कर्तारमाक्षिप्य तद्द्वारेण प्रत्ययार्थं विशेषयति।

न चैवं सति प्रेरणानर्थक्यं यतो विच्छेदमाशङ्कमानः क्रियायां प्रवृत्तमपि प्रेरयति। यत्राप्यप्रवृत्त एव प्रवर्त्यते तत्रापि योग्यत्वाद्बुद्धिस्थं क्रियासम्बन्धं गृहीत्वा प्रयुङ्क्ते। अबुद्धिनिबन्धनोऽपि क्रियाकर्त्रोस्सम्बन्ध उपपद्यते। तदाप्याख्यानात् कृतस्तदाचष्ट इत्याद्युपसंख्यानेन वा सामान्यम्। कृतत्वाद्धेतुतोह्यविशिष्टमिति बुद्धिनिबन्धनत्वेनैव प्रत्याख्यातः। तदा च बुद्धिसोबुद्धि वासुदेवेन हन्यत इत्येवंभूतबुद्धिविषयं प्रयोजकव्यापारमाश्रित्य पुनर्बौद्ध एव प्रयोजकव्यापारोऽङ्गीकृतः। अथोऽर्थाक्षिप्तकर्तृसङ्गताया धात्वभिहितायाः क्रियायाः प्रत्ययार्थत्वेन प्रेरणादिना सम्बन्ध इति। अत एव प्रवृत्तोऽपि प्रेष्यमाणे लोडादिप्रत्ययोत्पत्तेः कर्तृत्वस्यापायात्। ननु कथमप्रवृत्तबाह्ययोगः कर्तृत्वमुपेयात्। प्रैषसाध्यं च कर्तृत्वं कथं नाम? ततः प्रागेव भवेत्। उच्यते; नेदं बाह्यप्रयोगप्रवृत्त्यधीनं कर्तृत्वमभिधीयते। क्रियायां तु सम्बध्यमानत्वेन विवक्षितायां तत्साध्यता। नान्तरीयकः सामर्थ्यप्रापितसन्निधानः कर्ता स्थित एव प्रयोजकव्यापारेण बाह्यप्रयोगसिद्ध्यर्थमेव विषयीक्रियते। अन्यथा प्रयोजकव्यापारापेक्षकर्तृत्वे प्रयोजकोत्तरकालमेवास्य

कर्तृत्वं भवेदिति न संप्रति कर्तृत्वाभावे तन्निबन्धनो लोडादिरुपपद्यते। तस्मात्पचत्वित्यादिना यः पचति सः पाकं प्रति प्रवर्तयत्विति कथितं भवति। क्रियासामर्थ्यादेनं निर्ज्ञातं कर्तारं प्रैष्यतयाभिधेयभावेन लकारोभिनिविशते । तथाहि; सोऽयं पाकादिधात्वर्थसामर्थ्यादवगतः कर्ता साधनत्वार्थस्य बाह्यप्रयोगसंपत्यर्थं प्रेषणादिव्यापारविषयीकृतः प्रत्ययेनाभिधीयत इत्यामनन्ति ।

भवतु नाम क्रियाप्राप्तिनसन्निधानः कर्ता । सतु नियत एव पुरुषः कथं ज्ञायते ? येनैवमुच्यते यस्त्वं पचसि स पाकं प्रवर्तयेति । अत एव भाष्ये सत्क्रियस्य कर्तुः प्रयोगे णिचमभिधाय द्रव्यमात्रस्य प्रयोगे लोट उत्पत्तिरभिहिता—पृच्छतु मा भवान, अनुयुङ्क्तां मा भवान् इति । उच्यते द्रव्यमात्रमपि प्रेष्यमाणं क्रियासाधनयोग्यमेव प्रेष्यते, न काष्ठकुड्यादि। नन्वेवं णिचो लोटश्च विषयसङ्करः प्राप्नोति, नास्ति सङ्करः; यस्यावगतमसकृत् प्रमाणान्तरेण क्रियाकर्तृत्वमसावेव सम्भावितक्रियो णिज्विषयः । अदृष्टक्रियासामर्थ्यं तु योग्यमेव । द्रव्यमात्रं लोड्विषय इति तेन पचेत्यसमर्थः यस्त्वं पचसि पाकार्हः पाके शक्तः स त्वं प्रवर्तय पाकमिति । एवं च क्रियाकर्तृत्वेन योग्यतया ज्ञायमानस्य प्रयोगे प्रवर्त्यमानत्वात् कर्तुरेवाधिकार इत्युक्तं भवति ।

विद्वच्छूराभिजातकर्तृके राज्ये भवानधिकृत इत्यादिवचनभङ्गिभिरयमेवार्थस्समर्थ्यते । यदि तर्हि न कर्ताधिक्रियते नाऽयं मतिमान् विशिष्टमेव पुरुषमेवंप्रकारेऽधिकारेनुरुन्धीत यमेव कञ्चित्पुरुषमुपाददीत । अथवा एते लोडादिविषयाः प्रैषादिविषयाः । ते कस्य धर्मभूताः, तत्रैव ते वर्णयन्ति प्रयोक्तुः; प्रयोक्ता हि प्रेषणादिभिरभिहितसिद्ध्येऽभिलाषान् पुरुषं प्रवर्तयति; सतु क्वचित्प्रेषयन्, क्वचिदध्येषयन्, क्वचिदामन्त्रयमाण इति शब्दस्यैते व्यापारा इत्यपरे । प्रेषणा हि सर्वविध्यादिसाधारणरूपा । साच शब्दव्यापारः निमन्त्रणादयस्तु प्रमाणादिनिबन्धनास्तद्विशेषाः । तथाहि, इदं निमन्त्रणं, इयमनुज्ञा, अयं प्राप्तकाल इति प्रकरणादेरवगम्यते । अन्यन्मतं प्रयोज्यव्यापारविशेषः; ते चासंविदिताः । सतु पुरुषो लिङादिप्रयोगात् भोजनादिक्रियासु निमन्त्रणाद्यवस्थान्तरमात्मानं मन्यते निमन्त्रितोऽहमध्येषितोऽहमिति ।

अन्येत्वाहुः—विधिरेक एवार्थः प्रत्ययस्य । सच यजेतेत्यादेर्यथारूपोऽवगम्यते तथारूप एव । कटं कुरु, इह करोत्यर्थात्मके विधिवद्धात्वर्थानुयायीति कारकाणामभिसंबन्धः । यतः करोत्यर्थात्मकव्यापारेण कारकाणां विशेष उपजायमान उपलभ्यते कुर्वद्धि कारको भवति । अन्येत्वाहुः—योऽयं पाकादिको विशेष इतरेतरवैलक्षण्येनोपलभ्यमानः प्रतिनियतफलजनकः । यत्रैव फलसाधकत्वात् करणानि प्रवर्तन्ते तस्यैव तु व्यापारात्मकत्वात् क्रियारूपताऽपि संपन्नैवेति । अपरमतं तन्नविवेक्तुं इह कारकाणि व्याप्रियन्ते न व्याप्रियन्त इति । उभयात्मके वस्तुनि विशिष्टोपाधिरूपस्य निर्धारितत्वादेकत्राऽपि प्रवृत्तिमुपयत् कारकमितरत्रापि प्रवृत्तमिवोपलभ्यते । अथापरे ब्रुवते उभयात्मकमेव हि क्रियारूपं वस्तु कारकैस्संपद्यते । अत एव कारकाणां प्रवृत्तिविशेषः क्रियेत्येतद्भावनापक्षेऽपि सङ्गच्छते, न चास्माभिस्सकलधात्वर्थानुयायिकरोत्यर्थरूपा भावना

अङ्गीक्रियते ; यदित्थमध्यगीषत कृभ्वस्तयः क्रियासामान्यवचनाः क्रियाविशेषवचनाः पचयादयः इति । किंतु प्रत्ययवाच्यत्वमस्या अनुकृष्यते ।

ननु च भावनापक्षे कारकाणामिति बहुवचनानुपपत्तिः कर्तुरेव हि व्यापारो भावना, न कारकाणामुच्यते । कर्तैव कारकशब्देनोक्तः, न पुनरितरकरणादि । कर्तॄणां तु क्रियाभेदेन बहुवचनम् । कथं पुनरिदं ज्ञायते । यतो भुजिक्रियाभूरीकृत्यैदमभिधत्ते । अन्यथा कारकाणि शुष्कौदने प्रवर्तन्ते अन्यथा मांसौदन इति । कर्तैव शुष्कौदने मन्दप्रस्थानेन प्रवर्तते, मांसौदने संरम्भेणातः कर्तुर्मन्दतासंरंभप्रदर्शनं ज्ञायते । कर्तैव परिगृहीता, यस्य बुद्ध्यानुषङ्गात्तथा-प्रवृत्तिः । ननु च शुष्कौदनमांसौदनयोः करणाधिकरणादीनामपि तद्भेदनिमित्तं बहुवचनं भविष्यति । नैवम् ; विद्यमानमपि कारकान्तरं कांस्यपात्रादिशुष्कमांसौदनयोर्मन्दतया संरंभेण वा प्रवर्तते । यदापि सकलकारकव्यापारः क्रियेति पक्षस्तदापि प्रधानत्वात् कर्तैव कारकशब्देनोच्यते, तस्य च सर्वक्रियाविशेषविषयत्वेनानपायात् प्रयोगप्रवृत्तिहेतुत्वाच्च । कर्म पुनः यद्यपि तदर्थत्वात् प्रवृत्तेः प्रधानं तथापि तस्यासर्वविषयत्वान्नकारकाणामिति बहुवचनेन सङ्ग्रहः । यद्येवं कर्तृशब्द एव कस्मान्न कृतः कर्मणि लकाराणां तस्य व्युदासो माभूत् ? तेन यत्र संभवति कर्म तत्राङ्गीकृतमेव तु तदपेक्षया बहुवचनम् । ननु च संरंभादिप्रदर्शनाच्चेतनाव्यापारस्य क्रियात्वं न प्राप्नोति । नैवम् ; संरंभादेः कर्तृविलक्षणत्वात् । अतः कर्तृव्यापारः क्रियेति सिद्धम् । नन्वेवं सति भाष्यं न संगच्छते कः पचेः प्रधानार्थः, याऽसौ तण्डुलानां विक्लितिरिति अर्थं प्राधान्यमाश्रित्य तद्भाष्यमित्यविरोधः । यत्तदर्थं प्रेषणं, अध्येषणं वा ससर्वः पच्यर्थ इति । एवं च पचतीत्या-ख्यातस्य विक्लित्युपसर्जनं विक्लेदनमर्थो भवति ।

अन्ये तु कारकाणामिति बहुवचनं सर्वकारकव्यापारत्वेन व्याचक्षते यस्मात्सर्वकारक-व्यापाराभिधायित्वं धातूनां दृश्यते । तथाच देवदत्तस्य काष्ठैः स्थाल्यामोदनस्य च पाचकः इत्यादौ सर्वाण्येव कारकाणि धात्वर्थस्य विशेषणं ; नात्र कस्यचिद्गुणभावः प्रधानभावो वा अवगम्यते । आख्यातास्तर्हि सर्वकारकव्यापाराः किमिति नावगम्यन्ते ? प्राधान्यात्कर्तृकर्मणोरेव लकारोत्पत्तेः तद्व्यापार एवाख्यातात्प्रतीयते । किं पुनस्सर्वेषां कारकाणामेका प्रवृत्तिः ? आहोस्वित् प्रतिकारकं भिन्नाः प्रवृत्तयः क्रियेति । न तावदाद्यः पक्षः, सर्वेषामेकस्याः प्रवृत्तेरसंभवात् । न हि यैव काष्ठानां प्रवृत्तिस्सैव देवदत्तस्य स्थाल्यादेश्च संभवति तस्मात्प्रतिकारकं भिन्नाः प्रवृत्तयः धातुना युगपदभिधीयमानाः क्रियेत्युच्यन्ते । अथवा पुनरस्त्वेकैव सर्वकारकाणां प्रवृत्तिः क्रिया । तथाहि ; सर्वैरेव कारकैरेका प्रवृत्तिरुपजन्यते सर्वाण्येव हि फलजननाय प्रवर्तन्ते । किन्त्विन्तु केनचिद्रूपेण जनयतीत्यवान्तरभेदात्करणादिव्यपदेशः एकस्यानेकत्र वृत्तिर्जातिवदुपपद्यते । विशेषाद्वास्याः फलजननरूपत्वं, न पुनरधिश्रयणादिरूपतेति विशेषणादिरूपतेति । विशेषणादिरूपं निपातादिरूपं, आख्यातादिरूपं, संबोधनादिरूपं, संबन्धादिरूपं, हेत्वादिरूपं चेत्युपस्काररूपाः ।

एते चाग्रत उपस्कारार्थप्रस्तावे प्रपञ्चतो वर्णयिष्यन्त इति नेह प्रतन्यन्ते । संबन्धाविच्छेदार्थं तु लेशत उदाह्रियन्ते ।

तत्र विशेषणादयः क्रियाविशेषणं, कारकविशेषणं, उपसर्गश्च । यथा—साधु पचति, भीष्ममुदारं दर्शनीयं कटं करोति, एवमन्ये रथेन यास्यतीति । निपाताः कर्मप्रवचनीयाः अव्ययानि च यथा—अहं च त्वं च वृत्रहन् असांप्रतं जेतुमित्याख्यादयः आख्यातानि । कृतस्तद्धिताश्च यथा—स्मरसि देवदत्त काश्मीरेषु वत्स्यामः, रैपोषं पुष्यति, ब्राह्मणवद्ब्रवीति । सम्बोधनादयः आमन्त्रणमवधि भावलिङ्गं च यथा—हे देवदत्त भुक्त्वा व्रजतीति, स इति, संबन्धादयश्शेष इति उपपदम् । सहार्थश्च यथा—राज्ञः पुरुषः, कुशलं देवदत्तायेति, पुत्रेण सहायात इति । हेत्वादयो हेतुर्लक्षणं तादर्थ्यं च यथा-विद्यया यशः, कमण्डलुना छात्रः, यूपाय दार्विति । कथं पुनरयं हेतुः कारकाद्भिद्यते ? 'द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् ॥' यथा—बीजेन सस्यं, तपसा कृशः, अन्नेन वसति, व्रतेन ब्राह्मण्यं, कारकं यथा—देवदत्तः श्रद्धया तीर्थे हेमशतं निष्कं ब्राह्मणाय ददाति । यद्येवं द्रव्यादिविषयत्वेन क्रियायामनियत एव भवति । यथा-पुत्रेण सह गोमान्, पुत्रेण सह स्थूलः, पुत्रेण सह ब्राह्मण इति । नैवम्; न हि सहार्थस्य द्रव्यादीन् प्रति निवर्तनभावश्शब्देनोच्यते । हेतोः पुनराश्रितव्यापारस्याऽपि तृतीयादिभिस्स विधीयत इति क्रियाविषयः करणात्कथं भिद्यत इति चेत्,

क्रिया यैः करणं तस्य दृष्टः प्रतिनिधिस्तथा । हेत्वर्थोपि क्रियाहेतुर्नच प्रतिनिधीयते ॥

तर्हि तादर्थ्याद्भेदः । किमिदं तादर्थ्यं नाम ? कार्यस्य कारणं प्रति प्रयोजकत्वं तादर्थ्यं; विशिष्टः कार्यकारणभाव इति यावत् । यद्धि यदर्थं तन्नियोगतस्तस्य करणम् । यथा—अङ्गुलीयाय कनकमिति कथं तर्हि हेतोर्न भिद्यते ? यतः कारणस्य कार्यप्रस्तावयोग्यताहेतुत्वं कार्यस्य कारणं प्रति प्रयोजकं तादर्थ्यमिति । अयं च विशेषः कार्यवाचिन एव तादर्थ्ये चतुर्थी; कार्यवाचिनो निमित्तवाचिनश्च हेतोस्तु तृतीयेति । यद्येवं हेतुलक्षणयोर्हेतुलक्षणा तृतीया कनका त्प्राप्नोति । न च तादर्थ्यचतुर्थ्या बाध्यते विषयभेदात्; कार्यवाचिनो तृतीया, चतुर्थी कारण-वाचिन इति कथं च संबन्धे विधीयमाना चतुर्थी कार्यशब्दादेव, न कारणशब्दात् । अपिच भिन्नकारणत्वात्संबन्धस्य यथा राज्ञः पुरुष इति द्विष्ठमपि संबन्धं राजशब्दादुत्पाद्यमाना चतुर्थ्युभयमपि संबन्ध उत्पत्स्यते, इति । नैवम्; तस्मै तदर्थमिति सर्वनाम्ना योर्थः प्रतिपद्यते स एव स्वकारणापेक्षया प्रापितव्यतिरेकश्चतुर्थ्या संबध्यते । यथा—यदर्थमस्य मन्त्रः तदनेनाधि-गतमिति सर्वनामार्थ एव कार्ययोगि, तथेहापि तच्छब्दोपात्त एवार्थः प्रयोजनतया विपरिणतः; तदर्थं शब्दो नाभिधीयते । भावप्रत्ययान्तोऽप्यसौ कार्यगतमेव रूढविशेषाण्याचष्टे कार्यस्य कारणं प्रति प्रयोजकत्वं तादर्थ्यमिति । तत्कथं कारकस्य तादर्थ्यविभक्तिराशङ्क्येत ? कार्य-

स्थयाऽपि चतुर्थ्योभयगतस्यापि संबन्धस्यावगतत्वात् अव्यतिरिक्तप्रातिपदिकार्थाभिन्नः कारण-शब्दाद्भवति, न तु व्यतिरेकलक्षणा तृतीयेति । अयं च हेतुतादर्थ्ययोर्विषयः ।

प्रातिलोम्यानुलोमाभ्यां हेतुरर्थस्य साधकः । तादर्थ्यमानुलोम्येन हेतुत्वानुगतं तु तत् ॥

वासेनाधीते, अध्ययनेन वसतीति, या च यूपाय दारु, अध्ययनाय वसतीति । यस्तु मन्यते तदर्थतान्तविषयस्य पारार्थ्यरूपा कार्यप्रसवयोग्यता हेतोरनन्यार्थस्य तादर्थ्यं, तस्य तद्विषयस्येति अनन्यार्थस्येति विशेषणद्वयमपार्थं उभयत्राविशेषात् । यदि तावदर्थस्यानन्यार्थता तादर्थ्यं तदसत् । कनकस्य वलयादावपि सामर्थ्यं सद्भातादथोक्तिधर्मेण तद्धेतावपि समानम् । न हि विद्याया यशोहेतुतां मुक्त्वा कार्यान्तरयोग्यतां ब्रूते ; पारार्थ्यरूपेत्यपि न वचनीयं कार्यप्रसवयोग्यतेत्यनेनैव गतार्थत्वात् । ननु च नटस्य शृणोतीत्यादौ कार्यप्रसवयोग्यस्यापि नटादेः पारार्थ्येण विवक्षायां मा भूद्धेतुत्वमिति विशेषणं क्रियते । नैवम् ; यथा उपाध्यायादधीत इति उपाध्यायादेः परार्थत्वेन कारकत्वं प्रयोजकत्वमेव तादर्थ्यमिति ।

अथ लक्षणस्य का वार्ता ? लक्षणमपि तादर्थ्यवद्धेतुविशेष एव । सिद्धो हि हेतुः कारको ज्ञापकश्च । तत्र कारकस्य स्वव्यापारानाश्रयणे हेतुरित्याख्या, ज्ञापकस्य लक्षणमिति पदार्थान्तर-परिच्छेदहेतुता हि लक्षणार्थः ।

अनाश्रितेषु (तु) व्यापारे निमित्तं हेतुरिष्यते । आश्रयावधि भावं तु लक्षणे लक्षणं विदुः ॥

क्वचित्तु हेतुरपि लक्षणम् । जटाभिस्तापस इति इत्थंभूतलक्षणं, अक्ष्णा काण इति विकारलक्षणं, कपिला विद्युदित्युत्पातलक्षणं, गोषु दुह्यमानासु गत इति भावलक्षणं, पचन्नास्त इति क्रियालक्षणं च व्याख्यातमिति । एकार्थपरः पदसमूहो वाक्यम् । तत्त्रिधा—संस्कृतं प्राकृतमपभ्रंशश्च । तत्र संस्कृतं श्रौतमार्षं लौकिकञ्च । तेषु श्रौतं द्विधा—मन्त्रब्राह्मणभेदात् । तत्र मन्त्रो यथा— तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः । तदेव शुक्रममृतं तद्ब्रह्म तदापस्स प्रजापतिः ॥ ब्राह्मणं यथा— शंयो मनुष्याणां रागद्धस्समृद्धो भवति । तत्रान्येषामधिपतिः सर्वेषां मनुष्यकैः कामैस्संपन्नमतः । स मनुष्याणां परम आनन्दः ।

आर्षं द्विधा । स्मृतिः पुराणं च । तयोस्स्मृतिर्यथा—

शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते ।
ते च स्वा चैव राज्ञस्तु ताश्च स्वा चाग्रजन्मनः ॥

पुराणं यथा—

हिरण्यकशिपुर्दैत्यो यां यां दिशमुदैक्षत । भयभ्रान्तैस्सुरैश्चक्रे तस्यै तस्यै दिशे नमः ॥

लौकिकं द्विविधं, काव्यं शास्त्रं च । तयोः काव्यं यथा—

कस्य नो कुरुते मुग्धे पिपासाकुलितं मनः । अयं ते विद्रुमच्छायो मरुमार्ग इवाधरः ॥

शास्त्रं यथा—

प्रकामधवलं यस्याश्चक्षुः पर्यन्तपक्ष्मलम् । नवनीतोपमं तस्या भवति स्मरमन्दिरम् ॥

प्राकृतं त्रिधा, सहजं, लक्षितं, श्लिष्टं च । तेषु सहजं द्विधा—संस्कृतसमं देश्यं च । तयोस्संस्कृतसमं यथा—

सरले साहसरागं परिहर रंभोरु मुञ्च संरम्भम् ।
विरसं विरहायासं वोढुं तव चित्तमसहं मे ॥

देश्यं यथा—

विप्प अपि आपु आणुणाहं षडरसमं परिहसन्तेई ।
वासअर विणडिओ विसं ललंख्व णावेसि ॥

लक्षितं द्विधा, महाराष्ट्रं शौरसेनं च । तयोर्महाराष्ट्रं यथा—

णमह अवढ्ढिअतुंगं अविसारिअवित्थअं अणोणअगहिरं ।
अप्पळहुअपरिसण्हं अणाअपरमन्थपाअडं महुमहणं ॥

शौरसेनं यथा— . . . .

श्लिष्टं द्विधा, पैशाचं मागधं च । तयोः पैशाचं यथा—

फनमथ चन अप्पकुवि अकाधी चरणकिपटि अपटि ।
पिप्पंतसु नखतप्पनेसु एतासतनुततरं रुतं ॥

मागधं यथा—

हदमाणुशमंशभोयणं कुंभशहाशवशाहिशच्छिदं ।
अणिशंअ पिबामि शोणिदं वलिशशदं शमलेण भोयदु ॥

अपभ्रंशस्त्रिधा । उत्तमो मध्यमः कनिष्ठश्च । तेष्वावन्त्यलाटीयादिरुत्तमः । तत्रावन्त्यो यथा—

एकदू असलोणी अळ आहरणसुसंठवी अच्छि उपलंपटं वीवउकहिम्मळं भट्टएवटपि अमइए ।
उणजाणिउं विरहातुरणुजूरि अपमञ्झ हरोदावणुदिण्णुवहिणे विण्णूरि अ ए ॥

लाटीयो यथा—

हिरउ हरन्त हो चोरहोए भुजिदन्दुहले जप्पिउपणव्र सच्छिले विलोइ अउगणे ।
एह्रुपुणपिण गणत्थणि संथहउव्कपणु जव्चन्दाणमेदिज्ञइ अहरहोदन्तपणा ॥

आभीरगौर्जरादिर्मध्यमः । तयोराभीरो यथा—

लवियव्फउ बीउदुह्रडाकउ हहाण एच्छसि पुतहोमत्थजिभु ।
जळदहिडां उजं मे पि जवि आआसि ॥

गौर्जरो यथा—

अव अख्खो श्री समुद्रुतरि सिलदुहि गरुकाणि ।
मन्दो हि ए पिलहि अउउजंपरुच्चइतं व अणि ॥

काश्मीरपौरस्त्यादिः कनिष्ठः । तयोः काश्मीरो यथा—

कंवळि आळ एकं ते कुदुच्छलदन्तहि विठि सुद्धि एमं इवि आलसीलंति ।
सव अंगापिदुसरासहि खवाचि डुं फलिनन्तेकी आआसण अईदसि ॥

पौरस्त्यो यथा—

महणाहि अकुटुंबि सामइन्दीहिरेरेभाउ जपिहुरि । विण्णउजान्तां वव्हरिवामेव्केरेधूजे वासां हावाथि ।
आंखीजणुकणांसहुंकाजाथितेहाथेश्चित उदूकराए । वळ आच्छइणी जीव उपाथरूस
अणइ भवणाहिं वाच्छरं ॥

तदेतत् समस्तमपि वाक्यजातमाख्यातोपाधेरेकादशप्रकारं विप्रथते । तद्यथा—एकाख्यातमनेकाख्यातमावृत्ताख्यातमनुवृत्ताख्यातं विपरिणताख्यातमेकार्थाख्यातं समुच्चिताख्यातं क्रदभिहिताख्यातमपेक्षिताख्यातमेकान्तराख्यातं निरन्तराख्यातमिति । तेष्वेकाख्यातं यथा—

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

अनेकाख्यातं यथा—

यदेव रोचते मह्यं तदेव कुरुते प्रिया । इति वेत्ति न जानाति तत्प्रियं यत्करोति सा ॥

आवृत्ताख्यातं यथा—

जयत्यमलकौस्तुभस्तबकितांसपीठो हरि र्जयन्ति मृगलोचनाचलदपाङ्गदृष्टिक्रमाः ।
ततो जयति मल्लिका तदनु सर्वसंवेदना विनाशकरणक्षमो जयति पञ्चमस्य ध्वनिः ॥

अनुवृत्ताख्यातं यथा—

चरन्ति चतुरम्भोधिवेलोद्यानेषु दन्तिनः । चक्रवालादिकुञ्जेषु कुन्दभासो गुणाश्च ते ॥

विपरीताख्यातं यथा—

सोऽस्मिञ्जयति जीवातुः पञ्चेषोः पञ्चमध्वनिः। तेच चैत्रे विकीर्णेवा तक्कोलीकेलयोऽनिलाः ॥

एकार्थाख्यातं यथा—

विकसन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः। उन्मीलन्तिच कन्दल्यो दलन्ति ककुभानिच ॥

समुच्चिताख्यातं यथा—

नामवातारयत्पत्नीं रथादुवततार च ॥

कृदभिहिताख्यातं यथा—

ततःकुमुदनाथेन कामिनीगण्डपांडुना। नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता ॥

अध्याहृताख्यातं यथा—

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा। यश्चैनं गन्धमाल्याभ्यां सर्वत्र कटुरेव सः ॥

अनपेक्षिताख्यातं यथा—

कियन्मात्रं जलं विप्र जानुदघ्नं नराधिप। तथापीयमवस्था ते न हि सर्वे भवादृशाः ॥

एकान्तराख्यातं यथा—

तेनाद्रिबन्धो ववृधे पयोधिस्तुतोष रामो मुमुदे कपीन्द्रः।
तत्रास शत्रुर्ददृशे सुवेलः प्रोचे जलान्तो जहृषुः सुधाशाः ॥

निरन्तराख्यातं यथा—

भ्रेमुर्ववल्गुः ननृतुर्जहृषुर्जगुस्समुत्पुप्लुविरे निषेदुः।
आस्फोटयांचक्रुरभिप्रणेदू रेजुर्ननन्दुः प्रययुस्समीयुः ॥

ननु च निरन्तराख्यातं समुच्चिताख्यातमेकार्थाख्यातमावृत्ताख्यातमित्यादयो वाक्यविकल्पा नोपपद्यन्ते, वाक्यकारो हि मन्यते। नास्त्येव तिङन्तयोस्संबन्धः। तथाच 'तिङ्ङतिङः' (पा. ८.१.२८) इत्यत्रातिङ्वचनमनर्थकं समानवाक्याधिकारादित्यतिङ्वचनं प्रत्याचष्टे। नह्येकत्र वाक्ये द्वे तिङन्ते स्त इति, एवं लक्षणं करोति ; आख्यातं साव्ययकारकविशेषणं वाक्यम्। तत्राख्यातग्रहणं न कर्तव्यम् ; नह्यव्ययकारकविशेषणपदानि निबन्धनमन्तरेणावतिष्ठन्ते। आख्यातमेवैषां निबन्धनमिति लब्धे व्याख्याने पुनराख्यातग्रहणं आश्रितसङ्ख्याख्यातपदपरिग्रहार्थम्। यत्रैकमाख्यातपदमव्ययकारकविशेषणपदानि सन्निपतन्ति, तद्वाक्यं यथा स्यात्? अनेकाख्यातपदप्रयोगे तु वाक्यसंज्ञा माभूदित्यनाश्रितसङ्ख्याख्यातपदांशकानिरासार्थमेकातिङ्वाक्य-

मिति वचनान्तरमारभते । तत्रेदं विचार्यते ; किमेकस्मिन् वाक्ये द्वयोस्तिङन्तयोस्संबन्ध एव नास्ति, उत सत्यपि संबन्धे द्वितीयं न प्रयुज्यते ? एकतिङ्वाक्यमिति पूर्वाचार्यसमयादनु । किञ्चिदाह । सत्यपि तिङन्तयोस्संबन्धे तिङन्तामन्त्रितयुष्मदस्मदादेशप्लुतादिकार्यव्यवस्थार्थमेकतिङ्वाक्यमिति पारिभाषिकमेव वाक्यलक्षणं क्रियते । किं कारणम् ? समानवाक्यार्थात् पदादुत्तरयोस्तिङामन्त्रितयोर्निघातस्स्मर्यते । 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वां नावौ' (पा. ८.१.२०) वादयः आदेशा विधीयन्ते । 'वाक्यस्य टेः प्लुत उदात्तः' (पा. ८.२.८२) इति वाक्याचामन्त्यस्य प्लुतश्शिष्यते इति । तच्च तदोपपद्यते यदेकतिङ्वाक्यमिति पारिभाषिकं वाक्यलक्षणं क्रियते । अन्यथा 'समर्थः पदविधि' (पा. २.१.१.) रिति पदानां परस्परासामर्थ्ये वाक्यस्य चापरिसमाप्तौ सर्वथा न प्राप्नोति । तथाहि ; नद्यास्तिष्ठन्ति कूले वृक्षस्य लम्बते शाखायां, कः प्रिये मयि कोपः ? का सुभग प्रिया ते ? शालीनां ओदनं दास्यामीति मे माता ब्रवीति । आगच्छ भो देवदत्त कुग्रामं गच्छावः, ग्रामं यदि यासि रे न मामपि प्रतीक्षस्व । अत्र तिष्ठति नाकूलमभिसंबन्धान्न नदी, लम्बनेन शाखा न वृक्षः, क इत्यनेन कोपेन प्रिया, केत्यनेन तु प्रिया न सुभगा ते इति युष्मदस्मदर्थेन दानं न शालयः मे इत्यस्मदर्थे न मातावचनम् । आगच्छ देवदत्त ग्रामं यदि यासि रे इत्येतावति वाक्ययोः परिसमाप्तिः । किं तर्हि गच्छावो मामपि प्रतीक्षस्वेति ततश्च निघातादिकार्याणामप्राप्तिः । एकतिङ्परस्य तु पदसमुदायस्य वाक्यत्वे परंपरया यथाकथञ्चिदभिसंबन्धे निघातयुष्मदस्मदादेशा युज्यन्ते । 'युक्तयुक्ते चोपसङ्ख्यान' मिति युक्तेन वक्तव्यं भवति । एवं साकांक्षस्याऽपि पदकदम्बकस्य एकतिङवच्छेदेन वाक्यत्वप्रतीतौ वाक्यस्य टेः प्लुत इति वाक्याचामन्त्यस्योदात्तः प्लुत इति सिद्धो भवति ।

कश्चित्तु ब्रूते—नास्त्येव तिङन्तयोस्संबन्धः । स हि तिङन्तेषूपकल्प्यमानः षोढैवावकल्पते । विशेषणविशेष्यसंबन्धः, साध्यसाधनसंबन्धः, लक्ष्यलक्षणसंबन्धः, हेतुहेतुमत्संबन्धः, अवध्यवधिसंबन्धः, समुच्चयादिसंबन्धश्चेति । तत्र विशेषणविशेष्यसंबन्धस्सामानाधिकरण्येन वा स्यात् वैयधिकरण्येन वा । न तावत्सामानाधिकरण्येन पचति पठतीत्येतयोरत्यन्तमर्थभेदात् ; न हि पदार्थयोरत्यन्तभेदेऽभेदे वा विशेषणविशेष्यभाव उपपद्यते । न हि भवति आम्रश्चूतोऽश्वत्थ इति, यत्र तु नात्यन्तभेदो वा तत्रोपपद्यते यथा नीलमुत्पलमिति ।

ननु यथा प्रपचति स्तोकं पचति इत्यादावुपसर्गेण स्तोकादिना वाऽऽख्यातं विशेष्यते, तथाऽऽख्यातान्तरेणापि कस्मान्न विशेष्यते ? नैवम् ; अत्र यथा नीलवीरशब्दौ नीलत्ववीरत्वे विशेषणरूपेणाभिदधतौ उत्पलं पुरुषं च सामान्येनोपगृह्णीतः । न रूपपुरुषसामान्ययोर्वा नियतौ भवतः, उत्पलपुरुषशब्दावप्युत्पलपुरुषौ विशेष्यरूपेणाभिदधतौ नीलत्वं वीरत्वं च सामान्येनोपगृह्णीतः ; न तु सामान्ययोस्तद्विशेषणयोर्वात्मानं नियमयतः । परस्परोपश्लेषकृतयोर्विशेषणविशेष्य-

भावो भवति । नचैतत् पचति पठतीत्येतयोरुपपद्यते ; न हि नीलोत्पलादिवत् पचतिः पठतिः पचति वा पठतिरुपगृहीतुं शक्नोति ।

ननु चात्यन्तमभिन्नार्थश्च दृश्यते विशेषणविशेष्यभावः । अभिन्नार्थयोर्यथा—अधीते, अध्येति, भिन्नार्थयोर्यथा—प्रतिष्ठते, प्रस्सरति । नैवं, अधीते, अध्येतीत्येतयोर्यद्यपि धातुरुपसर्गं न व्यभिचरति ; व्यभिचरत्येवोपसर्गो धातुम् । अतश्शक्यतेऽन्वयव्यतिरेकाभ्यामर्थभेदः कल्पयितुं, यदर्थोऽयमधिरन्यत्र दृष्टस्तदर्थं इहापि भवितुमर्हति । अयंचाधिरन्यत्रोपरिभावार्थो दृष्टः, यथा—अध्यास्ते, अधिरोहतीति ते मन्यामहेऽप्यस्य स एवार्थ इति तस्मादधीङेव शब्दक्रियो ज्ञानक्रियश्चेति । अधिशब्दस्त्वेतमेवार्थमुपरिभावेन विशिनष्टि विशिष्टार्थक्रियश्चार्थवतां शब्दानां विधिपूर्वं विशब्दनं तथाधीतार्थविषयविज्ञानमिति एतावानेवार्थोऽधिना विभज्यते ; इह तर्हि कथं प्रतिष्ठते, प्रस्सरति इति । नह्यत्र सत्यपि केवलप्रयोगे तिष्ठतेः स्सरतेर्वा पचतिवत्सामान्याभिधायित्वं, किं तर्हि विरोधिन्येव क्रिया गम्यते ? व्रजिक्रियास्सरणनिवृत्तिश्च व्यक्तंच प्रतिष्ठत इत्यनेन स्थानप्रारंभो नोच्यते । किं तर्हि गमनमेव स्सरतीत्यनेनापि स्सरणात् प्रारंभो नोच्यते ; पितुस्स्सरणारंभ एवेति नैष दोषः । शब्दोऽयं प्रपचतीत्यादिकर्मवचनत्वेन निर्ज्ञातोऽस्य विशेषतोदृष्टादनुमानादादिकर्म-वचनत्वमनुमीयते । तिष्ठतिश्च देवदत्तस्तिष्ठतीत्यादौ क्रियावचनाद्धातुत्वेन निर्ज्ञातः ; अतोऽस्य सामान्यतो दृष्टादनुमानाद्गमनार्थत्वमपि विज्ञायते । बह्वर्था अपि धातवो भवन्ति, 'वपिः प्रकरणे दृष्टश्छेदेऽपि प्रवर्तते' केशान्वपतीति । 'ईडतिश्च गतौ दृष्टः प्रेरणेऽपि प्रवर्तते । अग्निर्वा इतोपर्वमीहे ॥' करोतिरपूर्वप्रादुर्भावे दृष्टो निर्मलीकरणेऽपि वर्तते । पादौ कुरु, पृष्ठं कुरु, मा कुरु, उदरं स्नेहो हीयते, उन्मृदा न मृदोन्मृदा नेति गम्यते । तथा कटे कुरु, अश्मना नमितः कुरु, निक्षिपावक्षिपेति गम्यते । अयमपि च धातुत्वादनेकार्थो भवितुमर्हति ; एतेन स्सरतिरपि व्याख्यातः । न चैतन्न दृष्टं विरुद्धार्थावर्थौ तुल्यरूपेण शब्देनाभिधीयेते । तद्यथा—सन्निकर्षविप्रकर्षयोर्दृष्टमाराच्छब्देनाभिधानं—आराच्छत्रुमपबाधस्व दूरं, दूराद्वीयो अपसेध शत्रून् । अतस्तिष्ठतिरेव गमनार्थः, स्सरतिरेव स्सरणनिवृत्तिक्रियः ; तद्विशेषश्चोपसर्ग इति युक्तमुक्तं वस्तुनोरत्यन्तभेदेऽभेदे वा विशेषणविशेष्यभाव इति यदाह—

"सम्भवे व्यभिचारे च विशेषणमर्थवद्भवति" इति ।

नापि वैयधिकरण्येनाख्यातस्य विशेषणं भवति प्राधान्ये सत्यधात्वर्थभूतार्थत्वात् । इह राज्ञः पुरुष इति भरणादिक्रियानिमित्तो व्यतिरेको विशेषसम्बन्धनम् । न च प्राधान्यस्यैव राजार्थस्योपजायते ; न च तथाख्यातार्थस्य प्राधान्यं सत्वाभावे वा संभवति । यत्रापि च क्रियापदं न श्रूयते मातुः स्सरति सर्पिषो जानीते इति तत्रापि सा क्रियासाध्यास्येत्यनेन रूपेणाश्रियमाणसत्वभूतस्याप्रधानस्य मात्रादेरर्थस्य व्यतिरेकमुपजायते ; श्रूयमाणक्रिया विशेष-संबन्धनिमित्तं भवति । न चैतदाख्यातस्योपपद्यते, सत्वभूतत्वादेव निमित्तानिर्देश्यतयास्येति

व्यपदेशाभावात् । यत्स खलु परिनिष्ठितस्वभावमस्य तस्येति सर्वनामप्रत्यवमर्शयोग्यं तद्विशेषणतया क्वचिदुपयुज्यते वा न वा, यत्पुनरात्मनैवापरिसमाप्तरूपे तद्विपरीतं, तत्कथमिवान्यस्य विशेषणत्वं यायात् ।

नन्विदानीमिव प्रपचति, स्तोकं पचतीत्यसत्त्वभूतयोः प्रशब्दस्तोकशब्दयोर्विशेषणत्वमुक्तम् । नैवम्; अन्यथा तदुपपत्तेः, उपसर्गाणां क्रियाविशेषणानां वा सत्वभूतानामप्यनन्यविषयत्वेनैव क्रियां प्रति गुणभावो भवति । तथाहि; योऽसौ क्रियाभूतो धर्मः प्रारंभादिः, तं क्रियार्थमिव क्रियानुप्रविष्टमसत्वभूतमभिदधत्प्रशब्दोभिव्यञ्जयति । यदिवा यथाक्षिनिकोचादयः अनभिदधतः एवार्थान् प्रदर्शयन्ति, एवं क्रियास्थान् प्रारम्भादीनभिदधत एव प्रादयोऽवद्योतयन्ति । दृश्यते अनभीयमानस्याप्यर्थस्यात्मस्थस्यावद्योतनं यथा—दण्डा क्रीडयति, तदस्यां प्रहरणमिति क्रीडायां णो विहितः क्रीडामब्रुवन् प्रहरणत्वं दण्डत्वमवद्योतयति । तस्मात्पचतीत्यत्र पचिमेव संदिग्धं विशेषमेव स्थापयन्नसत्वार्थोपि शब्दो विशेषणत्वं लभते । एवं स्तोकशब्दोपि क्रियाभूतं धर्ममपकर्षादिकं क्रियात्वसत्वभूतं क्रियानुप्रविष्टमभिदधानः क्रियानुरोधादेवासत्वभावमापन्नः क्रियाविशेषणत्वं भजते ।

न चैवमाख्यातान्तरस्थं विशेषणमाख्यातमभिव्यञ्जयितुमभिधातुं वा शक्नोति द्वयोरपि प्राधान्येन परस्परानपेक्षत्वात् । भवतु, चोपसर्गादेरसत्वार्थस्यापि नीलोत्पलादिवदेव सामानाधिकरण्येन विशेषणविशेष्यभावः; वैयधिकरण्ये तु व्यतिरेकापेक्षायां कथमिवैतद्भवति ? न हि अपरिनिष्पन्नत्वेनात्मलाभ एव क्षीणस्यापरोपकारिणः करणादयो व्यतिरेका युज्यन्ते । अतो वैयधिकरण्येनापि न तिङन्तयोर्विशेषणविशेष्यभावस्संबन्धो भवति । साध्यसाधनभावोऽपि नोपपद्यते, सहि क्रिययोः कर्तृत्वे कर्मत्वे वा स्यात्; साध्यं हि वस्तूत्पद्यमानत्वेन कर्ता कर्म चेति । न चैतदुभयमपि क्रियायाः क्रियान्तरं प्रतियुज्यते । तिङन्तेन हि क्रियात्मोत्पत्तिं प्रति प्रयतमानकारकाकांक्षापि प्रकृत्या प्रयोगेषु विनिवेशितस्वरूपाऽभिधीयते । अतोऽप्रतिलब्धात्मरूपत्वेन क्रियायास्साधनपरवशत्वेन तदवरुद्धत्वादितरेण क्रियात्मना संबन्धसत्वेनास्याः कर्तृरूपता वा संभवति, यतः परिनिष्पन्नरूपस्यात्मलाभनिरपेक्षस्य सिद्धात्मनस्साधनभावो घटते, नतूक्तविपरीतात्मन इति । क्रियायाश्चायमेव स्वभावः, यदुत साधनाधीनत्वेन साध्यस्वभावायाः प्रतीतिः या च साध्यस्वभावा सा कथमिवान्यस्मिन् साध्ये साधनभावं गच्छेत् येन कर्त्रीत्युच्यते या च साधनाधीनत्वेन साध्यस्वभावा सा कथमिव क्रिया साध्येत येन कर्मेत्युच्यते ? यदि च स्यात् परिनिष्पन्नरूपद्रव्यवदेवेदं तया निर्दिश्येत । न च निर्दिश्यते, अतोऽनिदन्तया निर्देशादपि न साधनम् । अवस्थारूपश्च साधनधर्मो व्यापारशब्दवाच्यः । क्रिया सा कथमिवात्मसिद्धये तथाविधमेव धर्मान्तरमपेक्षेत ? अनपेक्षितयोश्च कथमिव मिथस्संबन्धोपपत्तिः ?

न च क्रियायाः किमपि तदवशिष्यते यत्साधनैरसाधितं क्रियान्तरस्य साध्यं भविष्यति। तदेवमितरेतरानायत्तरूपयोरसंबन्ध एव क्रिययोः। न च निवर्तमानलब्धात्मकं वस्तुनिवर्तकादृते परेण सह संबन्धमर्हेत्। उपकार्योपकारकनिबन्धनस्वभावानामितरेतरेण संबन्धलब्धात्मकस्य लोपकारकत्वम्? क्रिया च तथारूपत्वविरहात् साधनेभ्यस्स्वोत्पत्तिमवेक्षमाणा कथमिवातथाभूत-क्रियान्तरेण संबन्धमियात्? तस्मात् स्वसाधनावरुद्धत्वात्साध्यमानैकस्वभावायाः क्रियायाः कर्तृत्वे कर्मत्वे वा न क्रियान्तरेण सह संबन्धः।

ननु च यथा पाकं करोति, पाको वर्तते, इति तिङ्कृदभिहितयोः क्रिययोस्साध्यसाधन-भावो दृश्यते, तथाच पठति पचतीत्येतयोरपि कस्मान्न भवति? नैवम्; उक्तमिदं भाष्ये, अस्ति खलु तिङभिहितस्य कृदभिहितस्य भावस्य विशेषः, कृदभिहितो हि भावो द्रव्यवत् प्रकाशमानः क्रियया समवायं गच्छतीति। न हि भवति, पचति, पठति, इति लक्ष्यलक्षणभावोऽप्याख्याता-भिहितयोः क्रिययोरभिन्नसाधनयोर्वा संभवति। द्विधाऽपि चानुपपत्तिः; साध्यमानत्वेन प्रवर्तमानस्य साधनपरतन्त्रस्य चात्मनोऽनिदन्तानिर्देशस्य साधनवल्लक्षणत्वायोगात्। ननु च माभूत् क्रियायास्साधनम्; लक्षणं तूभयथापि दृश्यते, पाचकः पठति, रुदतः प्राव्राजीदिति। ततो यः पचति स पठति, स रोदिति, अयं प्रव्रजतीत्याख्यातयोर्लक्ष्यलक्षणभावो भविष्यति। चिरं जीव, त्वयैव स्मारितोस्मि; आख्यातयोर्लक्ष्यलक्षणत्वेनासंबन्धकारणस्य यदत्र लक्षणहेत्वोः 'क्रियायाः' (पा. ३.२.१२६) इति शतृशानचौ तिङपरादौ स्मर्येते। अतो लक्षणत्वे क्रियायाः क्रियान्तरं प्रति समाश्रियमाणे पचन् पठति रुदतः प्राव्राजीदित्येव भवितव्यम्।

ननु यः पचति स पठति, स रोदित्ययं प्रव्रजतीति तत्कथं संबन्धः? एतेन हेतुहेतुमद्भावः आख्यातयोः प्रत्युक्तो भवति, यतोऽसावपि द्विधा—हेतुर्वा हेतुमत्परत्वेन, हेतुमतो वा हेतुपरत्वेन। तत्र हेतोर्हेतुमत्परत्वे शतृशानज्भ्यां हेतुमतस्स्वहेतुपरत्वे तुमुनादिभिर्भाव्यम्। यथा पचन् भुङ्क्ते, अधीयमानो वसति, भोक्तुं पचति, भोजको व्रजतीति। ननु पचति, भुङ्क्ते, व्रजतीति तत् कस्य केन संबन्धः? अवध्यवधिमद्भावोपि तिङन्तयोर्नास्त्येव; स हि देशतः कालतो वा स्यात्। न तावद्देशतः, तस्य मूर्तिमद्विषयत्वात् कालतस्तु युज्यते। किंतु तत्र पूर्वकाले क्त्वाप्रत्ययविधानात् पक्त्वा भुङ्क्त इत्येव स्यात्। न तु पचति भुङ्क्त इति समुच्चयेनापि क्रियायास्संबन्धः। सोपि हि द्विधैव; साधनानां वा क्रियायां यथा—गौरश्वश्च गृह्यताम्, क्रियाणां वा साधने यथा—असौ पचति पठति चेति; नतु क्रियाणां क्रियायामेव।

ननु चैकत्वात्क्रियाया यद्यपि साधनसमुच्चये क्रियाभिसंबन्धो नास्ति, तथाप्येकवस्तु-विषयत्वेन क्रियासमुच्चयोऽसौ भविष्यति। तथाहि; य एव पचति स एव पठतीत्यैकाधिकरण्ये भवत्येव संबन्धोपपत्तिः। नैवम्; साध्ययोस्साधनाय तयोरलब्धात्मनोस्साधनोन्मुखत्वेन परिवर्त-मानयोः क्रियायाः परस्परानपेक्षत्वात्, नह्यनन्वितात्मनामधिकरणमुपेक्षामुपजनयितुमलम्।

अतस्सव्येतरगोविषाणवत् परस्परेणासमन्वितमेव क्रियाद्वयं साधने समुच्चीयते । न च समुच्चीयमाने वस्तुनि मिथस्संबध्यते, तथा सति समाहारेतरेतरयोरन्यतरापत्तौ समुच्चयस्यैवाभावात् । आदिग्रहणादन्वादयोऽनन्वय एव क्रिययोः, तस्मान्नास्त्येवाख्यातयोर्मिथस्संबन्ध इति ।

ननु च अस्ति स मे रोचते, अस्ति त्वमीशिषे, नाहं रमेस्मिन्निति सामानाधिकरण्येन विशेषणविशेष्यभावो भवति । पचति, भवति, पक्ष्यति, भवत्यपाक्षीत्, भवेदपि भवेत्, स्यादपि स्यादिति कर्तृत्वेन पश्य मृगो धावति, इह पश्यामः, कर्मणि द्विवचनबहुवचनान्युदाह्रियन्ते । एहि मन्ये रथेन यास्यसि, स्मरसि देवदत्त काश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे, न मर्षयामि यत्तत्र भवान् वृषलं याजयेदिति कर्मत्वेन साध्यसाधनभावः । यो भुङ्क्ते स गृह्यतां, योऽधीते स पचतीत्यभिन्नसाधनत्वेन, स स्वपिति, एष बुध्यते, स उदेति, अयमस्तमेतीति भिन्नसाधनत्वेन लक्ष्यलक्षणभावः । हस्तीति पलायते, वर्षतीति धावतीति हेतोर्हेतुमत्परत्वेन, वक्ष्यामीति व्रजति, भोक्ष्यते इत्यास्त इति हेतुहेतुमतोर्हेतुपरत्वेन हेतुहेतुमद्भावः । यावद्भुङ्क्ते ततो व्रजति, यदयं भुङ्क्ते ततः पठति, यदयं भुक्त्वा व्रजतीत्यधीत एव, ततः परमिति अवध्यवधिमद्भावः । सक्तून् पिब, धानाः खाद, ओदनं भुंक्ष्वेत्येवायमभ्यवहरति, पठति चायं पठति चेति समुच्चयः, वटो भिक्षामट, गां चानयेत्यन्वाचयोऽपि तिङन्तेषु दृश्यते । तत्कथमुच्यते नाख्यातयोस्संबन्धोऽस्तीति ? नैवम्; वाक्यभेदादिना तदुपपत्तेः । अस्ति स स मे रोचते, असि त्वं त्वमीशिषे, अस्म्यहमहं रमे, अस्त्येतद्गच्छामो वयं, भवत्वेवमेतत्, पयसोधयामयत्वममिथ्यैवासि, यन्मुरजितस्त्वमपूपुज इत्युक्तेषु वाक्यभेदा उपपद्यन्ते । निपाता वा अस्त्यादयः आख्यातसरूपनिरर्थका अपि वाक्यपूरणाय कमीमिद्धादिवत्प्रयुज्यन्ते ; न तु क्रियाभिर्विशेषणविशेष्यभावमनुभवन्ति । भवति पचतीत्यादिषु तु पचतीति पक्ष्यतीति अपाक्षीदिति च योऽर्थो भवति असावस्तीत्यर्थः । ननु पचत्यादेर्भवन्तौ कर्तृत्वेन साध्यसाधनभावः ; एवं भवेदपि भवेत्, स्यादपि स्यादिति ।

ननु चावश्यमेव पचत्यादिक्रिया भवतिक्रियाकर्तृत्वेनाभ्युपेया । यदि ह्येषा न भवेत्तेन कर्त्री स्यात् सिद्धरूपतया, न लकारेणाभिधीयते । न च सा सती सिद्धभावमुपैति । न च लकारसिद्धतदभिधानेन विना कर्तृभावेनेमां प्रतिपादयितुमुत्सहते । ततो येनात्मना कर्त्री न तेन क्रिया, येन च साध्यात्मना क्रिया न तेन कर्त्रीति वस्त्वन्तरमेव लकारेण कर्तृतया कथितमापद्येत । देवदत्तः पचतीति चानेन ज्ञातवत्प्राज्ञाप्येते विधेयता त्वक्तेर्भवतीत्यत्र तु अज्ञातरूपतयोपादीयते भवनक्रियानुभवितृत्वात् । न च युगपदेव ज्ञातवदज्ञातवच्च समाश्रयणं युक्तम् ; अतो न क्रियाकर्तृत्वमुपयाति । पश्य मृगो धावतीत्यत्र तु पश्यशब्दो न तिङन्तः । किं तर्हि पिता तोयमाश्चर्यमित्येतस्मिन्नर्थे वर्तते ? पश्य भुङ्क्ते, अहो आश्चर्यमद्भुतं भुङ्क्त इत्यर्थः । केचिदाख्यातसरूपौ पश्य पश्यत शब्दौ न दर्शनार्हेयं क्रियेत्यस्मिन्नर्थे मन्यन्ते, अथवा पश्य मृगो धावतीत्यत्र

नासावेवमाह दृशं मृगसरणे नियुंक्ष्व । किं तर्हि ? चक्षुः प्रणिधत्स्व प्रमत्तो माभूरिति सतोऽप्रणिहितचक्षुस्सन् मृगसरणमन्यद्वा प्रतिपद्यते यथा रूपमन्यं दृष्ट्वा एतदेवाह, आलोकय आलोकयेति, तस्मात्पश्येत्येतावत्पर्यवस्यति, परिसमाप्तत्वान्नास्ति दृशस्सरणेन संबन्धः। अथ यो धावति मृगस्तं पश्येति सर्वनाम्ना यदा सोऽर्थः प्रत्यवमृष्टो भवति तदा क्रिया तस्योपलक्षणाय प्रवर्तते । यो धावति सर्तारं पश्यति ; अयं चार्थः पश्य धावतीति पदयोरसंबन्धत्वेन श्रुतार्थापत्तिगम्यः, न तु शब्दसन्निवेशी ; यदि वा श्रुतार्थापत्त्यैव गम्यमानेतिशब्दोपसंहृतस्य मृगो धावतीति वाक्यार्थस्य दृशौ कर्मत्वमेव पश्याम उदाह्रियन्त इति । अथवा द्वे एते वाक्ये एकमेतावति वाक्यमिह पश्यामः ; कर्मणि द्विवचनबहुवचनादीनि वचनान्येव दृशः कर्मत्वेनावतिष्ठन्ते, नोदाहृतिः। अतश्च पश्यामो यस्मादुदाह्रियन्ते प्रयुज्यत इति द्वितीयम् । एहि मन्ये रथेन यास्यसीत्यत्र 'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकश्चेति' (पा. १.४.१०६) वचनाद्वाक्यमर्थः, एहि मन्ये रथेन यास्यामीति । यदा वा सूत्रप्रतिषेधपक्षे स्वविषय एव मध्यमोत्तमौ तदा सर्वथा गम्यमानेतिशब्दोपसंहृतस्य वाह्यार्थस्यैव कर्मत्वम् । एहीति च प्रहासविषयसंबोधनार्थ आख्यातस्वरूपो निपातः। आख्यातस्वरूपाश्च पुरुषसंख्यां च व्यभिचरन्ति। न हि भवति त्वमस्ति वयमस्तीति। किञ्चास्तिरपि निपातः ; सोढं यथा—अस्ति क्षीरा गौः । तत्र ह्याख्यातमिति कृत्वोक्तः सुबधिकारेऽस्तिक्षीरादिवचनमिति ; न चाव्ययत्वान्निपातोऽयमिति परिहारः।

ननु च सङ्ख्यामभिचरन् कथमेकशब्दो बहूनां प्रहासे बहुत्वं ब्रूयात् ? नैवम् , बहुभिरेकः प्रहस्यते, नैकेन बहवः, नहि बहुष्वेकं प्रहसत्सु सूत्रप्रतिषेधपक्षे एहि मन्ये रथेन यास्यामि । यदा वा सूत्रप्रतिषेधपक्षे अस्तीति कथं न सत्वभूतोर्थस्साध्यसाधनसंबन्धमनुभवति । यो भुंक्ते स गृह्यतामित्यत्रापि वाक्यद्वितयमेव । न चात्र क्रिययोः लक्ष्यलक्षणभावः क्रियायाः कारकोपलक्षणत्वात् यो भुंक्ते स देवदत्त इति देवदत्तसत्वो लक्षणमेको वाक्यार्थः ; स तथाभूतो गृह्यतामिति तस्य ग्रहणसंबन्धः, दर्शनमपरम् । न च यथासत्वं तद्रूपाभिधायित्वेन स्मरणात् कर्तृप्राधान्यमभिदधत् क्रियायाः क्रियान्तरं प्रति लक्षणत्वमभिधत्ते तथा सर्वनामाभिधातुं शक्नोति । तेन हि सा क्रियासाध्यत्वात्प्रच्याव्य साधनोपसर्जनभावमुपनीता तत्परामृष्टं देवदत्तमुपलक्षयति ; स तु तथाभूतः क्रियान्तरेण संबध्यत इति । नह्येकस्याः प्रवृत्तेस्साधनोपलक्षणमपरक्रियासंबन्धश्चोपपन्ने भवति ।

नन्विदमेवास्याः क्रियान्तरेणान्वितत्वं यदन्यस्यास्साधनमुपलक्षयति । नैवम् , एषा स्वसाधनलक्षणत्वेन प्रवर्तमाना यदधीनोदया तदेवोपलक्षयेत् , नान्यसंबन्धात् । ननु चाऽस्याः अपि देवदत्त एव साधनं स चानयोपलक्षितः, तत्कथं भिन्नवाक्यता ? नैवम् , भवतु नाम देवदत्तो लक्षणत्वमस्याः ; किंतु न देवदत्ततयोपलक्षयति, अपितु स्वसाधनत्वेन । ततस्स्वसाधक एव देवदत्ते प्रथमतोऽस्यविश्रान्तिः, देवदत्तस्य च तयैव तदाभिसंबन्धोऽप्युपेयः । न हि

यौगपद्येन लक्ष्यमाणत्वं प्राधान्यं च प्रतिपद्येत, क्रियान्तरे गुणभावं च विरोधप्रसङ्गात् । न च भुजिक्रियावच्छिन्नस्येतरक्रियाभिसंबन्धोऽभिमतः समुच्चीयमानक्रियाद्वयप्रसङ्गात् । यो भुंक्ते सः गृह्यतामित्येकरसा प्रवृत्तिः प्रत्यासत्तेः तन्मात्रमित्रं सत्रं, तस्य तु पुनरित्थंभूत एवार्थ इति न तत्र वाक्यभेदः । एतेन योऽधीते स पचतीत्यपि प्रत्युक्तम् । स स्वपित्येष बुध्यते, स उदेतीत्ययमस्तमेतीत्यत्र तु साधनत्वान्न तरां लक्ष्यलक्षणभावः । हस्तीति पलायत इति अत्रेति शब्दो हेतुहेतुमद्भावं द्योतयन्नर्थस्य स्वातन्त्र्यं करोति । इष्ट इति शब्दोऽर्थस्य स्वातन्त्र्यमुपजनयन् 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (पा. १.१.६६.) इति अत्र हि तस्मिन्नित्यधिकरणस्य कर्तृकर्मसमवायिन्यौ क्रिये प्रत्युपाधित्वेन प्रवर्तमानस्याकांक्षा यत आधेयस्तत्र स्व आत्मन्यवस्थानाभावादिति शब्देनासत्यवच्छेदे कार्ययोगो न स्यात् । तस्मिन्निति निर्दिष्टे पूर्वस्येत्युक्ते तस्मिन् य आधेयो निर्दिष्ट इति संप्रत्ययस्स्यात् ; तस्मात् सप्तम्यर्थनिर्देशे पूर्वस्य कार्यस्य संप्रत्ययार्थमिति उपादीयते एवमिहापीति शब्दो वा न तस्य स्वातन्त्र्यमुपजनयति ; यस्मादयं हन्ति तस्मादयं पलायत इति, एवं वर्षतीत्यादावपि योजनीयम् ; अत्र च तिङन्तयोरिति शब्दसामर्थ्याद्धेतुहेतुमद्भावोऽनुमीयते, न पुनश्शब्दसन्निवेशीति । यावद्भुंक्ते ततो व्रजतीत्यादौ तु भिन्नवाक्यतायामपि यावत् ततः पूर्वमित्यादिनिपातसामर्थ्यादवध्यवधिमद्भावो गम्यते ; न पुनराख्यातशब्दसन्निवेशीति । सक्तून् पिबेत्यादावपि सक्तून् पिब, धानाः खादेति ओदनं भुंक्ष्व इति विशेषणवाक्यार्था इतिशब्दोपसंहृता इतिशब्दसामर्थ्यादेव तत्सामान्याभिधायिना अयमभ्यवहरतीति वाक्यान्तरेणोच्यन्ते । पचति चायं पठति चेति वाक्यद्वयमेव ; एवं भिक्षामट, गां चानयेति ।

तदेवं कात्यायनमते नास्त्येवमाख्यातयोस्संबन्धः ; सूत्रकारस्य तु मतेऽस्त्येवाख्यातयोः अनेकवाक्यत्वेनाभिसंबन्ध इति । यदयं समानवाक्याधिकारे तिङन्तादुत्तरस्य तिङो निघातं शास्ति । अभिज्ञावचने लृडिति स्मृत्युक्तावतीतकालेऽपि लृटं स्मरति ; यदिति यत्प्रयोगे तन्निषेधति विभाषा साकांक्ष (पा. ३.२.११४) इत्याकांक्षायां विभाषयाभ्यनुजानाति, 'नयद्यनाकांक्षे' (पा. ३.४.२३) इति निराकांक्षवाक्ये क्त्वाणमुलौ निषिध्य लडादीनेवानुमन्यते इति का पुनरत्रोपपत्तिः ? उच्यते आख्यातपदतुल्यधर्मिणो हि क्त्वान्तस्यानेकस्यापि दृष्टस्तिङन्तेन सह संबन्धः । स्नात्वा पीत्वा भुक्त्वा व्रजतीति, तथा पूर्वं स्नाति भुंक्ते पिबति तु व्रजति, इति । तत्र यथैव क्त्वान्तस्य तिङन्तेनैकवाक्यत्वं तथा पूर्वकालक्रियाभिधायिनामाख्यातानां सर्वेषामपि क्रियाविशेषणकत्वाद्भवति । उक्तञ्च—

> यथाऽनेकमपि क्त्वान्ततिङन्तस्य विशेषकम् ।
> तथा तिङन्तं तत्राहुः तिङन्तस्य विशेषकम् ॥

किञ्च यथाकथंचिदाश्रियमाणोऽर्थस्सामानाधिकरण्येनावधिभावेन वा विशेषणत्वं न व्यतिक्रामति । तथाहि, व्रज देवदत्तेत्यामन्त्रितस्य विशेषणत्वेनैकवाक्यत्वादामन्त्रितस्य चेति

निघातो दृश्यते ; कर्तृत्वाद्भविष्यतीति चेत् व्रजति देवदत्तेत्यत्र कथम् ? नहि देवदत्तो व्रजिक्रियायाः कर्ता, न खल्वपि कारकस्य विशेषकं, नापि सुष्ठु पचतीति पदान्तरत्वेन क्रियाविशेषणमुपपद्यते । किंतु क्रियां प्रत्याभिमुख्येनावस्थाप्यमानः पञ्चवारान् पचतीतिवत् बाह्यविशेषणतां लभते । कः पुनर्बाह्यान्तरयोः क्रियाविशेषणयोर्विशेषः ? अयमस्ति आन्तरं हि क्रियाविशेषणं कर्मत्वं नपुंसकत्वं च प्रतिलभते ; बाह्यस्य तु स्वलिङ्गता न कर्मत्वनियमः । एवं च कृत्वोक्तम् —

संबोधनपदं यच्च तत्क्रियाया विशेषकम् । व्रजानि देवदत्तेति निघातोऽत्र तथा सति ॥

ननु च संबोधनपदस्य तिङन्तेनैकवाक्यता युज्यते, संबोधनं ह्याक्षिप्तक्रियापदं वर्तते । देवदत्त अभिमुखो भवेत्याभिमुख्ये हि युज्यते । तत्र देवदत्तेत्येतावत्यर्थस्य परिसमाप्तत्वात् संबोधनपदमेकं वाक्यम्, सोभिमुखीभूतः क्रियान्तरो व्यापारः । अन्येत्वाहुः—

साकांक्षावयवं भेदे परानाकांक्षशब्दकम् । कर्मप्रधानगुणवदेकार्थं वाक्यमुच्यते ॥

एवं च ब्रुवतो यथोक्तलक्षणपदसमूहो वाक्यमित्यभिप्रायः, न च देवदत्तेति पदसमूहः । अथाभिमुखो भवेत्याक्षेपादस्य समूहभावः ; तथाऽपि साकांक्षत्वादवाक्यत्वम् । न ह्यभिमुखीभावमात्रमेव कश्चिद्विधत्ते । किं तर्ह्यभिमुखीभावं विधाय क्रियान्तरे नियुङ्क्ते, अपि चाभिमुखो भवेत्यध्याह्रियमाणयाऽपि क्रियया संबन्धं मन्यसे व्रजेत्युपात्तयाऽपि न मन्यस इत्यहो माध्यस्थ्यम् । किंचाभिमुखो भवेत्ययमपि नियोगः, तत्रानभिमुख्यस्य नियोक्तुमशक्यत्वात् । अभिमुखीकरणाय क्रियान्तराध्याहारेऽनवस्था, तद्भयाच्चाभिमुखीकारगर्भनियोगोऽङ्गीकर्तव्यः, स च व्रजेत्यादावपि तुल्य एवेत्यलमतिप्रसङ्गेन । यदि चामन्त्रितस्य तिङन्तेनैकवाक्यता न स्यात्, 'आमन्त्रितं पूर्वमविद्यमानव' दिति (पा. ८.१.७२) सूत्रकारो न ब्रूयात् । तत्रेदमविद्यमानवत्वे प्रयोजनम् । निघातादयो माभूवन्निति निघातादयश्चासमानवाक्यत्वादेव न भविष्यन्ति, किमविद्यमानवद्भावेन ।

न चैतद्वार्तिककारो मन्यते । सोऽपि ह्यविद्यमानवद्भावस्य प्रयोजनानि पठति अविद्यमानवत्वे प्रयोजनमामन्त्रितयुष्मदस्मदादेशातिङ्निघाता इति । भवतु नाम सामानाधिकरण्येन वैयधिकरण्येन वा यथाकथंचिदाश्रियमाणानामाख्यातानामाख्यातं प्रति विशेषणत्वमुपलक्षणत्वं हेतुमत्वमवधिभावो वा समुच्चयोऽप्येवमेवोपपद्यताम् । साध्यसाधनभावस्तु नोपपद्यते, विरुद्धरूपयोरर्थयोरेकरूपेण शब्देनाभिधानात् । यथाऽयं दण्डो हरानेन फलानीत्यत्रायं दण्ड इत्यनेन रूपेण दण्डशब्दो दण्डार्थमन्तर्भूतास्तिक्रियमुपादातुमीष्टे । अनेनेत्ययं च शब्दः करणरूपेणैव वस्तुसामान्यमभिदधत् प्रत्यक्षेणोपादत्ते, न रूपान्तरेण प्रकरणात्तु दण्डे प्रतिपत्तिः । तथेहापि पचति धावतीत्यादिराख्यातसाध्यभूतां क्रियामभिधत्ते, तामेव च सिद्धां साधनत्वमापन्नामनेनैव रूपेण वक्ष्यतीत्यसंभवः । नासंभवस्साध्यत्वेनैव साधनत्वात्, यदेवं हि क्रियायास्साध्यमानत्व-

मनिदन्तानिर्देश्यं परिनिष्ठितं रूपं तेनैव साधनभावं प्रतिपद्यते; न रूपान्तरेण तस्याभावात्ऌकारोऽपि चैतां साध्यतया भवन्ति कर्तृभावेनाभिधत्ते पचति, भवतीति ।

ननु किमन्यद्भवनं पचतिक्रियायास्साध्यता व्यतिरेकि, किंवा तद्व्यतिरिक्तं कर्तृत्वं, येन साध्यसाधनभावोऽवकल्पेत । उच्यते; योऽयमस्याः कारकसंबन्धः, कारकव्यापारविषयता न कारकाणि शशविषाणवत्पराकरोति । शक्यते संपादयितुं तेभ्यस्संपद्यितुम्भवति; तदस्याः कारकसंबन्धलक्षणं साध्यमानत्वमेव रूपं भवनमभिधीयते । पचति क्रियाभवनं निर्वर्तयत् कारकेभ्यो निवृत्तिं प्रतिपद्यते । कारकाणि व्यापारवन्ति करोतीत्यर्थः । यत्पुनरस्या विशेषणरूपं यागादिधर्मकं पक्तिरूपं पचत्येकशब्दवाच्यमनन्यसाधारणं, तेनैषा कर्त्री संपद्यते, तदेवमनन्यसाधारणेन कर्त्री संपद्य साध्यात्मना भवति, क्रियारूपत्वेन भवति पचति, भवति साध्यत्वं लभत इत्यर्थः; अथवा प्रयोगात्मको योऽधिश्रयणादिव्यापारस्तैरेषा भवनक्रियारूपतामुपयाति । फलभूतेन विक्लित्यात्मना भवितृरूपं कर्तृत्वं, तेन भवति पचति इत्ययमर्थः पक्तिरधिश्रयणाद्यात्मना भवति, अधिश्रयणाद्योऽस्याः प्रवृत्ता इति यावत् । अधिश्रयणादिरूपेण वा भवितृत्वं पक्तिरूपेण भवनक्रियात्वं तेनाऽयमर्थः अधिश्रयणादयः पक्तिरूपतया भवन्ति विक्लितिस्सञ्जातेति यावत् । अथवा शब्दवाच्यो बुद्धिपरिगतं यद्रूपं तेन कर्तृत्वमस्यां बाह्यसंपत्तिरूपत्वेन भवनरूपत्वं बाह्यरूपेण भवितृत्वं बुद्ध्यात्मना भवनरूपत्वमिति; यदि वा सामान्यात्मना कर्तृत्वं विशेषात्मना भवनरूपतेत्युपपद्यते क्रियायां कारकत्वम् ।

ननु चोक्तं न लकारः सिद्धवदभिधानेन विना कर्तृभावेनेमां प्रतिपादयितुमुत्सहते, ततश्च सिद्धत्वेनाभिधाने पुनरपि विरोधः । नैवम्, यदेव पचतिक्रियायास्स्वभावभूतमात्मीयरूपं साध्यतालक्षणं तेनैव रूपेण सा कर्तृत्वमुपगता लकारेणोच्यते । सिद्धत्वावभासः कुत इति चेत्, लकारस्तां कर्तृभावेन प्रतिपादयितुं प्रवृत्तस्सिद्धत्वेनावगमयति, न तु साध्यायाः क्रियाया सिद्धत्वापत्तिः । अतो रूपान्तरापत्तेः नास्ति विरोधः; यथा—चोरस्य रुजतीति धात्वर्थ एव रोगलक्षणः, कर्त्रन्तराश्रयणात् कर्तृभावमुपयाति; साध्यात्मन एव चास्य कर्तृत्वम् । न च सिद्धताप्राप्तिः कर्तृत्वेन प्रतीयमाना सिद्धतयाऽवभासते तथा क्रियाऽपि न सिद्धतया लकारेणाभिधीयते । अपितु साध्यायामेव तस्यां तदधिकरणात् कर्तृशब्दैरभिधीयते इति; अथवा एकस्यैव वस्तुनो नानारूपाश्शक्तयो विरुद्धविरुद्धस्वभावा लोकयात्रां कल्पयन्ति । ततोऽस्य सर्वशब्दभावस्य वाचकशब्दः कश्चित्, सिद्धात्मिकां शक्तिवृत्तिमवलम्बते कश्चित्, तदेवंसिद्धसाध्यताशक्तियुक्तं वस्तु शब्दाभ्यामभिधीयमानं न विरुध्यते । अनेकशक्तियुक्तत्वात् पचतीत्यनेन तदेव साध्यत्वेनावगतं भवतीति लकारस्साध्यत्वेनाभिधत्ते; सर्वशक्तिविरहितं वा वस्तु सकलविकल्पोल्लेखरहितत्वात् । तस्य तु शब्दा एव स्वमहिम्ना नानाविधबुध्युपजननहेतवश्शक्तिं संनिवेशयन्ति; शक्त्याविष्टमिव व्यवहारगोचरतां नयन्ति । तेन शब्दाभ्यामेव सिद्धसाध्यताशक्त्याधानादखिलविकल्पीकृता-

त्मकमपि तद्वस्तु सिद्धसाध्यभावेनोपदिश्यते । भवति पचतीत्येकेन शब्देन सन्निवेशितसाध्यताशक्तियुक्तमभिहितमितरेण तु तदेव शक्त्यन्तरारोपेण प्रकाश्यत इति नास्ति विरोधः ।

यदि वा न पदस्य पदरूपादेवाधिकार्थता किं तर्हि वाक्यरूपात् ? तद्यथा— पुरुष इति पदकाले पुरुषो व्यतिरिक्त उच्यते । यदा तु राज्ञः पुरुष इति विशेषसन्निधौ प्रयुज्यते तदा विशिष्टस्य पुरुषार्थस्य गतिर्न पुरुषस्येति वाक्यकालेऽधिकस्य धर्मस्य प्रादुर्भावः तथा पचतीति नैकस्मादेव पदरूपात्कर्तृत्वम् । यदा भवतीति पदान्तरसन्निधिस्तदापरत्वे साधनमदृष्टवाक्यकाले पुरुषस्यैव व्यतिरेक उपजायत इति । यथाऽपि व्यपदेशिवद्भावेनाभिन्नस्यापि धातोरवयवप्रथमैकाज्व्यपदेश इयायेत्यादौ प्रवर्तते, तथा बुद्धिभेदकल्पनया आख्यातवाच्यस्यार्थस्य भेदेऽपि क्रियाकारकादिव्यपदेशाः प्रवर्तन्ते । ततश्च पचतीत्यत्रापि कदाचिदपरा तदतिरेकिणी भवनक्रिया कश्चिदपरो वा कर्ता विरोधहेतुरस्ति । अपि तु सैव व्यपदेशिवद्भावेन भवनक्रियारूपतां पितृत्वं च दर्शयन्ती चकास्ति । एतेन पश्य मृगो धावतीत्यादावपि सिद्धसाध्यत्वयोरपि चैकस्याप्यर्थस्य विषयभेदेन द्विधर्मत्वं न विरुध्यते । यथा राज्ञः पुरुषस्य पुरुष इति पुरुषश्शेषी भवति, शेषश्चेति राजानं विशेषोऽविचलितस्वार्थश्शेषतामापद्यते । एवं च धावतीति मृगे कर्तरि साध्यभावं प्राधान्येनाजहत् सरणं दृशावङ्गत्वं साधनत्वं चोपैतीति न कश्चिद्विरोधः । अथवाऽयमर्थः ; साधनमिदमयं साध्य इति रूपं सिद्धमात्रमेतत् , यथा पदे अयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इत्येक एवासावर्थः । अविशिष्टो विशिष्टो वा वाक्यविशेषयोर्गृहीतव्यः, यथा—मुण्डयति, कुट्टयति, सूत्रयति, चर्चयतीति । तत्र मुण्डयति माणवकं मुण्डिः केशच्छेदनवचनः । तस्य तु व्युत्पत्तिः मुण्डं करोतीति सामान्यप्रवृत्तिविशेषं मुण्डशब्दोऽवस्थापयति । करोति विशेषो यस्मिन् णिजुत्पद्यते, न करोतिमात्रम् । अन्ये पुनः केशच्छेदनादिवचनान्मुण्डादीनध्यवस्यन्ति यथोक्तम् । अथवा मुण्डादयो धातवः । मुण्डयतीति चैतस्मिन्नर्थे कुट्टयतीति च प्रयुञ्जते कुट्टयति माणवकमिति ; यथाच मुण्डं करोतीति प्रयुञ्जते, नैवम् ; कुट्टं करोतीति कुट्टशब्देन हि करोति, विशेषो न लक्ष्यते ; किंतु छिदादिविशेषमवलक्ष्यमाणोद्देशविभागं कुट्टिरेवोपादत्ते । एवं सूत्रं करोतीति सूत्रयति, चर्चां करोतीति चर्चयति । सूत्रेण चर्चया वा करोतौ विशेष्यमाणे क्षरणं परिभाषणं वा विशेषेणोपादीयते । स एव च कदाचित् क्षरणविशेषः परिभाषणविशेषो वा नष्टोद्देशविभागः उपादीयते, यथा सूत्रस्रवणे सूत्रयति, चर्चपरिभाषणे चर्चयतीति ।

एवं पश्य मृगो धावतीति इदमत्र साधनपदमिदमत्र साध्यपदमिति उत्प्रेक्षैषा । इदं त्वर्थतत्वं नात्र सरणं न दर्शनं न मृगः । किं तर्हि मृगकर्तृको दृशिकर्मसरणविशेषोऽयं तत्रैकार्थत्वादेकमेवेदं वाक्यमित्यस्ति द्वयोस्तिङन्तयोरेकस्मिन् वाक्ये । ततश्च पचति करोतीत्यादावपि पाकं करोतीतिवत् साध्यसाधनभावेन संबन्धोऽस्त्येवेति न कश्चिद्विरोधः । अन्ये पुनर्न मन्यन्ते कस्यचिदपि बाह्यस्य वस्त्वात्मनोऽसंभवात् । भावभूतवस्तुशून्यमेवेदं जगत् , ततो बुद्धीनामेव

तथाभूतव्यवहारोपजननिबन्धनत्वम् । बुद्धय एव हि लिङ्गसाध्यतारूपमुपदर्शयन्त्यः शब्दात्प्रवर्तयन्ति । ततश्च स्वमहिमोल्लसितनानाविधबुद्धिसमुपनीतभेदनकालपरिकाकारपरिगतोऽयं मायेन्द्रजालसदृशो व्यवहारः प्रवर्तत इति न कश्चिदपरं वस्तु यस्य लिङ्गस्य साध्यलक्षणविरोधापत्तिः । तथाहि ; बुद्धिमाकारभेदवर्तीमेके क्रियां मन्यन्ते । ते हि स्वमात्राभिरपर्यवसितविषयनिर्भासाभिः अन्तस्तत्त्वादिभिरिव बहिरर्थनिबन्धनामर्थक्रियां साधयन्ति । न तदर्थं दर्शनाभिनिवेशादस्माकं आराद्वीयस्समुत्सारयन्ति प्रत्ययव्यक्तयो हि परकृतवाक्यार्थसंस्पर्शाद्बाह्यार्थवत् तासु नास्त्यर्थक्रियासु यथासामर्थ्यमुपजायमानाः प्रतीताशङ्काविषयपरिगमनाद्यवस्थासु तदा सामर्थ्यक्रिया सामर्थ्ये किमर्थमन्यपदार्थरूपमनुभूयेत इत्यत्र चूर्णाविरोधं दर्शयति । इदं किलोक्तं भाष्ये— कृदभिहितो भावः क्रियया समवायं गच्छति, पाको वर्तत इति ; तिङभिहितस्तु न गच्छति ।

न हि भवति पचति पठतीति अत्राऽयं समाधिः ; यथा क्रियोपन्यस्ता तथाभूता समवायं न गच्छति, विशेषयोस्समवायो नास्ति, सामान्ययोरस्त्येव । अस्ति स मे रोचते, असि त्वमीशिषे, नास्ति रमे, भवति पचति करोतीति । तत्रैतच्छक्यते वक्तुम् । यत्रान्या च क्रिया भवति यत्र तु खलु सैव सा क्रिया तत्र कथं ? यथा—भवेदपि भवेत्, स्यादपि स्यादिति । अस्ति च लोके एवंभूतः प्रयोगः । अपि भवेदेतद्देवदत्तस्यापि स दिवसस्याद्यत्रेदं भवेदिति देवदत्तस्य च वर्तमानकालां सत्तामविनाशं प्रार्थयमान एतत्प्रयुङ्क्ते ; अपि भवेदेतत् भवेद्देवदत्त इति । अत्राप्यनत्वमस्ति कुतस्साधनभेदात्कालभेदाच्च हि कस्यात्र भवतेर्भवतस्साधनस्सर्वकालश्च प्रत्ययः । अपि भवेदित्यत्र यो भवति तत्र देवदत्तसत्ता न प्रकृत्यर्थः । किं तर्हि प्रत्ययार्थः प्रार्थनैव लिङिति सर्वकालत्वं कालविशेषस्यानाश्रितत्वात् । अपरस्य बाह्यसाधनं वर्तमानकालस्य प्रत्ययो भवति । तस्य बाह्यं साधनं द्रव्यं देवदत्त इत्यर्थः, देवदत्तसत्ता तु प्रकृत्यर्थः, वर्तमानसत्ता तु देवदत्तस्य प्रार्थ्यत इत्यनुपात्तकालविशेषः । शास्त्रे लिङ् स्वरूपादेव वर्तमानकालेऽवतिष्ठते, यथा तव्यादयो भविष्यन्ति, कर्तव्यः कट इति । स्वभावाचार्थानां व्यवस्थेति भाष्ये कालाधिकारः प्रत्याख्यातः । एवं स्यादपि स्यादित्यत्रापि स्वाभाविकं नानात्वं साधनकालभेदेन प्रतिपद्यत इति ।

नन्वस्त्यादयोऽपि निपाताः, ते चाख्यातस्वरूपत्वात् कारकाणि विशिंषतः कालं पुरुषं संख्यां न व्यभिचरिष्यन्ति ; यत्र व्यभिचारस्तत्र कथम् ? तथा हि, भवति पक्ष्यति भवत्यपाक्षीद्यूयुजस्त्वमसीति कालव्यभिचारः ; भवतु गच्छाम्यहमिति पुरुषव्यभिचारः । भवतु तथैव मण्डूकाः पच्यन्तामिति संख्याव्यभिचारः । भवतु नाम द्रक्ष्यसीति कालपुरुषव्यभिचारः । भवतु भविष्यन्ति जीवतो धानानीति कालसंख्याव्यभिचारः । अस्त्वगमाम वोषादिति कालपुरुषसंख्याव्यभिचारः । लोके चैवंभूता वाचोयुक्तिरस्ति प्रयुङ्क्ते हि लोकः । अस्ति गच्छामो वयमिति एवमादिः तत्रास्तीत्येकवचनमुपलभ्यते । तेन मन्यामहे गमेरेवैकत्वाश्रयस्य कर्तृत्वं, न वयमिति बहुत्वाश्रयस्य । तदेवं सामान्यक्रियया विशेषक्रियाणां कर्तृत्वेनाभिसंबन्धात् अस्त्यनयोस्साध्य-

साधनभावः । विशेषक्रियायामपि क्वचित्कर्मत्वेन संबन्धो दृश्यते, पश्य धावति, पश्याम उदाह्रियन्ते, मन्ये यास्यसि स्मरसि वत्स्यामः न मर्षयामि याजयिष्यति आशंसे युक्तोऽधीयेति । करणादिभावश्च तिङन्तानां न विद्यते, पचति पठतीति ; अत्र तु विद्यत एव संबन्धः, सर्वनाम्ना परामर्शात् । न चेह वाक्यभेदः सर्वथैव तदनुपलब्धेः । तत्र हि खलु वाक्यभेद उपेयते ; तत्रासौ परामृश्यमानोऽन्या बुद्धिरुल्लिखति । न चेहोल्लेखवान् वाक्यभेदो बुद्धावुपलभ्यते ; तस्मादेकवाक्यत्वमेव । अत एवाभिजानासि देवदत्त यत्काश्मीरेषु वत्स्यामः, तत्रौदनं भोक्ष्यामहे इति 'विभाषासाकांक्षे' (पा. ३.२.११४) इति सर्वनाम्ना परामर्शात्साकांक्षत्वोपपत्तेः । तत्रेत्यनेनानुसंधीयमानत्वाल्लृटो लङश्च विकल्पः प्रवर्तते । स स्वपित्येष बुध्यते, सोऽस्तमयतेऽयमुदेतीत्यत्र तु परस्परं वा आख्यातयोर्लक्ष्यलक्षणभावः । सह वा सर्वैरेव कालविशेषादिकं लक्ष्यत इत्येकपरत्वादेकवाक्यतैव । यथा—

कुमुदानि प्रबुध्यन्ते शतपत्राणि शेरते । शकटं गाहते व्योम मातृमण्डलमुज्झति ॥

हन्तीति पलायत इत्यादौ त्ववस्थित एव हेतुहेतुमद्भाव इति न द्योत्यते ; नन्वपूर्वं क्रियते पचति पठतीत्यत्रापि प्रसङ्गात् । एते तावदवध्यवधिमद्भावो यावदादौ समुच्चयादौ चादयश्च व्याख्याताः । तदेवं सूत्रकारस्य भाष्यकारस्य च दर्शने अस्तिक्रियायाः क्रियान्तरेण संबन्धः । वार्तिककारस्तु युष्मदस्मदादेशनिघाताद्यर्थमाख्यातं साव्ययकारकविशेषणं वाक्यमेकतिङ्वाक्यमिति अन्यदेव लौकिकात्पारिभाषिकं वाक्यलक्षणमारभते । न च तेन लौकिको व्यवहारस्सिध्यतीत्युपेक्ष्यते । तदुक्तम्—

निघातादिव्यवस्थार्थं शास्त्रे यत्पारिभाषिकम् । साकांक्षावयवं तेन न सर्वं तुल्यलक्षणम् ॥

एतेन भिन्नाभिन्नप्रवक्तृकानेकवाक्योपकल्पितैकवाक्यस्थानामपि क्रियाणां परस्परमभिसंबन्धो व्याख्यातः । स भिन्नप्रवक्तृकत्वे यथा—

कुशलं तस्या जीवति कुशलं पृच्छामि जीवतीत्युक्तम् ।
पुनरपि तदेव कथयसि मृतां नु कथयामि याश्वसिति ॥

अभिन्नवक्तृत्वे यथा—

अस्वच्छे सलिलात्मनि प्रतिफलेद्देवे त्रियामापतौ ।
पीयूषाकृति पर्यवस्यति किल ज्योत्स्नेति तत्वान्तरम् ॥
तिग्मं धाम चिरं चकास्ति दिवि तत्त्रास्ति दिव्यः पुमान् ।
यं विज्ञातवतां त्रुटन्ति निखिला भूयो भवग्रन्थयः ॥

प्रबन्धाङ्गमवान्तरवाक्यं प्रकरणम् । तत्त्रिधा—प्रस्तुतं, कल्पितं, आकस्मिकञ्च । तेषु प्रस्तुतं द्विधा—अङ्गं वर्णकञ्च । तयोरङ्गं यथा—

अथाजिनाषाढधरः प्रगल्भवाग्ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं शरीरबन्धः प्रथमाश्रमो यथा ॥ इत्यत आरभ्य,

इतो गमिष्याम्यथवेति वादिनी श्रमालसा च स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितस्समाललम्बे वृषराजकेतनः ॥ इति यावत् ।

अत्रहि— तमातिथेयीबहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥

इत्यादेः प्रकरणान्तस्य कथाशरीरत्वमवगम्यते । वर्णको यथा—

असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साऽथ वयः प्रपेदे ॥ इत्यत आरभ्य,

सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव ॥ इति यावत् ।

अत्रहि— उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम् ।
बभूव तस्याश्चतुरश्रशोभि वपुर्विभक्तं नवयौवनेन ॥

इत्यादेः प्रकरणार्थस्य पार्वतीरूपयौवनलावण्यवर्णनाद्यवगम्यते । कल्पितं द्विधा—साभासं निराभासं च । तयो स्साभासं यथा—

अभूदभूमिः प्रतिपक्षजन्मनां भियान्तनूजस्तपनद्युतिर्दितेः ।
यमिन्द्रशब्दार्थनिषूदनं हरे हिरण्यपूर्वं कशिपुं प्रचक्षते ॥ इत्यत आरभ्य,

यथोपपत्तिच्छलनापरोपरामवाप्य शैलूष इवैष भूमिकाम् ।
तिरोहितात्मा शिशुपालसंज्ञया प्रतीयते संप्रति सोऽप्यसःपरैः ॥ इति यावत् ।

अत्रहि— विनोदमिच्छन्नथ दर्पजन्मनो रणेन कण्ड्वास्त्रिदशैस्समं पुनः ।
सरावणो नाम निकामभीषणं बभूव रक्षः क्षतरक्षणं दिवः ॥

इत्यादिप्रकरणार्थः कल्पितोऽपि पुराणेषूपलम्भासंभवाच्च तथात्वेनावभासते । निराभासं यथा—

ततः किराताधिपतेरलघ्वीमाजिक्रियां वीक्ष्य विवृद्धमन्युः ।
स तर्कयामास विविक्ततर्कश्चिरं विचिन्वन्निव कारणानि ॥ इत्यत आरभ्य,

इयं च दुर्वारमहारथानामाक्षिप्य कीर्तिं महतां बलानाम् ।
शक्तिर्ममावस्यति हीनयुद्धे सौरीव तारापतिधाम्नि दीप्तिः ॥ इति यावत् ॥

अत्र हि, मदद्युतिश्यामितगण्डलेखाः क्रामन्तिविक्रान्तनराधिरूढाः ।
सहिष्णवो नेह युधामभिज्ञा नागा नगोच्छ्रायमिवोत्क्षिपन्तः ॥

इत्यादिः प्रकरणार्थः तापसकिरातयुद्धवर्णनायामनाभासमानः काव्यकुशलेन कविना पोद्द्वारेणोपकथ्यते । आकस्मिकं द्विधा—सबीजं निर्बीजं च । तयोस्सबीजं यथा—

अथोपरिष्टात् भ्रमरैर्भ्रमद्भिः प्राक्सूचितान्तःसलिलप्रवेशः ।
निर्धौतदानामलगण्डभित्तिर्वन्यस्सरित्तो गज उन्ममज्ज ॥ इत्यत आरभ्य,

इत्थं तयोरध्वनि दैवयोगादासेदुषोस्सख्यमचिन्त्यहेतु ।
एको ययौ चैत्ररथप्रदेशान्सौराज्यरम्यानपरो विदर्भान् ॥ इति यावत् ।

अत्र हि— गान्धर्वमस्त्रं तदतः प्रतीच्छप्रयोगसंहारविभक्तमन्त्रम् ।
प्रस्वापनं नाम यतः प्रहर्तुर्नचारिहिंसा विजयश्च हस्ते ॥

इति बीजम् । यस्याग्रतः,

प्रियंवदान्प्राप्तमथ प्रियार्हः प्रायुङ्क्त राजस्वधिराजसूनुः ।
गान्धर्वमस्त्रं कुसुमास्त्रकान्तः प्रस्वापनं स्वप्ननिवृत्तलौल्यः ॥

इति फलमुपलभ्यते । निर्बीजं यथा—

सन्ध्याभ्रकपिशस्तत्र विराधो नाम राक्षसः ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥ इत्यारभ्य,

तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीम् ।
गन्धेनाशुचिना चेति वसुधायां निचख्नतुः ॥ इति यावत् ।

अत्र हि— स जहार तयोर्मध्ये मैथिलीं लोकशोषणः ।
नभोनभस्ययोर्वृष्टिं अवग्रह इवान्तरे ॥

इत्यादेः प्रकरणार्थस्याग्रतः फलानुपलम्भादाकस्मिकस्यापि निर्बीजत्वमवगम्यते ।

तादिदमर्थतस्त्रिधा । प्रकरणमभिहितम् । अथ शब्दतोऽपि त्रिधैवाभिधीयते—एकवाक्यमनेकवाक्यमेकानेकवाक्यं च । तत्रैकवाक्यं द्विधा—सानुबन्धं निरनुबन्धं च । तयोस्सानुबन्धं यथा—

स मारुतिसमानीतमहौषधिहतव्यथः । लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः ॥

इति । निरनुबन्धं यथा—

ते हिमालयमामन्त्र्य पुनः प्राप्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥

अनेकवाक्यं द्विधा—आद्युपसंहृतमन्तोपसंहृतं च । तयोराद्युपसंहृतं यथा—

तस्मिन्क्षणे पौरविलासिनीनामीशानसंदर्शनलालसानाम् ।
प्रासादमालासु बभूवुरित्थं त्यक्त्वान्यकार्याणि विचेष्टितानि ॥ इत्यत आरभ्य,
तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तरास्सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ॥

अन्तोपसंहृतं यथा—

स्थाने तपो दुश्चरमेतदर्थमपर्णया पेलवयाभितप्तम् ।
या दास्यमप्यस्य लभेत नारी सा स्यात्कृतार्था किमुताङ्कशय्याम् ॥ इत्यारभ्य,
इत्यौषधिप्रस्थविलासिनीनां शृण्वन् कथाः श्रोत्रसुखास्त्रिनेत्रः ।
केयूरचूर्णीकृतलाजमुष्टि हिमालयस्यालयमाससाद ॥ इति यावत् ।

एकानेकवाक्यं द्विधा—सर्वनामयोजितं विभक्तियोजितं च । तयोस्सर्वनामयोजितं यथा—

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः । इत्यारभ्य,
यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च ।
प्रजापतिः कल्पितयज्ञभागश्शैलाधिपत्यं स्वयमन्वतिष्ठत् ॥ इति यावत् ।

विभक्तियोजितं यथा—

निर्वाणभूयिष्ठमथाऽस्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन ।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या ॥ इत्यत आरभ्य,
सुगन्धिनिश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम् ।
प्रतिक्षणं संभ्रमलोलदृष्टि लीलारविन्देन निवारयन्ती ॥ इति यावत् ।

एतेनैतद्व्यतिरेकोऽपि व्याख्यातः । यथा—

अहपं . . . तिववगासअळज अक्कमणवढ्ढि अमहासि हरं णिव्ठवि
अदक्खिणदिसं सेसदि सामुह पहावि अक्खसुवळं ॥ इत्यत आरभ्य,
तुङ्ग अढोज्झरमुहळे जन्स अकसणमणिगंड से ।
लध्धं तीणणपत्तो तिसवहुण सिढिळत्तणं अनुराओ ॥
इत्याश्वासकपरिसमाप्तियावदिति ।

ननु वर्णसमूहः पदं, पदसमूहो वाक्यं, वाक्यसमूहः प्रकरणमित्याचक्षते । तत्कथमुच्यते एकवाक्यं प्रकरणमवान्तरवाक्यं प्रकरणमिति ? उच्यते, त एव प्रष्टव्याः उच्चरितप्रध्वंसिनामनर्थकानां च वर्णानां समूहस्य पदत्वमर्थवत्तया वर्णयन्ति । वयं त्वेकार्थपरः पदसमूहो वाक्यमित्येव प्रतिजानीमहे । तत्र पदैरपि वाक्यमारभ्यते, वाक्यैरपि च प्रकरणमारभ्यते । पदैरपि च प्रकरणैः प्रबन्ध आरभ्यते । वाक्यैः पदैरपि च तैश्च वाक्येष्वपि वाक्यानि भवन्ति । यथा—

कन्यारत्नमयोनिजन्म भवतामास्ते वयं चार्थिनो ।
रत्नं यत्कचिदस्ति तत्परिणमत्यस्मासु शक्रादपि ॥
कन्यायाश्च परार्थतैव हि मता तस्याः प्रदानादहं ।
बन्धुर्वो भविता पुलस्त्यपुलहप्रष्ठाश्च संबन्धिनः ॥

प्रकरणेष्वपि प्रकरणानि यथा— इन्दुमतीस्वयंवरे मगधेश्वरादिराजवर्णनादीनि । प्रबन्धेष्वपि प्रबन्धा यथा—उत्तरचरितादौ गर्भनाटकादीनि । यदि वाक्यमेव पदसमूहः, कथमाह महावाक्योपनिषदाचार्यो दण्डी,

तैश्शरीरं च वाक्यानामलङ्काराश्च दर्शिताः ।
शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली ॥ इति ।

विधिनिषेधावगतिहेतुर्महावाक्यं प्रबन्धः । तत्त्रिधा—पद्यं गद्यं च मिश्रं च । तेषु छन्दोगतं पद्यं, छन्दस्तु त्रिधा—अक्षरच्छन्दोमात्राच्छन्दोगणच्छन्दश्चेति । तान्यपि प्रत्येकं त्रिधा—समार्धसमविषमभेदात् । तत्राक्षरच्छन्दस्समं यथा—

आशुश्शिशानो वृषभो न इध्मो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एक वीरश्शतँ सेना अजयत्साकमिन्द्रः ॥

अर्धसमं यथा—

नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे ।
भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरति दीर्घमायुः ॥

विषमं यथा—

न नूनमस्ति नोऽश्वः कस्तद्वेद यदद्भुतम् ।
अन्यस्य चित्तमभिसंचरेण्यमुताधीतं विनश्यति ॥

पूर्वोक्तोदाहरणत्रयमपि वैदिकविषयमेव । मात्राच्छन्दस्समं यथा—

वा ओनवुव्वनवुपजिमु नविदव्खिणुवहइवणेनकव्वुनपाधनपादमझहइ ।
कोइलमोरमरालव्हकोलनवाहरइ माएनजाणं इमाहहे केव विरहिणी मरइ ॥

अर्धसमं यथा—

दिणहदिवव्ठहो इति स उप्पिव्जइउ सुरेविओ । अवरणेह मिहइ वरुमादालव्च हि दूरे ॥

विषमं यथा—

जइविव्गव्डहीजइ विवव्डुरव्हु पडुदुव्गमुतरु अरहीजइ विगहणेसूरु ।
विणदीसइ इतो इसु पुरिसु वसदि जहीत ध्रुवव्ठहरहव अव्टदि ॥

गणच्छन्दस्समं यथा—

रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमस्स्पृशे ।
अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः ॥

अर्धसमं यथा—

वपुषा परमेण भूधराणामथ संभाव्य पराक्रमं बिभेदे ।
मृगमाशु विलोकयाञ्चकार स्थिरदंष्ट्राङ्कमुखं नरेन्द्रसूनुः ॥

विषमं यथा—

अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनञ्जयः ॥

तदेतत्त्रिविधमपि महाकाव्येतिहासश्रुत्यादिषु च दृश्यते । अच्छन्दः पदसंतानो गद्यम् । तत्त्रिधा— वृत्तगन्धि चूर्णमुत्कलिकाप्रायं च । तेषु पद्यगन्धवद्वृत्तगन्धि ; तत्त्रिधा–समा (र्ध) सम-विषमभेदात् । तेषु समगणच्छन्दोगन्धि यथा—

पाता .... वासिष्विति ॥

अर्धसमगणच्छन्दोगन्धि यथा—

कुसुमारचय्य च महेन्द्रशासनात् स्वयमुत्पपातेति ॥[1]

एवं मात्राक्षरच्छन्दोपि द्रष्टव्यः ।

---

[1] न विषमगणच्छन्दोगन्धेरुदाहरणमत्र ।

अनाविद्धललितपदं चूर्णम्; तत्त्रिधा—गुरुबहुलं, लघुबहुलं, मिश्रं चेति। तत्र गुरुबहुलं यथा—

त्रैलोक्यैकप्रदीपस्य भगवतस्सहस्ररश्मेरर्चिश्शिखासहस्रानिष्च्युतोऽञ्जनराशिरिव शार्वरस्तोमस्त्वायते।

लघुबहुलं यथा—

व्यपगतघनपटलमचलजलनिधिसदृशवपुरम्बरतलं विलोक्यते।

मिश्रं यथा—

महाभागसुश्लिष्टगुणतया रमणीय एष सन्निवेशः। कुतूहलिनी च नो भर्तृदारिका वर्तते, यतस्तस्याममभिनवो विचित्रः कुसुमेषुव्यापार इति।

अललिताविद्धं वाक्यमुत्कलिकाप्रायम्। तदपि त्रिधा—ललिताविद्धपदवाक्यभेदात्। तत्र ललितं यथा—

अयं ललाटतटघटितविकटकीनाशतोरणो त्रिशूलायमानभीषणभ्रुकुटिः क्रुद्धो भीमसेन इत एवाभिवर्तते।

अविद्धपदं यथा—

एसो खु वज्जनिग्घाददारुणचपेडामोडि पाडिदाने अणरतुरगमज गळुग्गारभरिदगळ गुहागंभीर गंगिरोळं ळिगव्वूरण संदस्सदंभपडिखाभो अहेसवि अ णव्ठा णव्ठाविदाअव्णजणणिहा ओदुं सदूळो कअंत ळीळाइदं करेइ।

अविद्धवाक्यं यथा—

यस्य च मदकलकरिकुम्भपीठपाटनमाचरतो लग्नस्थूलमुक्ताफलेन दृढमुष्टिनिपीडनान्निष्च्युतधाराजलबिन्दुदन्तुरेणेव कृपाणेन कृष्यमाणा सुभटोरः कवाटपुटघटितकवचसहस्रान्धकारमध्यवर्तिनी करिकरटतटगलितमदजलासारदुर्दिनास्वभिसारिकेव समरनिशासु समीपमसकृदाजगाम राजलक्ष्मीः। तदेतत्त्रिविधमपि आख्यायिकासु कथासु मधुमल्लिकादिषु दृश्यन्ते।

गद्यपद्यव्यायोगो मिश्रम्। तत्त्रिधा—पद्यप्रधानं, गद्यप्रधानं, तुल्यरूपं चेति। पद्यप्रधानं त्रिधा, सजातीयेन विजातीयेनोभाभ्यां च। तत्र सजातीयेनेतिहाससुभाषितकोशादौ, विजातीयेन प्रस्थानसेतुबन्धनविवरणादौ, उभाभ्यां भारतीयदशरूपकलक्षणादावस्य प्रयोगो दृश्यते।

गद्यप्रधानमपि तद्वदेव त्रिधा—तत्र सजातीयेन पञ्चतन्त्र चकेट . . दौ,† विजातीयेन कात्यायनीय पाणिनीय प्राकृतलक्षणादौ, उभाभ्यां मयूरशुकमार्जारिकादावस्य प्रयोगो दृश्यते।

तुल्यरूपमपि त्रिधैव—सजातीयाभ्यां विजातीयाभ्यां सजातीयविजातीयाभ्यां चेति। तत्र सजातीयाभ्यां चम्पू . . मीक्षास . . कादौ,† विजातीयाभ्यामपि मारसाम्बगोविन्दाख्यानकादौ सजातीयविजातीयाभ्यां नाटकनाटिकादि विदग्धमुखमण्डनादावस्य प्रयोगो दृश्यते।

---

† अत्र मूलमातृकाकोशे ग्रन्थपातः।

प्रकृत्यादिविभागेन सैष द्वादशधा स्थितः ।
अर्थावसायप्रसवनिमित्तं शब्द उच्यते ॥

ननु च वर्णसमूहश्शब्द इति वक्तव्ये किमर्थमुच्यते प्रकृत्यादयश्शब्दा इति ? यदाह कः पुनश्शब्द इति गकारौकारविसर्जनीया इति भगवानुपवर्षः । नैवं, अर्थमर्थावसायप्रसवनिमित्तं शब्दः इष्यते । अथ गौरिति न प्रसवादिनिमित्तेषु जातिक्रियागुणद्रव्यादीनां कः शब्दः, येनोच्चारितेन अर्थः प्रतीयते, तर्हि वर्णा एव शब्दः । उच्चारितेषु हि गकारौकारविसर्जनीयेषु गौरिति सास्नादिमानर्थः प्रतीयते, सत्यमेतत् । किन्तु वर्णाः प्रत्ययनिमित्तमेकैकशो वा स्युः, समुदिता वा । न तावदेकैकशः, द्वितीयादिवर्णोच्चारणवैयर्थ्यप्रसङ्गात् । नापि समुदिताः, उत्पत्तिपक्षे यौगपद्येनानुत्पत्तेः, उत्पन्नस्य च क्षणादूर्ध्वमनवस्थानात्; अभिव्यक्तिपक्षे क्रमेणैवाभिव्यक्तेः, अभिव्यक्त्यनन्तरमेव च वायुभिस्तिरोधानात् कथं समुदायः एकस्मृत्युपारूढानां च वर्णानां वाचकत्वे क्रमस्मरणे नियमनिमित्ताभावात् । उक्तक्रमेण च स्मरणदर्शनात् सरोरस इति प्रतीतेरविशेषः प्राप्नोति । वक्तृभेदे चार्थप्रत्ययप्रसङ्गः । अतो न वर्णाश्शब्दः, किन्तु वर्णसमूहाभिव्यङ्ग्यस्फोटलक्षणोऽकार्थात्मा शब्द इति । स एव स्फुटत्यस्मादर्थ इत्यर्थावसायप्रसवनिमित्तमिष्यते । कथं तर्हि शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्नुच्यते ? अभिव्यञ्जकाभिव्यङ्ग्ययोरभेदोपचारात् । नन्वभिव्यञ्जकत्वेऽपि न वर्णानामर्थवत्ता भवितुमर्हतीति ? नैवम् , वर्णसमूहात्मनो ध्वनेरेवाभिव्यञ्जकत्वात् । किं पुनर्वर्णास्सर्वथैव नार्थवन्तः ? पृथक्त्वेन तावन्नार्थवन्तः, न हि प्रतिवर्णमर्था उपपद्यन्ते ।

ननु च धातुप्रातिपदिकप्रत्ययनिपातेषूपलभ्यन्ते—धातुषु इण् - एति, ऋ - इयर्तीति ; प्रातिपदिकेषु अ इशार्ङ्गी, उ ब्रह्मेति ; प्रत्ययेषु भ्रमे धूः भूः, प्राग्दीव्यतोऽण् कापटव इति ; निपातेषु अ अवेहि, उ उपस्करोति । नैते वर्णाः, अपितु शब्दाभिव्यक्तिहेतव एकवर्णा एकध्वनिहेतवश्शब्दशब्दवाच्याः, न तूपचारतोऽपि वर्णसमूहश्शब्दः । नैवम् , अर्थाभिव्यक्तिहेतुश्शब्दः, शब्दाभिव्यक्तिहेतुर्ध्वनिः । स तु कश्चिदेकवर्णः, कश्चिदनेकवर्णः, एकस्मिन्नेव वा समूहारोपणं सामर्थ्यातिशयात् यथैकापूपीति । यदि ह्येकस्मिन्नपूपे समूहो नारोप्यते स समूहाभावादेकापूप इत्येव स्यात् , न त्वेकापूपीति । कथं पुनरेकस्मिन् समूहारोपणं ? व्यपदेशिवद्भावात् । अन्यथा अनुपाय अरेत्यादौ प्रथमत्वेकात्त्वयोरभावात् द्विवचनाभावः । यद्येवमन्येऽपि वर्णास्समूहारोपणेनैव ध्वनयो भवितुमर्हन्ति ? नार्हन्ति, कुतः, शब्दशक्तिस्वाभाव्यात् । यथा समानमीहमानानामधीयानानां च केचिदर्थैर्युज्यन्ते, तथा धातुप्रातिपदिकप्रत्ययनिपाता एवैकवर्णास्समूहारोपणेनैवार्थवत्त्वाय ध्वनिव्यपदेशं लभन्ते, न पुनरन्ये । स्वाभाविकं चैतत् ।

न च स्वभावाः पर्यनुयोगमर्हन्ति ; इतस्तर्ह्यर्थवन्तो वर्णाः । वर्णव्यत्यये वर्णविपर्यये वर्णापाये वर्णोपजने वर्णविकारे वाऽर्थान्तरं गम्यते । वर्णव्यत्यये कूपः, सूपः, यूपः, इति ।

वर्णविपर्यये कमलं, लमकः, मलकः, इति । वर्णापाये शमकः मशक इति । वर्णोपजने अक्षः, प्लक्षः, पक्षः, इति । वर्णविकारे नीरं, नीलं, नीडमिति । तत्र कूप इति ककारेण कश्चिदर्थो गम्यते, सूप इति सकारव्यत्ययेऽर्थान्तरं, यूप इति तु सकारस्य ककारस्य वा यकारस्य व्यत्यये कूपात् सूपाच्चार्थान्तरमिति । तेन मन्यामहे यः कूपे कूपार्थस्स ककारस्य, यस्सूपे सूपार्थस्स सकारस्य, यो यूपे यूपार्थस्स यकारस्येति । यदि तु समुदायस्यायमर्थो भवेत्, कूपादिसमुदायस्य यूपादिषु भूयस्त्वाद्भूयिष्ठः कूपार्थस्सूपे स्यात्; सूपार्थश्च कूपे, सूपार्थश्च यूपे, यूपार्थश्च कूपे, सूपार्थश्च यूपे, यूपार्थश्च सूप इति; एवं वर्णविपर्ययेऽपि क्रमोत्क्रमयोस्समुदायाविशेषात्, कमलः, मलकः, लमक इति प्रत्ययाविशेषः प्राप्नोति । न हि तत्र तेभ्यो दशान्तेभ्यो वा तदपरिच्छेदे पलाशतः खदिरतो वा नाऽवधारणे समुदायस्य भेदो भवति, वर्णापायेऽप्येकाद्यवयवविरहे समुदायस्यानन्यत्वात्, मशकः, शकक इति नार्थान्तरं गम्येत । भिन्नकर्णपुच्छोऽपि श्वा श्वेव न चाश्वतर इति, वर्णोपजनेऽप्यक्षः, पक्षः, प्लक्ष इति प्रत्ययविशेषो न स्यात् ।

न हि सूनोच्छेदे केशोद्गमे वा युवतिव्यक्तेरन्यतायुक्तिमती; एवं वर्णविकारेऽपि नीरं, नीलं नीडमिति नार्थान्तरप्रतीतिर्जायेत । न ह्यवलिते वलिवति रञ्जितकेशपाशे वा विष्णुमित्रादेः स्वरूपान्यत्वं भवति । वर्णव्यत्ययविपर्ययापायोपजनविकारेषु चार्थान्तरदर्शनान्मन्यामहे अर्थवन्तो वर्णा इति । वर्णार्थवत्त्वे हि वर्णव्यत्ययविपर्ययापायोपजनविकाराः कारणमर्थान्तरोपलब्धेर्जायन्ते ।

अत्रापि ब्रूमः य एते त्वया वर्णानामर्थवत्तायां हेतव उपन्यस्ता वर्णव्यत्ययादयः तेषु कूपस्सूपो यूप इति सङ्घातान्तराण्येवैते अर्थान्तरे च वर्तन्ते । यदि हि वर्णव्यत्ययादिकृतमर्थान्तरगमनं स्यात् भूयिष्ठः कूपार्थस्सूपे स्यात् ककारमात्रस्यैव व्यत्ययात् । सूपार्थश्च कूप इति समानं पूर्वेण । यतस्तु न किंचित् कूपादीनां सूपादिष्वतोऽन्वयाभावान्मन्यामहे सङ्घातान्तराण्येवैतान्यर्थान्तरेषु वर्तन्त इति, एतेन वर्णविपर्ययादयोऽपि व्याख्याताः । तान्यपि हि अर्थान्तरवर्तीनि सङ्घातान्तराण्येवेति । इदं खल्वपि भवता वर्णानामर्थवत्त्वं ब्रुवता साधीयोऽनर्थकत्वं द्योतितम् । यो हि मन्यते यः कूपे कूपार्थः स ककारस्योपशब्दस्तस्यानर्थकत्वं स्यात् ।

ननु च समुदायस्यार्थवत्त्वे समुदायस्यैकदेशस्य विनाशे समुदायस्य कारणाभावे कार्याभावः इति विनाशो वाऽभ्युपेयते, छिन्नकर्णपुच्छश्वन्यायादपि विनाशो वा किञ्चातः; विनाशपक्षे समुदायाभावादर्थाभावप्रसङ्गः । पक्षान्तरेऽपि स एवार्थो न त्वर्थान्तरम्; ततश्च कथं श्लोकः शोकः, लोकः, ओकः, कः, इत्यर्थान्तरप्रतीतिः उक्तमत्र । समुदायान्तराण्येवैतान्यर्थान्तरेषु वर्तन्ते । भवेदेतत् यत्रार्थान्तरं गम्यते । यत्र तु स एव सोऽर्थस्तत्र कथं, यथा—उदकं, दकं, कं, इति । इमान्यपि सङ्घातान्तराण्येवैकार्थवृत्तीनि; यथा—कन्दुः, कोष्ठः, कुसूल इति क्रमात्तस्य चार्थवत्त्वं ब्रुवता त्वयैव दकारोकारयोरानर्थक्यमुक्तं भवति । कश्चैवमाह—वर्णव्यत्ययविपर्ययापायोपजनविकारेष्वर्थान्तरदर्शनमेव; यतः श्यामा, रामा, वामा, इति वर्णव्यत्ययो नार्थव्यत्ययः । तर्कः,

सिकता, सिंह इति वर्णविपर्ययो नार्थविपर्ययः। सन्ति, स्यन्ति, घ्नन्तीति वर्णापायो नार्थापायः। आस्थात्, अवोचत्, सञ्चस्कारेति वर्णोपजनो नार्थोपजनः। घातयति, क्षिणोति, रोपयतीति वर्णविकारो नार्थविकारः। तेन मन्यामहे वर्णव्यत्ययादिष्वप्यनर्थान्तरगमनादनर्थका एव वर्णा इति। इतस्तर्ह्यर्थवन्तो वर्णाः ; यदेषां सङ्घाता अर्थवन्तः। येषां ह्यवयवा अर्थवन्तस्त एव समुदायादर्थवन्तः ; तद्यथा— एकश्चक्षुष्मान् पश्यति, तत्समुदायश्शतमपि पश्यति। एकतिलस्तैलं प्रसूते, तत्समुदायः खारीशतमपि प्रसूते। येषां पुनरवयवाः नार्थवन्तस्तत्समुदाया अपि नार्थवन्तः। तद्यथा—एकोऽन्धो न पश्यति, शतमप्यन्धानां न पश्यति। एका सिकता तैलं न प्रसूते, तत्समुदायः खारीशतमपि न प्रसूत इति। नैवम्, अतदर्थेनाप्यवयवेनावयविनोऽर्थसद्भावो दृश्यते। यथा—एकस्तण्डुलः क्षुत्प्रतिघातेऽसमर्थः, तत्समुदायश्च वर्धितकं समर्थमिति। नैवं भवति। तत्र प्रत्येकमपि कियत्यप्यर्थमात्रा इमे पुनर्वर्णा अत्यन्तायैवानर्थकाः यथा—तर्हि रथाङ्गानि विहितानि तानि प्रत्येकं व्रजिक्रियाऽसमर्थानि, तत्समुदायश्च रथस्समर्थ इति।

एवमेषां वर्णानां समुदायाश्शब्दाभिव्यक्तिहेतवोऽर्थवन्तः अवयवास्त्वनर्थका इति। अतः स्थितमेतत् प्रकृतिप्रत्ययादिवर्णजनितध्वनिसमूहोऽभिव्यङ्ग्यस्फोटलक्षणोऽर्थात्माऽर्थावसायप्रसवनिमित्तं शब्दः। तद्विशेषाश्च प्रकृत्यादिस्फोटः पदस्फोटो वाक्यस्फोट इति। —

योभूदित्यादिकश्शब्दो भवतीत्यादिकश्च यः।
भूरस्तीत्यादिको यश्च स स्फोटं नातिवर्तते ॥

प्रतिपाद्यो निवर्त्यश्च प्रतिपादक एव च।
त्रिधा स्फोटस्स्फुटत्यस्मादतोऽर्थास्ते घटादयः ॥

उक्तः क्रमात् द्वादशभेदभिन्नश्शब्दप्रपञ्चोऽयमनादिसिद्धः।
अथार्थमूर्त्याऽस्य विवर्तमाद्यं तावत्प्रकारं प्रतिपादयामः ॥

इति महाराजाधिराज श्रीभोजदेवविरचिते शृङ्गारप्रकाशे प्रकृत्यादिशब्दप्रकाशो नाम तृतीयः प्रकाशः ॥

चतुर्थः क्रियाद्यर्थचतुष्टयप्रकाशः

तत्र प्रकृत्यादिशब्दप्रत्याय्याः क्रियाकालकारकपुरुषोपाधिप्रधानोपस्कारार्थप्रातिपदिकार्थवृत्त्यर्थपदार्थवाक्यार्थरूपा द्वादश भेदाः । तेषु कारकाणां प्रवृत्तिविशेषः क्रिया ; तां धात्वर्थः इत्यामनन्ति । धातवश्च त्रेधा—अस्त्यर्थाः, भवत्यर्थाः, करोत्यर्थाश्च । तत्र येषां कर्तार उदासते ते अस्त्यर्थाः ; यथा—अस्ति विद्यते ध्रियते तिष्ठति आस्ते वर्तते इत्यादि । येषां विकुर्वते ते भवत्यर्थाः ; यथा-भवति संजायते वर्धते स्पर्धते विपरिणमते अपक्षीयते विनश्यति इत्यादि । येषां प्रयुञ्जते ते करोत्यर्थाः ; यथा—करोति विधत्ते जनयति निर्वर्तयति साधयति उत्पादयति । तत्र अस्ति करोति भवतीनां साम्यावस्थानान्निर्विकारमनाद्यन्तं शब्दब्रह्मेत्याचक्षते । तथैवंविधानेकार्थवाचिनो भवतिनैवोमिति व्यपदिशन्ति । तस्य यदा अस्तिताहेतुरविद्यानिबन्धनोऽविपरिणामरूपः प्रथमविकारोऽस्तिरुदयते । तदा अस्तेर्नास्तिप्रतियोगित्वादस्तिवेत्येकमेवैतदुभयथापि प्रथामयते । यन्नास्ति तद्भवामीति चापेक्षायां, तद्भवतोऽस्य भवति नाम द्वितीयविकारः परिप्लवते । ततो यद्भवति तस्य तस्य चान्यत् भवतो मिथ्याभिनिवेशान्मिथः प्रयोज्यप्रयोजकत्वं संभावयतिसंज्ञकः तृतीयविकारं करोतिरित्याख्यायते ।

एवं चास्मितापेक्षाभिनिवेशैर्दूरविप्रसृतायामविद्यायां एषामपि विशेषविशेषतो दूरीकृता विद्या, विद्यति, जनिपचादयः प्रादुर्भवन्ति । तदाह, कृभ्वस्तयः क्रियासामान्यवचनाः क्रियाविशेषवचनाः पचादय इति । तेऽमी सर्वेऽपि धात्वर्थभेदाः संभेदतो मिथस्सङ्ख्यानमतिवर्तन्ते, न तु कृभ्वस्तिरूपताम् । ननु च धात्वर्थः क्रिया, स च कारकाणां प्रवृत्तिविशेषः, कारकेषु च स्वतन्त्रः कर्ता, कर्तुरीप्सिततमं कर्म, साधकतमं करणं, आधारोऽधिकरणं, कर्मणा यमभिप्रैति स संप्रदानं, ध्रुवमपायेऽपादानं, तेभ्योऽन्यस्तदविवक्षा वा शेषः; कर्तुः प्रयोजको हेतुरिति कर्त्रादिभ्यो व्यतिरिक्तमर्थान्तरं नोपलभ्यते यत् क्रियेति प्रतीयते ।

उच्यते अस्ति क्रिया किन्तु कर्त्रादिभ्यः पृथगाख्यातुमशक्यं, अनापन्नसत्वभावात् । अनिर्लुठितगर्भवत् यथा गर्भोऽनापन्नसत्वभावः कललावस्थायामाशयतः पृथगाख्यातुं न शक्यते, तथा क्रियाऽपि साधनेभ्यस्साध्यावस्थायां । तद्यथा- ज्योतिः प्रकाशते, शब्दो ध्वनति इति । कथं तर्हि अस्ति ज्ञायते कारकसन्निधानेऽपि पचतीति प्रख्योपाख्ययोर्भावाभावाभ्यां, इह खलु यत्सन्निधाने यस्य भावाभावौ, तस्य ततोऽन्यनिमित्तापेक्षितत्वं दृष्टं । यथा अग्निघटयोस्सन्निधाने भवतामभवतां च तत्सन्नियोगापेक्षितत्वं पाकजानां, कर्त्रादि च सन्निधाने च कदाचिद्भवतीत्येतद्भवति, कदाचिन्न पचतीति दृश्यते । तेन मन्यामहे नूनमस्ति शक्तिशक्तिमद्भ्योऽन्यश्शक्तिर्धर्मो

यद्भावादिमे प्रख्योपाख्ये प्रवर्तेते, यदभावाच्च न प्रवर्तेतेति सिद्धमस्तित्वं क्रियायाः, इतश्चास्तिक्रिया-साध्यमन्तरेण साधनानुपपत्तेः। इह खलु कर्त्रादीनां साधनव्यपदेशो दृश्यते। स च साध्यमन्त-रेणानुपपन्नः। यच्च साध्यं सा क्रिया। तदाह—संहत्य कारकैर्य एकोऽर्थोऽभिनिर्वर्त्यते सा क्रिया। क्रियानिमित्तं कारकमिति, तथा च क्रियासु स्वेच्छया कारकादीनि यः प्रयुङ्क्ते, न तु तैः प्रयुज्यते स कर्ता, कर्तुः क्रिययाऽन्यया यदाप्यते तत्कर्म, क्रियासिद्धौ साधकतमत्वेन यदव्यवहितं व्याप्रियते तत्करणं, कर्त्रा कर्मणा वा व्यवहितः क्रियाधारोऽधिकरणं, क्रियाकार्यत्वेनावधारितं कर्मणा संयोगं यदनुभवति तत्संप्रदानं, कर्त्रा कर्मणा वा क्रियाजन्यमेव ध्रौव्येन यद्विभागमव-गाहते तदपादानम्, श्रूयमाणक्रियापदोपक्रियाकृतः कारकाणामकारकाणां च संबन्धविशेषः। स शेषः कुर्वन्तमेवाज्ञाप्रदानादिना यः क्रियायां नियुङ्क्ते, स तत्प्रयोजको हेतुः कर्ता च भवति। एवं च यथा काष्ठादयो लाक्षादिकमपेक्षमाणा एव मिथस्संबन्धयोग्यतामनुभवन्ति तथा द्रव्याण्यपि क्रियापेक्षीण्येव परस्परसंबन्धाय भवन्तीति क्रियामन्तरेण जगतश्चित्रकर्मण इव मिथस्संयोगो वियोगश्च न स्यात्। तदुक्तं- यावद्देवदत्त इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रियेति। अस्तु नाम क्रिया, कारकेभ्यस्तु तस्याः कथं व्यतिरेकः? न च भवन्तोऽपि क्रियाकारकयोर्व्यति-रेकं न मन्यन्ते। तद्यथा—चोरस्य रुजति, चोरस्यामयति इति। उच्यते व्यतिरिक्तैव कारकेभ्यः क्रिया; अनेकस्यैकव्यपदेशनिमित्तत्वात्। इह यद्यस्यानेकव्यपदेशनिमित्तं तत्तेभ्योन्यत्। यथा—व्यक्तेर्जातिः कारकमित्येतद्व्यपदेशनिमित्तं चानेकस्य कर्त्रादेः क्रिया; तस्मात्ततोन्येत्यनु-गम्यत्वात्। इह यैर्यदनुगम्यते तत्तेभ्योऽन्यत्, यथा नरेभ्यो राजाभिगम्यतेऽनुगम्यते च। क्रिया कारकैरतस्ततोऽन्येयम्, जन्यत्वेनोपलम्भात्। यज्जन्यतया यदुपलभ्यते तत्ततोऽन्यत्। यथा पितुः पुत्र उपलभ्यते क्रियाकारकजन्यत्वेन तस्मात्ततोऽन्या उपलब्धावनुपलब्धेः; इह यस्योपलब्धौ यस्यानुपलब्धिः तत्ततोऽन्यथा, रूपाद्रसः सूर्यस्य चोपनगतेरुपलब्धिः तस्यास्ततोऽन्यथा। अस्ति चास्यासौ देशान्तरप्राप्तेः; साऽपि दृष्टा तथैवापश्यतः परावृत्य दर्शनात्। प्रमाणान्तरग्राह्यत्वात्। इह यद्यस्मात्प्रमाणान्तरेण गृह्यते तत्ततोऽन्यत्; यथा शरीरादात्मा। प्रमाणान्तरग्राह्या च सदागतौ गतिः; तस्मात्ततोऽन्या। बहुविविक्तत्वेनाभिधानात्, इह यद्बहुभ्यः प्रविविक्तमेकत्वेनाभिधीयते। तत्ततोऽन्यत्; यथा तन्तुभ्यः पटः। अभिधीयते बह्वाश्रितापि प्रविवेकैकत्वेन क्रिया; यथा—ब्राह्मणैरास्यत इति तस्मात्ततोऽन्या। अनावृत्तावावृत्तेः, इह यस्मिन्ननावर्तमाने यदावर्तते तत्ततोऽन्यत् यथा हस्तिनो मशकः। आवर्तते चानावर्तमाने कर्तरि क्रिया पञ्चकृत्वः पचतीति, तस्मात्ततोऽन्या, इहोभयोरपि संशयनिर्णयनिमित्तत्वात्; इहोभयोस्संशये यस्य यो निर्णयहेतुश्च पुरुषस्य चलनादिक्रिया, तस्मात्ततोऽन्या। अभिधायाभिधानात्, इह यदभिधायार्थान्तरा विवक्षां अन्तरेण यदभिधीयते ततोऽन्यत्, यथा—गौरश्वः, अभिधीयते च अध्येता अधीते गन्ता गच्छतीति कारकमभिधाय क्रिया तस्मात्ततोऽन्या, पर्यायाप्रसिद्धेः। इह येषामेव पर्यायप्रसिद्धिः, तेषामेव च तेभ्यो न भेदः, यथा—निर्वर्तिरिति।

न च पचन्नधीते पचत्यधीत इति पचन्पचत्योः पर्यायत्वम् । अपि पचन्नधीत इति कर्तुः पचतीति क्रियायाः पर्याययोग्यत्वं ; अतोऽसौ ततोऽन्यः । अभिन्नशब्दाभिधानेऽपि विशेषाणां लिङ्गवचनभेदात् । इह खलु क्रियाकर्त्रोरभिन्नशब्दाभिधेयत्वेऽपि तद्विशेषणानां लिङ्गवचनभेदो दृश्यते, यथा—शोभनं पचति शोभनं पचतः शोभनं पचन्तीति सत्त्वाऽर्थो भेदे भिन्नशब्दोपादान एव दृश्यते । तटः तटी तटं, पुष्यः तारका नक्षत्रं, रसः आपः जलम्, दाराः कलत्रं भार्या, इत्यादिविशेषणानाम् । न तूदाहृतसदृशेष्विति क्रिया कर्तुरन्या । शब्दावृत्तिभेदेषु द्धिभेदात् । इह खलु क्रियाकारकयोश्शब्दावृत्तिभेदे बुद्धिभेदो दृश्यते ; अध्येता पठति, पठति गन्ता, गन्ता गच्छतीति पूर्वयोर्वीप्सोत्तरयोराभीक्ष्ण्यम् । यस्य च यतो बुद्धिभेदस्तत्ततो व्यतिरिक्तं यथा—मृदङ्गध्वनेर्मेघध्वनिः, घटादिभ्यः पटादय इति क्रियायाः कारकेभ्यो व्यतिरेकः । सिद्धे चास्मिन्नभेददर्शनं भेदव्यतिरेकश्चाविवेकत एवेति द्रष्टव्यं दृश्यते च । प्रदीपप्रवाहदृशब्दशरीरस्संस्कारज्ञानसुखदुःखेच्छाद्वेषप्रयत्नरूपादिभिन्नेषु अभिन्नप्रत्ययः प्रवर्तते तेष्वभेदेनैव तदनुकूलो व्यपदेशः । चोरस्य रुजतीत्यत्र तु रुक्साधकस्य कर्तुरभावाल्लकारः कर्तरि वर्तमाना तामेव रुजधातुमभिहितामभिधेयीकरोति । अस्ति च साध्यस्यापि वस्तुनो भवतो कर्तृत्वमतस्तदेव कर्तृप्रत्ययेनाभिधीयते न चोरस्य रुजतीति । अस्यायमर्थः चोरस्य रुगुत्पद्यत इति कुतः पुनरियं कारकक्रिययोर्विशेषः ; तदेकत्र वीप्सा अन्यत्राभीक्ष्ण्यमिति क्रियाया एकत्वेन वीप्सानधिगमात् । बहूनां हि क्रिया गुणद्रव्यैः प्रयोक्तुर्युगपद्व्याप्तुमिच्छा वीप्सा, सा त्वेकत्वे क्रियाया नोपपद्यते, इति । ननु च क्रियाया एकत्वं नोपपद्यते कालत्रयेणात्यन्तविरोधिना युगपदभिसंबन्धव्यपदेशात् । इह खलु क्रियाया सा कस्मिन्नपि काले कालत्रयाभिसंबन्धहेतुर्व्यपदेशो दृश्यते ; पचति देवदत्तः, अपाक्षीद्यज्ञदत्तः, पक्ष्यति विष्णुमित्र इति ।

तच्चैकत्वे न घटते इत्यनेका क्रिया भेदनिबन्धना । आतिशयिकतरबादिप्रत्यययोगात् । इह खलु क्रियायाः पचतितरां पचतितमामित्यातिशायनिकप्रत्ययो दृष्टः । स च द्वयोर्बहूनां च प्रकर्षे सिद्ध इत्यनेकक्रिया एकेन युगपदनेकाधिकरणस्य निर्धारणात् । इह यदेकैकस्मिन् काले अनेकाधारस्थं पृथक्त्वेनावधार्यते तदनेकं ; यथा—अङ्गुलीषु नखानि निर्धार्यन्ते । निर्धार्यते चानेकाधारकेन युगपद्रोषु गतिरित्यनेका क्रिया । पूर्वकालेऽपि प्रत्ययदर्शनात् । इह द्वयोरेककर्तृकयोः क्रिययोः पूर्वकाले क्त्वाप्रत्ययो दृश्यते ; यथा भुक्त्वा भुङ्क्ते, पक्त्वा पचतीति द्वित्वं चैकत्वप्रत्यनीकमित्यनेकक्रिया, युगपल्लक्ष्यलक्षणयोगात् । इह क्रियाणामभिन्नकालं लक्ष्यलक्षणयोगो दृश्यते । गवि दुह्यमानायामपि दोग्धि, तयैकत्वेऽनुपपन्नमित्यनेका क्रिया पूर्वकालेऽपि प्रत्ययदर्शनात् । इह द्वयोरेककर्तृकयोः क्रिययोः पूर्वकाले क्त्वाप्रत्ययो दृश्यते, यथा—भुक्त्वा भुङ्क्ते, पक्त्वा पचति हेतुगर्भफलाभावात् । इह खल्वहेतुफलयोः प्रसिद्धो भेदः । स च क्रियासु दृश्यते ओदनं पचति, शाकं पचति, भुञ्जान ओदनं भुङ्क्ते इति भेदश्चैकत्वविरोधीत्यनेका क्रिया क्रियार्थक्रियोपपदतुमुनादिप्रत्ययोत्पत्तेः । इह ये तु क्रियार्थायामुपपदे तुमुनादयस्स्मर्यन्ते, ते च

भोक्तुं गच्छति, पाकाय व्रजति भोक्ष्यामीति पचतिप्रभृतिषु यथा भिन्नधातुवाच्यत्वेऽपि दृश्यन्ते ; यथा गन्तुं गच्छति, भोजनाय भुङ्क्ते, पक्ष्यामीति पचतीति ।

सचायं तदर्थफलभावेनैकत्व एवोपपद्यत इत्यनेकार्थक्रियाभिहितानभिहितशक्तिप्रादुर्भावानिमित्तत्वात् । इह धात्रीं धयति, दात्रेण दाति, दाशाय दाशते, भीमाद्बिभेति, आसने आस्ते, शयने शेते, स्थाने तिष्ठति, प्रासादे प्रसीदतीति प्रत्ययविभक्त्योर्दर्शनादभिहितानभिहितशक्तिप्रादुर्भाव उपलभ्यते । सा चानैक्यनिमित्तं क्रियाभेदमन्तरेण न सङ्गच्छत इत्यनेका क्रिया भावाभिधानेऽपि यत्रादिभ्यो द्विवचनबहुवचनोपलब्धिः । इह खलु शुद्धेऽपि भावे यत्रादिभ्यः पाकौ पाकाः, उष्ट्रासिका आस्यन्ते, हतशायिकाश्शय्यन्त इति द्विवचनबहुवचनोपलब्धिः । तच्च क्रियैकत्वे न युक्तमित्यनेका क्रिया कृदाख्याताभिहितायाः क्रियायाः सर्वसंख्यासामानाधिकरण्यात् । इह कृदभिहिताया आख्याताभिहितायाश्च क्रियाया भिन्नार्थानभिधायिभिस्संख्याशब्दैः सामानाधिकरण्यं दृश्यते । यथैकः पाकः द्वौ पाकौ बहवः पाकाः ; एका उष्ट्रासिका आस्यते द्वे आस्येते बह्व्य आस्यन्ते । तच्चैकत्वे क्रियाया न सांप्रतमित्यनेका क्रिया इह भवति निमन्तृप्रभृतीनामवधृतभेदपरिस्पन्दाश्रयकार्याभिनिवृत्तेः इह यासां क्रियाणामवच्छेदकधात्वर्थोपाधिभेदत्वादनेकत्वं प्रत्यविवादः, तासु ये भेदाश्रया धर्माः प्रसिद्धाः । तद्यथा— भोक्तुमिच्छति, भवति पचति, भवति पक्ष्यति, भवत्यपाक्षीत्, आमन्त्रये समाजमुत्सवमामन्त्रये इति समानधातुवाच्यास्वपि दृश्यन्ते ; एषितुमिच्छति, भवेदपि भवेत्, स्यादपि स्यात्, निमन्त्रये निमन्त्रणार्थमामन्त्रये आमन्त्रणार्थमिति । तस्माद्भेदाश्रयकार्यसंबन्धाद्भवितव्यम् । अनेकत्वमेकेन धातुना सर्वत्र भेदेनेत्यनेका क्रिया साध्यसाधनभावात् । इह साध्यसाधनयोः प्रसिद्धो भेदः प्रदृश्यते च । साध्यसाधनता क्रियाणां यथा—स इमान् पोषानपुषत्, तप्यते तपस्तापस इति । तच्चैकत्वे न घटते इत्यनेका क्रिया । तदेतदनेकत्वे क्रियायास्सर्वमसाधनं साधनभेदादेवोपचरितभेदाया एकत्वे वा तदुपपत्तेरभिन्नानामप्युपाश्रयादिभेदात् । भिन्नाकारात् प्रतीतदेशव्यपदेशाश्च दृश्यते । यथेन्दोर्जलेषु ज्योत्स्नाजालेषु जलधराशासु दिशो व्यवस्थासु पृथक्त्वस्यार्थेषु बुद्धेर्विषयेषु विद्युतोऽब्देषु शब्दस्य च कन्दरेषु चित्रस्य नीलादिषु आकाशस्यावकाशेषु भावस्य भावेषु च यो भेदबुद्धिः ; यथा च संपन्नो यवो यवेषु शुक्लस्तुरुष्केषु विनष्टस्सुराष्ट्रेषु दर्शनीयोस्तनेन्द्रसेनेषु अक्षिणी कलिङ्गेषु पटुर्भवान् पटुरासीत् पटुतर एष मार्गे कूपोऽभूत् कूपो भविष्यति प्रियो मन्युस्ते प्रियो न वयम्, मैथिली रामस्य दाराः, आः पवित्रं वरणां नगरं शिरीषाः रामः पाञ्चाला जनपदा इत्यभिन्नस्याऽपि जात्यादेरर्थभेदस्य भेदतो व्यपदेशः, तथा क्रियाया अपि कालयोगादयः साधनभेदाद्भविष्यन्ति ; अनेकाधारसमवेतायाश्च युगपदेकेन ग्रहणं जातिवदुपपद्यते ।

कृदभिहितानां तु शुद्धभावानां आख्यातवद्भिः क्रियाभिः द्रव्यवद्वैधर्म्यादयुक्तस्तद्धर्मोपनयः। कृदभिहितो हि भावो द्रव्यवत्प्रकाशमानो लिङ्गसंख्याकर्मादिशक्तीनामाश्रयो भवति ; न त्वाख्यात-

वाच्यः तस्याः परिनिष्पन्नत्वेनाश्रयत्वानुपपत्तेः। तथाहि, यथा पाको वर्तते पाकं पचतीति शक्तिसंख्यादियोगः कृदन्तेषु दृश्यते, नैव तिङन्तेषु। नहि भवति, पचति वर्तते, पचति पश्यतीति; ननु च भवति पश्यति, मृगो धावति, उत्पश्यामि कर्मणि द्विवचनबहुवचनान्युदाह्रियन्त इति धावतीनां दृशि कर्मत्वं केवलं त्वप्रातिपदिकत्वात् सुपोऽनुत्पत्तिः। तन्न; यथा क्रियायाः क्रियमाणत्वादेव नैसर्गिकं च भवति पचति पश्यति भवत्यपार्श्वादिति च दृश्यते। पचादीनां भवतेः कर्तृत्वं दृश्यते; भवति पश्यति कर्मत्वं क्रियाविशेषणानां कर्मतयाऽवगम्यते। तदोत्पद्यमानत्वादेव गतौ कर्तृत्वमपि नैसर्गिकमेव। मृगो धावतीत्यादौ गम्यमानेतिशब्दोपसंहृतस्य वाक्यार्थस्य कर्मत्वं, न क्रियायाः। तस्मादशङ्कनीयः क्रियासकर्तृशक्तियोगा करणादियोगायोगाभ्यां व्यक्तमेव कृदाख्याताभिधेयभावयोर्मिथोवैधर्म्यमिति। तस्मादनेकार्थविषयया वीप्सयाऽनभिसन्धानात् सिद्धमेकत्वं क्रियायाः। शब्दप्रत्यययोरभेदाच्च, यत्राभिधानज्ञानयोः अत्यन्तमभेदस्तस्यैकत्वं सिद्धम्; यथा जातेः प्रत्येकं च व्यक्तिविशेषाणां, अभिन्नौ च देशकालौ भेदे च क्रियायाः शब्दप्रत्ययौ दृश्येते, यथा च पचति पचतः पचन्तीति; तस्माच्छब्दप्रत्ययहेतुः एका क्रिया।

ननु च, जलचन्द्रादिदृष्टान्ते भेदव्यवहारे सन्देहः किं साधनमभेदाश्रयाणि क्रियायाः कालत्रययोगादीनि प्रत्ययव्यपदेशानि च भेदकार्याण्युत स्वभेदाश्रयाणीति। अत्रोच्यते क्रियायाः अभेदेऽपि साधनभेदात् द्विवचनबहुवचनोत्पत्तेस्संदेहो भाव्यः। इह भेदस्याभेदपूर्वकत्वात् भेदमभ्युपगतवतावश्यमभेदोभ्युपगन्तव्यः; तस्य यस्याः क्रियाया एकत्वमभ्युपगम्यते तस्यास्साधनभेदादृष्टो द्विवचनबहुवचनयोगः। यथा—परमाणुं पचतः, परमाणुं पचन्ति। अनेकत्वाभ्युपगमे च साधनस्याभेदे दृष्टमेकवचनमेव, भिनत्ति कुसूलमिति वचनभेदः। तस्मात्साधनभेदानुविधानाच्च क्रियायाः, क्रियाभेदानुविधानाच्च साधनानां साधनाश्रयाणि भेदकार्याणि, क्रियायाः न स्वाश्रयाणीति।

कथं तर्हि, पच्येते ओदनौ पच्यन्ते ओदना देवदत्तेनेति कर्तृभेदे वचनभेदः? यस्मिन् साधने लादयोऽभिधीयन्ते? तद्भेदमनु धीयन्ते क्रियायाः क्रियाभेदं साधनानीत्यशङ्कनीयमेतत्। प्रदीपादिषु भेदाभेदयोरनात्यन्तिकत्वात् ज्ञानाभिधानयोरपि तथात्वेऽस्ति न तैर्व्यभिचारः। इतश्चानेका क्रियाया अभ्यावृत्तिभावात् बहुसंख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजादयस्स्मर्यन्ते; पञ्चकृत्वो भुङ्क्ते, चतुष्पचतीति तच्चाभेद एवोपपद्यते। न हि देवदत्ते गते, यज्ञदत्ते चायाते पुनरावृत्त इति व्यपदेशो दृश्यते च। तत्रैवायात इत्येका क्रिया समुच्चयाभावात्। इह भिन्नानां एकविषयसंपाते समुच्चयो दृष्टः; देवदत्तस्य गौश्चाश्वश्च पुरुषश्च देवदत्तस्य यज्ञदत्तस्य विष्णुमित्रस्य च गौरिति। नच वक्तृभेदे गुडतिलौदनादिवाक्यभेदात् क्रियाभेदाभ्युपगमेऽपि क्रियासमुच्चयो दृश्यते। देवदत्तः पठति पचति चेति तस्मादेकक्रियासत्वभावनापत्तौ

प्रविवेकः, एकत्वेनाभिधानात् । इह क्रिया सत्वभावं प्रतिपन्ना यदा साधनेभ्यः प्रविविच्यते, न भवति तदा द्विवचनादियोगः ; ब्राह्मणैरास्यत इति तस्मादेका ।

ननु च सत्वभावेऽप्येतदुपलभ्यते यथा गुडतिलौदनानां पाकः, ताम्रः पलाशेषु बभूव रागः, इति तन्न ; तस्याव्यभिचारात् ।

'यथा नृपाणां प्रणयाग्रदूत्यो विलासचेष्टा विविधा बभूवुः ॥'

व्यभिचारे किन्निमित्तमिति चेत् कृदभिधानमेव ; 'कृदभिहितो भावो द्रव्यवत्प्रकाशते ।' द्रव्यस्य च सत्यपि नानात्वे संबन्धिभेदादेव भेदावगतौ क्वचिदभेदाभिधानम् ।

ऊरुमूलचपलेक्षणमभ्रन् यैर्वतंसकुसुमैः प्रियमेताः ।
चक्रिरे सपदि तानि यथार्थं मन्मथस्य कुसुमायुधनाम ॥

यथा च वेदवाक्यं—

'यत्पशुर्मायुमकृतोरोवा पद्भिराहते ।' इति ॥

क्वचित्पुनस्तद्विवक्षायां भेदेनैव यथा—

तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तरास्सान्द्रकुतूहलानाम् ॥ इति ॥

ब्राह्मणैरास्यत इति सर्वदैकवचनमेवेति विशेषः, साध्यत्वात् । सिद्धस्य हि वस्तुनस्संख्यायोगो युज्यते, न साध्यस्यापरिनिष्पन्नत्वेनाश्रयत्वानुपपत्तेः । साध्या च क्रिया प्राधान्यतयास्माभिरभिधीयते तस्मान्न भेदसंख्ये इत्येका । एकशेषात् इह येषां सरूपशब्दाभिधेयानामनेकत्वं दृष्टं, तदभिधानानामेकशेषो दृष्टः । तद्यथा—व्यक्तिपक्षे ब्राह्मणाः पुरुषाः, इति । न च ब्राह्मणैरास्यते, पुरुषैर्गीयत इति क्रियाभिधानानामेकशेषो दृश्यते । स चायमेकशेषो व्यावर्तमानस्तद्व्याप्तमनेकत्वमपि गृहीत्वा व्यावर्तत इति एका क्रिया ।

ननु च कथमेकशेषाभावः न तिङन्तान्येकशेषं प्रयोजयन्तीति का पुनरत्रोपपत्तिः ? क्रियाप्रधानत्वमाख्यातानां, तदेव चिन्त्यते ; इह खलु क्रियाकारकयोः प्रधानोपसर्जनाभावेन वृत्तिसंसर्गेण चतुष्टयी गतिः । क्रिया वा क्रियाया न्यग्भवति यथा–चिकीर्षति अध्यापयतीति, कारकं वा आक्षिकः निष्कौशाम्बिः, कारके वा क्रिया यथा—पाचकः पचनीयं, क्रियायां वा कारकं यथा–पुत्रीयति उपश्लोकयति । आख्यातेषु चैषामन्यतोऽपि न प्रकारः ; तत्र हि साध्यक्रियाऽपि प्रकृतातमवती साधनतन्त्रा सव्यापारसाधना अपरिसमाप्ता पचादिभिरुच्यते सिद्धानि च साधनानि तिबादिभिरभिधीयन्त इति न कस्यचित्प्राधान्यमप्राधान्यं वा प्रत्युत प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः प्राधान्येनेति प्रत्ययार्थस्य प्राधान्यं स्यात् ।

एवं च द्विवचनबहुवचने अपि तन्निबन्धने उपपद्येते; तत्र, सिद्धं साध्यायोपादीयते। सिद्धानि च साधनानि च तानि परार्थमुपादीयमानानि शेषतां लभन्ते। साध्यं तु परापकारेषु असमर्थमात्मसिद्ध्येऽर्थान्तरमपेक्षमाणं तद्धैधर्म्यात् प्रधानभावमनुभवति। नन्वेवं ह्येकशेषाभावो न सिध्यति; न ह्येकशेषाभावे प्राधान्येन गुणाभावेन वा किञ्चिदाश्रीयते। पचादयो हि क्रियावचनाः, तेषामेक एवानेकसाधनसमवेतानेकत्वेन विवक्षितां क्रियामभिधास्यति। तत्र, यद्यप्येको धातुः यथोक्तां क्रियां ब्रवीति तथा लकारस्यानेककर्मकर्तृविषयत्वात् प्रतिसाधनमुपपत्तावनेकत्वं प्राप्नोति। तदनुरोधाच्चार्थाः प्रधानानि प्रत्ययेभ्यो व्यावर्तन्त इत्येकशेषारम्भस्स्यात्। क्रियाप्राधान्येन तु गुणभूतयोः कर्तृकर्मणा . . . . स्तुत इति। एवं तर्हि भिन्नसाधनमभिन्नमर्थं वक्ष्यामीति एकशब्दत्वं, साधनभेदात्तु द्विवचनबहुवचनयोगः।

अन्ये तु ब्रुवते यद्येकस्याः प्रकृतेस्साधनभेदे भिन्नालङ्काराः प्रसज्येरन्, तथाऽपि यथैकस्थाने एकवचनमेव द्वयोर्द्विवचनं बहूनां भविष्यन्तीति। इदमेव हि द्विवचनबहुवचनयोः द्विवचनबहुवचनत्वं, यत्तदेकशब्दरूपमेकशेषशब्दवदनेकार्थाभिधाने समर्थमिति व्याख्यायते। इतश्च क्रियाप्रधानमाख्याताः करोतिना प्रश्ने निर्णयार्थत्वात्। किं देवदत्तः करोतीति प्रश्ने पचत्यास्ते इत्युत्तरं भवति, न त्वासकः पाचक इति। न चायं कर्तृप्रश्नः किं देवदत्त इति, विशेषस्याभ्यन्तरीकृतत्वात् भिन्नलिङ्गत्वाच्च। नापि कर्मप्रश्नः अनुज्ञाते व्यापारे कर्मप्रश्नासंभवात्। पचति पठतीति कर्तृविशेषमन्तरेण प्रतिवचने प्रष्टुः कृतार्थत्वात् पचति पठतीति चाख्यातस्य आख्यातेनायोगात्। यदि साधनं प्रधानं स्यात् यथा पाचकः पचतीति सामानाधिकरण्येन न योगो भवति, यथा पचति पठतीत्यत्रापि स्यात्। न चैतदस्त्यतः क्रियाप्रधानत्वमेवाख्यातानां क्रियाप्रधानत्वाच्च एकशेषारम्भः, तदनारम्भादेकत्वमेकत्वेन वीप्साभावः, वीप्साभावाच्च गन्ता गन्ता गच्छति गच्छतीति शब्दावृत्तिभेदः बुद्धिभेदाच्च क्रियायाः कारकेभ्यो व्यतिरेक इति।

ननु च पचति पचतः पचन्तीति धात्वर्थ एवाऽयं, न क्रिया। तत्र, धात्वर्थस्य प्रत्ययार्थस्येवावच्छेदकत्वाद्धात्वर्थात्तु क्रियायाः पृथक्त्वं साध्यमानमप्रधानव्यपदेश्यतायामेव संतिष्ठते। यथैव तर्हि कारकभेदेऽप्यभेदः क्रियायास्तथा धात्वर्थभेदेऽप्यभेद एवास्तु, सत्यमेतत्। किंतु वस्तुनः सर्वथैकत्वमनेकत्वं वोच्यमानं भेदाभेदनिबन्धनं लोकव्यवहारं सर्वमतिक्रामति। तस्माद्भेदमभेदं वा अभ्युपगच्छता व्यवहारप्रसिध्यर्थमभेदो भेदश्चाभ्युपगन्तव्यं कस्यचित् किञ्चिन्मुख्यं किञ्चिदौपचारिकं सर्वो हि भेदवादी निरुपकारेष्वयश्शलाकपदसंबन्धेष्वन्योन्यव्यावृत्तेषु भेदेषु तदेवेदमितिप्रत्ययस्य अभेदादेकत्वमाश्रित्य लौकिकव्यवहारमनुगच्छति। एकत्ववादी च भेदाधिष्ठानामिव भवतां सर्वां वृत्तिं सर्वं च विशेषशब्दव्यवहारं धर्मान्तरसंसर्गपूर्वकं लोके व्यवस्थितं मन्यमानो लोकमनुगच्छन् अभिन्नमपि भेदैरेव निदर्शयति। तस्माद्भिन्नधात्वर्थावच्छिन्ना भिन्नाऽपि क्रिया भिन्नैवेति एतेनैतदपि संगृहीतं भवति। व्रजतिपचत्यस्तीति श्वेतत इत्यादौ प्रत्ययार्थधात्वर्थयोरुद्वापावापा-

भ्यामन्यत्वेनावधारितो धात्वर्थावच्छिन्नः; परिच्छिन्नकालः कालपरिच्छिन्नो वा उपसर्गादिभिरुपस्कृतः प्रत्ययार्थोपकारः कारकैरसंख्यशक्तिभिस्संख्योपध्युपकृतैरुपक्रियमाण उपक्रमप्रभृत्यवमर्शपर्यन्तमन्तःप्रतिभया साकल्येनोल्लिख्य साध्यत्वेनाध्यवसितः तथा सूपभृतोबहिर्निष्पन्नः प्रक्रान्तक्रमरूपावयवसमुदायात्माऽनपेक्षितान्तरालक्रियान्तरोपनिपातस्तथाविधावयवो वा पुरुषव्यापारः क्रिया । यथोक्तविशेषणोत्पन्नधात्वर्थो वा साध्यफलनिष्पत्तिपूर्वक्षणोपलभ्यमानतदवयवो वाऽवयवसमूहोपलभ्यमानैकाकारप्रत्ययनिमित्तजातिविशेषो वा पूर्वावयवोपकृतान्यावयवप्रतीयमानजातिप्रादुर्भावो वा धात्वर्थव्याप्रियमाणकर्तृकर्मणोस्स्वव्यपदेशनिमित्तसत्तासंबन्धो वा कर्तृकर्मसत्ता वा तद्व्यापाराविष्टधात्वर्थावयवसामान्यं वा तथैवोपलभ्यमानधात्वर्थावयवव्यक्तयो वा व्याप्रियमाणेषु स्वपरात्मनोः पूर्वस्वरूपविलक्षणरूपान्तराभिमानो वा तत्रैव च तयोस्तथाविधाभिन्नस्वकारणसत्तासंबन्धो वा बुद्धिसत्ताभावेषु प्रत्यस्तमितरूपमनेकबुद्ध्यनुस्यूते बुद्धिसामान्यं वा क्रियाशब्देनाभिधीयते । अपिच—

यावत्सिद्धमसिद्धं वा साध्यत्वेन विवक्षितम् । आश्रितक्रमरूपत्वा त्तत्क्रियेत्यभिधीयते ॥

स च कार्यानुमेयत्वात् परोक्ष इत्येके । गच्छतिपचत्यादिप्रत्ययेषु प्रत्यक्षेण, देवदत्तादिस्वरूपेऽतिरिक्तक्रियातत्वानुपलब्धेः । य एव देवदत्तात्मा तिष्ठन् प्रत्ययगोचरः चलतीत्यपि संवित्तौ स एव प्रतिभासते । किंतु चलतीति प्रतीतिः संयोगविभागमालम्बते, संयोगविभागः कदाचिदेवोत्पद्यमानः परिदृश्यमानपदार्थस्वरूपातिरिक्तं कारणमनुमापयति, यच्च कारणं स परिस्पन्दप्रयत्नादिरूपः पुरुषव्यापारोऽतीन्द्रियः क्रियेति ।

तदनुपपन्नमित्यन्ये, चलतीत्यादिप्रत्ययानां प्रत्यक्षत्रयावलम्बनत्वात् । तथा च न चलतीति प्रतीतेस्संयोगविभागालम्बनमव्याप्त्यादिप्रसङ्गात् । तत्राऽऽकाशे विहङ्गमो गच्छतीति प्रतीति र्न स्यात्, संयोगविभागयोरग्रहणात् । न च द्वयोर्विहायसोस्संयोगविभागौ प्रत्यक्षौ प्रत्यक्षेतरवृत्तित्वात् वायुवनस्पतिसंयोगविभागवत् । अथ विततालोकावयव्याकाशः तत्संयोगविभागौ च पक्षिणः प्रत्यक्षौ तन्न, सन्तमसेऽपि खद्योतविद्युतोः क्रियाबुद्धेः । न च तमो नाम वस्तुस्वरूपमस्ति, भूकंपे च कंपते वसुंधरेति च ज्ञानमस्ति । संयोगविभागमस्तीत्यतिव्याप्तिः संयोगविभागोपजनप्रबन्धेऽपि तयोर्वर्तमानयोरेव ग्रहणं तौ च गत्वाऽपि स्थिते गवादौ स्त इति । तत्रापि गच्छतीतिज्ञानप्रसङ्गः निश्चले च श्येनसमवायापायपरंपरावति वध्यशूले प्रवाहजलजाशेषविशेषमालहारिणि सरित्कूले रङ्गतुरङ्गमसंयोगविभागश्रेणिमति च बाह्यालिन्दमहीतले चलतीति प्रत्ययः प्राप्नोति । अथ क्रियाजन्यत्वं संयोगविभागजानां तत्रैव चलतीति श्येनादौ प्रत्ययो न निष्क्रिये शूलादाविति तर्हि क्रियावयवव्यतिरेकानुविधानात् क्रियालंबन एवाऽयं प्रत्ययो, न संयोगवियोगालंबनः ।

किञ्च नित्यपरोक्षायां क्रियायामिदमपि न ज्ञायते ? किं शूलकूलमहीतलक्रियाजन्यत्वं संयोगविभागानां, किं वाऽन्येन जलतुरगक्रियाजन्यत्वमित्यतिव्याप्तिः संयोगविभागालंबनत्वे च

संयुज्यते वियुज्यत इति च प्रतीतिभ्यां न चलतीति यथाविषयं प्रत्ययोत्पादादनिर्ज्ञाने जलस्य आलम्बनता स्यात् । चलतीति च वर्तमानाभासः प्रत्ययस्संयोगविभागानुमेयत्वेन संभवति । तथाहि—संयोगान्तरं कर्मेति । न च संयोगो वर्तमानां क्रियामनुमापयति, विभागो विकास्यत्वा-दात्मनः प्राक्कालीन इव कारणं गमयति । कारणस्य हि सत्वं प्राक्कालीनमेव कार्योपयोगि न तुल्यकालं, तदानीं तस्य सिद्धत्वात् । अतः कार्यात्कारणभूतां क्रियामनुमिमानो भूतामेवानुमिमीते न वर्तमानाम् । तस्मात्संयोगविभागाभ्यां क्रियानुमाने वर्तमानाभासश्चलतीति प्रत्ययो न संभवतीत्यसंभवः । न च नित्यपरोक्षक्रियानुमानमपि शक्यं कार्यं कारणपूर्वकमिति संबन्ध-ग्रहणानुपपत्तेः । न हि द्रव्यमिश्रं कारणं; अपि तु क्रियाविशिष्टं क्रियायाश्च परोक्षत्वान्न तदानीमिष्टद्रव्यकारणग्रहणमनुघटामिति घटादावपि दुर्घटाव्याप्तिप्रतीतिः ; तस्मान्न कार्यानुमेया क्रिया। अपितु उत्क्षेपणादिभेदवतः परिस्पन्दरूपस्य कर्मणः प्रत्यक्षेणोपलम्भात् प्रत्यक्षैवेति । एतेन पचतीति प्रतीतिरपि प्रत्यक्षक्रियालंबनैवेति व्याख्यातम् । तत्र हि पचत्यादिक्रियाबहवः प्रतीयन्ते ; देवदत्तश्चलति, चुल्ली ज्वलति, स्थाली उर्वायते, वयस्यः कथयति पिधानमपिधत्ते, तण्डुलानि विक्लिद्यन्ति, दर्व्यपविध्यति, ओदनस्सिध्यति, इति ।

ननु च पाको नाम धात्वर्थः परिदृश्यमानदेवदत्तादिव्यापारव्यतिरिक्त एषितव्यः, तदन्तरेण फलनिवृत्तेरभावात्; तदभावे च किमधिकृत्य कारकाणि संसृज्येरन् । अत्रोच्यते, यं तमेकं पाकं नाम धात्वर्थं चलनादिभ्योऽतिरिक्तं क्रियेति मन्यसे, स किं वस्तुधर्मः ? तत्कार्यं वा, तत्र वस्तुधर्मत्वे रूपवज्जातिवद्वाभ्युपगम्यमाने यावद्वस्तु सर्वकालं वा फलनिष्पत्तिप्रसङ्गः । तत्कार्यत्वे सति स किं सकलकारकनिष्पाद्यः, एकैककारकनिर्वर्त्यो वा । तत्राद्यपक्षे एकैकं भवेत् कारकमक्रियं एकैकनिष्क्रियत्वे तु साकल्येऽपि कार्यत्वाद्व्यापारान्तरकल्पनायामनवस्था । पक्षान्तरे तु क्रियामिव फलमपि निष्क्रियाण्येव कारकाणि कुर्युरिति किं क्रियया । ननु करोतीति कारकं सत्यं करोति फलमनुक्रियाम् । ननु करोतीति यद्रूपे सेयमुक्तैव क्रिया । चैत्रः कटं करोतीति चैत्रस्यैव कटस्यैव करोतेरप्यर्थो वाच्य एव । उच्यते परिस्पन्द एव भौतिको व्यापारः, करोत्यर्थः । न हि वयं परिदृश्यमानं परिस्पन्दात्मकं व्यापारमपह्नुमहे । प्रतिकारकं विचित्रस्य चलनादेर्व्यापारस्य प्रत्यक्षेणोपलम्भात् । अतीन्द्रियस्तु तदतिरिक्तः करोत्यर्थो नास्तीति ब्रूमहे । क्रियातीन्द्रियत्वे हि तद्योगकृतं कारकत्वमधिगच्छन्तः फलार्थिनस्तदुपाददीरन् ।

तावदेव विनिश्चित्य तदुपादीयतेऽर्थिभिः । तदेवोपाददानैश्च फलमप्यतिगम्यते ॥

कारकत्वं च पक्षेऽस्मिन्नास्ति किञ्चिदतीन्द्रियम् । कारकत्वं स्वरूपस्य सहकार्यादिसन्निधिः ॥

निर्व्यापारस्य नन्वस्य को गुणस्सहकारिभिः ।
व्यापारयोगिनोऽप्यस्य को गुणस्सहकारिभिः ॥

बुधव्यापार एवैष सर्वै संभूय साध्यते ।
किं फलेनापराद्धं वः तद्धि संभूय साध्यताम् ॥

तस्मात्कारकचक्रेण चलता जन्यते फलम् । न पुनश्चलनादन्यो व्यापार उपलभ्यते ॥
चलन्तो देवदत्ताद्यास्तदनन्तरमोदनम् । एतावद्दृश्यते तत्र न त्वन्या काचन क्रिया ॥
क्रियानिमित्तसंसर्गवादिनोऽपि द्वयी गतिः । सत्यां क्रियायां संसर्गस्संसर्गे सति वा क्रिया ॥
अत्राऽपि पक्षे पूर्वस्मिन् संसर्गः क्वोपयुज्यते । तथा सति फलं सिध्येत्काष्ठादेः केवलादपि ॥
संसर्गात्तु क्रिया सिद्धा पुनरेकैकमक्रियम् । तथा च सति नैधांसि ज्वलेयुः पिठरान्विताः ॥
ज्वलन्त्येधांसि न पुनः पचन्ति पिठरान्विताः । पिठरे सत्यपीमानि ज्वलन्तीत्येव मे मतिः ॥
तस्मात्क्रियान्तराभावात्काष्ठाम्बुपिठरादयः । संसृज्यन्तां फलायैव किमदृष्टेन कर्मणा ॥

ननु च फलं सिद्धं साध्यं वा ; किञ्चातः सिद्धं चेत् कारकान्तराण्यपि सिद्धानीति संसर्गाभावः । अथ साध्यं सैव कारकव्यापारव्यतिरिक्ता क्रियेति । तन्न, फलस्य क्रियात्वानुपपत्तेः । ओदनो हि फलं, न चासौ क्रियाणां विप्रतिपत्तिः ; पाकस्तर्हि कः ? पचेर्वाच्यः, शून्यतैव युक्ता उच्यते—समुदितदेवदत्तादिकारकनिकरपरिस्पन्द एव विशिष्टफलावच्छिन्नः पाकः । स एव च पचेरर्थः ; देवदत्तादिक्रिया हि चलनज्वलनादिरूपाः पृथक्तथैवावभासन्ते, समुदितासु सत्सु फलान्तरावच्छेदाद्रूपान्तरेण पाकादीनामपस्फुरन्ति, व्यपदिश्यन्ते च ; तथा देवदत्तः पचतीतिवत् काष्ठानि पचन्ति, स्थाली पचतीत्यपि व्यपदेशो भवति । ननु च यथा स्थाली पचति काष्ठानि पचन्तीति दृश्यते । नैवम् ; ओदनः पचति तण्डुलाः पचन्तीति सत्यमेतत् । कारणं तु वाच्यं किं तदिति चेत् पचेरकर्मकत्वक्रियात्वमेव ।

नन्वोदनस्य तण्डुलानां वा कर्तृत्वं न तूभयोस्संभवति । नैवं, तण्डुलानोदनं पचतीत्यपि व्यपदिश्यते ; न च कर्मणस्स्वतन्त्रता युक्ता, तदभावाच्च न कर्तृत्वनिबन्धनः पचतिव्यपदेशः स्वातन्त्र्ये वा कथं कर्मकर्तुः कर्मवत् न कर्तृप्रत्ययभावात् ।

नन्वेवं सति, ओदनतण्डुलानां निवृत्तिविकारयोरस्वातन्त्र्यात्सिध्यति ओदनोऽपि क्रियन्ति तण्डुला इत्यपि न स्यात् । तन्न, निवृत्यादिषु तत्पूर्वमनुभूय स्वतन्त्रतां कर्त्रन्तराणां व्यवहारे कर्म संपद्यते पुनः । भवतु नाम, तण्डुलानां सिद्धानां कथञ्चिदेतत्, ओदनस्य तु साध्यस्य नोपपद्यते ? नैवं, भवत्यर्थं सर्वस्य कर्तृत्वात् भवत्यर्थश्च सिध्यतीति न दोषः ।

यद्योदनो न पक्तव्यः पक्तव्यो यदि नोदनः ॥

यथा— शाटकश्चेन्न पातव्यो पातव्यश्चेन्न शाटकः ॥ अत्रोच्यते ।

अन्तस्थत्वं बहिस्थत्वं निष्पत्तौ द्वयमिष्यते । अन्तस्थत्वं पुरस्कृत्य बहिस्थत्वं प्रकाशते ॥

द्वयी सत्ता पदार्थानां बाह्याचाभ्यन्तरीति च । आन्तरी व्यवहारार्था बाह्यात्वर्थक्रियां प्रति ॥

अन्यथा ह्यङ्कुरो जायत इत्यपि न स्यात् । अत इदमुक्तम्; उपक्रमप्रभृत्यपवर्गपर्यन्तमन्तःप्रतिभया साकल्येनोल्लिख्य साध्यत्वेनाध्यवसितः पुरुषव्यापारः क्रियेति । न च पुरुषव्यापारस्य क्रियात्वं, रथो गच्छति, कूलं पततीत्यादिप्रयोगाभावः उपचारो वा । पुरुषशब्देनेह प्रथममध्यमोत्तमलादेशं त्रिकाभिधेययोः कर्तृकर्मणोरभिधानात् । न चैवमेतद्व्यापारयोरेव क्रियात्वं फलाभिधायित्वेन कारकोपलक्षणत्वात् ।

यथा च भागाः पचतेश्चलनज्वलनादयः । चलनज्वलनादीनां ज्ञेया भागास्तथाऽपरे ॥

तथाहि । देवदत्तश्चलतीत्यत्र किं प्रतीयते ? युगीमादत्ते, उदकमासिञ्चति, तण्डुलानावपतीति । एवं कारकान्तरव्यापारेष्वपि द्रष्टव्यं; न तु देवदत्तादेर्भौतिको व्यापारः आत्मव्यापारपूर्वको भवितुमर्हति । नैतदेवम्, नह्यात्मनो व्यापारः किञ्चिदस्ति इच्छाद्वेषपूर्वकप्रयत्नवशादेव स भौतिकव्यापारकारणतां प्रतिपद्यते । चलतीतिप्रतीतिवत् पचतीति प्रतीतिरपि प्रत्यक्षक्रियालंबनैवेति अत्रानुमेयक्रियावादिनस्समादधते ।

अस्तु नाम देवदत्तादिकारकनिकरपरिस्पन्दसमुदायः क्रिया । किन्तु पचतीत्यादावधिश्रयणावचनविचटनादीनां किमायुष्मान् क्रियात्वं मन्यते, किमर्थं सर्वाण्येवेति ? ओमिति ब्रूमः । पृच्छामि चायुष्मन्तं किमधिश्रयणादयः क्रियाव्यपदेशमेकशो वा लभेरन् । न तावदेकशः, क्रमरूपाभावात्; एतच्च तत्क्रियायाः क्रियात्वं, यदुत साधनैस्साध्यमानता क्रमरूपोपादानञ्च । न चैकस्य क्रमस्संभवति, अवश्याभिधेयश्चैतदुपात्तक्रमस्साध्यतयाऽभिधीयमानपदार्थः क्रियेति । अन्यथा हि पाकादीनां उपसंहृतक्रमाणामपि क्रियात्वप्रसङ्गः । ते हि पर्यवसिताः स्वरूपतयोपसंहृतक्रमा एव स्वशब्दैरभिधीयन्ते । तेषां पूर्वापरीभावविरहान्न क्रियात्वम् । अत एव ते साधनभावेन तैश्शब्दैरुपादीयन्ते, न साध्याभावेन । पाकं करोतीत्यादौ हि साधनविशेषनिबन्धनाविभक्तिरुपलभ्यते, द्वितीयानिवृत्तिरूपं च साधनमुपपद्यते । नन्वेवं, अस्ति विद्यते तिष्ठन्त्यादीनामपि न क्रियात्वं प्रसजेत्, यावता नेहापि क्रम उपलभ्यते । नैवम्, अत्रापि क्रमस्य प्रतीयमानत्वात् । तथाहि—

कालानुपाति यद्रूपं तदस्तीत्यपदिश्यते । परितस्तु परिच्छिन्ना भाव इत्येव कथ्यते ॥

एवं विद्यते तिष्ठतीत्यत्रापि द्रष्टव्यम्; कालाधिकारे चैतद्विशेषतो वर्णयिष्यामः । नापि गणशः क्रमजन्मताधिश्रयणादीनामुत्पन्नमत्र, प्रध्वंसित्वादयौगपद्ये समूहानुपपत्तेः । तदभावे च

कथमिव भिन्नेषु भिन्नशब्दो वर्ततां पचतीति । उच्यते, क्रमोपजातावयवपरिच्छेदप्राप्तसंस्कारान्तं हि यदा सकलं क्रियाकलापं चेतः कलयति, तदा प्रत्ययः परिवर्तिसमुदाय एककार्यत्वादाहितभेदः पचतीत्यादिशब्दव्यपदेशनिमित्तं भवति । तथाहि, ओदनादिकार्यक्रियाकलापस्तिरोधाय भेदमभेदेन व्यपदिश्यते । पचतीति फलस्य च सकलक्रियावयवसाध्यत्वात् साधनभावेनापि स एवाऽपेक्ष्यते । तदनन्तर्गतास्त्वधिश्रयणादयः प्रत्येकं फलमभिनिर्वर्तयितुमपर्याप्ताः पर्याप्तस्य समुदायस्य रूपसंपादनार्थत्वात्समुदायं प्रति गुणभूता विज्ञायन्ते । तदाह–

गुणभूतैरवयवैस्समूहक्रमजन्मनाम् । बुद्ध्या प्रकल्पितो भेदः क्रियेति व्यपदिश्यते ॥

यद्येवं पचतीति व्यपदेशो नोपपद्यते धातूपादानातीता न चानागता तदा वर्तमानकालविहितः प्रत्ययः प्रयुज्यते । न चाऽस्य क्रियाप्रतानस्थेयं व्यवस्था संभवति, अधिश्रयणादीनां पूर्वापरीभावनियमात् ; न चैकः क्रियाभागः पचतिशब्दनिबन्धनः शब्दशक्तिस्वभावात् । न ह्युपात्तक्रियावयवार्थप्रत्यायकश्शब्दो यथाभूतमर्थं प्रत्याययति ; ततः कथमेकस्य वर्तमानकालतां प्रत्ययोऽनुरुध्येत ? नैतदस्ति, शब्दशक्तयो हि भिन्नरूपामभिन्नामर्थव्यक्तिमुपात्तभेदान् दर्शयन्ति, यतः पूर्वापरीभूतावयवसमुदायावग्रहरूपा बुद्धिर्यथावगृहीतं समुदायाकारमवयवेषु प्रत्ययस्येति तेऽवयवाः प्रत्ययेन समारोपितसमुदायानुरूपाः पचतिशब्दवाच्यास्सन्तः स्वरूपसन्निधानात्त वर्तमानादिव्यपदेशमनुभूय प्रत्ययविशेषोत्पत्तिनिमित्तं भवन्ति । तथा हि, अभिसमीहितफलः क्रियायां फलोपजननसाधनभूतायां वर्तमानः पुमान् समुदायमेवाधाय चेतसि तास्ववयवक्रियासु प्रवर्तते । ततो ह्यस्य समुदायाभिसन्धिसमुत्थापिताः क्रियाभागाः समुदायसंपादनार्थत्वात् समुदायरूपेणाध्यवसीयन्ते । तथाऽध्यवसितक्रियारूपैस्तु तस्य क्रिया क्षणस्य सन्निधानाद्वर्तमानकालविहितः प्रत्ययः प्रयुज्यते पचतीति । अत्र चोत्पन्नमात्रप्रयुक्तत्वात् सर्वे क्रियावयवा वर्तमाना न संभवन्तीति स्फुटमेवावसीयते ; किन्तु प्रत्येकं समुदायिषु समुदायाध्यासेन प्रयुज्यते पचतीति । अधिश्रयणाद्यवयवक्रियासमुदायवचनेषु पचादिषु यस्मिन्नवयवेऽध्यारोप्य समुदायोऽधिश्रयणादिः विक्लित्यन्तः प्रत्याय्यते, तत्कालप्रत्ययोऽनुवर्तते । तत्र यदा वर्तमानावयवे समुदायाध्यासस्तदा पचतीति भवति । यदा तु भूतभविष्ययोस्समूहारोपणे तदाऽपाक्षीत् पक्ष्यतीति । तदुक्तम्—

समूहस्स तथाभूतः प्रतिभेदं समूहिषु । समाप्यते ततो भेदे कालभेदस्य संभवः ॥

समुदायस्य च समुदायिषु प्रत्येकपरिसमाप्तौ निदर्शनं, ग्रामो दग्धः, पटो दग्धः, इति । यदि ह्येकस्मिन्नंशे समुदायो न स्यात्, पाणिमात्रस्याङ्गुलिमात्रस्य वा चण्डालत्वविरहात् चण्डालपाण्यङ्गुलिस्पर्शेनैवोच्येत चण्डालस्पृष्ट इति । न चाङ्गविकारेणाङ्गिनो विकृतिर्लक्ष्यते, अक्ष्णा काण इति । तदुक्तम् ; अवयवे हि स्पृष्टे समुदायोऽपि स्पृष्टो भवति ; अवयवे हि कृतं लिङ्गं समुदायस्यापि विशेषकं भवति ; यश्च समुदायः सोऽवयवान्न व्यभिचरति । तस्य विशेषकं

यथा—गोस्सक्थनि कण्ठेऽपि कृतं लिङ्गं गोरेव विशेषकं न गोमण्डलस्येति । तदेवमुक्ते किमुक्तं भवति उपात्तक्रमाधिश्रयणादिविक्लित्यन्तानामवयवानां समुदायः पचतिक्रियेति ? तर्हि, चिरं जीवतु भवान् भवतैव प्रतिज्ञाता नैव क्रिया प्रत्यक्षेति । तस्मादुपात्तक्रियां क्रियावयवास्तदस्य क्रियासङ्घातस्य केचिदवयवा निवृत्ताः, केचिदनिवृत्ताः, कश्चिदेव प्रत्युपस्थितः । उपस्थितविषयाः चक्षुरादयः, ततोऽथ क्रियाकलापादयः प्रत्यक्षयितुं चक्षुरादिभिरभिसंबन्धात् न व्यतीतानागतरूपस्यासतः क्रियावयवस्य सदासदानुपातिना कारणग्रामेण संबन्धो, न वाऽनधिगतेन्द्रियसंबन्धस्य पदार्थस्य दर्शनपरिच्छेद्यता संभवति । तदुक्तं—

क्रमात्सदसतां तेषामात्मनो न समूहिताः । सद्वस्तुविषयैर्यान्ति संबन्धं चक्षुरादिभिः ॥

दर्शनाभिमानः कथमिति चेत्, यथा गौरश्व इत्येवमादिषु पदेषु गकारादयो वर्णभागाः क्रमरूपानुविधायिनो व्यक्तावुपजने* वा प्राप्तयौगपद्यासङ्घातरूपेण न पार्यन्तेऽवधारयितुं, इन्द्रियायत्तया बुद्ध्या तस्याः प्रत्युपस्थिताक्षरावसायशक्तेः पूर्वोत्तरभागयोरसंस्पर्शात् । समभिहितावयवपरिच्छेदप्रापितातिशयास्तु बुद्धयः स्वानुरूपं संस्कारपरंपरामन्ते समालोचितविशेषवर्णभागामुपजनयन्ति तस्यामुत्कीर्णबुद्धिमिव तत्पदं समुदायात्मना निरूप्यते । तदाह—

यथा गौरिति सङ्घातस्सर्वो नेन्द्रियगोचरः । भागशस्तूपलब्धस्य बुद्धौ रूपं निरूप्यते ॥

काल्पनिकस्तु युगपद्ग्रहणाभिमानः प्रत्यक्षभ्रमनिबन्धनम् । यथाऽलातस्य विद्धविश्वशते देशे नैरन्तर्या न परिवृत्तिरूपमपि रामेणावधारयन्नयनावसितकालभेदो युगपत्सकलदेशव्यापि परिच्छिन्दन्नध्यवसति, चक्रमिति यथा क्रमवन्तः क्रियाभागाः क्रमेणैवावसिता लघुतरं परिवर्तित्वादनवधृतकालभेदैर्युगपदेवाध्यवसीयन्ते ; यथाऽध्यवसायं च दर्शनाभिमानमुत्पादयन्तः प्रत्यक्षव्यवहारं वर्तयति । यदुक्तम्—

इन्द्रियैरन्यथाप्राप्तौ भेदांशोपनिपातिभिः । अलातचक्रवद्रूपं क्रियाणां परिवर्तितम् ॥

अप्रत्यक्षैव तु क्रिया । यदाह महाभाष्यकारः– क्रियाणामेवमत्यन्तापरिदृष्टा अशक्या निदर्शयितुं, यथा गर्भो निर्लुठितस्यासावनुमानगम्येति । ननु प्रत्यक्षप्रवृत्तौ संबन्धग्रहणाभावात् कथं क्रियाविषयेऽनुमानं वर्तते ? नैष दोषः, धातुवाच्यस्य समूहस्य युगपदसन्निधानात्प्रत्यक्षत्वम् । एकैकस्य तु लक्षणस्य प्रत्यक्षत्वे बुद्ध्या सङ्कलय्य पचतीति प्रयुज्यते, यदाप्येकस्मिन् क्षणे पचतीति प्रयोगस्तदा तत्र समूहारोपणम् । यदाह—

पूर्वोत्तरैर्यदा भागैस्समवस्थापितक्रमः । एकस्सोप्यसदध्यासादाख्यातैरभिधीयते ॥
यश्चापकर्षपर्यन्तमनुप्राप्तः प्रतीयते । तत्रैकस्मिन् क्रियाशब्दः केवलेन प्रयुज्यते ॥

न त्वेवमिन्द्रियैरभिसंबन्धात् सरूपसन्निधानाय वर्तमानव्यपदेशाच्च कथमप्रत्यक्षत्वं क्रियायाम्? उच्यते, नेह वस्त्वर्थो निरूप्यते, अपितु शब्दार्थः। तत्र चान्वयव्यतिरेकाभ्यां यः प्रकृत्यर्थोऽवस्थाप्यते, या क्रियावचनस्य धातुसंज्ञा, नासौ शक्या साक्षादुपलब्धुम्। तत्र हि आचार्याणां मतभेदः; एके मन्यन्ते—अधिश्रयणादीनां समुदायो बुद्ध्या निगृहीतः, एकत्वेन स पचतीत्यादीनां वाच्य इति। न च समुदायं पचतीति प्रयुञ्जानः प्रत्येकमधिश्रयणादिषु प्रत्यस्यति, प्रत्ययाश्च न समुदाय इत्येवं रूपं प्रत्यस्यन्ति। नाप्ययं चायं चेति संबन्धिनो बुद्ध्यावगृह्णाति। किं तर्ह्याश्रितक्रमनिरूपमिव प्रत्येकमवयवेषु प्रत्ययस्य पचतीति प्रयुङ्क्ते, तदा तस्यैव समीहितं भवति, अधिश्रयणाद्यनुपूर्वा फलमोदनादि निर्वर्तयितव्यमिति। यथा प्रथमक्रियासंभागे पचिरित्येवाध्यवस्यति नाधिश्रयणमिति। इतरथा ह्येवं प्रयोगस्तस्याधिश्रयतीति यदाचाधिश्रयणे निर्वृत्तेनागते वा भूतभविष्यत्कालाभिधायिनं शब्दं प्रयुङ्क्ते, तदा समुदायरूपप्रत्यासेनैव तमवयव-बुद्ध्या निगृह्य प्रयुङ्क्ते अपाक्षीत्, पक्ष्यतीति। न त्वधिश्रयणरूपेण, अन्यथा ह्येवं प्रयोगस्स्यात् अध्याशिश्रयत्, अधिश्रयिष्यतीति। एवमापनेपि च घटने वा समूहिनि समुदायरूपप्राप्त्या धातुत्वादेव व्यपदेशात्। पचत्यपाक्षीत् पक्ष्यति, एवं भूतश्चार्थात्माऽधिकृतस्साधनतन्त्रसाध्यावस्थः शब्देन प्रक्रान्तोऽशक्य उपलब्धुं; यथा—गौरिति गकारौकारविसर्जनीया एवोपलभ्यन्ते। समुदायस्तु बुद्धिनिर्ग्राह्य एव; तथा पचतीत्यादिष्वेवाधिश्रयतीत्यवयवादिषु अवयव एव हस्त-प्रसरणस्थालीविन्यासादयोऽशब्दवाच्याः प्रत्यक्षा एव। यावदपकर्षपर्यन्तप्राप्ता क्रियेति सापि नाप्रत्यस्ते क्रमरूपे समुदाये आख्यातशब्देनाभिधीयते। अपकर्षपर्यन्ता चेत्क्रमरूपेण नाऽवगृह्णादिति अवाचक एवाख्यातशब्दः यथा—श्लोकशब्दं प्रयुञ्जानो भाद्यं पदं पदरूपेणावगृह्णाति न तदा श्लोकस्समुच्चार्यत इति प्रयुङ्क्ते। यदा त्वाश्रितोत्तरप्रबन्धमवगृह्णाति तदा श्लोकशब्दं प्रयुङ्क्ते। एवं कृत्वा निरुक्तेत्युक्तं पूर्वापरीभूतं भावमाख्यायते नाचष्ट इति। अन्येषां दर्शनं यद्विचटनं तण्डुला-वयवानां तण्डुलावयवेभ्यो विभागः; यदनन्तरं मा भवादयो निष्पद्यन्ते। तद्यदाऽधिश्रयादिषु प्रत्यस्तरूपं भवति तदाऽख्यानेनाभिधीयते। तत्र यदुपलभ्यतेऽधिश्रयणं तदशब्दवाच्यं; कारक-निराकांक्षं यच्छब्देनाभिधीयते तदनिष्पन्नं; साधनतन्त्रमप्रत्यक्षं निष्पन्नानिष्पन्नयोश्चैकान्त्या-त्मायत्तौ पचत्यादिशब्दप्रयोगः। स चायमेवंरूपोऽर्थात्मा गुणक्रियाणां पौर्वापर्यात्मनां पूर्वो न परश्च पूर्वापरीभूते व्यपदिश्यते। अन्ये तु विचटनमेवाधिश्रयणादिरूपं प्रतिपन्नाः, न रूपशून्याधि-श्रयणादीन् प्रत्यस्तविचटनरूपानाहुश्च कः पुनः पचेः प्रधानार्थः योऽसौ तण्डुलानां विक्लित्तिः?

अथवा यदभिसंधिपूर्वकं प्रेषणमध्येषणं वा स सर्वः पच्यर्थ इति सर्वस्मिन्नपि दर्शने यथा-भूताख्यातशब्दो न क्रिया प्रक्रम्यते। तथाभूतायास्सिद्धमप्रत्यक्षमिति फलेनैव समधिगमो युक्तं कथमिति चेत्, इह सर्वेषु साधनेषु सन्निहितेषु कदाचित्पचतीत्येतद्भवति, कदाचिन्न भवति, यस्मिन्निमित्ते सन्निहिते पचतीत्येतद्भवति। सा नूनं क्रियायां देवदत्त इह भूत्वा पाटलिपुत्रे

भवति। सा नूनं क्रियेति द्वितीयहेतुमत्या सोऽप्यर्थ इति चेन्नैवम्; इह कस्यचिदेषा बुद्धिः स्यात्; असत्येवाऽस्मिन्निमित्ते पचत्यादिबुद्धयः प्रवर्तन्ते, यथा मृगतृष्णिकादिष्विति तदनेन निर्वर्तयति। मृगतृष्णिकादिभ्यो हि तृप्तिमलापकर्षण घर्मापनोदनादि न फलं निवर्तते; असर्वगतया हि देवदत्तपाटलिपुत्रयोर्गमनक्रियान्तरनैरन्तर्येणावस्थानरूपं फलमुपलभ्यते।

अथवा एतदयं प्रतिपद्येत, शक्तिकृताः पचत्यादयो विशेषाः सम्प्रत्ययाश्च स्युः, न क्रियाकृता इति। तदनेन निर्वर्तयति, यावां देवदत्त इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रियेति। यदि ह्येते शक्तिकृतास्स्युः शक्त्यनन्तरमेव पाटलिपुत्रेण प्राप्तिस्स्यात्। न च भवति तस्मात् शक्तिकृते नान्येन धर्मेण, यस्य फलं देशान्तरप्राप्तिरिति।

क्रियामन्ये तु मन्यन्ते क्वचिदप्यनपाश्रिताम्। सा नैवार्थावभासत्वे प्रवृत्तिरनपायिनी॥
सामान्यभूता धात्वर्थैरसा पुनः प्रविभज्यते। ततो व्यापाररूपेण साध्ये पर्यवतिष्ठते॥
प्रकृतिस्साधनानां सा प्रथमान्तमकारकम्। शक्तिरेकाधिकरणे स्रोतोवदुपकर्षति॥
अपूर्वं कालशक्तिंवा क्रियायाः कालमेव वा। तमेकं लक्षणं भावं केचिदाहुः कथञ्चन॥

सा तु यथा अस्ति भवति करोतीत्यादिक्रियावच्छेदे भेदाभिन्नाऽपि भिन्नेव प्रकाशते, तथा क्रमरूपोपादानान्नित्यमेव कालसंबन्धोपाधिभूतभूतभविष्यदादिव्यपदेशमासादयति। कः पुनरयं कालो नाम? क्रियैव क्रियान्तरावधृतपरिमाणव्यवच्छिन्ना वा क्रियापरिच्छिन्नहेतुः कालः, कथं पुनः क्रिययैव क्रियापरिच्छित्तिः? श्रूयताम्। इह तु क्रियाः काश्चित्क्रियान्तरैः कैश्चिद्बुद्ध्यैव परिमीयन्ते। यथा– अर्कादीनां गतयः यथा च गोदोहादयः, तथाऽस्मदादिव्यापाराः। यथा— पुरुषायुषादयस्तत्रावधृतपरिमाणाभिरितराः परिच्छिद्यन्ते; यथा—दिवसं गच्छति, वर्षशतं जीव, ओदनपाकमास्ते, गोदोहं स्वपिति। तत्र परिच्छेदकालव्यवहारं वर्तयन्ति; यथा—सवितुरुदयादिरस्तमयपर्यन्तः क्रियाप्रबन्धो दिवसः, स एवास्तमयादिः पुनरुदयावसानो निशा, सर्वाकर्षाणां सकृत्परिवृत्तिरहोरात्रः, कलाभिरिन्दोराप्यायनं परिक्षयो वा पक्षः, चन्द्रस्य सकलनक्षत्रातिक्रमो मासः, सूर्याचन्द्रमसोर्गतिविभागादेकाहोरात्रक्षय ऋतुः, रवेर्दक्षिणत उत्तरतो वा गमनमयनं, बृहस्पतेरेकराश्यतिक्रमस्संवत्सर इति। तेन चोक्तानुक्तं क्रिया कालोऽवच्छिद्यते। यथा– दिवा दिवः, दिवसो निशाचाहोरात्रः, पञ्चदशाहोरात्रः पक्षः, पक्षद्वयं मासः, मासद्वयमृतुः, ऋतुत्रयमयनं, अयनद्वयं संवत्सरः, पञ्च संवत्सरा युगम्। युगानि द्वादश कल्पः, कल्पशतानि द्वादश महाकल्पः, महाकल्पषष्टिश्चतुर्युगं, चतुर्युगानि द्विसप्ततिर्मन्वन्तरम्, मन्वन्तराणि चतुर्दश ब्रह्मदिवसः, तावत्येव तन्निशा प्रलयः, तन्मानेन वर्षशतान्ते ब्रह्मणोऽपवर्गो महाप्रलयः। यथा वा सूर्यस्य भगणभोगो वर्षं, राशिभोगो मासः, मासत्रिंशांशो दिनं, दिनषष्ट्यंशा कला, कलाषष्ट्यंशा

विकला, विकलाषष्ट्यंशः तत्परेति । तत्र यथा—रजतान्यधिकरणगौरवमवधृतपरिमाणद्रव्यान्तरसंबन्धसमुत्कीर्णरेखस्तुलादण्डः । रेखासु सूत्रावस्थानफलशः कर्षशोभा परिच्छिनत्ति । तथा कालदिनादीन्यवस्थानवशेन भागशः कालान्तरं परिच्छिनत्ति । परिमाणं परिमिमीते क्रियानियमैः कालावच्छेदनियमः यथा—परिमाणो स्ववष्टब्धप्रदेशो क्रमलक्षणः, पक्ष्मसंपातो निमेषः, इयत्क्षणे इयन्निमेषो वा नाडिका, द्विनाडिको मुहूर्तः, पादोनचतुर्मुहूर्तो यामः, यामाष्टकमहोरात्रः इति । बुद्ध्यवच्छेदेन वा कालपरिच्छेदः, यथा—अर्कस्य उदयाविदूरता प्रत्यूषः, पुरुषभ्रूप्रदेशता दीर्घता पूर्वाह्णः, तपमा मध्याह्नः, परावृत्य दर्शनमपराह्णः, अस्तमयासन्नताभिसन्धिः सन्ध्येति । रात्रेः प्रारम्भो निशामुखं, निशामुखाद्रात्रेस्तुर्यांशः, अर्धरात्रमुभयतो निशाष्टमो निशीथः, निशीथात्तावन्मात्रमपररात्रः, परतो निशावशेषः प्रभातमिति क्रियाविशेषैः कालविशेषावगमः । तथाहि—

शयाने शेरते रात्रौ दिवा जाग्रति जाग्रति । जगत्प्रदीपे पद्मानि कलत्राणीव भर्तरि ॥
रतान्तकालकान्तस्त्रीदृग्विलासैकसाक्षिणी । निशा नीलोत्पलानीके निमीलति निमीलति ॥
चञ्च्वग्रचुम्बितातानम्रचूतांकुरकदम्बकैः । कथ्यते कोकिलैरेव मधुर्मधुरकूजितैः ॥
दिवाकरकरालातपातनिर्दग्धवीरुधः । मार्गाम्भसमल्लिकामोदा भाविग्रीष्मस्य शंसिनः ॥
शिखण्डिमण्डलारब्धचण्डताण्डवडम्बरैः । प्रावृडाख्यायते मेघमेदुरैर्मेदिनीधरैः ॥
मौक्तिकाकारविस्तारि तारानिकरचित्रितम् । शरत्पिशुनतां याति यामुनाम्भोनिभं नभः ॥
आयामियामिनीभोगसफलाभोगविभ्रमाः । हेमन्तमभिनन्दन्ति सोष्माणस्तरुणीस्तनाः ॥
आस्कन्दनदलत्कुन्दकलिकोत्करदन्तुराः । वदन्ति शिशिरं वातास्तुषारकणकर्कशाः ॥

बाल्ययौवनकौमारयौवनादयो मौग्ध्यमाध्यप्रागल्भादयश्च क्रियाविशेषव्यङ्ग्याः कालविशेषाः एव । वयो हि देहिनां वत्सरादिभिः कालभेदः ; वयोनिमित्ताश्च तेषां मौग्ध्यादय इति । उच्यते—

उत्तालालकभञ्जनानि कबरीभारेषु शिक्षारसो ।
दन्तानां परिकर्म नीविनहनं भ्रूलास्ययोग्याग्रहः ॥
तिर्यग्लोचनवल्गितानि वचसां छेकोक्तिसङ्क्रान्तयः ।
स्त्रीणां म्लायति शैशवे प्रतिकलं कोऽप्येष केलिक्रमः ॥

व्यसनोत्सव नित्यनैमित्तिकक्षणप्रकीर्णचन्द्रोदयचन्द्रास्तमयप्रभृतयश्च कालव्यपदेशभाजो गोदोहादिवद्वेदितव्याः । अपिच, परावरच्चिरक्षिप्रक्रमोत्क्रमविभागवान् । कालक्रियाविशेषाभिव्यङ्ग्यरीतिः प्रतीयताम् । तथाहि ; उत्पत्त्यादिक्रियाणां प्रथमत्वे परः तथेयं बाला ज्येष्ठा च वैपरीत्ये

पुनरपरः यथैषा प्रगल्भा कनिष्ठा च । साधनानां मन्दसंपातित्वे चिरः यथा—वत्स्यति कालः, भोक्ष्यते तालफलं, तदन्यथात्वे क्षिप्रः यतो भिन्नश्च वंशकारी, शिरागतश्च प्रमाणं, क्रियाणां अपौर्वापर्यं युगपत्, यथा दिवसाग्रतो निशा, निशाग्रतो दिवस इति । सेयं वस्तुनश्शक्तिः पाकप्रभवा स्वाभाविकी क्रियैव, क्रियापरिच्छेदहेतुः कालः; क्रियाश्च ता भविष्यन्ति वर्तमानाः अव्यक्ताश्च । तत्र व्यतिपतितसाधनभूता यथाऽपाक्षीदिति, अनागताऽसन्निहितसाधना च भविष्यति यथा पक्ष्यतीति, अवाप्ता अप्रच्युतस्वरूपा वर्तमाना यथा पचतीति, अनिर्धारितविशेषा अव्यक्ता यथा पचेदयमिति, तन्निबन्धनश्च लोके, अद्यश्वः, परश्वः, परेद्युः, अन्येद्युः, उभयेद्युः, इदानीं, एतर्हि, एषमः, परुत्, परारि, शश्वत्, श्वः, भूः, सद्यः, पुरा, ह, स्म, यावत्, तदा, यदा, अन्यदा, एकदा, सदेति व्यवहारः लुङादीनां भूतादिषु स्मरणमिति ।

अन्ये पुनः क्रियाव्यतिरिक्तमनुदयास्तमयमभिन्नमनवच्छिन्नदेशं च द्रव्यं पृथग्विधानेकशक्तिशतसहस्रपाकायतनं जगत्प्रवृत्तिनियमकारणं क्रियापरिच्छेदहेतुमदृष्टाद्यपेक्षं कालमाचक्षते; स च क्रियापरिच्छेद्यः किलेति । केचिदाहुश्च—नित्यो व्यापी संप्रति भूतभविष्यत्क्रियासमावेशात् । आकाशकल्प एको द्रव्यात्मा भिद्यते कालः; तच्चासमीचीनमेवेति भ्रमः । क्रिया हि साध्यत्वात् साधनमेवापेक्षते । न च क्रियाविशिष्टस्यापि द्रव्यात्मनः कालकारकेण संबन्धो घटते, द्वयोरपि सिद्धत्वात् । तस्माद्द्रव्यरूपे क्रियारूपे वा कालः क्रियामेव विशेषयति । स च तद्विशिष्टा कारकविशेषमुपतिष्ठते । यदाह—

गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते । प्रधानस्योपकारित्वे तथा भूयसि वर्तते ॥
कलाभिः पृथगर्थाभिः प्रविभक्तं स्वभावतः । केचिद्बुद्ध्यनुसंधानलक्षणत्वं प्रचक्षते ॥
सत्तालक्षणमन्ये तु क्षणरूपं तथाऽपरे । देवतावस्तुशक्त्यात्मस्वरूपमपरे विदुः ॥
तमस्य लोकयन्त्रस्य सूत्रधारं प्रचक्षते । प्रतिबन्धाभ्यनुज्ञाभ्यां वृत्तिर्या तस्य शाश्वती ॥
तया विभज्यमानोऽसौ लभते क्रमरूपताम् । तृणराजस्य या वृद्धिस्त्वचिसारस्य वा दधत् ॥
चिरक्षिप्रादिभेदे च कालकत्वं विकल्पते । व्यतिक्रमेऽपि मात्राणां न तस्यास्ति व्यतिक्रमः ॥
नियन्तृगतिभेदेन मार्गभेदोऽस्ति कश्चन । दूरान्तिकव्यवस्थानमध्वादिकरणं यथा ॥
चिरक्षिप्रव्यवस्थानं कालाधिकरणं तथा । क्रियोपाधिस्स या भूतभविष्यद्वर्तमानता ॥
परावरविभागार्थं सा शक्तिः प्रतिपाद्यते । भूतानां चैव यद्रूपं रूपं यद्भाविनामपि ॥
सुदुर्दर्शे इवादर्शे काल एवोपलभ्यते । क्रियाभेदाद्यथैकस्मिंस्तक्षाद्याख्या प्रवर्तते ॥
क्रियाभेदात्तथैकस्मिन् नृत्वाख्याचोपजायते । विशिष्टमपि धत्तं तमुपादायावकल्पते ॥
कालः कालविदामेकः कालादिप्रविभक्तये । तृणपर्णलतादीनि यथा स्रोतोऽवकर्षति ॥

प्रवर्तयति कालोऽपि मात्रा मात्रावतां तथा। प्रारम्भवेशानिष्ठासु स्थितिविप्रतिपत्तिषु ॥
साम्योत्कर्षापकर्षेषु निमित्तं काल इष्यते। संसर्गिणां तु ये भेदा विशेषास्तस्य ते मताः ॥
संभिन्नस्तैर्व्यवस्थानां कालो भेदाय कल्पते। प्रतिव्यवस्थं कालस्य व्यापारो न व्यवस्थितः ॥
कालो वा विश्वरूपात्मा व्यापार इति कथ्यते। क्रियावच्छेदहेतुं वा क्रियावच्छेद्यमेव वा ॥
कालात्मानमनाश्रित्य व्यवहर्तुं न शक्यते। तस्य व्यक्तस्वरूपस्य व्यवहारे क्रियाकृताः ॥
भूतादयो महाभेदा यान् लोको नातिवर्तते ॥

के पुनस्ते यान् भूत उपाधौ लुङादिविषयानुदहरिष्यामः। तदेतत् द्रव्यात्मनः क्रियात्मनो वा क्रियापरिच्छेदिनः कालस्य स्वरूपमभिहितम्। अथापरमपरिमेयात्मनो देवतादिरूपस्य स्वशक्तिनिमित्तविश्वप्रवृत्तिपरिच्छेद्यस्य तस्य परिच्छेदिनो वा क्रियाहेतुशक्त्यायतनभूतद्रव्यरूपपरिणतं निवृत्तं वा, न समस्तनिवृत्तसंग्रहानुग्रहादिनित्यनैमित्तिकादिरूपं स्वरूपमस्ति। तत्पुरस्तात् प्रतिपादितं; अग्रतश्च विशेषतः प्रतिपादयिष्यत इति नेह प्रतन्यते, संबन्धावच्छेदार्थं तु लेशतो अभिधीयत इति। तत्प्रभेदाद्द्रव्यरूपोऽपि कालश्चतुर्धा—नित्यो, नैमित्तिकः, स्वाभाविको, वैपरामर्शिक इति। तेषु नित्यश्शाश्वतिको वैकल्पिकः नैयोगिकश्च त्रिधा। नैमित्तिकोऽपि औद्योगिकः औपयोगिकः प्रायोगिकश्चेति त्रिविधः। एवं स्वाभाविकोऽपि आगन्तुकः नैसर्गिकः सांसर्गिक इति त्रिधा। वैपरामर्शिकोऽपि सङ्कीर्णः प्रकीर्णो विप्रकीर्ण इति त्रिधैव। तेषु क्षणनिमेषनाडिकामुहूर्तप्रहराहोरात्रस्वरूपश्शाश्वतिक, अयं हि शश्वत्प्रवर्तमानो नावधिविशेषमपेक्षते। यथा—

क्षणे निमेषे नाड्यां वा मुहूर्ते प्रहरेऽह्नि वा। गते त्वमेष्यसीत्युक्ते रुरोध पथिकं प्रिया ॥

दिनरात्रिपक्षमासर्त्वयनरूपो वैकल्पिकः। अयं हि सूर्योदयादिविशिष्टमवधिमपेक्षमाणो विकल्पाय प्रभवति। यथा—

दिनानि रात्रयः पक्षमासावृतुरथायनम्। जरा वै यद्यदङ्गानां तत्तत्प्रेम्णो रसायनम् ॥

संवत्सरयुगकल्पमन्वन्तरप्रलयमहाप्रलयरूपो नैयोगिकः। अयं हि बृहस्पतितारायणसुरमथनब्रह्मणां राज्यादिवृत्तिविशेषाविशिष्टमेवावधिमपेक्षमाणः प्राणिनो विशिष्टासु प्रवृत्तिषु नियुङ्क्ते। यथा—

संवत्सरैर्युगैः कल्पैर्मनुभिः प्रलयैः क्षयैः। हीयते हि जगत्सर्वमेकः कामो न हीयते ॥

तेऽमी शाश्वतिकवैकल्पिकनैयोगिकास्त्रयोऽपि कालभेदा नित्या उच्यन्ते, नित्यरूपेणैवानिवारितप्रवृत्तित्वात्। प्रातःप्रत्यूषप्राह्णमध्याह्नापराह्णसन्ध्यारूप औद्योगिकः। अयं ह्युपेक्षितहविर्भागपौर्वापर्यावधिः प्राणिनां प्रबोधोत्थानस्नानभोजनप्रसाधनविहारादेरुद्योगस्य निमित्तं भवति। यथा—

प्रातः प्रत्यूषयोस्स्नाति भुङ्क्ते सन्ध्यापराह्णयोः। प्राह्णमध्याह्नयोर्यूनां शेते मनसि मन्मथः ॥

अयं ह्यपेक्षितरात्रिविभागपौर्वापर्यावधिः कामिनां दूतीसंप्रेषणप्रेक्षानिद्रासुखमधुपानाभिसरणादेरुपभोगस्य निमित्तं भवति । यथा—

निशामुखे प्रदोषे च निशीथापररात्रयोः। इन्दोः प्रकाशे नाशे वा सुप्तः कामो विबुध्यते ॥

शरद्धेमन्तशिशिरवसन्तग्रीष्मरूपः प्रायोगिकः । अयं ह्यपेक्षितसंवत्सरविषुपौर्वापर्यावधिं प्राणिनां कामकृतचित्तवैकृतानां प्रयोगनिमित्तं भवति । यथा—

शरद्धेमन्तयोरन्यदन्यद्वर्षावसन्तयोः । हिमर्तुग्रीष्मयोरन्यत्कामावस्था प्रवर्तते ॥

तेऽमी त्रयोऽप्यौद्योगिकौपयोगिकप्रायोगिकाः कालभेदाः नैमित्तिकाः, नित्यत्वेऽप्येषामुद्योगादेर्निमित्तत्वात् । मदप्रमदाभ्युदयोत्सवव्यसनपरिहाराभिरूप आगन्तुकः । स हि विशिष्टक्रियोपनिपातादिकमवधिमपेक्षमाणः प्राणिनां मदप्रमदादिरूपेणैवागच्छति । यथा—

मदप्रमदहर्षेषु व्यसनेषूत्सवेषु च । परिहासेषु च प्रायः कामस्सामान्यमर्हति ॥

बाल्यकौमारयौवनमौग्ध्यमाध्यस्थ्यप्रागल्भ्यादिरूपो नैसर्गिकः । अयं हि वयोभागादिकं विशिष्टमेवावधिमपेक्षमाणः प्राणिनां निसर्गत एव भवति । यथा—

मौग्ध्यप्रागल्भ्यमाध्यस्थ्यबाल्यकौमारयौवनैः ।
आतिष्ठति पदैष्षड्भिः त्रिजातिः कामषट्पदः ॥

परापरयौगपद्यचिरक्षिप्ररूपस्सांसर्गिकः । अयं हि प्रवृत्तिसाधनानां पूर्वापरत्वे सहैकत्वे मन्दशीघ्रसमपातित्वे च क्रियास्वपेक्षमाणो मिथः संसर्गाय प्रभवति । यथा—

क्रमेण युगपत्पूर्वमग्रतो द्राक् चिरेण वा। समासजन्त्यश्चेतांसि न ज्ञायन्ते स्मरातयः ॥

तेऽमी आगन्तुकनैसर्गिकसांसर्गिकास्त्रयोऽपि कालभेदाः स्वाभाविका उच्यन्ते ; स्वभावतः प्रवर्तमानत्वात् । देश्यक्रीडाकेलिकेलिद्यूतव्रतगोष्ठीविप्रेक्षादिरूपस्सङ्कीर्णः । स हि विशिष्टं तं तमवधिमपेक्षमाणस्संभूय प्रवर्तितस्सङ्कीर्ण एवं भवति । यथा—

व्रतेषु गोष्ठीप्रेक्षासु केलिद्यूतेषु केलिषु। देश्यक्रीडासु चानङ्गः पुनरङ्गेन युज्यते ॥

विविक्तं दीर्घिकोद्यानसौधक्रीडादिदर्शनरूपः प्रकीर्णः। स ह्येकस्य वा परिमितपरिवारस्य वा विशिष्टावधिक एव प्रकीर्णकन्यायेन यदाकदाचिदुत्पद्यते । यथा—

विविक्तदीर्घिकोद्यानसौधाक्रीडादिदर्शने। लतावेश्मोपवेशे च कामः कामेन युज्यते ॥

अष्टमीचन्द्रकेन्द्रोत्सवयक्षरात्रिकुन्दचतुर्थीसुवसन्तकमदनत्रयोदश्यादिरूपो विप्रकीर्णकः। स हि विशिष्टमष्टम्यादिकालमेवावधिमपेक्षमाणः कामिभिर्निर्वर्त्यते । समस्तेष्वपि देशेषु विप्रकीर्ण इव दृश्यते इति । यथा—

अष्टमीचन्द्रके कुन्दचतुर्थ्यां सुवसन्तके । हरस्स्मरार्चा शक्रार्चा यक्षरात्रिषु वर्धते ॥

स एव कालः कार्त्स्न्येन द्विरूप इव दर्शितः ।
क्रियापदैकवाच्यो यः क्रियायास्साधनं च यः ॥

किं पुनस्साधनं स्वपराश्रितक्रियाभिनिर्वृत्तिहेतुश्शक्तिमद्द्रव्यं, यद्द्रव्यं कारकमित्याचक्षते । कारकशब्दश्चायमव्युत्पन्नः क्रियानिमित्तवचनो लोकतस्सिद्धः करोतीति वा कारकशब्देन शक्तिमद्द्रव्यमुच्यते । तथाहि—

निष्पन्नमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके । व्यापारभेदापेक्षायां करणादित्वसंभवः ॥
पुत्रस्य जन्मनि यथा पित्रोः कर्तृत्वमुच्यते । अयमस्मादियं त्वस्मादिति भेदविवक्षया ॥
शक्तिमाला समूहस्य विश्वस्यानेकधर्मिणः । सर्वथा सर्वदाभावात्क्वचित्किंचिद्विवक्ष्यते ॥
सर्वत्र सहजा शक्तिर्यावद्द्रव्यमवस्थिता । क्रियाकालेत्वभिव्यक्तिराश्रयः परकारिणी ॥
साङ्गसंयोगिनः पाशादन्यानां वारणा यथा । व्यज्यन्ते विजिगीषूणां द्रव्याणां शक्तयस्तथा॥
तैक्ष्ण्यगौरवकाठिण्यसंस्थानैः स्वैरसिर्यदा । भेद्यं प्रतिव्याप्रियते शक्तिमारुह्यते तदा ॥
स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे । क्रियाणामभिनिष्पत्तेर्निमित्तं शक्तिरिष्यते ॥
तत्वे वा व्यतिरेके वा व्यतिरिक्तैव सोच्यते । शब्दप्रमाणको लोकस्स शास्त्रेणानुगम्यते ॥

तत्र शक्तिमतो द्रव्यस्य कारकाख्यायामवान्तरव्यापारनिबन्धनाः षडुपाख्या भवन्ति, कर्ता, कर्म करणं संप्रदानमपादानमधिकरणं चेति । तेषु स्वतन्त्रः कर्ता, किं पुनस्तस्य स्वातन्त्र्यं, यत् करणादीनि प्रयुङ्क्ते, न तैः प्रयुज्यते । तानि न्यक्करोति, न तैर्न्यक्क्रियते ; न तैर्निर्वर्त्यते, तानि तानि निर्वर्तयति, तानि प्रतिनिधत्ते न तैः प्रतिनिधीयते । तेभ्यस्सः प्रथममात्मानं लभते, न तानि । तस्मात् स तैर्विनाऽपि दृश्यते, न तानि तेनेति । तदाह—

प्रागन्यतश्शक्तिलाभान्न्यग्भावापादनादपि । तदधीनप्रवृत्तित्वात्प्रवृत्तानां निवर्तना ॥
अदृष्टत्वात्प्रतिनिधेः प्रविवेके च दर्शनात् । आरादप्युपकारित्वे प्राधान्यं कर्तुरुच्यते ॥

कथं तर्हि न्यक्कृतेषु करणादिषु कारकत्वं स्वव्यापारे प्रधानव्यापारे च स्वातन्त्र्यात् ।

गुणक्रियाणां कर्तारः कर्त्रा न्यक्कृतशक्तयः । कारणत्वादिभिर्जाताः क्रियाभेदानुवादिभिः ॥

व्यस्तायामपि संपूर्णैस्स्वव्यापारैस्समन्वितः। स्वातन्त्र्यमुत्तरं लब्ध्वा प्रधाने यान्ति कर्तृताम्॥
यथा राज्ञो नियुक्तेषु योद्धृत्वं योद्धृषु स्थितम्। तेषु वृत्तौ तु लभते राजा जयपराजयौ॥
तथा कर्त्रा नियुक्तेषु सर्वेष्वेकार्थकारिषु। कर्तृत्वं करणादिस्त्वैरुत्तरं न विरुध्यते॥

कर्त्रादीनां च षण्णामपि प्रत्येकं त्रिप्रकारत्वादष्टादशप्रभेदा भवन्ति। तत्र कर्ता स्वतन्त्रः, हेतुः, कर्मकर्ता च, कर्म निर्वर्त्यं विकार्यं प्राप्यं च, करणं बाह्यमाभ्यन्तरं बाह्याभ्यन्तरं च, संप्रदानं ददातिकर्माख्यं कर्ममात्राख्यं क्रियाख्यं च, अपादानं निर्दिष्टविषयमनिर्दिष्टविषयमुपात्त-विषयमपेक्षितक्रियं च, अधिकरणं वैषयिकमौपश्लेषिकं नैमित्तिकं चेति। तत्र कर्तृभेदेषु स्वतन्त्रः समर्थोऽसमर्थस्समर्थासमर्थः, संबन्धोऽसंबन्धस्संबन्धासंबन्धश्च। तेषु समर्थो यथा— व्रजति, पचति, अस्ति, श्वेतते। असमर्थो यथा—जायते, विरमति, नश्यति, विकरोति। समर्थासमर्थो यथा—चैत्रस्य रुजति, चैत्रस्यामयति, चोरं ज्वरयति, चोरं संतापयति। संबन्धो यथा—प्रियं दृष्ट्वा सुखं भवति, रिपुं दृष्ट्वा दुःखमुत्पद्यते, रम्यं श्रुत्वा दिदृक्षा जायते, रहः प्राप्य रतिर्निर्वर्तते। असंबन्धो यथा—मेरौ दोग्धरि धरित्रीमद्रयो दुदुहुः, पञ्चभिर्हलैः क्षेत्रं ग्रामणीः कर्षति, शैलैर्वाल्मीकिरम्भोधिं बन्धयति, उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्यमुद्गमयति। संबन्धासंबन्धो यथा—भवति पचति, भवति पक्ष्यति, भवत्यपाक्षीत्, भवेदपि भवेत्, स्यादपि स्यात्। हेतुः कर्मप्रयोजकः कर्तृप्रयोजकः हेतुप्रयोजकः अहेतुप्रयोजकः हेत्वहेतुप्रयोजकश्च। तेषु कर्मप्रयोजको यथा—गां दोग्धि पयः, पौरवं गां याचते, गर्गाञ्छतं दण्डयति, काशान् कटं करोति। कर्तृप्रयोजको यथा—यज्ञदत्तः पाचयति, माठरः पाठयति, भिक्षा वासयति, कारीषोऽग्निः अध्यापयति। कर्मकर्तृप्रयोजको यथा—आरोहयति हस्तिनं हास्तिपकः, आरोहयते हस्तिनं हास्तिपकः, आरोहयते हस्ती, निषादयति क्रमेळकमौष्ट्रिकः, श्रपयति यवागूं यज्ञदत्तः, साधयति ओदनं सूपकार इति। कथं पुनः श्रायति, सिध्यति? कर्त्रोर्यवाग्वोः कर्मकर्तृत्वं घटते। श्राति-सिध्यती अकर्मकौ कर्मकर्तृविषयस्य पचेरर्थे प्रवर्तेते। एतौ पुनः प्राकृतं वाच्यार्थमाहतुरिति। हेतुप्रयोजको यथा—अवीवदत् प्रवीणो वीणां परिवादकेन, अपीपठत् कठो माणवकं माठरेण, अजिघ्रपत् प्रियः कुसुमं कान्तया, अदूदुहत् गां बल्लवो गोपालकेन। कथं पुनः दुहिकर्ता कर्तृप्रयोजकस्य हेतुत्वं दुहेरन्तर्भूतणिजर्थत्वात् वक्ष्यति हि—

अन्तर्भूतणिजर्थानां दुहादीनां णिजन्तवत्। सिद्धं पूर्वेण कर्मत्वं णिजन्तनियमस्तथा॥

इति॥ अहेतुप्रयोजको यथा, संवर्मयति, अतिहस्तयति, अभिषेणयति, उपश्लोकयति। हेत्वहेतुप्रयोजको यथा, पुत्र उपाध्यायमध्यापयति, कन्या नदौ न वर्तयति, याज्ययाजकौ याजयति, कन्यावरौ विवाहयति।

कर्मकर्ता विकर्मकर्ता प्रयोज्यकर्ता कर्मप्रयोज्यकर्ता प्रकृतिकर्ता विकारकर्ता प्रकृतिविकारकर्ता च । तेषु विकर्मकर्ता यथा–अवकिरते हस्ती, ग्रथते माला, प्रस्नुते गौः, चिकीर्षते कटः । प्रयोज्यकर्ता यथा—पाचयति देवदत्तेन, पाठयति विष्णुमित्रेण, भारयति भारं वाहकेन, कारयति कटं वरुटेन । कर्मप्रयोज्यकर्ता यथा—आरोहयते निषादं करेणुः, लावयते पामरं केदारः, दर्शयते राजा भृत्यैः, अभिवादयते गुरुर्देवदत्तेन । प्रकृतिकर्ता यथा—काष्ठानि भस्मवन्ति, महद्भूतश्चन्द्रमाः, त्वद्भवन्ति जातयः, मद्भवन्ति दायादाः । विकारकर्ता यथा—मूत्राय संपद्यते यवागूः, अभ्यूषाय कल्पते यवः, घटाय कपालौ भवतः, सुवर्णपिण्डं कुण्डले भवतः । प्रकृतिविकारकर्ता यथा—सङ्घीभवन्ति ब्राह्मणाः, वर्गीभवन्ति गावः, वत्सो वृषस्संपद्यते, बाला प्रगल्भा भवति, । स एषोऽष्टादशप्रकारोऽपि अभिहितानभिहितप्रयुज्यमानाप्रयुज्यमानप्रसिद्धप्रकृतापेक्षितौपचारिकप्रकल्पितानुस्यूतसामान्यादिभेदादनेकधा कर्तृभेदस्संभवति । तत्राभिहितो यथा—भवता कृतं, तेन सुप्यते । प्रयुज्यमानो यथा—त्वं पचसि, अहं पचामि । अप्रयुज्यमानो यथा–पचसि, पचामि । प्रसिद्धो यथा—वर्षति, हेषते । प्रकृतो यथा—भ्रेमुः ववल्गुः । अपेक्षितो यथा—इत्याचक्षते, यमयुङ्क्त । उपचरितो यथा—धनुर्विध्यति, मञ्चाः क्रोशन्ति । प्रकल्पितो यथा—आत्मनोऽपि नात्मानो जायन्ते, आत्मैवात्मानं जानाति । विकल्पितो यथा—अहमन्यो वा गच्छतु, अन्योऽहं वा गच्छामि । अनुस्यूतो यथा—स च त्वं च पचथः, त्वं चाहं पचावः । सामान्यो यथा—पचति, पठति चेति । एते च भेदाः कर्मादिष्वपि यथासंभवमूहनीया इति । विभक्तः, तत् क्रियाप्यं कर्म, यदाह—कर्तुरीप्सिततमं कर्मेति । तच्च त्रिविधं, निर्वर्त्यं विकार्यं प्राप्यमिति । तत्र यदविद्यमानमुत्पाद्यते विद्यमानं जन्मादिना प्रकाश्यते तन्निर्वर्त्यं, यदभिनिर्वृत्तमेव प्रकृत्युच्छेदेन गुणान्तराधानेन वा विकारमापद्यते तद्विकार्यं, यस्य क्रियाकृतानां विशेषाणां सर्वथानुपलब्धिस्तत्प्राप्यम् । तदुक्तम्—

यदसज्जायते सद्वा जन्मना यत्प्रकाशते । तन्निर्वर्त्यं विकार्यं तु कर्म द्वेधा व्यवस्थितम् ॥
प्रकृत्युच्छेदसंभूतं किञ्चित्काष्ठादिभस्मवत् । किञ्चिद्गुणान्तरापत्त्या सुवर्णादि विकारवत् ॥
क्रियाकृता विशेषाणां सिद्धिर्यत्र न गम्यते । दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥

तत्र निर्वर्त्येति विकार्यप्राप्यधर्मस्स्वधर्मश्च विकार्ये प्राप्यधर्मस्स्वधर्मश्च प्राप्ये तु स्वधर्म एव । कः पुनरसौ —

आभासोऽवगमो व्यक्तिस्सोढत्वमिति कर्मणः ।
विशेषाः प्राप्यमाणस्य क्रियासिद्धौ व्यवस्थिताः ॥

निर्वर्त्यविकार्ययोस्तु निवृत्तिकार्यावेव । यथोच्यते—

निर्वर्त्यादिषु तत्पूर्वमनुभूय स्वतन्त्रताम् । कर्त्रन्तराणां व्यापारे कर्म संपद्यते पुनः ॥

तत्र निर्वर्त्यं उत्पाद्यं प्रकाश्यमुपसर्जनं विशेषणं व्यवहितमप्राप्यं च । तेषु यदसदुत्पाद्यते तदुत्पाद्यं ; यथा—संयोगं विधत्ते, सुखमुत्पादयति, विभागं कुर्वते, दुःखं जनयति । विद्यमानमेव यदावरणापायादाविर्भवति तत्प्रकाश्यम् ; यथा—शब्दं जनयति, पुत्रं सूयते, तैलं कुरुते, पयो दोग्धि । अप्रधानभूतमुपसर्जनं यथा—कटं कर्तुमारभते, ग्रामो वासयितुमिष्यते, पक्वौदनो भुज्यते, पक्तुमोदनश्चिन्त्यते । स्वानुरक्तप्रत्ययजनकं विशेषणं यथा—भीष्ममुदारं कटं करोति, महान्तमव्यक्तं शब्दमुच्चारयति, दीर्घायुषं गुणिनमात्मजं प्रसूते, चित्रमच्छपटं वयति । क्रियान्तरेण व्यवधानवद्व्यवहितं यथा—मासमास्ते, गोदोहं पचति, क्रोशमधीते, कुरून् गच्छ स्वपिति ।

कालाध्वभावदेशानामन्तर्भूतः क्रियान्तरैः । सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते ॥

सकर्मिकाऽपि क्रिया द्रव्यादिकर्मण्येव निविशते । कालादिकर्मणि यथा—मासमोदनं पचति, क्रोशमनुवाकमधीते ।

आधारत्वमिव प्राप्ते पुनर्द्रव्यकर्मसु । कालादयो भिन्नकक्ष्या यान्ति कर्मत्वमुत्तरम् ॥

क्रियाविशेषणमप्राप्यं यथा—सुखमभिधत्ते, दुःखं निवर्तयति, मन्दं गच्छति, शीघ्रमायाति । कथं पुनरुपसर्जनादीनाम् निर्वर्त्यमानता ? यथा निर्वर्त्यमानस्य—यथाह्यसौ कटं निर्वर्तयति, एवं तद्गतभीष्मोदारादिकमपीति । एवं शब्देऽपि पक्वौदनो भुज्यत इति । अत्र तु पाकेनौदनो निर्वर्त्यते ; केवलं साऽस्य शक्तिः ; प्रधानभुजिक्रियाविषयकर्मशक्तिसन्निधौ पक्त्युपसर्जनीभूताख्यानेन प्रधानशक्त्यभिधानेऽभिहितवत् प्रकाशते । पक्तुमोदनश्चिन्त्यत इत्यत्र पच्यर्थत्वात् चिन्तायाः यद्यपि पाकस्य वास्तवमप्रधानत्वं, तथाऽप्याख्यातप्रत्ययेन प्राधान्यतश्चिन्ताभिधानात् पचिक्रियोपसर्जनं भवति । अतस्तद्विषया कर्मशक्तिः प्रधानशक्त्यभिधानेऽभिहितवद्भवति । एतेन कटः कर्तुमारभ्यते, ग्रामो गन्तुमिष्यते इत्यपि व्याख्यातम् ।

ननु गमेर्ग्रामः, इषेरुभे कर्मणी, तत्कस्यात्रोपसर्जनता ? नैवं, इषेरुभेकर्मणी इति यदुच्यते तत्सामर्थ्यप्रदर्शनपरमवगन्तव्यम् । इष्यते ग्रामं, किं कर्तुं, गन्तुं ग्रामो ग्राममिति वा ; न पुनरिषेः युगपदुभे कर्मणी संभवतः । एवमभिहितेऽपि कटादिवदेव मासादीनामासनादिभिरभिनिर्वर्त्यमानता प्रतीयते । तथा हि—पक्तारो भवन्ति इह स्थितोऽयं मासं निर्वर्तयतीति । एवं पचन् गोदोहमधीयानः क्रोशं स्वपन् गन्तव्यं कुर्वन्ति क्रमकालमिति गन्तव्यानामेव कुरुक्रोशादीनां कर्मत्वम् । यदाह—

कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् ॥ इति ।

अप्राप्यं यत्क्रियाविशेषणत्वात् क्रियावदेव निर्वर्त्यमानं तत्क्रियायाः कथमिति चेत् पुरुषव्यापारसामान्याश्रयणात् ; अप्राप्यत्वं पुनस्तस्य धात्वर्थाभिप्रायेण । नह्यसौ धात्वर्थेन प्राप्यते ; अपितु पुरुषव्यापारेण । धात्वर्थस्य तु तत्र करणत्वम् । विश्वजिता यजेतेत्यादौ धात्वर्थनाम-

धेयेभ्यो विश्वजिदादिभ्यः करणविभक्तिदर्शनादग्निष्टोमयाजीत्यादिसिद्ध्यर्थं करणे यजेति च सूत्रारम्भात् । अग्निष्टोमादयो हि स्वर्गादिफलभावनायां करणम् । कार्यमविनाश्यं विनाश्यमीप्सितमनीप्सितमास्थितं कर्तृकर्म च । तत्राविनाश्यं यथा—सुवर्णं कुण्डलीकरोति, काण्डं लुनाति, कान्तां सादयति, प्रियं सादयति । विनाश्यं यथा—कुसूलं भिनत्ति, काष्ठं दहति, धानाः पिबति, उदपेषं पिनष्टि । ईप्सितं यथा—श्रियं गच्छति, पयः पिबति । अनीप्सितं यथा—चोरान् पश्यति, धनं त्यजति, विषं भक्षयति, अहिं लङ्घयति । कः पुनरेषां विकारः? प्रकृतेरन्यथात्वं ; न हि चोरादयो दर्शनादिविषया भवन्ति । आस्थितं यथा—पन्थानं गच्छति, नदीं तरति, पर्वतमारोहयति, गर्तमुत्तरति । कः पुनरन्यतोऽस्य भेदः । उच्यते—

त्यागरूपं प्रहातव्ये प्राप्ये संदर्शनादिके । आस्थितं कर्म यत्तत्र द्वैरूप्यं भजते क्रिया ॥

कर्तृकर्म यथा—लूयते केदारस्स्वयमेव, पच्यत ओदनस्स्वयमेव, भिद्यते कुसूलस्स्वयमेवेति । प्राप्यमपि प्राप्यं प्रयोज्यं परिहार्यमभिहितमनभिहितमकथितं च । तत्र प्राप्यं यथा—आदित्यं पश्यति, हिमवन्तं शृणोति, वेदमधीते, चर्चाः पारयति । प्रयोज्यं यथा—माणवकं गमयति, शिष्यं बोधयति, ब्राह्मणमासादयति, पतिं शाययति । ननु च कार्यमेतत् ; तन्न, प्रयोजकव्यापारमात्रस्याविवक्षितत्वात् विकार्यश्चैषां स्वक्रियानिबन्धन इति । अपरिहार्यं यथा—विभागं जनयन् संयोगमुच्छिनत्ति, कटं कुर्वन् काशानाहरति, ग्रामं गच्छन् वृक्षमूलानुपसर्पति, आमिक्षां भक्षयन् वाजिनमाप्नोति । अभिहितं यथा—उष्ट्रासिका आस्यन्ते, हतशायिकाश्शय्यन्ते, रैपोषं पुष्यति, उदपेषं पिनष्टि । अनभिहितं यथा—पश्य मृगो धावति, स्मरसि देवदत्त काश्मीरेषु वत्स्यामः, न मर्षयामि यत्तत्र भवान् वृषलं याजयेत् ।

भावरूपं तु यत्कर्म तदिहाभिहितं विदुः । क्रियारूपं तु मन्यन्ते कर्मानभिहितं बुधाः ॥

अथाकथितं, तद्यथा—गां दोग्धि पयः, पौरवं गां याचते, व्रजं गामवरुणद्धि, माणवकं पन्थानं पृच्छति, पौरवं गां भिक्षते, वृक्षमपचिनुते फलानि, माणवकं धर्मं ब्रूते, माणवकं धर्ममनुशास्ति, शतानीकं जयति, गर्गाञ्छतं दण्डयति, उपसरमश्वं पुष्णाति, अम्बुनिधिममृतं मथ्नाति, शाखां ग्रामं कर्षति, अजां ग्रामं नयति, एधान् ग्रामं हरति, भारं ग्रामं वहति, एवं नगरं हरति भारं, समाहर्तारमयुतं गृह्णाति, काशान् कटं करोति । किं पुनरिहाकथितं? पयः प्रभृति ; केनाकथितं? लकृत्यक्तखलर्थादिभिरिति । न हि पयःप्रभृतयो लादिभिः कथ्यन्ते ; अपितु गवादयो यथा–दुह्यते गौः पयः, सुदुहा गौः पय इति । यत्तु तैराख्यायते तदीप्सिततमं प्रधानकर्म प्रागेव क्रियासंबन्धात् । तदुक्तं–यस्माच्छब्दस्य दुहे भवति गवा पूर्वमेव संबन्धः गोदुहिना पयसस्तु प्राक्तस्माल्लादयस्तस्मिन्नेवं सारादिष्वपि आनयनादिभ्यः प्रागेव नयत्यादिसंबन्धात् लादिभिरभिधाने तद्धितोत्पत्तिरवगन्तव्या । तद्व्याख्यानतः कथितमुच्यते, तद्विपरीतमकथितमिति । दुहियाचिकथिप्रच्छिभिक्षिचियामित्यादि —

चिदण्डिमुखिमस्जीनां गत्यर्थानामकीर्तिते । नीवृष्प्रहिवृहादीनामुपसंख्यानमिष्यते ॥

अस्यार्थः दुहादीनां य उपयोगः प्रपूरणादिस्तस्य यन्निमित्तं पयःप्रभृति यच्च ब्रुविशास्योः क्रियाधर्मादिकं समवायेन संबध्यते तदपादानादिसंज्ञानामविधाने द्वितीयावाच्यं प्रधानं कर्मकथितं उच्यते । जिप्रभृतीनां चाप्रधानकर्मणस्तत्रैवोपसंख्यानमिति, अन्ये तूपयुज्यत इत्युपयोगः पयःप्रभृति ; तस्य यन्निमित्तं गवादि ब्रुविशासिगुणेन च प्रधानेन धर्मादिकर्मणा माणवकादि यत्संबध्यते तदकथितमित्याचक्षते । तत्पक्षे लादिवाच्यानां गवादीनां प्राधान्यं व्याहन्येत । अकथितसंज्ञा च नानार्था स्यात् । लादयश्च तेषामपि ते प्रधानकर्मण्येव यथा—अजा नीयते ग्राममिति । यथोक्तं—

प्रधानकर्मणाख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥

तान्मिथो विरुद्धार्थत्वादेषामेवाविमृश्यवादितामापादयति । कथं समान एव योगक्षेमे गवादीनामप्राधान्यं, अजादीनां च प्राधान्यं, कथं वा प्रधानं गवादि लादिभिरजादिवदेवाभिधीयते ? किञ्च—

अन्तर्भूतणिजर्थानां दुहादीनां णिजन्तवत् । सिद्धं पूर्वेण कर्मत्वं णिजन्तनियमस्तथा ॥

अस्मिन् पक्षे गवादीनां व्यक्तमेव प्रयोज्यत्वात् प्राक्सूत्रेणैव प्रधानकर्मत्वं । तथा च गां दोग्धि पय इत्यत्र गां पयः क्षारयतीत्यर्थः । यतो दुहिः प्रपूरणार्थः, पूरणमाप्यायनं, प्रपूरणं तु विरेचनं प्रेरणप्रस्थानादाविवार्थवैपरीत्याधानात् । यस्तु णिजन्तादीनामपि गतिबुद्धीत्यादिना कर्मसंज्ञारम्भः, स पाचयति देवदत्तेनेत्यादौ प्रयोज्यस्य कर्तुः कर्मसंज्ञां निवर्तयन्नियमार्थो भविष्यतीति विभक्तं कर्म करणमुच्यते । तत्र क्रियां प्रत्युपात्तव्यापारेषु कर्मादिषु यद्व्यापारानंतरं क्रियासिद्धिविवक्षा तत्कारकं साधकतमं करणमिति । यदाह—

क्रियायाः परिनिष्पत्तिः यद्व्यापारादनन्तरम् । यदा विवक्ष्यते तस्य करणत्वं तदा स्मृतम् ॥

तदपि त्रेधा बाह्यमाभ्यन्तरं बाह्याभ्यन्तरं च । तेषु बाह्यं कर्तृरूपं कर्त्राश्रितं क्रियाश्रितमनाश्रितं चेति । तत्र कर्तृरूपं यथा—एधैः पचति, सेनया जयति, अश्वेन गच्छति, नावा तरति । कर्त्राश्रितं यथा—अक्षैर्दीव्यति, दात्रेण लुनाति, धनुषा विध्यति, परशुना छिनत्ति । कर्मरूपं यथा—पथा गच्छति, अन्तिकेन याति, पयसा भुङ्क्ते, यवाग्वा जुहोति, कर्माश्रितं यथा—पयसा ओदनं भुङ्क्ते, पथा ग्रामं गच्छति, द्विद्रोणेन धान्यं क्रीणाति, पञ्चकेन पशून् बध्नाति । क्रियाश्रितं यथा—मासेनाधीते, क्रोशेनाधीते, विश्वजिता यजते, विधिना विदधाति । अनाश्रितं यथा—स्तोकेन मुक्तः, कृच्छ्रेण लब्धः, आलोकेन याति, दीपिकया याति ।

आभ्यन्तरमपि— आन्तरमवान्तरमाभ्यन्तरमनन्तरं समनन्तरं प्रत्यनन्तरं बाह्याभ्यन्तरमिति । तत्रान्तरं यथा—आत्मना बुध्यते, स्वयमुपक्रमते, स्वतः प्रकाशते, अन्योन्यतो जानाति । अवान्तरं

यथा–जात्या दुर्जनः, प्रकृत्या अभिरूपः, निसर्गेणार्यः, स्वभावेन सुभगः । आभ्यन्तरं यथा–अहङ्कारेण कत्थते, सत्वेन सहते, रजसाऽनुरज्यते, तमसा मुह्यति । अनन्तरं यथा—मनसा मोदते, अन्तरानाचरति, प्रतिभया पश्यति, संस्कारेण स्मरति । समनन्तरं यथा—प्रयत्नेनारभते, बुद्ध्या जानाति, सुखेन शेते, दुःखेन पठति । प्रत्यनन्तरं यथा—धर्मेण वर्धते, अधर्मेण पतति, अविद्यया मृत्युं तरति, विद्ययाऽमृतं प्राप्नोति । बाह्याभ्यन्तरमपि बहिर्मुखमन्तर्मुखं निर्मुखं बहिरुद्रेकमन्तरुद्रेकं निरुद्रेकं च । तेषु बहिर्मुखं यथा–विद्ययाऽमृतं प्राप्नोति । बाह्याभ्यन्तरं यथा—चक्षुषा पश्यति, वाचा वदति, इङ्गितेन कथयति, आकारेण ज्ञापयति । अन्तर्मुखं यथा—घ्राणेन जिघ्रति, जिह्वया स्वादयति, स्पर्शेण बुध्यते, श्रोत्रेण शृणोति । निर्मुखं यथा—निश्शङ्कत्वेन यातः, निर्भयत्वेन यातः, निष्किञ्चनत्वेन मुक्तम्, निरायुधत्वेन हतः । बहिरुद्रेकं यथा —पद्भ्यां गच्छति, पाणिभ्यां स्पृशति, संज्ञया गमयति, पौंस्नेन प्रीणाति । अन्तरुद्रेकं यथा—बलेन वर्षति, कौशलेन रञ्जयति, अभियोगेनाधीते, अभ्यासेन धारयति । निरुद्रेकं यथा–प्रायेण याज्ञिकः, गोत्रेण गार्ग्यः, अभिजनेन स्रौघ्नः, शाखया च्छन्दोगः, इति । निष्किञ्चनत्वस्तोकादीनां सद्भावा सत्वरूपत्वादसाधकत्वमिति चेत् तन्न ।

यथैव सन्निधौ तस्य तथैवासन्निधावपि । भावस्य करणत्वेन क्रियासिद्धिः प्रतीयते ॥
स्तोकत्वस्याभिनिर्वृत्तेरनिर्वृत्तेश्च तस्य वा । प्रसिद्धिं करणत्वस्य स्तोकादीनां प्रचक्षते ॥

न च करणस्य वास्तवं रूपमस्ति विवक्षानिबन्धनत्वात् । तदुक्तम्—

वस्तुतस्तदनिर्देश्यं नहि तद्वस्तुनि स्थितम् । स्थाल्या पच्यत एषाऽपि विवक्षा दृश्यते यतः ॥

न च भवति यथाः पचन्ति धनुर्विध्यति चक्षुः पश्यति मनो जानाति करणमुक्तं, संप्रदानमुच्यते, तत्त्रिविधं–ददातिकर्माप्यं कर्ममात्राप्यं क्रियाप्यं चेति । तत्र संप्रदानमिति महत्याः संज्ञायाः करणात् । सम्यगस्मै प्रदीयते तद्वादिना ददातिकर्मणा प्राप्यमुपाध्यायकं संप्रदानसंज्ञं भवति ; तत् स्वत्वनिवृत्तौ परस्वत्वापत्तौ उभययोगे स्वोपयोगे परोपयोगे उभयोपयोगे चेति षोढा विप्रथते । स्वत्वनिवृत्तौ यथा—शिष्याय विद्यां प्रयच्छति, वराय कन्यां विश्राणयति, आप्तायोपदेशं ददाति, गुरुभ्य आत्मानं निवेदयति । परस्वत्वापत्तौ यथा—रिपुभ्यो भयं ददाति, शत्रवे प्रहारं प्रयच्छति, वादिने उत्तरं ददाति, देवतायै वाचं प्रयच्छति । उभययोगे यथा—कर्मकराय छत्रमर्पयति, मूकाय हितमुपदिशति, संवाहकाय कायं वितरति, प्रियतमाय शरीरं ददाति । वाताय चक्षुर्ददाति, पृष्ठमातपाय स्पर्शयति, गीताय कर्णं ददाति, श्रुताय चेतो वितरति । परोपयोगे यथा—पुत्रायाशिषं प्रयच्छति, छात्राय चपेटां ददाति, भीतायाभयं प्रयच्छति, आर्तायौषधं ददाति । उभयोपयोगे यथा—नापिताय क्षुरं प्रयच्छति, मैत्रावरुणाय दण्डं ददाति, प्रियतमायाधरं प्रयच्छति, प्रियायाङ्कपालीं ददाति । 'कर्मणा यमभिप्रैति स संप्रदानम्' इति

तेषु यत्रोपात्तक्रियोपादानेनापायः प्रतीयते, तन्निर्दिष्टविषयं । तत् षोढा—उज्झितमनुज्झितमीप्सितं जिहासितं परिणतं निवृत्तमिति । तत्रोज्झितं यथा—ग्रामादागच्छति, वृक्षात्पर्णं पतति, मेषाद्वेषोऽपसर्पति, धावतोऽश्वात्पातितः । अनुज्झितं यथा—शृङ्गाच्छरो जायते, हिमवतो गङ्गा प्रभवति, वटात्प्ररोहो लंबते, अग्नेर्धूम उच्चरति । ईप्सितं यथा—यवेभ्यो गां निषेधति, माषेभ्यो महिषान् रुणद्धि, कूपादन्धं वारयति, अग्नेर्माणवकमपसारयति । जिहासितं यथा—अरण्यान्निष्क्रामति, गर्तात्तरति, पर्वतादवरोहति, आकाशात्पतति । परिणतं यथा—गोमयाद्वृश्चिको जायते, गोलोमविलोमेभ्यो दूर्वा भवन्ति, सुवर्णात्कुण्डलमुत्पद्यते, काशैः कटो भवति । निवृत्तं यथा—प्रभावाद्धीयते, प्रज्ञायाः प्रभ्रश्यते, न्यायादपैति, स्वरूपात् प्रच्यवते । कथं प्रभावानां ध्रौव्यमिति चेत् शब्दव्यापारतोपायाभिनिवेशः; औदासीन्याद्यत्रोपात्तक्रियासामर्थ्यादवगम्यमानक्रियापदेनापायप्रतीतिस्तदुपात्तविषयं । तदपि षोढा—सिद्धरूपं साध्यरूपं प्राप्यरूपमप्राप्यरूपं परिहर्तव्यं निहर्तव्यमिति । तेषु सिद्धरूपं यथा—कुलात्पतति, कुसूलात्पचति, कांस्यपात्रतो भुङ्क्ते, ब्राह्मणाच्छंसति, उपाध्यायादधीते । साध्यरूपं यथा—अध्ययनात्पराजयते, धर्मात्प्रमाद्यति, अधर्माज्जुगुप्सते, अकृत्याद्विरमति । प्राप्तरूपं यथा—आसनात्प्रेक्षते, प्रासादादवलोकयति, बलाहकाद्विद्योतते, यौवनतो विकुरुते । प्राप्यरूपं यथा—श्वङ्गादन्नं भोक्ष्यते, आमृत्योः श्रियमाकांक्षेत्, क्रोशाल्लक्ष्यं विध्यति, आपाटलिपुत्रात् वृष्टो देवः । परिहर्तव्यं यथा—चोरेभ्यो बिभेति, दुर्जनेभ्य उद्विजते, उपाध्यायादन्तर्धत्ते, सहाध्यायिभ्यो निलीयते । निहर्तव्यं यथा—चोरेभ्यो गुह्यं त्रायते, रोगेभ्य आतुरं रक्षति, काकेभ्यो दध्यवति, असत्यादात्मानं पाति । यत्रार्थप्रकरणादिभ्यो गम्यमानात् क्रियापदादपादाय बुद्धिस्तदपेक्षितक्रियं; तदपि षोढा । सामान्यक्रियापेक्षं विशेषक्रियापेक्षं सत्वभूतापेक्षमसत्वभूतापेक्षं नियतरूपापायमनियतरूपापायं चेति । तेषु सामान्यक्रियापेक्षं यथा—दानवेभ्यो देवा बुद्धिमन्तः, सुरेभ्योऽसुरा योद्धारः, सुह्मा ब्रह्मोत्तरेभ्य आढ्यतराः, पाटलिपुत्रेभ्यः सुकुमारतराः । विशेषक्रियापेक्षं यथा—रोहणाद्रत्नम्, पयोवारिधरात्, कुतो भवान् पाटलिपुत्रात् । सत्वभूतापेक्षं यथा—अन्यो देवदत्तात् इतरो देवदत्तात् पृथक् देवदत्तात् नाना देवदत्तात् । असत्वभूतापेक्षं यथा—ऋते देवदत्तात्, विना देवदत्तात्, आराद्देवदत्तात्, दूराद्देवदत्तात् । नियतरूपापायं यथा—कौमुद्या यक्षरात्रिः पक्षे कार्तिक्या आग्रहायणी मासे, गवेधुमतः सांकाश्यश्चतुर्षु योजनेषु, पाटलिपुत्राद्राजगृहं सप्तयोजनानि । अनियतरूपं यथा—प्राग्ग्रामात्, दक्षिणा ग्रामात्, तत उपरिष्टात् ।

अन्ये तु ध्रुवमपायेऽपादानमिति निर्दिष्टविषयं; 'भीत्रार्थानां भयहेतुः, पराजेरसोढः, अन्तर्धौ येनादर्शनमिच्छति, आख्यातोपयोगे, जनिकर्तुः प्रकृतिः, भुवः प्रभवः, ल्यब्लोपे कर्मणः उपसंख्यानं, सप्तमीपञ्चम्यौ कारकमध्ये.' इत्यादियोगोक्तमुपात्तविषयम् । 'पञ्चमी विभक्ते, अन्यारादितरर्ते, दिक्शब्दाञ्चूत्तरपदाजाहि युक्ते, प्रतिः प्रतिनिधिप्रतिदानयोः, प्रतिनिधिप्रतिदाने च

यस्मात्.' इत्यादिकं त्ववधिभावादपेक्षितक्रियमिति त्रिधाऽपादानं मन्यन्ते । आहुश्च—

निर्धारणे विभक्ते यो भीत्रादीनां च यो (व)विधिः । उत्पातापेक्षितापायस्सध्रुवः प्रतिपद्यते ॥

उक्तमपादानम्; अधिकरणमुच्यते, 'आधारोऽधिकरणम्'; कर्तुः कर्मणो वा क्रियाश्रयस्य क्रियां प्रति य आधारस्तदधिकरणम् । तदुक्तं-

कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम् । उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥

तत्रेधा-वैषयिकमौपश्लेषिकं नैमित्तिकं चेति । तत्रिविधमपि अनेकप्रकारं विनोतीति विषयो जातिगुणक्रियादीनामाश्रयः, विषय एव वैषयिकमिति; विनयादिभ्यष्ठक् । तत् षोढा—जाति-वैषयिकं गुणवैषयिकं क्रियावैषयिकं द्रव्यवैषयिकं संज्ञावैषयिकमिति । तेषु जातिवैषयिकं यथा-दिवि देवाः, भुवि मनुष्याः, जले मत्स्याः, पाताले पन्नगाः । गुणवैषयिकं यथा— आयुक्तः कटकरणे कुशलः कटकरणे साधुः मातरि निपुणः पितरि प्रवीणः । क्रियावैषयिकं यथा—प्राच्यामादित्य उदेति, दक्षिणस्यामगस्त्यो दृश्यते, आकाशे शकुन्ताः पतन्ति, शब्दादिषु श्रोत्रादयोऽभिनिविशन्ते । द्रव्यवैषयिकं यथा—गोषु स्वामी. गोषु दायादः. अधिब्रह्मदत्ते पाञ्चालाः. अधिपाञ्चालेषु ब्रह्मदत्तः । संज्ञावैषयिकं यथा—ब्रह्मणि पितामहः. विष्णौ पुरुषोत्तमः. रुद्रे महेश्वरः. इन्द्रे शक्रः । सङ्केतवैषयिकं यथा—तर्जनीमध्ये उदात्तः. कनिष्ठिकामध्येऽनुदात्तः. अनामिकामध्ये स्वरितः. मध्यमामध्ये प्रचय इति । उपश्लेषोवष्टम्भः । तस्मै प्रभवत्यौपश्लेषिकम् । तदपि षोढा—एकदेशिकमभिव्यापकं सामीप्यकमौपश्लेषिकमौपशल्यकमौपचारिकं चेति । तेष्वेक-देशिकं यथा—गृहे तिष्ठति. स्थाल्यां पचति. पर्यङ्के शेते. शाखायां लम्बते । अभिव्यापकं यथा— तिलेषु तैलम्, शैलेषु रागः, गवि गोत्वं, तन्तुषु पटः । सामीप्यकं यथा-गुरौ वसति, तीर्थे वसति. गङ्गायां घोषः. कूपे गर्गकुलम् । औपश्लेषिकं यथा-द्व्यहे भोक्ता. कार्तिक्या आग्रहायणी मासे. इहस्थोऽयमविश्वासः. क्रोशे लक्ष्यं विध्यति. पाटलिपुत्राद्राजगृहं सप्तसु योजनेषु । औपशल्यकं यथा—उपखार्यां द्रोणः. उपनिष्के कार्षापणं. उपव्यामे वितस्तिः. उपशते पंचाशत् । औपचारिकं यथा—यो यस्य प्रियस्स तस्य हृदये वसति. यो यस्य द्वेष्यस्स तस्याक्ष्णोः प्रतिवसति. समे समग्रो मुष्टिमध्ये तिष्ठति. अङ्गुल्यग्रे हस्तियूथशतमास्त इति ।

निमित्तमेव नैमित्तिकं; तदपि षोढैव—देशनैमित्तिकं कालनैमित्तिकं भावनैमित्तिकं वस्तु-नैमित्तिकं कर्मनैमित्तिकं कर्मयोगनैमित्तिकमिति । तेषु देशनैमित्तिकं यथा—गेहे मोदते. अरण्ये बिभेति. जले मज्जति. श्वभ्रे पतति । कालनैमित्तिकं यथा—

काषाः पुष्यन्ति मेघान्ते मधौ माद्यन्ति कोकिलाः । पुष्ये पायसमश्नीयान्मघासु पललोदनम् ॥

भावनैमित्तिकं यथा-दर्शने प्रसीदति. विरहे विषीदति. अर्थलाभे हृष्यति. अरिविनाशे तुष्यति । वस्तुनैमित्तिकं यथा—आतपे क्लाम्यति. छायायामाश्वसिति. दोषेभ्द्विजते. गुणेषु

रुच्यत इति । कर्मनैमित्तिकं यथा—इष्टी यज्ञे परिगणिती याज्ञिक्ये. आम्नाती छन्दसि. अधीती व्याकरणे । कर्मयोगनैमित्तिकं यथा—

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् । वालेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥

ननु च निमित्तहेतोः कारकत्वात् कारकस्य च प्रयोजकपरतन्त्रत्वादिह कथं कारकत्वमिति। उच्यते द्विविधः कारकहेतुः, प्रवृत्तप्रेरकः अप्रवृत्तप्रेरकश्च । तत्राद्यो णिज्विषयः, इतरस्तु विध्याद्यात्मको निमित्तात्मकश्च । तयोश्च प्रथमो लिङ्लोट्तव्यादिवाच्यः । तदुक्तम्—

द्रव्यमात्रस्य तु प्रैषप्रच्छादेः लोड्विधीयते । सक्रियस्य प्रयोगस्तु यदा स विषयो णिचः ॥

निमित्तात्मकस्तु क्रियाशल्यत्वात् सप्तमीवाच्यो नैमित्तिकमधिकरणमिति विभक्तमधिकरणम् । ननु च उपखार्यां द्रोणः, अधिपाञ्चालेषु ब्रह्मदत्त इत्यादौ यद्यधिकरणमेव सप्तमी अधिकरणं किं ? उच्यते 'यस्मादधिकं. यस्य चेश्वरवचनं तत्र सप्तमी' इति । उच्यते कर्मप्रवचनीययुक्ते द्वितीया मा बाधिष्ट इति । ननु च 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' ति द्वितीया न भविष्यति । यथा—गोस्वामी व्रजति देवानां नमस्करोतीति । नैवम्; नेयमुपपदविभक्तिः, अपित्वन्तर्भूत-क्रियान्तरसंबन्धा कर्मविभक्तिः। तद्यथा—शाकल्यस्य संहितामनु प्रावर्षत्, संहितामनुनिगम्येत्यर्थः। किं तर्हि किमर्थं विधीयते कारकान्तरेऽपि यथा स्यात् तेन उपार्जुनं योद्धार इत्यपादानेऽपि पञ्चमी बाध्यते । अत एव पञ्चम्यपाङ्परीत्यपादानेऽप्यारभ्यत इति । एतेनाधीती व्याकरणे, पथेभ्यो व्रजतीत्यादयः कारकविभक्तिविषये, गोषु स्वामी, प्राग्ग्रामादित्यादयः संबन्धविभक्तिविषये कारकाविभक्तिसमावेशात् प्रकाशिता भवन्ति ।

ननु च शक्तिस्साधनं तद्वशेन द्रव्यस्य क्रियासु योगित्वात् । किञ्च द्रव्यमपि साधनं कल्पयित्वा साधनभेदादपुनराश्रयितव्याश्शक्तयः संन्यस्ता एव सत्यभेदास्साधनमिति कल्पितम् । न च तासामधिकरणद्रव्यमेतावति द्रव्यानपेक्षसाधनत्वं; द्रव्यस्यापि स्वकर्मणायत्तजन्मनस्तदपेक्षया तुल्यदोषत्वात् । शक्तीनामेव च साधनत्वे प्रत्ययाभिहितासु शक्तिषु द्रव्यवचनानामनुप्रयोगो युज्यते। वर्धते देवदत्तः परिगतमर्थतत्त्वं इति द्रव्ये तु साधने तस्याभिहितत्वादनुप्रयोगो न प्राप्नोति। शक्तीनामेव च साधनत्वेऽद्य भुक्त्वा देवदत्तो द्व्यहे द्व्यहाद्वा भोक्तेति शक्तिमध्यवर्तिनि काले सप्तमीपञ्चम्यौ कारकमध्ये लभ्येते । द्रव्यस्य देवदत्तादेरेकत्वान्मध्ये द्व्यहादिकालो न संभवति । शक्तीनामेव च साधनत्वे प्रासादे आस्त इति घञादिविषयमधिकरणमभिहितं, न त्वासिविषय-मित्यनभिहितविषयलक्षणा सप्तमी लभ्यते । द्रव्ये सत्यभिहितत्वात् इति शक्तीनामेव साधनत्वे योऽयमेकद्रव्याधिकरणः साधनभेदः श्रूयते, स उपपन्नो भवति । वेगेन पतितो रुग्णात् स्फुरतो ध्वनिरुदित इति । द्रव्ये तु तस्यैकत्वान्न संभवति । क्रियाभेदनिबन्धनो भविष्यतीति चेत् कर्मादि-नियमो बाध्येत ; प्रतीतिभेदश्च न स्यात्, तत्र क्रियाया अर्थान्तरत्वात् ।

न ह्यन्यस्य भेदः, अन्यस्माद्भिद्यते। अपिच द्रव्यस्यैकत्वे कुतः क्रियाभेदकारणभेदः कार्यस्याभेदात्। शक्तीनामेव च साधनत्वे प्रातिपदिकाद्विभक्तयो युज्यन्ते । द्रव्यस्य तु प्रातिपदिकेनाभिहितत्वात् अनर्थका नोत्पद्येरन् वचनात् स्वार्थिका इति चेत् कर्मादिनियमो बाध्येत, प्रतीतिभेदश्च न स्यात्। वृक्षं वृक्षेणेति अस्ति चासावभिन्नेऽपि प्रातिपदिकार्थे तस्मादर्थान्तरं प्रातिपदिकार्थाद्विभक्त्यर्थः कारकमिति। नैवम् ; शक्तिमद्द्रव्यं कारकं क्रियानिष्पत्तावुपात्तव्यापारत्वात् । न चाशक्तान्न क्रियानिष्पत्तिरित्येतावती शक्त्यपेक्षा तस्य साधनत्वं विहन्ति ; शक्तेरपि द्रव्यापेक्षत्वे तुल्यदोषत्वात् । न चान्यापेक्षा कारकाणां कारकत्वं विरुणद्धि, कार्यत एवान्वयव्यतिरेकाभ्यां कारकत्वावगतेः। कार्यं हि कस्यचित् संभवेऽप्यनवाप्तसत्कारः पुनरवाप्नुवन् सत्तान्तरस्य भाव एव परिगृहीतातिशयान्तरस्य कारणतां सूचयति ; न त्वकारणतामेव। विशेषशालिनि तस्मिन्नेव पुनः भवन् तदभावे चाभावात् । न खलु कुसूलादौ बीजसमवधानेऽप्यलब्धोपलब्धेरङ्कुरस्य क्षित्यादिसहकारिग्रामबीजस्य समवधानसंदृश्यमानमूर्तेरन्वयकार्यं न प्रतीयते । अपि तु तदेव बीजं समवहितक्षित्यादिसहकारिप्रत्ययमस्य जनकमितरथेति गम्यते। द्रव्यस्यैकत्वात् साधनभेदः कथमिति चेत् एकद्रव्याधिकरणाश्शक्तयो भिन्नरूपाः स्वरूपभेदेनाश्रयभेदमुपदधत्योऽभेदमधिकरणस्य दर्शयन्ति । एकस्यापि देवदत्तादेः शिल्पभेदात्तक्षायस्कारादिसमाख्या अर्थभेदव्यवस्थां चरतीति । तत्सूक्तम् ; द्रव्ये साधने प्रत्ययाभिहितत्वात्तदनुप्रयोगो न स्यात् । तत्र सामान्यमभिहितं, विशेषो न प्रयोक्ष्यते न वक्तव्यं साधने विधीयमानः प्रत्ययः कथं साधनं सामान्यमभिदधीत ? सामान्यस्य विशेषाश्रयत्वात् विशेष एव वा प्रत्ययेनैकरूपत्वादनुप्रयोगापेक्षिणाऽभिधीयते गोशब्देनैव प्रकरणाद्यपेक्षिणा गवादिरर्थ इति ।

ननु चान्यापेक्षया विशेषमभिदधतः प्रत्ययस्य कथमभिधानशक्तेर्नोपरोधः ? यथा गवादिं अभिदधतो गोशब्दस्य शक्तावपि चैतत्समानं साधनशक्तीनां विशेषे शब्दस्याभिधानशक्तिप्रतिघात इति। नैवं, शक्तिर्विशेष एवोच्यते धातोः क्रियाविशेषवचनादेव प्रत्ययोत्पत्तेः । स च कार्यविशेषाश्रयभेदाभ्यामवधार्यते । तत्र कार्यभेदो धातुनैवाभिहितः ; आश्रयभेदः पुनरप्रतीतः पदान्तरेणैवोच्यते । चैत्रो मैत्र इति तथाप्यन्यापेक्षा तुल्यैव । न चाश्रिताश्रययोस्सामानाधिकरण्यं अतश्चैत्रो वर्धयतीति न स्यात्, अपि तु चैत्रो वर्धत इति। अपि च धातुः क्रियाविशेषवचन एवेति कुत एतद्वर्धते यावदनेन वर्धयितव्यं ; इदं कर्म कुर्याः, नागरकवृत्ते वर्तते, सामान्येनैषा न पुष्यति, इत्यादौ सामान्यस्य विशेषः प्रतीयते । यत्तु देवदत्तादेर्द्रव्यस्यैकत्वान्मध्ये ह्यहादिः कालो न संभवतीत्युच्यते, तदपि न सम्यक् ; आश्रितोपाधिनिमित्तस्य भेदस्योपपत्तेः । तथाहि ; वक्तारो भवन्ति, पटुर्भवान्, पटुरासीत्, पटुतरश्श्रेष्ठः, अद्यान्य एवासि संपन्न इति तदेवं सामर्थ्यभेदादाहितविभागमधिकरणं भागशोऽवच्छिद्य साधनभेदः प्रकल्प्यमानो मध्यमप्युपकल्पयति ।

न च शक्तिपक्षेऽपि साक्षान्मध्यसंभवः पूर्वशक्तिकाले परस्याः परकाले तु पूर्वस्याभावात्।

अथवा ग्रहे भोक्तृत्वनाधिसप्तमी ग्रहादभोक्तृत्वबधिरेव पञ्चमी स चान्त्यभोजनेनावच्छिद्यते । यदि तु मध्यसिद्धये द्रव्यभेदश्शक्तिभेदश्च कल्प्यते तदा कर्तृभेदात् भुक्त्वेति क्त्वाप्रत्ययः समानकर्तृकयोः पूर्वकाल इति न स्यात् । उपचरिताभेदाश्रयस्त इति चेन्मध्यं न सिध्यति । अथैकत्वात् भुक्तिक्रियायां कारकैकत्वकालभेदाश्रयश्च कारकभेदः स्नात्वा व्रजतीति न स्यात्, स्नानस्नानव्रज्यायाश्च भेदात् तन्निमित्तयोः कर्तृशक्त्योरपि भेदे समानकर्तृकत्वाभावात् । ननु चात्रापि द्रव्यमाश्रितशक्तिभेदसंपादितनानात्वं साधनं तस्यापीत्येव दोषः । अपि च भिन्नाधारवर्तितया सामर्थ्ययोरभेदमाश्रेयशक्तिवादिना शक्यते वक्तुं समानः कर्तेति । यस्य तु शक्तिभेदोपनीतस्तदाधारस्य भेदस्तस्य निवन्धनमुपचरितमप्येकत्वं न विद्यते, अभेदश्रीयच्चाधारभेदक्रियाभेदस्य पौर्वापर्यवतः अपेक्षितत्वात् । अत्रोच्यते द्रव्यस्यैकत्वेन शक्त्योरेकत्वमुच्यते । शक्तिनानात्वेन च द्रव्यस्यापि नानात्वं करिष्यते, द्रव्यस्य तु पारमार्थिकमप्येकत्वं न मृष्यत इत्यहो कामचारः । अपितु शक्तौ साधने पशौ कर्तरि हस्तिकवाटयोः कर्त्रोरिति कथं शक्तिराख्या धारावच्छिन्ना प्रतिपाद्यते, प्रतिपाद्यतां सामानाधिकरण्यं पृच्छामि पशौ द्रव्ये यः कर्तेति चेत् उपमानात् कर्तुरिति न प्राप्नोति ।

अथ शक्तिभेदोपकरणाः कर्त्रादिश्रुतयः तदपि कारणं कार्ययोगितयाऽवगमयति। शुक्लादयः रूपविशेषाश्रयमिति सामानाधिकरण्योपपत्तेः । जितं तर्हि भवता, सिद्धश्शक्तिसाधनभेदः कर्त्रादिश्रुतिभिराश्रयस्य शक्तिमतोभिधानात् । किञ्च शक्तिकारकपक्षे कम . . . कर्मणो द्वित्वे कर्मणो बहुत्वे विभक्तिवचनादिति न स्यात् । न हि गुणस्य संख्यासंबन्धो दृश्यते ; पञ्च कर्माणि, चतुरो भावास्त्रयस्संयोगा द्वे सामान्ये एकस्समवाय इति । न चायमुपचारः प्रत्ययाविशेषात् ; एवं शक्तयोऽपि कार्यभेदाद्भिन्नास्सङ्ख्याभेदमनुभविष्यन्ति । सत्यमस्ति शक्तीनां भेदः, न तु तत्रापि ते वचनभेदं, यस्मादादित्यं पश्यति स्तौतीति दर्शनादिक्रियाभेदात् भिन्नास्वपि शक्तिषु न बहुवचनं दृश्यते । न पर्यायोक्तौ शक्तयः क्रियाभिरभिसंबध्यन्त इति चेन्न । प्रत्येकसमाप्ता अपि क्रियाभेदास्समस्याभिधानेषु वचनभेदं प्रयुञ्जते । यथा पञ्च शरानस्यति, सव्यापसव्याभ्यां विध्यति, द्वयोः पर्यङ्कयोश्शेते इति । न च पर्यायेणैव दर्शनादयस्स्युः यौगपद्येनापि भावात् । तस्मात्सामर्थ्याधारनिबन्धनो वचनभेदो न शक्त्याश्रय इति । अत एव स्वातन्त्र्या विभक्त्याऽपि शक्तिर्नाभिधीयते । यदि हि स्वतन्त्रां शक्तिं विभक्तिरभिदध्यात् तदा तद्गतामेव संख्यां विभक्तिरभिदधीत ; समानशब्दोपादानात् न चैतदस्ति । तस्माद्यस्य संख्यां विभक्तिरुपादत्ते तदेव शक्तिमत्कारकमिति ।

यत्तु शक्तावेव विभक्त्यर्थे वर्तमानमव्ययं समस्यते इत्युच्यते तच्छक्तिमत्यपि कारके अव्ययानामपि सत्ववचनात्तन्मात्राभिधानमिति कथं सत्वभूतं द्रव्यमसत्वार्थे नाव्ययेनाभिधीयेत ? यत्तु प्रासाद आस्त इत्यनभिहितलक्षणा सप्तमी न लक्ष्यत इति तत्र यथा—घञादिविषये शक्तिमद्द्रव्यमभिहितं, न त्वाश्रितविषयशक्तिमदिति तत्र न च केन सप्तमी वार्यते ? यदि च घञादयः

शक्तिमभिदधीरन् तदा शक्तेरसिशब्दाभिहितायाः शक्त्यन्तरायोगादास्तां सप्तमी द्वितीयादयोऽपि नोत्पद्येरन्। कथं चैवमाह अधिकरणादिवचनानि प्रसादादयः। ते हि संज्ञाशब्दा वृक्षादिवदेव केषुचिदर्थविशेषेषु रूढाः केवलममीषां धर्मनियमा वा यथाकथञ्चिदुत्पत्ति एतेन च वेगेन पततः इत्यादौ ये यमेकद्रव्याधिकरणा साधनभेदश्रुतिः सापि प्रतिविहितैव भवति।

न चैतावता कारके प्रातिपदिकादयो नोत्पद्येरन्। द्रव्यं हि विभक्तिलिङ्गशक्तिसंख्यालिङ्गवच्च विभक्तिवचनसंस्कारो लभ्यत इत्यतः स्थितमेतच्छाक्तिमद्द्रव्यं कारकमिति। आख्यातप्रत्ययाभिधेयं कारकविशेषः पुरुषः। स त्रिधा– प्रथमो मध्यम उत्तमश्च। तत्र परस्मैपदात्मनेपदयोः प्रथमत्रिकाभिधेयः प्रथमः, मध्यमत्रिकाभिधेयो मध्यमः, अन्त्यत्रिकाभिधेय उत्तमः। तत्र च—

प्रत्युक्तापरभावश्चेदुपाधिः कर्तृकर्मणोः। तयोःश्रुतिविशेषेण वाचकौ मध्यमोत्तमौ॥

तदाह– युष्मदि-मध्यमः, अस्मद्युत्तमः, शेषे प्रथम इति। तत्र कर्तरि पुरुषप्रयोगो यथा—

अथाऽऽह वर्णी विदितो महेश्वरस्तदर्थिनी त्वं पुर एव वर्तसे।
अमङ्गलाभ्यासरतिं विचिन्त्य तवाभ्यनुज्ञां न तु कर्तुमुत्सहे॥

कर्मणि यथा—

यदि त्वं मन्यसे तेन त्वया स यदि तोष्यते।
तत्किमास्था न कोपेन दूति दध्यामहे वयम्॥

अथैषां कचित् प्रथम एव यथा—भावप्रयोगेषु युवाभ्यामास्यते, अस्माभिर्गण्यते इति। कचिन्मध्यम एव यथा— क्रियासमभिहारत्रयाभ्यां स समुच्चयेषु लुनीहि लुनीहीत्येवायं लुनाति, अलावीत् लविष्यति वा, अधीष्वाधीष्वेत्येवमधीयाते, अध्यैषातां अधीष्येते वा, राष्ट्रमट, मठमट खदूरमटेत्येवावामटावः, अटिष्व अटिष्यामो वा, छन्दोऽधीष्व व्याकरणमधीष्व, निरुक्तमधीष्वेत्येव वयमधीमहे, अध्यगीष्महि अध्येष्यामहे वा, सक्तून् पिब, धानाः खादत, ओदनं भुङ्क्ष्व इत्येवं यूयमभ्यवहरत अभ्यवाहार्ष्ट अभ्यवहरिष्यथ वा। कचिदुत्तम एव यथा— प्रहासे मन्यन्ते, एहि मन्यन्ते, रथेन यास्यसि, दुहि यास्यसि, यातस्ते पिता. एहि मन्ये ओदनं भोक्ष्यसे, न हि भोक्ष्यसे, भुक्तस्सोतिथिभिरिति। मन्यतेस्तु उत्तमविषयेऽपि मध्यम एव; तत्राद्यत्रायमर्थः. एहि मन्यसे ओदनं भोक्ष्यथ. इति। युगपद्वचने पुनः पुरुषाणां परो भवति। यथा— स च त्वं च पचथः, त्वं चाहं च पचावः, स च त्वं चाहं च पचाम इति। युगपद्वचनता चैकशेषस्य द्वन्द्वसमानार्थत्वाच्च अर्थविषयैव गृह्यते; न चार्थविषया। तेन—

अहं वा कुम्भकर्णो वा त्वं वा राक्षसपुङ्गव। इन्द्रजिद्वा निकुम्भो वा वहेयुर्भारमीदृशम्॥

शेषे प्रथम एव भवति, त्वमहमन्यो वा गच्छत्विति । एवं तर्हि चार्थे युगपद्वचनतायामभावात् वहेयुरिति बहुवचनं न प्राप्नोति । नैवम्; वार्थेषु कचिद्युगपद्वचनता दृश्यते । यथा—द्वौ वा त्रयो वा छिन्ना इति आह च महाभाष्यकारः, द्वौ प्रयुक्ते त्रयो वेति गम्यते, त्रयो वेत्युक्ते द्वौ वेति गम्यते । सैषा पश्चाधिष्ठानवाक् । तत्र युक्तं बहुवचनं सामान्याश्रयो वा बहुवचनम्; यथा—कति भवतः पुत्राः, कति ते भार्या इति बहुत्वं संपद्यते यस्मिन्नतस्मिन्युष्मदाश्रया ।

प्रवृत्तिः पुरुषस्यास्ति प्रकृते स्सा विधीयते ॥

यथा अत्वन्तं संपद्यते त्वद्भवति, अयूयं यूयं संपद्यन्ते युष्मद्भवन्तीति, उपलक्षणं चैतत् । प्रकृतिविकृत्याश्रयपुरुषसंप्रधारणायां प्रकृत्याश्रय एव पुरुषो भवति, न विकृत्याश्रय इति । तेन अनहमहं संपद्यते मद्भवति, अवयं वयं संपद्यन्ते अस्मद्भवन्ति, असस्स संपद्यते तद्भवति, अनहमहं संपद्ये मद्भवसीत्याद्यपि सिद्धं भवति । का पुनरत्रोपपत्तिः? अभूततद्भावे प्रकृतिविकृत्योः कर्तृत्वविवक्षायां कामचारः । तथाहि; क्वचिद्विकृतेः कर्तृत्वं विवक्ष्यते । यथा—मूत्राय संपद्यते यवागूः, यथा च सुवर्णपिण्डः पुनरपरया आकृत्या संपृक्तः खदिराङ्गारसवर्णे कुण्डले भवत इति । तथाहि; क्लृपि संपद्यमाने या चतुर्थी सा विकारतः । सुवर्णपिण्डे प्रकृतौ वचनं कुण्डलाश्रयम् । क्वचित्तु प्रकृतेः; यथा—सङ्घीभवन्ति ब्राह्मणाः, महद्भूतश्चन्द्रमा इति । अत्र यदि प्रकृतेः कर्तृत्वं न विवक्ष्यते तदा विकृतेस्सङ्घस्यैवकर्तृत्वाद्भवन्तीति बहुवचनं न प्राप्नोति । महद्भूतः इत्यत्र च महच्छब्दस्य च मुख्यार्थत्वादान्महतस्समानाधिकरणजातीययोरित्यात्वं स्यात् । प्रकृतिर्हि काचिदुपचरितविकाररूपा, यथा इन्द्रस्थूणा उपेन्द्रो ग्राव इति । काचित्परिणामिनी यथा—दुग्धं दधि भवति, हेम कुण्डलीभवति । तत्र विपरिणामिनीषु प्रकृतिषु संघमहत्वादिभिर्मुख्यैरपि योगे पूर्वस्या अवस्थायाः प्रच्युतस्योत्तरामवस्थां प्राप्तस्य पूर्वोत्तरयोरवस्थयोराश्रितयोस्सव्यापारत्वात् पूर्वस्यावस्थायां कर्तृत्वविवक्षायाः सङ्घमहदादेर्विकारशब्दस्य प्रकृत्युपग्राहिणो गौणत्वं विज्ञायते । तदुक्तं—

महत्त्वं सङ्घभावं च प्रकृतिः प्रतिपद्यते ।
भेदेनापेक्षिता सा तु गौणत्वस्य प्रसाधिका ॥

इति । यद्येवम्, अतिमहती महती संपन्ना महद्भूता ब्राह्मणीति पुंवद्भावो न प्राप्नोति, अर्थाश्रयः एतदेवं भवति । शब्दाश्रयश्च पुंवद्भावः; यथा गो तो णित्, औतोऽम्शसोरिति वाहीके । वर्तमानस्य गोशब्दस्य गौस्तिष्ठति गामानयेति वृद्धिरात्वं च भवति ।

तेऽमी क्रिया च कालश्च कारकं पुरुषस्तथा ।
उक्ताः पदार्थाश्चत्वारस्स्वैस्स्वैर्भेदैस्समन्विताः ॥

द्रव्यात्मा चापि कालो यः प्रसङ्गात्सोऽपि कीर्तितः ।
स हि प्रायः प्रबन्धेषु तत्र तत्रोपयुज्यते ॥
क्रियायां कालोन्तर्भवति पुरुषः कारकपदे ।
प्रधाने सोपाधिद्वयमपि तदेतन्निविशते ॥
प्रधानं तं प्राहुर्यमभिदधते घञ्प्रभृतयः ।
सहोपस्कारार्थैर्निवसति स तु प्रातिपदिके ॥

इति महाराजाधिराज श्रीभोजदेवविरचिते शृङ्गारप्रकाशे क्रियाद्यर्थचतुष्टयप्रकाशो नाम चतुर्थः प्रकाशः ॥

पञ्चमः उपाध्यायार्थचतुष्टयप्रकाशः

प्रकृत्यर्थप्रत्ययार्थभेदेषु कारकाणां प्रवृत्तिविशेषः क्रिया ; तामनुपहितां कृभ्वस्तयो वदन्ति । तेषां परस्परमसंभेदसंभेदाभ्यां साम्योत्कर्षापकर्षजन्मानः द्वादश धात्वर्थभेदाः क्रिया भवन्ति । तद्यथा— अकर्मकाः, अन्तःकर्मकाः, अर्थान्तरकर्मकाः, अविवक्षितकर्मकाः, प्रसिद्धकर्मकाः, द्विकर्मकाः, प्रसिद्धकर्तृकाः, भावकर्तृकाः, कर्मकर्तृकाः, कर्तृस्वक्रियाः, कर्मस्वक्रियाः, उभयस्वक्रियाश्चेति । ते चापरिस्पन्दसपरिस्पन्दभेदात् प्रत्येकं द्विधा भूत्वा चतुर्विंशतिर्जायन्ते । तत्र स्वभावतोऽस्तिः तदासीनकर्तृकत्वादपरिस्पन्दः । करोतिः प्रयुञ्जानकर्तृकत्वात्सपरिस्पन्दः । भवतिः विकुर्वाणकर्तृकत्वात्सपरिस्पन्दापरिस्पन्द इति स्थितम् । अतोऽस्त्यर्थाश्च न्यग्भवतयो न्यगस्तयश्चाकर्मका भवन्ति । तेषु पूर्वे अपरिस्पन्दा यथा—म्रियते, स्वदते, वर्तते, प्रीयत इति । उत्तरे सपरिस्पन्दाः यथा—जायते, विवर्धते, स्फुरतीति । त एव न्यक्करोतयोऽन्तःकर्मकाः ; तेषु पूर्वे अपरिस्पन्दाः यथा—जीवति, म्रियते, पुत्रीयति, प्राणितीति । उत्तरे सपरिस्पन्दाः यथा— नृत्यति, श्वसिति, बाष्पायते, रोदितीति । अस्तिकरोत्यर्थाः करोतिभवत्यर्थाश्चार्थान्तरकर्मकाः । तेषु पूर्वे अपरिस्पन्दाः यथा—तरति काष्ठं, तरति विपदं, विपर्यस्यति मतिं, विपर्यस्यति हस्तमिति । उत्तरे सपरिस्पन्दाः यथा—वहति नदी, वहति भारं, पतति पर्णम्, पतत्यध्वानमिति । त एवानुत्करोतयोऽपि विवक्षितकर्मकाः । तेषु पूर्वे अपरिस्पन्दाः यथा— संज्ञा संज्ञिन्यभिनिविशते, बुद्धिस्तत्त्वमभिनिविशते, तीर्थं उपवसति, त्रिरात्रमुपवसतीति । उत्तरे सपरिस्पन्दाः यथा— चैत्रो हसति, मैत्रो हसति, चक्रं भ्रमति, देशाद्भ्रमतीति । उत्करोतयस्तु, त एव प्रसिद्धकर्मकाः । तेषु पूर्वे अपरिस्पन्दाः यथा— वपतीत्युक्ते बीजमिति गम्यते, प्रसूत इत्युक्ते गर्भमिति गम्यत इति । उत्तरे सपरिस्पन्दाः यथा— कृषतीत्युक्ते क्षेत्रमिति गम्यते, परिणयतीत्युक्ते कन्यामिति गम्यत इति । सत्येवोत्करोतित्वे न्यगस्तयो न्यग्भवतयश्च त एव द्विकर्मकाः । तेषु पूर्वे अपरिस्पन्दाः यथा— लिङ्गं लिङ्गिनमवगमयति ज्ञातारं, जयति शतमश्वानश्वसेनमिति । उत्तरे सपरिस्पन्दाः यथा— गां दोग्धि पयः, वृक्षमपचिनोति फलानीति । एवमेते षट् वियोगविकल्पाः परं त्रियोगविकल्पाः षड्भवन्ति । तत्रोदस्तय उद्भवतयो वा प्रसिद्धकर्तृकाः । तेषु पूर्वे अपरिस्पन्दाः यथा— दहतीत्युक्ते वह्निरिति गम्यते । उत्तरे सपरिस्पन्दाः यथा— कूजतीत्युक्ते पिक इति गम्यते, हेषत इत्युक्ते अश्व इति गम्यत इति । न्यग्भवतिकरोतयो न्यगस्तिकरोतयो वा भावकर्तृकाः । तेषु पूर्वे अपरिस्पन्दाः यथा— चोरस्य रुजति, चोरस्यामयति, चोरं ज्वरयति, चोरं संतापयतीति । उत्तरे सपरिस्पन्दाः यथा—भवति पक्ष्यति, भवत्यपाक्षीत्, भवेदपि भवेत्, स्यादपि स्यादिति ।

उदस्तिन्यक्करोतथ उद्भवतिन्यक्करोतयो वा कर्मकर्तृकाः। तेषु पूर्वे अपरिस्पन्दाः यथा— दुग्धे गौस्स्वयमेव, प्रसूते गौस्स्वयमेव, वृणीते कन्या स्वयमेवेति। उत्तरे सपरिस्पन्दाः यथा— अपकिरते हस्ती स्वयमेव, उच्छ्रयते दण्डस्स्वयमेव, नमते दण्डस्स्वयमेव, आरोहयते हस्ती स्वयमेवेति। उदस्तिकरोतयः उद्भवतिकरोतयो वा कर्तृस्थक्रियाः। तेषु पूर्वे अपरिस्पन्दाः यथा– अर्हति पूजां, जानाति वर्णं, पश्यति रूपं, शृणोति शब्दमिति। उत्तरे सपरिस्पन्दाः यथा— गच्छति ग्रामं, आरोहयत्यश्वमिति। न्यग्भवत्युत्करोतयो न्यगस्त्युत्करोतयो वा कर्मस्थक्रियाः। तेषु पूर्वे अपरिस्पन्दाः यथा— दुनोति शत्रुं, धिनोति मित्रं, मदयति सुहृदं, सुखयति सखायमिति। उत्तरे सपरिस्पन्दाः यथा— पचत्योदनं, भिनत्ति कुसूलं, श्लक्ष्णुते श्लक्ष्णयते वा शङ्कं, तक्ष्णोति यूपमिति। न्यग्भवत्युदस्तिकरोतयो न्यगस्त्युद्भवतिकरोतयो वा उभयस्थक्रियाः। तेषु पूर्वे अपरिस्पन्दाः यथा —लभते पूजां, प्राप्नोति धर्मं। उत्तरे सपरिस्पन्दाः यथा— भुङ्क्ते ओदनं, अधीते स्वाध्यायं, तप्यते तपः, साधयति स्वर्गमिति।

ननु च, भवति पश्यति, भवत्यपाक्षीत्, भवेदपि भवेत्, स्यादपि स्यादिति नैतावस्तिभवत्यर्थावपि तु साक्षादस्तिभवती। तौ चानुपहितक्रियाभिधायकाविति नोपाधीभवितुमर्हतः। उच्यते, असभुवि, भूसत्तायामिति धातुपाठादनुप्रयोगवर्जमार्धधातुकेऽस्तेर्भूविधानात्सङ्कर एवेति विज्ञायते। एवमपि करोत्यर्थानुप्रवेशो दुरुपपादः। सोऽपि कर्तृत्वान्यथानुपपत्तेरुपपद्यते।

ननु च, भवति पश्यति, भवत्यपाक्षीदित्ययं लट् प्रयोग एव। अस्तिगच्छामो वयमिति च अस्तिप्रयोगोऽपि भावकर्तृकेषु दृश्यते। नैवम्; नास्माभिरस्तिभवती भावकर्तृकावुच्येते। अपि तु अस्तिभवतिकर्तारोऽस्त्यादयः पचत्यादयश्च। ते हि रुजत्यादिवदुपाधिपरा अप्यस्तौ कर्तारो भवन्ति। एतावांस्तु विशेषः रुजादीनां कर्तृत्वं तत्परेणैव लकारेणोच्यते। पचादीनां च भवत्यस्तिपरेणेति; यथा च धात्वर्थः क्रियोपाधिरेवं कालोपि। यदुक्तम्—

क्रियोपाधिश्च संभूतभविष्यद्वर्तमानताः। परापरविभागार्थास्सशक्तिः प्रतिपद्यते॥

स भूतादिभेदाद्द्वादशधा। तद्यथा—भूतः, भूतानद्यतनः, भविष्यत्, भविष्यदनद्यतनः, वर्तमानः, वर्तमानानद्यतनः, परोक्षः, अतिपन्नः, अव्यक्तः, सङ्कीर्णः, प्रकीर्णः, विप्रकीर्ण इति। लुङादिविषयोऽप्यतीतमात्रं भूतः; स षोढा—भूतः, प्रकर्षभूतः, भूतानद्यतनः, अभिमानाद्यतनः, प्रबन्धाद्यतनः, सामीप्याद्यतनः इति। तेष्वनिर्धारितविशेषो भूतो यथा– अकार्षीत्, निषसाद, उवास, शुश्राव, अपक्त, पक्तवानिति। शब्दान्तरावगतप्रकर्षादनवेक्षितानद्यतनपरोक्षादिप्रत्ययः प्रकर्षभूतः यथा—अवात्सुरिह पुरा छात्राः। विवक्षितान्यावधिर्भूतानद्यतनः, यथा— अन्यामगामघोषात्। रात्रिशेषे जागरणसंततावभिमानानद्यतनः, यथा—अमुत्रावात्सम्, सकलां रात्रिं जागरितः, रात्रेरप्रभातत्वाद्यतनमिव कालं मन्यते। अविवक्षितक्रियाविरामः प्रबन्धाद्यतनः।

यथा–यावज्जीवं भृशमन्नमदात् । विवक्षितक्रियानन्तर्यः सामीप्याद्यतनः । यथा—येयं गता पौर्णमासी अस्यामुपाध्यायोऽग्नीनाधीत । अत्रानन्तर्योर्वाऽनद्यतनवत् क्रियाप्रबन्धसामीप्ययोरिति स्मर्यते । एवं लङ्निमित्तमविद्यमानाद्यतनो भूतानद्यतनः । स षोढा—सामान्यानद्यतनः, विशेषानद्यतनः, अभिज्ञानद्यतनः, प्रसिद्धपरोक्षः, प्रश्नापरोक्षः, हशश्वद्परोक्ष इति। तेष्वविवक्षितपरोक्षत्वादिः सामान्यानद्यतनः । यथा—अकरोत्, अशृणोत्, न्यषीदत्, अमुत्रावसम्, आसीदिदं तमो भूतं, रामो वनमगच्छदिति । पदान्तरावगतपरोक्षत्वादिविशेषो विशेषानद्यतनः । यथा—अवसन्निह पुरा छात्राः । न यदीत्यभिज्ञावचनं लङपवादोऽभिज्ञानद्यतनः, यथा—स्मरसि देवदत्त काश्मीरेषु यद्वसाम । लोकप्रसिद्धेरारोपितापरोक्षाभिमानः प्रसिद्धपरोक्षः, यथा—अजयज्जयन्तो हूणान् । प्रश्नोपमुक्तपरोक्षत्वं प्रश्नापरोक्षः, यथा–किमगच्छद्देवदत्तः । हशश्वदर्थोपक्षीणपरोक्षत्वो हशश्वद्परोक्षः, यथा—इति हाकरोत्, शश्वदकरोदिति । अनागतमात्रं लृडादिविषयो भविष्यत्प्रबन्धाद्यतनस्सामीप्याद्यतनः प्रविभागाद्यतन इति । तेष्वनिर्धारितानद्यतनादिः सामान्यभविष्यत्, यथा—करिष्यति, वह्निरिन्द्रो भविष्यति, कदा गमिष्यसि ? एष गमिष्यामि, पश्यन् व्रजति, पाचको व्रजतीति । निर्धारिताद्यत्वविशेषो विशेषभविष्यत्, यथा—अद्य गमिष्यामीति । लिप्सोपाधिको लिप्साभविष्यत्, यथा—यो मे भिक्षां दास्यति स स्वर्गं लोकं यास्यतीति । अविवक्षितक्रियाविरामः प्रबन्धाद्यतनः, यथा—यावज्जीवं भृशमन्नं दास्यतीति । विवक्षितक्रियानन्तर्यस्सामीप्याद्यतनः, यथा—येयमागामिनी पौर्णमासी अस्यामुपाध्यायोऽग्नीनाधास्यतीति । भविष्यति मर्यादावचने परस्मिन्कालविभागेचानहोरात्राणां परस्मिन्विभाषेति प्रविभागानद्यतनः, यथा—योयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्यास्तत्रौदनं भोक्ष्यामहे । योऽयमागामी संवत्सरस्तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे । एवं परस्मिन्विभाषेत्यपि द्रष्टव्यमिति । भविष्यन्नेवाविद्यमानाद्यतनो लुण्णिमित्तं भविष्यदनद्यतनः, स षोढा—सामान्यानद्यतनः, लिप्सानद्यतनः, परिदेवनानद्यतनः, परावरविभागीयः, परप्रविभागीय इति । तेष्वनिर्धारितक्रियाप्रबन्धादिः सामान्यानद्यतनः, यथा—कर्ता कर्तारौ कर्तारः, कारिता कारितारौ कारितार इति । शब्दान्तरावगतविशेषो विशेषानद्यतनः, यथा—त्वं पक्ता । लिप्सोपाधिको लिप्सानद्यतनः, यथा–यो मे भिक्षां दाता स स्वर्गं लोकं गन्ता । परिदेवनोपाधिकः परिदेवनानद्यतनः, यथा—इयं नु कदा गन्ता येवं पादौ निदधाति, अयं नु कदाध्येता य एवमनभियुक्तः । कालविभागे चानहोरात्राणामित्यहोरात्रविषयः परापरविभागीयः, यथा–योऽयमागामी मासस्तस्य यः परः पञ्चदशरात्रस्तत्रौदनं भोक्तास्महे । योऽयमागामी त्रिंशद्रात्रस्तस्य योऽपरः पक्षस्तत्र युक्ता अध्येतास्महे । परस्मिन्विभाषेत्यनहोरात्रकालाध्वमर्यादाविषयः परप्रविभागीयः । यथा—योऽयमागामी संवत्सरस्तस्य यदवरमाग्रहायण्यास्तत्र पाटलिपुत्रं गन्तास्मः । स एव अध्वविभाषाविषयोऽध्वविभाषीयः । योऽयमध्वा गन्तव्य आपाटलिपुत्रात् तस्य यत्परं कौशाम्ब्याः

तत्र सक्तून्पातास्म इति । अपातप्रच्युतक्रियाविषयो लडादिनिमित्तं वर्तमानः । स षोढा—सामान्यवर्तमानः, विशेषवर्तमानः, अविरामवर्तमानः, प्रवृत्तोपरतः, वृत्ताविरतः, नित्यवृत्त इति । तेष्वनपेक्षितविरामादिविशेषस्सामान्यवर्तमानः, यथा—अस्ति, भवन्, कुर्वाणः, पच्यमानः, पवमानः, पत्रमुद्वहमान इति । परोक्षादिविषयो विशेषवर्तमानः । अत्र वटे यक्षः प्रतिवसति । विवक्षितक्रियाप्रबन्धोऽविरामवर्तमानः, यथा—प्रासादं करोति । विवक्षितप्रवृत्तिविरामः प्रवृत्तोपरतः, यथा—जीवन्तं मारयति । अविवक्षितप्रवृत्तिविरामो वृत्ताविरतः, यथा—इह कुमाराः क्रीडन्ति । अविच्छिन्नप्रवृत्तिसंतानो नित्यप्रवृत्तः, यथा—तिष्ठति पर्वत इति ।

अनागतातिक्रान्तक्रियास्वपि पदान्तरप्रयोगापादितवर्तमानत्वाल्लटो निमित्तमविद्यमानानद्यतनो वर्तमानाद्यतनः । स षोढा—लिप्साविषयः, आशंसाविषयः, पुरायोगीयः, स्मयोगीयः, उभययोगीयः, अनुभययोगीय इति । तेषु लिप्साविषयो यथा—यो मे भिक्षां ददाति स स्वर्गं याति, को मे भिक्षां ददाति कस्स्वर्गं लोकं याति, एवं कतरो मे भिक्षां ददाति, कतमो मे भिक्षां ददाति । आशंसाविषयो यथा—देवश्चेद्वर्षति संपद्यन्ते शालयः । पुरायोगीयो यथा—वसन्तीह पुरा छात्राः । स्मयोगीयो यथा—इति स्मोपाध्यायः कथयति । उभययोगीयो यथा—नडेन स्म पुराधीयते । अनुभययोगीयो यथा—भाषते राघवस्तदेति । भूत एव लिड्विषयोऽक्षाणां परः परोक्षः । स षोढा—स्वपरोक्षः, परपरोक्षः, स्वपरपरोक्षः, मनःपरोक्षः, प्रमाणपरोक्षः, निर्णयपरोक्ष इति । तेषु स्वापेक्षया परोक्षो यथा—चकार चकार, चकासाञ्चकार, ऊषुरिह पुरा छात्रा इति । परापेक्षया परपरोक्षः, यथा—कः कलिङ्गान्विवेढः, को ब्राह्मणान्ददर्श, नाहं कलिङ्गान् जगामेति । उभयापेक्षया स्वपरपरोक्षो यथा—जघान कंसं वासुदेवः, ददाह त्रिपुरं हरः, ममाथ वृत्रं मघवेति । स्मरणापेक्षया मनःपरोक्षो यथा—इति चकार, शश्वच्चकार, इति ह, शश्वच्चकारेति । प्रश्ने चासन्नकाल इति निर्णयपरोक्षः, यथा—किं सा जगाम तत्पार्श्वं, किमुवाच यथोचितं, स किं शुश्राव तद्वाक्यमिति, पृच्छामि किं सखीति । भविष्यद्भूतवर्तमानक्रियातिपत्तिविषयो लङ्निमित्तमतिपन्नः । स षोढा—भविष्यद्भूतवर्तमानक्रियातिपत्तीनां शुद्धमिश्रभेदात् । तत्र केनचिल्लिङ्गेन भविष्यन्तीं शुद्धामेव क्रियातिपत्तिमवगम्य प्रयुङ्क्ते । यथा—अपि वज्राहतेनापतिष्यत्, कथं नाम तत्रभवान् वृषलमयाजयिष्यत्. दक्षिणेन चेदयास्यत् न शकटं पर्याभविष्यत्. यथा च सद्भिः प्रदिष्टेन पथा समचरिष्यथ, न ते समचरिष्यन्न चरणान्ते न भूतयः । एवं मिश्रामपि यथा—

रामाय पुण्यमहसे सदृशाय सीता दत्तैव दाशरथिचन्द्रमसेऽभविष्यत् ।
आरोपणेन पणमप्रतिकार्यमार्यस्त्रैयम्बकस्य धनुषो यदि नाऽकरिष्यत् ॥

केनचिल्लिङ्गेनानीतां क्रियातिपत्तिं शुद्धामेवावगम्य प्रयुङ्क्ते । यथा—न श्रद्दधे यत्तत्रभवान्वृषलमयाजयिष्यत्, न संभावयामि तत्र नाभोक्ष्यत भवान् । यथा च—

दुर्वचं त्वदथ मा स्म भून्मृगस्त्वय्यसौ यदकरिष्यदोजसा ।
नैनमाशु यदि वाहिनीपतिः प्रत्यपत्स्यत सितेन पत्रिणा ॥

एवं मिश्रामपि—

परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोऽभविष्यत् ॥

केनचित्प्रमाणेन वर्तमानामपि क्रियातिपत्तिं बुद्ध्वामेवावगम्य प्रयुङ्क्ते । यथा—उताकरिष्यत्, अप्यकरिष्यत् । यथा च–

गामधास्यत्कथं नागो मृणालमृदुभिः फणैः । आरसातलमूलात्त्वमवालम्बिष्यथा न चेत् ॥

एवं मिश्रामपि यथा—

अमङ्क्ष्यद्वसुधा तोये च्युतशैलेन्द्रबन्धना । नारायण इव श्रीमान्यदि त्वं नाधरिष्यथाः ॥

इति ॥ तिरोभूतभूतभविष्यदादिविशेषोऽव्यक्तः । स षोढा– लिङ्विषयः, लोड्विषयः, लड्विषयः, लृड्विषयः, तव्यादिविषयः, तुमुनादिविषयश्चेति । तेषु लिङ्विषयो यथा—कटं कुर्यात्, चिरं जीयात्, कथं तत्रभवान् वृषलं याजयेत्, अपि शिरसा पर्वतं भिद्यात्, संभावयामि भुञ्जीत भवान्, कालोऽयं यद्भुञ्जीत भवानिति । लोड्विषयो यथा—उपाध्यायश्चेदागच्छति आगन्ता आगमिष्यति वा, अथ त्वं छन्दोऽधीष्व । ऊर्ध्वं मुहूर्तादुपाध्यायश्चेदागच्छेत् आगच्छति आगन्ता आगमिष्यति वा अथ त्वं व्याकरणमधीष्व, कुरु कटं प्राप्तस्ते कालः कटकरणे, चिरं जीवतु भवान् किमिह भवान् करोतु, लुनीहि लुनीहीत्येवायं लुनाति अलावीत् लविष्यति वेति । लड्विषयो यथा—कदा भुङ्क्ते कर्हि भुङ्क्ते, अपि तत्रभवान् वृषलं याजयति, जातु तत्रभवान्वृषलं याजयति, कच्चिज्जीवति मे माता, कं वा विभूतयो न मदयन्तीति । लृड्विषयो यथा– अन्धो नाम पर्वतमारोक्ष्यति उत दण्डः पतिष्यति, कतरो नाम वृषलः यं तत्रभवान् वृषलं याजयिष्यति, न मर्षयामि न श्रद्दधे नावकल्पयामि यत्तत्रभवान्वृषलं याजयिष्यति, प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो, इति । तव्यादिविषयो यथा— स्वाध्यायोऽध्येतव्यः, ब्राह्मणो न हन्तव्यः, पितरो वन्दनीयाः, गुरवो माननीयाः, कृत्यं न भावयेत्, कार्यं न कुर्यादिति । तुमुनादिविषयो यथा— भोक्तुमैच्छत् इच्छति एषिष्यति वा, भुक्त्वा अव्राजीत् व्रजति व्रजिष्यति वा, अधीत्यास्नासीत् स्नाति स्नास्यति वा, चोरङ्कारमाक्रुक्षत् आक्रोशति आक्रोक्ष्यति वा, पायंपायमासिसीष्ट आस्ते आसिष्यते वा, रैपोषमपुषत् पुष्यति पोक्ष्यति वेति । कालान्तरसम्पृक्तस्सङ्कीर्णः; सङ्करश्चानेकाकारत्वादियत्तया न शक्यते निर्देष्टुमिति भङ्गनिर्वाहार्थं तु षोढैवोदाह्रियते । स भूतभूतानद्यतनयोः यथा—अन्येभ्यो वा अभुंक्ष्महि । भविष्यद्भविष्यदनद्यतनयोर्यथा— अद्य श्वो वा गमिष्यति ।

भूतभविष्यदनद्यतनयोर्यथा-अग्निष्टोमयाजकस्य पुत्रो जनिता । भूतानद्यतनभविष्यतोर्यथा— भाविकृत्यमासीत् । वर्तमानपरोक्षयोर्यथा—

क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥

भविष्यद्वर्तमानपरोक्षाणां यथा—

साटोपमुर्वीमनिशं नदन्तो यैः प्लावयिष्यन्ति समन्ततोऽमी ।
तान्येकदेशान्निभृतं पयोधेस्सोऽम्भांसि मेघान्पिबतो ददर्श ॥ इति ।

वर्तमानस्य भविष्यद्भूतयोरनुप्रवेशो प्रकीर्णः । स भविष्यदनुप्रवेशे आशंसायां यथा— उपाध्यायश्चेदागच्छति युक्ता व्याकरणमधीमहे । लिप्सायां यथा— कोपयतो भोजयति यावत् । पुरायोगे यथा—यावद्भुङ्क्ते, पुरा व्रजति । सामीप्ये यथा—कदा ग्रामं गमिष्यसि, एष गच्छामि, गच्छन्तमेव मां विद्धि । एवं भूतानुप्रवेशेऽपि भूतसामीप्ये यथा—कदा ग्रामादागतोऽसि ? एष आगच्छामि, आगच्छन्तमेव मां विद्धि । पृष्टप्रतिवचने यथा— अयि भोः कटमकार्षीः, कटं देवदत्त ननु करोमि, अयं नु करोमीति । भविष्यतो भूतानुप्रवेशे भूतस्य भविष्यदनुप्रवेशो विप्रकीर्णः । स भविष्यतो भूतानुप्रवेशे यथा— स्मरसि देवदत्त काश्मीरेषु वत्स्यामः, अभिजानासि कलिङ्गेषु वत्स्यामः तत्रौदनं भोक्ष्यामहे, स्मरसि यत्काश्मीरेषु वत्स्यामः यत्तत्रौदनं भोक्ष्यामह इति । यथा वा—

स्मरत्यदो दाशरथिर्भवन्भवानमुं वनान्ताद्वनितापहारिणम् ।
पयोधिमाबद्धचलज्जलाविलं विलङ्घ्य लङ्कां निकषा हनिष्यति ॥

इति । भूतस्य भविष्यदनुप्रवेशो यथा— मास्म कार्षीः, मास्म करोः, देवश्चेद्वृष्टस्सम्पन्नाः शालयः इति । यथा वा—

अपकर्ताऽहमस्मीति मा ते मनसि भूद्भयम् ।
मा स्म सीमन्तिनी काचिज्जनयेत्पुत्रमीदृशम् ॥

जातश्चायं मुखेन्दुस्ते भ्रुकुटीप्रणयी पुनः । गतं च वसुदेवस्य कुलं नामावशेषताम् ॥

इति । अथ कथं नित्यप्रवृत्तस्य वर्तमानप्राप्तावपि तस्थुः स्थास्यन्ति गिरयः, मार्गे कूपोऽभूत्, कूपो भविष्यतीति भूतभविष्यत्कालविषयः प्रयोगो भवति । उच्यते । हैहयादिवंशेषु ये राजानो बभूवुः तेषां याः क्रियाः तासामतीतत्वात् तत्सम्बन्धविवक्षायां भूतकालविषयं प्रत्ययं प्रयुङ्क्ते,

हेहयराज्येऽपि पर्वता इत्यनेन तस्थुरिति । तथा आगामिमन्वन्तरेषु ये राजानो भविष्यन्ति तेषां याः क्रियास्तासां भविष्यत्वात्तत्सम्बन्धविवक्षायां भविष्यत्कालविषयं प्रत्ययं प्रयुङ्क्ते । यदा बलिरिन्द्रो भविष्यति तदापीत्थमेव पर्वताः स्थास्यन्तीति । एवं कूपस्यापि भूतभविष्यद्दर्शनक्रियासम्बन्धात् अभूद्भविष्यतीति क्रियाभिसम्बन्धो न विरुध्यत इति । उपग्रहोऽपि प्रकृत्यर्थोपाधिरेव । कः पुनरसौ परस्मैपदात्मनेपदोभयपदिनामात्मनेपदपरस्मैपदयोगनिमित्तमर्थविशेषः । तदुक्तम् ।

य आत्मनेपदाद्भेदः क्वचिदर्थस्य गम्यते । परस्मैपदतो वापि मन्यन्ते तमुपग्रहम् ॥

यथा—नाथति नाथते, शपति शपते, आह्वयति आह्वयते, प्रतिजानाति प्रतिजानीत इति । अत्राशिषि नाथः, शप उपालम्भने, स्पर्धायामाङः, सम्प्रतिभ्यामनाध्याने, ज्ञा आत्मनेपदं ; शेषे परस्मैपदमित्यर्थभेदाः । एवं मुण्डो भीषयते, कुञ्चिकयैनं भाययति, जटिलो विस्मापयते, मत्यैनं विस्मापयति । श्येनो वर्तिकामुल्लापयते, कस्त्वामुल्लापयति, संप्रवदन्ते ग्राम्याः, संप्रवदन्ति शकुनय इति । अत्र भीस्म्योर्हेतुभये, लियः सम्माननशालिनीकरणयोश्च, व्यक्तवाचां समुच्चारणे, वद आत्मनेपदं, शेषे परस्मैपदमित्यर्थभेदः । एवमन्यदप्यूहनीयम् ।

ननु च, 'य आत्मनेपदात् भेदः क्वचिदर्थस्य गम्यत' इत्यत्र क्वचिद्ग्रहणं किमर्थम् ? उच्यते । परस्मैपदात्मनेपदोभयपदिनामात्मनेपदपरस्मैपदोभयपदयोगः षट् प्रकारो भवति । प्रकृतिनिमित्तः, प्रकृत्यर्थनिमित्तः, प्रत्ययनिमित्तः, प्रत्ययार्थनिमित्तः, उपस्कारनिमित्तः, उपस्कारार्थनिमित्तश्च । तत्रार्थनिमित्तेषु यथायोगमर्थावगतिहेतुत्वं विद्यते ; शेषेषु तु न विद्यते । क्वचिद्ग्रहणेन ज्ञापयति । तत्रात्मनेपदयोगः प्रकृतिनिमित्तो यथा— अनुदात्तङित आत्मनेपदम् ; ज्ञाश्रुस्मृदृशां सनः, एधते च्यवते सुस्मूर्षते दिदृक्षत, इति । प्रकृत्यर्थनिमित्तो यथा— प्रकाशनस्थेयाख्ययोश्च, भुजोऽनवने, गृधिवञ्च्योः प्रलम्भने, कर्मव्यतीहारे तिष्ठते भुङ्क्ते गन्धयते व्यतिलुनीत इति । प्रत्ययनिमित्तो यथा- शदेश्शितः, म्रियतेर्लुङ्लिङोश्च, शीयते अमृतमृषीष्टेति । प्रत्ययार्थनिमित्तो यथा—भावकर्मणोरात्मनेपदं कर्मकर्तरिफलवत्कर्तरि च, आस्यते पच्यते विपच्यते पचत इति । उपस्कारनिमित्तो यथा—विपराभ्यां जेः, समवप्रविभ्यः स्थः, समस्तृतीयायुक्तात्, मिथ्योपपदात्कृञोऽभ्यासे, विजयते पराजयते, संतिष्ठते अवतिष्ठते प्रतिष्ठते वितिष्ठते, अश्वेन सञ्चरते, पदं मिथ्याकारयति । उपस्कारार्थनिमित्तो यथा—वेः पादविहरणे, आङो ज्योतिरुद्गमने, उपाङ् मन्त्रकरणे, दाणश्चसाचेच्चतुर्थ्यर्थे, विक्रमते वाजी, आक्रमते ज्योतिः, सावित्र्युपतिष्ठते, दास्या संयच्छत इति । प्रकृतिनिमित्तः परस्मैपदयोगे यथा—शेषात्कर्तरि परस्मैपदम् , भवति व्यतिहसन्ति व्यतिहरन्ति, परस्परस्य व्यति । प्रत्ययार्थनिमित्तो यथा- कुषिरजोः प्राचां श्यन् , परस्मैपदं च ; शेषात्कर्तरि परस्मैपदम् । रज्यति वस्त्रं स्वयमेव, कुष्यति पादस्स्वयमेव, रज्यते वस्त्रम् , कुष्यते पादमिति, उपस्कारनिमित्तो यथा- अनुपराभ्यां कृञः । इतरेतरान्योन्योपपदाच्च, अनुकरोति पराकरोति, इतरेतरस्य व्यतिलुनन्ति, अन्योन्यस्य व्यतिलुनन्तीति । उपस्कारार्थनिमित्तो

यथा—समोऽकूजने, आङोदोऽनास्यविहरणे, उदोऽनूर्ध्वकर्मणि, प्रादेरजाद्यन्तरात्युजेरयज्ञपात्रेषु, संक्रीडन्ति शकटाः, व्याघ्रो मुखं व्याददाति, आसनादुत्तिष्ठति, यज्ञपात्राणि प्रयुनक्तीति । उभयपदयोगप्रकृतिनिमित्तो यथा—वाक्त्वषः, अनुपसर्गाद्वा, लोहितायति लोहितायते, क्रामति क्रमत इति । प्रकृत्यर्थनिमित्तो यथा—विभाषाकर्मकात् विभाषा विप्रलापे, उपरमति उपरमते, संप्रवदन्ति मौहूर्ताः संप्रवदन्ते मौहूर्ता इति । प्रत्ययनिमित्तो यथा—द्युद्भ्यो लुङि, वृद्भ्यः स्यसनोः, अद्युतत् अद्योतिष्ट, वर्त्स्यति वर्तिष्यत इति । प्रत्ययार्थनिमित्तो यथा—रज्यति रज्यते, कुष्यति कुष्यते, कुषिरजोः प्राचां श्यन्, परस्मैपदं च कर्मकर्तरि, इति । उपस्कारनिमित्तो यथा—उपसर्गादस्यत्यूह्योर्वा, उदस्यति उदस्यते, समूहति समूहत इति । उपस्कारार्थनिमित्तो यथा—वा लिप्सायाम्, विभाषोपपदेन प्रतीयमाने, भिक्षुको ब्राह्मणकुलमुपतिष्ठति उपतिष्ठते, ब्राह्मणस्स्वं यज्ञं यजति, यजत इति । एवमन्येऽपि हेतुलक्षणाभीक्ष्ण्यभृशार्थगर्हाकौटिल्यसाकल्यपूर्वकालतादर्थ्यादयः प्रकृत्यर्थोपाधिविशेषा वेदितव्याः । यथा—अधीयानो वसति, पचन्नास्ते, पुनःपुनः पठति-पापठ्यते, पुनःपुनः पचति पापच्यते, गर्हितं दहति-दन्दह्यते, कुटिलं क्रामति चङ्क्रम्यते, कन्यादर्शं वरयति, भुक्त्वा व्रजति, भोक्तुं व्रजन्तीति । एवमेते धातुरूपायाः प्रकृतेरर्थोपाधयः प्रत्ययरूपायाः स्वप्रत्ययार्थोपाधय एवोपाधयो भवन्ति । प्रातिपदिकरूपायास्तु स्वार्थादप्यलिङ्गसङ्ख्यापरिमाणकारकसंबन्धसंबोधनसहार्थतादर्थ्यहेतुलक्षणादय उपाधयो विद्यन्ते । ते तु प्रत्ययार्थोपस्कारार्थप्रातिपदिकार्थेष्वनन्तरमेव वर्णयिष्यन्त इति नेह प्रतन्यन्ते ।

अथ प्रत्ययार्थोपाधिः । तत्र कारकोपाधिषु पुरुष उक्तः; सङ्ख्यात्वग्रतोभिधास्यते । अपरेऽपि चास्य यस्य विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनप्रैषातिसर्गप्राप्तकालशक्त्यर्हगर्हादयः उपाधयो भवन्ति । तद्यथा—अग्निहोत्रं जुहुयात्, इह भवान् भुञ्जीत, इह भवानास्ताम्, भवान्माणवकमध्यापयेत्, किं नु खलु व्याकरणमधीयीय, इतश्छन्दो लभेयाहं भिक्षाम्, आशंसनमपि प्रार्थनमेव, चिरं जीव्याः, ग्रामं गच्छ, गच्छानुज्ञातोऽसि, कुरु कटं प्राप्तस्ते कालः कटकरणे, भवान्खलु शत्रुं हन्यात्, खलु तत्रभवान् भारं वहेत्, कथं नाम तत्रभवान्वृषलं याजयेदिति । एवमन्येऽपि तच्छीलतद्धर्मतत्साधुकारिहेत्वानुलोम्यशक्तिवयोवचनकृच्छ्रानुद्यमनशिल्पिलक्षणलिङ्गादयोऽवगन्तव्याः । यथा—वदिता जनापवादात्, मुण्डयितारः श्राविष्ठायनाः, वधूमूढां कन्यामलङ्करिष्णुः, यशस्करी विद्या, आज्ञाकरी भार्या, हस्तिघ्नो भटः, कवचहरः क्षत्रियकुमारः, धारयन्नुपनिषदम्, अंशहरस्सुतः, नर्तकी वेश्या, जायाघ्नस्तिलकः, व्यासस्य वचनं, पाणिनेरुक्तिः, कालिदासस्य प्रबन्ध इति ।

अथोभयोपाधिः । सोपि संज्ञाजातिप्रभासपरिमाणद्यूताभ्रेषभाषाच्छन्दोमन्त्रब्राह्मणाशीरुत्क्रोशादिभेदादनन्तप्रकारः । तद्यथा—तिचूको च संज्ञायाम्, भद्रभूतिर्देवदत्त इति हस्ता पुरोढा इति । द्वितीया ब्राह्मणे ग्रामस्य तदहस्सहायान् दीव्येयुः, प्रष्ठौहीं दीव्यतीति, आशिषि वुन्, जीवतात्

जीवळः, नन्दतात् नन्दक इति । माङ्याक्रोशे, आक्रोशे नञ्यनिः, मा जीवन्यः परावज्ञादुःख-दग्धोऽपि जीवति । 'तस्याजननिरेवास्तु जननीक्लेशकारिणः' इति ।

एवमन्येऽप्यसूयासंमतिकोपकुत्सनभर्त्सनाबाधप्रकाराकृच्छ्रपर्यायार्हणोत्पत्तिप्रभृतयोऽवगन्तव्याः। तेष्वसूया यथा—माणवकामाणवक अभिरूपका अभिरूपक रिक्तं ते आभिरूप्यम् । संमतिर्यथा—माणवका माणवक अभिरूपका अभिरूपक शोभनः खल्वसि । कोपो यथा— माणवक माणवक अविनीतक अविनीतक इदानीं ज्ञास्यसि जाल्म । कुत्सनं यथा— शक्तिके शक्तिके यष्टिके यष्टिके रिक्ता ते शक्तिः । भर्त्सनं यथा— चोर चोर वृषल वृषल घातयिष्यामि त्वाम् । आबाधो यथा— गतगता नष्टनष्टा प्रिया प्रिया गमनादिना पीड्यमानः कश्चिदेकं प्रयुङ्क्ते । प्रकारो यथा—पटुपटु, भीतभीत, परिपूर्णगुणेन न्यूनगुणस्योपमाने त्वेवं भवति । अकृच्छ्रं यथा— सुखदुःखेन ददाति, प्रियाप्रियेण ददाति, अपीड्यमानो ददातीत्यर्थः । पारम्पर्यादयो यथा— भवतश्शायिका, अर्हति भवानिक्षुभक्षिकाम्, इक्षुभक्षिकां मे धारयसि, उदपादीक्षुभक्षिकेति । सर्वोऽपि चायमुपाधि-प्रपञ्चस्त्रिधैवाख्यायते, धर्म्युपाधिर्धर्मोपाधिः प्रकीर्णोपाधिश्च । तत्र कृञः स्तम्बशकृतोर्यां व्रीहिवत्सयोरिन्, स्तम्बकर्णयोरमिजपोः, हस्तिसूचकयोरित्यादि । धर्म्युपाधिर्यथा—

व्रीहिस्तम्बकरिः क्षेत्रे गृहे वत्सश्शकृत्करिः । जनःकर्णेजपो राज्ये मत्तस्तम्बेरमो वने ॥

प्रजने सर्तेरप् समुदोरजःपशुष्विति । धर्मोपाधिर्यथा—

समजस्त्याद्गवां गोभिरुक्ष्णामुदज उक्षभिः । भवत्यवसरे यस्यास्सैषा मे गोमतल्लिका ॥

मन्यकर्मण्यनादरे, विभाषा प्राणिषु, षष्ठी चानादराधिके भावलक्षणे इति । प्रकीर्णोपाधिर्यथा—

मन्यते न तृणायापि त्वां नावं पश्यतो हरः । मिषत्सु लोकपालेषु हविः पिबति सोऽध्वरे ॥

तिङ्कृत्तद्धिताभिधेयप्रत्ययार्थः प्रधानः । स त्रिधा— स्वार्थस्सम्बन्धी कारकश्च । तेषु प्रकृत्यर्थ एव स्वार्थः । स त्रिधा— धात्वर्थः प्रातिपदिकार्थश्शेषश्च । तत्र धात्वर्थस्त्रिधा । भावः क्रिया कारकश्च । तेषु भावो द्विधा—सत्त्वभूतोऽसत्त्वभूतश्च । तयोर्लिङ्गसङ्ख्यायोगी सत्त्वभूतः यथा—

अवचनं वचनं प्रियसन्निधावनवलोकनमेव विलोकनम् ।
अवयवावरणं च यदंशुकव्यतिकरेण तदङ्गसमर्पणम् ॥

अलिङ्गसङ्ख्योऽसत्त्वभूतो यथा—

अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय ।
कालोह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥

क्रिया द्विधा शुद्धा सङ्कीर्णा च । तयोः कारकासंपृक्ता शुद्धा यथा–

पल्लवोपमितिसाम्यसपक्षं दष्टवत्यधरबिम्बमभीष्टे ।
पर्यकूजि सरुजेव तरुण्यास्तारलोलवलयेन करेण ॥

कर्तृत्वापन्नसाध्यरूपा सङ्कीर्णा यथा–

कुचद्वन्द्वे तन्वि द्विपकलभकुम्भस्थलतुलां दधानेऽस्मिन्कस्या न युवतिषु चित्तस्य रुजति ।
तवोर्वोर्युग्मे वा हृतरुचिरचामीकररुचौ विकर्षत्यूष्माणं कमिह न युवानं ज्वरयति ॥

कारकं द्विधा, नियतधातुविषयमनियतधातुविषयश्च । तयोर्नियतधातुविषयं यथा–

तुषारलेशाकुलितोत्पलाभे पर्यश्रुणी मङ्गलभङ्गभीरुः ।
अगूढभावापि विलोकने सा न लोचने मीलयितुं विषेहे ॥

अनियतधातुविषयं यथा–

अभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकृतोदयम् ।
विनयवारितवृत्तिरितस्तया न विवृतो मदनो न च संहृतः ॥

प्रातिपदिकार्थस्त्रिधा, व्यक्तोऽव्यक्तस्संदिग्धश्च । तेषु प्रत्ययोत्पादानुत्पादयोरविशिष्टो व्यक्तः । स द्विधा— तल्लिङ्गोऽन्यलिङ्गश्च । तयोस्तल्लिङ्गो यथा— मन एव मानसम्, बन्धुरेव बान्धवः, यव एव यावक इति । अन्यलिङ्गो यथा— उपाय एव औपयिकम्, देव एव देवताः, देवतैव दैवतमिति । अव्यक्तो द्विधा, उज्झितस्वरूपोऽनुज्झितस्वरूपश्च । तत्रोज्झितस्वरूपो यथा– वेश्शालच्छङ्कटचौ, संप्रोदश्च कटच्, उपाधिभ्यां त्यकन्नासन्नारूढयोरिति । यथा, विशालं, विशङ्कटं, प्रकटं, विकटं, उपत्यका, अधित्यकेति । अत्रोपसर्गैरसङ्ख्यत्वादिस्वरूपमुज्झितम् । अनुज्झितस्वरूपो यथा–वत्सोक्षाश्वर्षभेभ्यस्तनुत्वे, कासूगोणीभ्यां ष्टरच्, किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे । विनञ्भ्यां नानाञौ न सह । यथा–वत्सतरः, उक्षतरः, नितरां, अतीवतरां, विना, नानेति । उपचरितार्थवृत्तिः संदिग्धः । स द्विधा— सङ्ख्यावानसङ्ख्यश्च । तयोस्तिङन्तार्थो यथा— पचतितरां, पचतकीति । सुबन्तार्थो यथा— त्वयका, उच्चकैरिति । प्रत्ययार्थो द्विधा, कृदर्थस्तद्धितार्थश्च । तयोः कृदर्थो यथा—न्यावक्रोशी, सांराविणमिति । तद्धितार्थो यथा— आभिजित्यः, कौञ्जायन्य इति । समासार्थो द्विधा, समास्यनिमित्तं, समासनिमित्तश्च । तत्र यमाश्रित्य तद्धितार्थ इति समासो भवति । समास्यनिमित्तं यथा—द्वैमातुरः पञ्चकपाल इति । सम्बन्धी यस्य तु समासान्त इति समासो निमित्तं स समासनिमित्तः यथा–देवराजः प्रत्युरसमिति । सम्बन्धी त्रिधा, क्रिया द्रव्यं गुणश्च । तेषु क्रिया त्रिधा, क्रियासम्बन्धिनी कारकसम्बन्धिनी उभयसम्बन्धिनी च । तासु क्रियासम्बन्धिनी द्विधा,

भिन्नरूपाऽभिन्नरूपा च। तयोर्भिन्नरूपा यथा–कर्तुमिच्छति चिकीर्षति, जुगुप्सितुमिच्छति जुगुप्सिषत इति । अभिन्नरूपा यथा— अत्यर्थं पापच्यते, पुनः पुनः पठति पापठ्यत इति । कारकसम्बन्धिन्यपि द्विधा, साकांक्षा निराकांक्षा च । साकांक्षा यथा— पटमिवाचरति पटीयति कम्बलम्, प्रासादमिवाचरति प्रासादीयति कुटीम् । निराकांक्षा यथा— पुत्रमिच्छति पुत्रीयति, पुच्छमुदस्यत्युत्पुच्छयत इति । उभयसम्बन्धिनी द्विधा, क्रियाकारकसम्बन्धिनी कारकक्रियासम्बन्धिनी च । तयोः प्रथमा यथा— पचन्तं प्रयुङ्क्ते पाचयति देवदत्तः, अधीयानं प्रयुङ्क्ते अध्यापयति कारीषोऽग्निः । द्वितीया यथा— कंसवधमाचष्टे कंसं घातयति, आरात्रिविवासमाचष्टे रात्रिं विवासयति । द्रव्यमपि त्रिधा, विशेष्यं विशेषणं व्यवहितञ्च । तेषु विशेष्यं द्विधा, सापेक्षमनपेक्षञ्च । सापेक्षं यथा— युष्माकमयं यौष्माको गौः, वत्सेभ्यो हितो वत्सीयो गोधुक् । अनपेक्षं यथा — वसिष्ठस्यापत्यं वासिष्ठः, पृथिव्या ईश्वरः पार्थिवः । विशेषणं द्विधा, धर्मिनिष्ठं धर्मनिष्ठं च । धर्मिनिष्ठं यथा—गावोऽस्य सन्तीति गोमान्, प्रासादोऽस्य स्यात्प्रासादीयं दारु । धर्मनिष्ठं यथा— अस्तीति मतिरस्यास्तिकः, नास्तीति मतिरस्य नास्तिक इति । व्यवहितं द्विधा, विशेष्यरूपं विशेषणरूपं च । विशेष्यरूपं यथा— द्विमयमुदश्विन्यवानां द्विमया यवाः उदश्वितः । विशेषणरूपं यथा- पञ्चमो मासोऽस्य जातस्य पञ्चमी बालकः, षष्ठं रूपग्रन्थग्रहणमस्य षट्को बटुः । गुणोऽपि त्रिधा, आश्रितः प्रवृत्तिनिमित्तमुपाधिश्च । तेष्वाश्रितो द्विधा, अभिन्नरूपो भिन्नरूपश्च । तयोरभिन्नरूपो यथा— भिक्षाणां समूहो भैक्षम्, काकोलूकस्य वैरं काकोलूकिका । भिन्नरूपो यथा— ऋत्विजां कर्मार्त्विज्यं, पीलूनां पाकः पीलुकण इति । प्रवृत्तिनिमित्तं द्विधा, अनुरञ्जकमननुरञ्जकं च । तत्रानुरञ्जकं जात्यादि यथा— ब्राह्मणस्य भावः ब्राह्मण्यं, ऋजोर्भावः आर्जवमिति । अननुरञ्जकं संबन्धादि, यथा— दण्डिनो भावो दण्डित्वम्, पाचकस्य भावः पाचकतेति । प्रकृत्यर्थप्रत्ययार्थयोर्विशेषणमुपाधिः । स द्विधा, व्यस्तस्समस्तश्च । व्यस्तः प्रकृत्यर्थे यथा— शिवो देवताऽस्येति शैवं, लवणं पण्यमस्येति लावणिकः । प्रत्ययार्थे यथा- गार्गिकया श्लाघते, काठिकयाऽधिक्षिपति । अत्र देवतापण्यश्लाघाधिक्षेपा उपाधयः । समस्तो यथा–दण्डाः प्रहरणमस्यां क्रीडायां दाण्डा । अत्र दण्डशब्दात् तदस्यामित्यधिकरणे प्रत्ययो विहितो दण्डस्थं प्रहरणत्वं, अधिकरणत्वं च क्रीडात्वं प्रत्याययति । एवं ह्योगोदोहस्य विकारो हैयङ्गवीनं नवनीतम् । अत्र ह्योगोशब्दाद्विकारे प्रत्ययो विहितः, प्रकृत्यर्थोपाधि दोहं प्रत्ययार्थोपाधि च संज्ञां प्रत्याययतीति ।

कारकं त्रिधा, सक्रियं भिन्नक्रियमभिन्नक्रियं च । तेषु सक्रियं त्रिधा, कर्तृरूपं कर्मरूपमनुस्यूतञ्च । कर्तृरूपं द्विधा, क्रियाविशेषस्थं कारकविशेषस्थं च । तयोः क्रियाविशेषस्थं यथा— सुस्नातं पृच्छति सौस्नातिकः, एवं सौखशायनिकः, प्रभूतमाह प्राभूतिकः, एवं माशब्दिकः, प्रतीपं वर्तते प्रातीपिकः, प्रतिकूलं चरति प्रातिकूलिक इति । कारकविशेषस्थं यथा— व्याकरणं

वेत्त्यधीते वा वैयाकरणः, समां समां विजायते समांसमीना, अक्षैर्दीव्यत्याक्षिकः, संतापाय प्रभवति सान्तापिकः, पितुरागतं पित्र्यं, समानोदरे शयितः सोदर्य इति । कर्मरूपं द्विधा, सजातीयस्थमसजातीयस्थं च । सजातीयस्थं यथा— अयनं नेयः आयानयीनः शारः, मासं भृतो मासिको भृत्यः, वर्षमधीष्टो वार्षिक उपाध्यायः, पक्षं लक्ष्यः पाक्षिको निबन्धः, षण्मासं क्रीतः षाण्मासिको दासः, संवत्सरं कृतस्सांवत्सरिकोऽभ्यास इति । असजातीयस्थं यथा— वामदेवेन दृष्टं वामदेव्यं साम, लाक्षया रक्तं वस्त्रं लाक्षिकं, देवाय देयं दैव्यं हविः, तन्त्रादचिरापहृतः तान्त्रकः पटः, द्वारे नियुक्तो दौवारिकः पुमान्, चतुर्दश्यां दृश्यते चातुर्दश्यं रक्ष इति । अर्थान्तरानुबन्धनमनुस्यूतम् । तद्द्विधा, क्रियानुस्यूतं कारकानुस्यूतं च । तयोः क्रियानुस्यूतं यथा— सीतान्वेषणमधिकृत्य कृतो ग्रन्थः सीतान्वेषणीयः, एवं किरातार्जुनीयः, वाक्यपदीयः, पौषी पौर्णमासी अस्मिन्मासे भवति पौषः, एवमाग्रहायणिकः आश्वत्थिक इति । कारकानुस्यूतं यथा— तित्तिरिणा प्रोक्तं वेदं विदन्त्यधीयते वा तैत्तिरीयाश्छात्राः, एवं वारतन्तवीयाः, एगलेयिनः, ऐतरेयिणः, तथा पाराशरिणो भिक्षवः, शैलालिनो नटाः ।

भिन्नक्रियं त्रिधा, लक्षितक्रियमपेक्षितक्रियमनुमतक्रियं च । तेषु लक्षितक्रियं द्विधा, कर्तृस्थं कर्मस्थं च । तयोः कर्तृस्थं यथा— मुद्गा भवन्त्यस्मिन्मौद्गीनं क्षेत्रम्, दण्डिनः सन्त्यस्यां दण्डिमती शाला । कर्मस्थं यथा— श्राद्धमनेन भुक्तं श्राद्धिकः, अग्रभोजनमस्मै दीयते आग्रभोजनिकः, पदमस्मिन् दृश्यं पद्यः कर्दम इति । अपेक्षितक्रियं द्विधा, व्यवहितमव्यवहितं च । तयोर्व्यवहितं यथा— ग्रामादागच्छति, ब्राह्मणाय ददाति, पर्यङ्के शेत इति । अव्यवहितं यथा— कटं करोति, दात्रेण लुनाति, देवदत्तेनास्यत इति । अनुषक्तक्रियं द्विधा, तुल्याधिकरणमतुल्याधिकरणं च । तयोस्तुल्याधिकरणं यथा— शुक्लीभवति, उन्मनीस्यात्, भस्मसात्संपद्यत इति। अतुल्याधिकरणं यथा— पटपटाकरोति, देवत्रागच्छति, मनुष्यत्रावसतीति । अभिन्नक्रियं त्रिधा, तिङभिधेयं कृदभिधेयं तद्धिताभिधेयं च । तत्र तिङभिधेयं द्विधा— कर्तृरूपं कर्मरूपं च । तयोः कर्तृरूपं यथा— पचति देवदत्तः, दुग्धे गौः, चोरस्य रुजति रोग इति । कर्मरूपं यथा— पच्यते ओदनः, भिद्यते कुसूलः, उष्ट्रासिका आस्यन्त इति । कृदभिधेयं द्विधा, विशेष्यं विशेषणं च । तयोर्विशेष्यं यथा— दात्रं, प्रासादः, कुम्भकार इति । विशेषणं यथा— कर्तव्यं, पाचकः, सुबोधमिति । तद्धिताभिधेयं द्विधा— सापेक्षक्रियमनपेक्षितक्रियं च । तयोस्सापेक्षक्रियं यथा— इष्टी यज्ञे, परिगणिती याज्ञिक्ये, आम्नाती छन्दसि, अधीती व्याकरणे, कृतपूर्वी कटमिति । अनपेक्षक्रियं यथा— पाकेन निर्वृत्तं पाकिमं, सेकेन निर्वृत्तं सेकिमं, कुट्टेन कुट्टिमं, करणेन कृत्रिमं, श्येनपाकोऽस्यां तिलपाकोऽस्यां क्रियायां श्येनंपाता तैलंपातेति । प्रकृतिप्रत्ययोभयद्वारकं पदार्थविशेषणमुपस्कारार्थः । स त्रिधा, प्रकृतिद्वारकः, प्रत्ययद्वारकः, उभयद्वारकश्च । तेषु प्रकृतिद्वारकः षोढा, लोपागमसवर्णविकारादेशप्रत्यापत्त्युपपदोपस्कारभेदात् । तेषु रज्जेर्णौ

मृगरमणेन लोप इत्यादिलोप इत्यादि । लोपोपस्कारार्थः यथा—

धृतहेतिरप्यधृतजिह्मगतिश्चरितैर्मुनीनधरयन् गुरुभिः ।
रजयाञ्चकार विरजः स मृगान् किमिवेशते रमयितुं न गुणाः ॥

अश्ववृषयोर्मैथुनेच्छायामित्यादिरागमोपस्कारार्थः यथा—

अनेकयुगजीविन्यास्त्रेता यस्यास्त्रयोदृशी । सा क्षीरकण्टकं वत्सं वृषस्यन्ती न लज्जिता ॥

वेश्च स्वनो भोजने मूर्धन्य इत्यादिवर्णविकारोपस्कारार्थः यथा—

ग्लानिच्छेदिक्षुत्प्रबोधाय पीत्वा रक्तं रिष्टं झावितार्जीर्णशेषः ।
स्वादुङ्कारं मांसखण्डोपदंशं क्रोष्टा डिम्भं व्यष्वणद्व्यस्वनच्च ॥

मातुर्मातच्पुत्रे श्लाघ्य इत्यादिरादेशोपस्कारार्थः यथा—

गौरी मा तस्य तस्यैताः कार्तिकेयस्य कीर्तयः ।
कीर्तितासु न कीर्त्यन्ते यासु कस्यापि कीर्तयः ॥

आख्यानात्कृतस्तदाचष्टे, कृल्लुक्प्रकृतिप्रत्यापत्तिः, प्रकृतिवच्च कारकमित्यादिप्रत्यया-पत्त्युपस्कारार्थः, यथा—

शैलैर्बन्धयति स्म वानरहृतैर्वाल्मीकिरम्भोनिधिम् ।
व्यासः पार्थशरैस्तथापि न तयोरत्युक्ति रुद्भाव्यते ॥

इति । अपादाने परीप्सायां णमुलित्यादौ स्यादिरुपपदोपस्कारार्थः, यथा—

किञ्चिच्छेषनिशातुषारमधुरस्पर्शे गृहप्राङ्गणे
शय्योत्थायमिह व्रजन्ति हलिनां बालाः कुकूलानलम् ॥ इति ॥

प्रत्ययद्वारकोऽपि षोढा, लोपागमवर्णविकारविकरणादेशोपग्रहभेदात् । तेषु लोपार्थः फलकुसुमयोर्लुक् । यथा—

वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः ॥

आगमार्थः यथा— हृपेर्लोमसु । आननैर्विचकसे, वल्लभानभितनूभिरभावि । वर्णविकारार्थः दिवो विजिगीषायां निष्ठानत्वम् । यथा—

आद्यूनस्सन् गृहिण्येव प्रायो यष्ट्यावलम्बितः ॥

विकरणार्थः श्लिषः प्राण्यङ्गनेकसः । यथा– 'आश्लिक्षद्द्वयचपलेक्षणा नवोढा भर्तारं विपदि न दूषितातिभूतिः ।' आदेशार्थं आशिषि तुह्योस्तातङ् । यथा—

भवताद्भवतो मतिश्शुभा जयताज्जीव भवावनीश्वर ।

उपग्रहार्थः अधेः प्रसहने कृते आत्मनेपदम् । यथा—

भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ॥ इति ॥

उभयद्वारकं तु द्वादशधा, अवधिसंबोधनक्रियाविशेषणकारकविशेषणशेषपरिशेषसहार्थतादर्थ्यहेतुलक्षणोपपदप्रकीर्णभेदात् । तत्र क्रियादीनां मिथो मर्यादावधिः । स पूर्वकालव्यतिहारपरापरयोगकालाध्वादिभेदादनेकप्रकारः । तेषु पूर्वकालो यथा—

कृतोर्मिलेखं शिथिलत्वमायता शनैश्शनैश्शान्तरयेण वारिणा ।
निरीक्ष्य रेमे स समुद्रयोषितां तरङ्गितक्षौमविपाण्डुसैकतम् ॥

व्यतिहारो यथा—

स्तनोपपीडं परिरभ्य चुम्बतोः प्रजल्पतोरप्यनवस्थितं मुहुः ।
स्रजश्च यूनोरपमित्य याचतोरनिद्रयोरेव जगाम शर्वरी ॥

परयोगो यथा—

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान् ।
हंसद्वारं भृगुपतियशोवर्त्मयत्क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभि-
श्यामं पादो बलिविमथनाभ्युत्थितस्येव विष्णोः ॥

अपरयोगो यथा—

अप्राप्य पर्वतमिमानि पुरोविलीननीरन्ध्रलोध्रवकुलानि वनस्थलानि ।
आसेदुषस्तव हरिष्यति येष्वघौघमध्वक्लमं च सुरसिन्धुतरङ्गवातः ॥

कालयोगो यथा—

एवमिन्द्रियसुखस्य वर्त्मनस्सेवनादनुगृहीतमन्मथः ।
शैलराजभवने सहोमया मासमेकमवसद्वृषध्वजः ॥

अध्वयोगो यथा—

....नशतं ।
सदा पान्थः पूषा गगनपरिमाणं गणयति ।

इति प्रायोभावास्स्फुरदुपधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥

सिद्धस्य क्रियार्थमभिमुखीकरणं सम्बोधनम् । तत्षोढा, नियोगनिषेधानुमत्युपालम्भप्रश्नाख्यानार्थभेदात् । तेषु नियोगार्थं यथा—

आज्ञापय ज्ञातविशेषपुंसां लोकेषु यत्ते करणीयमस्ति ।
अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितुमाज्ञया ते ॥

निषेधार्थं यथा—

आर्द्रकेसरसुगन्धि ते मुखं मत्तमत्तनयनं स्वभावतः ।
अत्र लब्धवसतिर्गुणान्तरं किं विलासिनि मदः करिष्यति ॥

अनुमत्यर्थं यथा—

सर्वं सखे त्वय्युपपन्नमेतदुभे ममास्त्रे कुलिशं भवांश्च ।
पूर्वं तयोर्वीर्यमहत्सु कुण्ठं त्वं सर्वतोगामि च साधकञ्च ॥

उपालम्भार्थं यथा—

अवस्तुनिर्बन्धपरे कथं नु ते करोऽयमामुक्तविवाहकौतुकः ।
करेण शम्भोर्वलयीकृताहिना सहिष्यते तत्प्रथमापराधम् ॥

प्रश्नार्थं यथा—

का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते ।
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ॥

आख्यानार्थं यथा—

नूनमुन्नमति यज्वनां पतिश्शार्वरस्य तमसो निषिद्धये ।
पुण्डरीकमुखि दिङ्मुखं यतः कैतकैरिव रजोभिराहतम् ॥

प्रकृतिप्रत्ययसमुदायस्य प्रकृत्यर्थभागमुखेन भेदकं क्रियाविशेषणं, भावोत्पन्नेऽपि हि प्रत्यये कदाचित्समुदायः प्रत्ययमुखेन विशेष्यते, तीव्रः पाकः, तीव्रं पाक इति । नामरूपमव्ययरूपं कृद्रूपं तद्धितरूपं समासरूपमुपसर्गादिरूपमिति । तेषु नामरूपं यथा—

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालास्सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥

अव्ययरूपं यथा —

प्रशान्तधर्माभिभवश्शनैर्विवान् विलासिनीभ्यः परिमृष्टपङ्कजः ।
ददौ भुजालम्बमिवात्तशीकरस्तरङ्गमालान्तरगोचरोऽनिलः ॥

कृद्रूपं यथा—

शय्यन्ते हतशायिकाः पथि तरुच्छायानिषण्णाध्वगैः
श्रीकण्ठायतनेषु धार्मिकजनैरास्यन्त उष्ट्रासिकाः ।
शून्ये तत्र निकुञ्जशाखिनि सखि ग्रीष्मस्य मध्यन्दिने
सज्जानां दयिताभिसारणविधौ रम्यः क्षणो वर्तते ॥

तद्धितरूपं यथा—

शतं वारानुक्तः प्रियसखि वचोभिस्सुपरुषैरसहस्रं निर्धूतः पदनिपतितः पार्ष्णिहतिभिः ।
कियत्कृत्वो बद्धाःपुनरपि न वेद्मि कुटयस्तथाऽपि क्लिश्नन्मां क्षणमपि न धृष्टो विरमति॥

समासरूपं यथा—

इति प्रविश्याभिहिता द्विजन्मना मनोगतं सा न शशाक शंसितुम् ।
अथो वयस्यां परिपार्श्ववर्तिनीं विवर्तितानञ्जननेत्रमैक्षत ॥

उपसर्गादिरूपं यथा—

प्रसीद विश्राम्यतु वीर वज्रं शरैर्मदीयैः कतमस्तवारिः ।
बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ॥

कर्त्रादीनां स्वेभ्यः परे कारकविशेषणम् । तदपि षोढा, कर्तृविशेषणं कर्मविशेषणं करणविशेषणं संप्रदानविशेषणमपादानविशेषणमधिकरणविशेषणमिति । तेषु कर्तृविशेषणं यथा—

सा मङ्गलस्नानविशुद्धगात्री गृहीतवत्युद्गमनीयवस्त्रम् ।
निवृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे ॥

कर्मविशेषणं यथा—

अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती ॥

करणविशेषणं यथा—

मुखेन सा पद्मसुगन्धिना निशि प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसम्पदां सरोजसन्तानमिवाकरोदपाम् ॥

संप्रदानविशेषणं यथा—

तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व ।
योषित्सु तद्वीर्यनिषेकभूमिस्सैव क्षमेत्यात्मभुवोपदिष्टम् ॥

अपादानविशेषणं यथा—

विसृष्टरागादधरान्निवर्तितस्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशांकुरादानपरिक्षतांगुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥

अधिकरणविशेषणं यथा—

सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे ।
निवेशयामास मधुर्द्विरेफान् नामाक्षराणीव मनोभवस्य ॥

अनुप्रयोगार्थश्शेषः । स षोढा, लिङनुप्रयोगार्थः, लोडनुप्रयोगार्थः, कृदनुप्रयोगार्थः, यथाविध्यनुप्रयोगार्थः, अधिकानुप्रयोगार्थः, द्विर्वचनानुप्रयोगार्थ इति । लिङनुप्रयोगार्थो यथा—

न लङ्घयामास महाजनानां शिरांसि नैवोद्धतिमाजगाम ।
अचेष्टताष्टापदभूमिरेणुःखुराहतो यत्सदृशं गरिम्णः ॥

लोडनुप्रयोगार्थो यथा—

पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः ।
निगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः ॥

कृदनुप्रयोगार्थो यथा—

सलीलमासक्तलतान्तभूषणं समासजन्त्या कुसुमावतंसकम् ।
स्तनोपपीडं नुनुदे नितम्बिना घनेन कश्चिज्जघनेन काचन ॥

यथाविध्यनुप्रयोगार्थो यथा—

स ते प्रियश्चेत्सुभगोपरोधैर्विचिन्तितैरस्य फलं न किञ्चित् ।
प्रियापराधो हि विचिन्त्यमानस्समूलकाषं कषतीव चेतः ॥

तद्धितानुप्रयोगार्थो यथा—

परिक्षते वक्षसि दन्तिदन्तैः प्रियाङ्कशीता नभसः पतन्ती ।
नेह प्रमोहं प्रियसाहसानां मन्दारमाला विरलीकरोति ॥

द्विर्वचनानुप्रयोगार्थो यथा—

वदत वदत सत्यं रूपमीदृक्कदाचिद्यदि पुनरपरासां दृष्टपूर्वं मुखादि ।
जगति जितसमस्तारातिवर्गे .... मिव न दृष्टं मत्प्रसादाद्भवद्भिः ॥

चादिनिपातद्योत्यः समुच्चयादिः पदार्थधर्मः परिशेषः । सोऽनन्तप्रकारोऽपि षड्विधः इहोदाह्रियते । समुच्चयः, विकल्पः, उपमा, नियोगः, विनिग्रहः, प्रतिषेधः । तेषु समुच्चयो यथा—

इतो गमिष्याम्यथवेति वादिनी चचाल सा च स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितस्समाललम्बे वृषराजकेतनः ॥

विकल्पो यथा—

विभूषणोद्भासि पिनद्धभोगिवा गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्तेरवधार्यते वपुः ॥

उपमा यथा—

हस्तेन हस्तं परिगृह्य वध्वास्सरोजसूनुस्सुतरां बभासे ।
अनन्तराशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन ॥

नियोगो यथा—

रूपं तदोजस्वि तदेववीर्यं तदेव नैसर्गिकमुन्नतत्वम् ।
न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ॥

विनिग्रहो यथा—

त्वमहनीव निबर्हय मानिनीः विरहिणः कु . . . ति ।
इति निवेशयति स्म कलापिना मनुगिरं नु गिरं जलदागमः ॥

निषेधो यथा—

न प्रसादमुचितं गमिता द्यौः नोद्धृतं तिमिरमद्रिवरेभ्यः ।
दिङ्मुखेषु न च धाम विकीर्णं भूषिता च रजनी हिमभासा ॥

यद्युत्पत्तौ सहकारिलाभः तदा सहार्थस्त्रिधा, अभिधीयमानः, प्रतीयमानो व्यवधीयमानश्च । तेष्वभिधीयमानो द्विधा, सहेन पर्यायेण च । तयोराद्यो यथा—

अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन्मनसो रुचिस्ते ।
शिप्रातरङ्गानिलकम्पितासु विहर्तुमुद्यानपरम्परासु ॥

द्वितीयो यथा—

अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु ।
द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः ॥

प्रतीयमानोऽपि द्विधा, विभक्तितो निपाताच्च । तयोराद्यो यथा—

स पौरकार्याणि विचिन्त्य काले रेमे विदेहाधिपतेर्दुहित्रा ।
उपस्थितं चारु वपुस्तदीयं कृत्वोपभोगोत्सुकयेव लक्ष्म्या ॥

द्वितीयो यथा—

तमन्वगच्छत्प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च साक्षात् ।
जयेति वाचा महिमानमस्य संवर्धयन्तौ हविषेव वह्निम् ॥

व्यवधीयमानोऽपि द्विधा, वीप्सया भागेन च, 'सहकृता एव हि क्रियागुणद्रव्यैः प्रयोक्त्रा युगपद्व्याप्तुमिष्यन्ते, सहकृता एव च विभज्यन्ते । अर्थशब्दस्तु निवृत्तिवचनोऽपि विद्यते, यथा मशकार्थो धूम इति । तत्र वीप्सया यथा—

सुगन्धिनिश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम् ।
प्रतिक्षणं सम्भ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती ॥

भागेन यथा—

अलंकृताप्यन्वयरूपभूषणैर्न शोभते मां प्रति तावदङ्गना ।
बिभर्ति यावत्प्रमदासमागमे न शूरभार्यादृतगर्वितं शिरः ॥

कार्यस्य कार्यिणो वा कारणं प्रति प्रयोजकत्वं तादर्थ्यम् । तत्षोढा, क्रियातादर्थ्यं, द्रव्यतादर्थ्यं, क्रियाद्रव्यतादर्थ्यं, द्रव्यक्रियातादर्थ्यं, प्रकृतिविकारतादर्थ्यं, क्रियाकारकतादर्थ्यमिति । तत्र क्रियातादर्थ्यं यथा —

पुनर्ग्रहीतुं नियमस्थया तया द्वयेषु निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च ॥

द्रव्यतादर्थ्यं यथा—

प्रसन्नदिक्पांसुविविक्तवातं शङ्खस्वनानन्तरपुष्पवृष्टि ।
शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव ॥

क्रियाद्रव्यतादर्थ्यं यथा—

तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव ।
शरत्प्रविष्टाम्बुभरोपरोधश्शशीव पर्याप्तकलो नलिन्याः ॥

द्रव्यक्रियातादर्थ्यं यथा—

अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं प्रसारयेत्पन्नगरत्नसूचये ॥

प्रकृतिविकारतादर्थ्यं यथा—

वन्यं फलं चार्तवमाहरन्त्यो बीजं च बालेयमकृष्टरोहि ।
विनोदयिष्यन्ति नवाभिषङ्गामुदारवाचो मुनिकन्यकास्त्वाम् ॥

क्रियाकारकतादर्थ्यं यथा—

गेहाद्याता सरितमुदकं हारिकानाजिगीषे
मङ्क्ष्यामीति श्रयसि यमुनातीरवीरुद्गृहाणि ।
गोसन्दायी विशसि विपिनान्येव गोवर्धनाद्रेः
किं त्वं राधे दृशि निपतिता देवकीनन्दनस्य ॥

हेतुविशेषेषु प्रयोजकः कारकश्च कारक एव, अकारकस्तु प्रपञ्च्यते । तत्र कार्यप्रसवयोग्यः कारकस्तु षोढा, लिङ्गादिवाच्यः, सद्वाच्यः, निपातादिवाच्यः, तृतीयावाच्यः, पञ्चमीवाच्यः, प्रथमादिवाच्य इति । तेषु लिङ्गादिवाच्यो यथा—

पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्यात् विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य ॥

सद्वाच्यो यथा—

सा संभवद्भिः कुसुमैर्लतेव ज्योतिर्भिरुद्यद्भिरिव त्रियामा ।
सरिद्विहङ्गैरिव लीयमानैरमुच्यमानाभरणा चकाशे ॥

निपातादिवाच्यो यथा—

नैसर्गिकी .... ।
इतीव जङ्घायुगलं तदीयं चक्रे तुलाकोट्यधिरोहणानि ॥

तृतीयावाच्यो यथा—

तया दुहित्रा सुतरां सवित्री स्फुरत्प्रभामण्डलया चकाशे ।
विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव ॥

पञ्चमीवाच्यो यथा—

अतोऽत्र किञ्चिद्भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥

प्रथमादिवाच्यो यथा—

उद्वेजयत्यङ्गुलिपार्ष्णिभागान्मार्गे शिलीभूतहिमेऽपि यत्र ।
न दुर्वहश्रोणिपयोधरार्ताः छिन्दन्ति मन्दां गतिमश्वमुख्यः ॥

हेतुरेव ज्ञापको लक्षणं; तत्षोढा, द्रव्यलक्षणं, इत्थंभूतलक्षणं, विकारलक्षणं, उत्पातलक्षणं, भावलक्षणं, क्रियालक्षणमिति । तेषु द्रव्यलक्षणं यथा—

तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।
प्रवालशोभा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ॥

इत्थंभूतलक्षणं यथा—

कलक्वणितगर्भेण चञ्चुना चङ्क्रमोद्यतः ।
पारावतः परिक्रम्य रिरंसुश्चुम्बति प्रियाम् ॥

विकारलक्षणं यथा—

स बालभावाद्वपुषा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ।
युवा कराक्रान्तमहीभृदुच्चकैरसंशयं संप्रति तेजसा रविः ॥

उत्पातलक्षणं यथा

गोनासाय नियोजितागदरजास्सर्पाय बद्धौषधिः
कण्ठस्थाय विषाय वीर्यमहतः पाणौ मणीन्बिभ्रती ।
भर्तुर्भूतगणाय गोत्रजरतोनिर्दिष्टमन्त्राक्षरा
रक्षत्वद्रिसुता विवाहसमये प्रीता च भीता च या ॥

भावलक्षणं यथा—

तथागतायां परिहासपूर्वं सख्या सखी वेत्रभृता बभाषे ।
आर्ये व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ॥

क्रियालक्षणं यथा—

बध्नन्नङ्गेषु रोमाञ्चं कुर्वन्मनसि निर्वृतिम् । नेत्रे चामीलयन्नेष प्रियास्पर्शः प्रवर्तते ॥

उपपदं षोढा, क्रियारूपं, नामरूपं, नामार्थरूपं, प्रत्ययरूपं, निपातरूपं, कर्मप्रवचनीयरूपमिति । तेषु क्रियारूपं यथा—

भवत्सम्भावनोत्थाय परितोषाय मूर्च्छते । अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे ॥

नामरूपं यथा—

सुखैस्तेभ्यो विभावर्यस्तेभ्यो हितमहस्सदा । येषामकृत्रिमप्रेमा प्रिया पार्श्वं न मुञ्चति ॥

नामार्थरूपं यथा—

हुतहुताशनदीप्तिवनश्रियः प्रतिनिधिः कनकाभरणस्य यत् ।
युवतयः कुसुमं दधुराहितं तदलके दलकेसरपेशलम् ॥

प्रत्ययरूपं यथा—

नृपसुतमभितस्समन्मथायाः परिजनगात्रतिरोहिताङ्गयष्टेः ।
स्फुटमभिलषितं बभूव वध्वा वदति हि संवृतिरेव कामितानि ॥

निपातरूपं यथा—

यो हि दीर्घासिताक्षस्य विलासवलितभ्रुवः । कान्तामुखस्यावशगस्तस्मै नृपशवे नमः ॥

कर्मप्रवचनीयरूपं यथा—

आलोचनान्ताच्छ्रवणे वितृत्य पीतं गुरोस्तद्वचनं भवान्या ।
निदाघकालोल्बणतापयेव माहेन्द्रमम्भः प्रथमं पृथिव्या ॥

शब्दान्तरसाहचर्यविरोधलिङ्गस्वराभिनयादयः प्रकीर्णम् । तत्र साहचर्यं यथा—

भवतु समदना रतये तिलकवती चारुचम्पकच्छाया ।
घनचन्दनधवलकुचाक्रान्ता तव विद्विषामटवी ॥

साहचर्यं यथा—

लक्ष्मणानुगतो रामस्त्यागीराम इवापरः ।
कौसल्येव बिभर्ति द्यौरभिषेकोज्ज्वलां श्रियम् ॥

विरोधो यथा—

हरिबाणाविमौ रोषादुभावपि धृतायुधौ । प्रहर्तुमुद्यतौ वीरौ रणे रामार्जुनाविव ॥

लिङ्गं यथा—

आप्याययति मित्रोऽयमस्य मित्रं पयोनिधिः ।
सोऽप्यमित्रश्शशी जातस्तदमैत्र्याद्य मे सखि ॥

स्वरो यथा—

यदि मे वल्लभा दूती तदाहमपि वल्लभा । यदि तस्यां प्रिया वाचस्तन्ममापि प्रिय प्रियाः ॥

अभिनयो यथा—

एते वयममी दाराःकन्येयं कुलजीवितम् । ब्रूत येनात्र वः कार्यमनास्था वा ह्यवस्तुषु ॥

प्रातिपदिकार्थस्त्रिधा, स्वार्थो, द्रव्यं, लिङ्गं च । तेषु शब्दात्मैव स्वार्थः । स द्विधा, स्वरूपमनुकार्यश्च । तयोः स्वरूपं द्विधा, सत्त्ववचनार्हमसत्त्ववचनार्हं च । तत्राद्यं यथा—

चूडामणिश्शिरोरत्ने तरलो हारमध्यगे । पर्यङ्कश्शयने प्रोक्त आवेशश्चापि वेश्मनि ॥

द्वितीयं यथा—

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥ इति ॥

अनुकार्यो द्विधा, अर्थवाननर्थश्च । तयोरर्थवान्यथा—

उन्नमय्य सकचग्रहमास्यं चुम्बति प्रियतमे हठवृत्त्या ।
हुंहु मुञ्च ममेति च मन्दं जल्पितं जयति मानवतीनाम् ॥

निरर्थको यथा—

अग्रशालमधिरुह्य नगस्य स्फारकण्ठकुहरोमदमत्तः ।
ह्रस्वदीर्घसविसर्गघुकारान् घोषयत्युषसि पाण्डुकपोतः ॥

उपात्तनिमित्तेनानुपात्तनिमित्तेन वा यत् श्रूयते गम्यते प्रत्यभिधीयते तद्द्रव्यम् । तद्द्विधा, आश्रयरूपमनाश्रयरूपं च । तत्र जात्यादिभिः प्रवृत्तिनिमित्तैर्यदाश्रीयते तदाश्रयरूपम् ; यथा— गौः, अश्वः, शुक्लः, एकः, प्रस्थं, पलं, ऋजुः, पूर्वः, पाचकः, दण्डी, राजपुरुषः, चैत्रः, इति । तद्विपरीतमनाश्रयरूपं निपाताव्ययोपसर्गगतिकर्मप्रवचनीयादीनामर्थः यथा— अहं च त्वं च वृत्रहन्, कस्त्वामूरीकरिष्यति, कस्तं प्रति न यास्यति, स्वयं पर्येतुमिच्छति । लिङ्गं द्विधा, शब्दलिङ्गमर्थलिङ्गञ्च । तयोरियमयमिदमित्यर्थव्यपदेशनिमित्तं शब्दसंस्कारहेतुरय-मित्यर्थव्यपदेशकारणं पुमान् नपुंसकस्य झलच इति . . उपस्कारहेतुरिदमित्यर्थव्यपदेशकारणात् नपुंसकमिति । तदेतच्छुद्धमिश्रादिभेदात् षोढा विप्रथते । शुद्धं, मिश्रं, सङ्कीर्णं, उपसर्जनं,

आविष्टं, अव्यक्तं च । तेष्वेकसंस्कारहेतुश्शुद्धम्; खट्वा, वृक्षः, कुण्डं, स्त्री, पुमान्, नपुंसकमिति । संस्कारद्वयोपग्राहि मिश्रम्, मरीचिः, ऊर्मिः, अर्चिः, छर्दिः, कषायः, कवाटमिति । संस्कारत्रययोगि सङ्कीर्णम्, तटी तटः तटं, शृङ्खला शृङ्खलः शृङ्खलमिति । विशेष्यशब्दनियतविशेषणरूपमुपसर्जनम्, शुक्ला शुक्लः शुक्लं, पट्वी पटुः पट्विति । विशेषणत्वेऽपि नियतशब्दसंस्कारार्हमाविष्टम्, प्रकृतिः, विषयः, प्रधानं, भार्या, दाराः, कलत्रमिति । लिङ्गनिमित्तशब्दसंस्कारानर्हमव्यक्तम्, पञ्च, षट्, कति, उच्चैः । विशेष्यते अवच्छिद्यते द्रव्यं येन तच्छब्दस्यार्थे प्रवृत्तिनिमित्तमर्थधर्मोऽर्थलिङ्गविशेषणं गुणो भाव इति चाख्यातम् । तात्रिधा, गुणः परिमाणं संबन्ध इति । तत्र द्रव्ये स्वाद्युक्ते प्रत्ययजनको गुणो जातिः, गुणस्सङ्ख्या, संस्थानमवस्थानमित्यादि । यथा—गौः, ब्राह्मणः, पटुः, गौरः, एकः, अनेकः, हनूमान्, वासुदेवः, युवा, वृद्धः, ऋजुः, पूर्व इति । अननुरञ्जकमात्राभिधेयमवच्छेदकं परिमाणं तद्दध्वगौरवसङ्ख्यानसङ्घातक्षेत्रादिभेदादनेकधा । यथा—योजनं पर्वतः, फलं सुपर्णः, पुराणः कपर्दकाः, अक्षौहिणी बला, खारी व्रीहयः, निवर्तनं भूमिरिति । कृत्तद्धितसमासप्रातिपदिकविशेषाणामर्थेषु प्रवृत्तिनिमित्तं संबन्धः । स त्रिधा, क्रियासंबन्धो द्रव्यसंबन्धः क्रियाद्रव्यसंबन्धश्च । तत्र क्रियासंबन्धो यथा, पाचक इति । द्रव्यसंबन्धो यथा—दण्डी राजपुरुष इति । क्रियाद्रव्यसंबन्धो यथा—आक्षिकः, निष्कौशाम्बिरिति । यदा पुनः जातिगुणपरिमाणादयश्शब्दाः प्राधान्येनाभिधीयन्ते भावप्रत्ययैर्वा प्रतिपाद्यन्ते तदैतेषां द्रव्यत्वमेव, न लिङ्गत्वम् । भावप्रत्ययो हि जातिगुणाज्जातिगुणे; समासकृत्तद्धितास्तु संबन्धे, डित्थादेः स्वे रूपे, धवखदिराज्जातिसङ्घात इति । अन्ये तु स्वार्थो विशेषणं, द्रव्यं विशेष्यं, लिङ्गं स्त्रीनपुंसकमित्याचक्षते । तच्च निपातगत्युपसर्गकर्मप्रवचनीयादिप्रातिपदिकार्थो इत्यभिधीयते । न हि निपातादिकं प्रवृत्तिनिमित्तमुपादायेदंतदिति व्यपदेशयोग्येषु सत्त्वभूतेष्वर्थेषु वर्तन्ते । अपि तु प्रवृत्तिनिमित्तानुपग्रहेणैवासत्त्वभूतं समुच्चयादिकमर्थमभिनिविशन्ते । तदाह—

तेषामुच्चावचार्थत्वात्सर्वसंबन्धदर्शनात् । अन्यतन्त्रतयोद्भूतेरसत्त्वार्थत्वमुच्यते ॥

अथ किममी वाचका उत द्योतका इति । तत्रैके वर्णयन्ति, 'तत्प्रयोगावसेयत्वाद्वाच्यस्तेषां, यथान्येषां गवादिकः ।' अन्वयव्यतिरेकनिबन्धना हि शब्दानामभिधेयव्यवस्था । ततश्च अनादिप्रयोगादवसीयमानः समुच्चयविचारणादिरर्थात्मा कथममीषां वाच्यो न भवेत्? प्रतीयते चशब्दात्समुच्चयः; अहं च त्वं च वृत्रहन्निति । विचारणा वा शब्दात्, हन्ताहं पृथिवीमिमां निदधानी हवेहवेति । एवमिवादिभ्य उपमानादयो गम्यन्त इति तद्वाच्यास्ते भवन्ति ।

अन्ये त्वाहुः— 'षष्ठ्यभावादस (त्वाच्च समुच्चयविकल्पयोः) ।
(अकामचरि) तैश्चैषां द्योतकत्वं सुनिश्चितम् ॥'

तथाहि। प्लक्षन्यग्रोधयोः समुच्चय इति वाक्यप्रयोगे षष्ठी निर्दिश्यते। नैवम्; प्लक्षन्यग्रोधयश्चेति। यथा च व्रीहियवयोर्विकल्पः प्रवर्ततामिति वाचकशब्दप्रयोगे सत्त्वभूतो विकल्पशब्दार्थः क्रियया संबध्यते, नैवं व्रीहियवयोर्वेति। यथा च वृक्ष इत्येकेनापि वाचकेन शाखादिमानर्थः प्रतीयते, नैवं समुच्चयो विकल्पो वा। यथा च भिक्षां देहि देहि भिक्षामिति वाचकशब्दानां पौर्वापर्यप्रयोगे कामचारः, नैवं वृक्षश्च वृक्ष इति। यथा च वृक्षश्शोभन इति वाचकस्य विशेषणयोगो दृश्यते, नैवं च शोभन इति। तदेवं वाचकशब्दवैधर्म्यात् द्योतकाश्चादय इति निश्चीयते। स्मरति च सूत्रकारश्चादयोऽसत्त्व इति। निरुक्तकारोऽप्याह– भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि चोपसर्गा उच्चावचेष्वर्थेषु पतन्तीति निपाता इति। सचैषामुच्चावचोऽनेकप्रकारोऽर्थः स्वतोऽनवगम्यमानात्मा पदान्तरसंबन्धोपहितप्रकरणाद्यनुविधानेनावसीयते। ततः स्वरूपमात्रेणाप्यर्थानवगतौ इतरप्रयोगापेक्षत्वात् द्योतका एवैते, न वाचका इति। एतत्तु सर्वं सव्यभिचारमिति केचित्। तथाहि। वाचकेनाप्याख्यातेन द्योतितं सत्त्वभूतार्थमपि च वाचकमाख्यातमास्यते भवद्भिरिति वाचकावपि प्रकृतिप्रत्ययौ नैव केवलौ प्रयुज्येते। जुहोतीति वाचकविवर्तिपदं पौर्वापर्यनियमेनावतिष्ठते। राजपुरुष इति वाचकानामपि चोपसर्जनपदानां विशेषणयोगो न दृश्यते। न हि भवति ऋद्धस्य राजपुरुष इति स्मृतेश्चेति यदुच्यते तदप्ययुक्तम्। न हि व्याकरणेऽर्था आदिश्यन्ते, निरुक्तकारो वाचकतां मन्यते न तु द्योतकतां, अतो व्यभिचारदर्शनात् कथमिवैतदुपपन्नं भवति? उच्यते। वाचकत्वादाख्यातप्रयोगे शेषविवक्षायां षष्ठ्यपि दृश्यते; न माषाणामश्नीयादिति। चादिप्रयोगे तु षष्ठी नैव भवति। न च स्वभावस्यासत्त्वरूपता संबन्धेन द्रव्यवत् प्रकाशते। चादयः पुनर्यदत्यन्तमस्वतन्त्रं, यस्य न शक्यते पदान्तरसंबन्धः, दृश्यते रूपमवगन्तुं, तदेवासत्त्वभूतमर्थमात्रमवगमयन्ति। प्रकृतिप्रत्ययाभ्यां च केवलाभ्यामप्यर्थोऽभिधीयते, दधि मधु इयानधुनेति। चादयस्तु नैव केवलाः तमभिदधते। अथैवमुच्यते शब्दान्तराण्येवैतानि दध्यादीनि प्रयोगसमवायीनि . . . . हे प्रकृतिप्रत्ययावपि न स्तः। कथमभिधीयते प्रकृतिप्रत्ययावपि केवलौ नार्थं ब्रूत इति वर्ती पदानां पुनरनियतप्रयोगत्वमपि दृश्यते, आहिताग्निरग्न्याहित इति। न चैवंप्रकारतावादिनां शब्दान्तरमेव वा समासः। वावचनानर्थ्यं च स्वभावसिद्धत्वादिति। यदि वावर्तिनीपदानां उपसर्जनं पूर्वमित्यादिना प्रकृतिप्रत्यययोरपि परश्चेति वचने गत्युपसर्गाणां ते प्राग्धातोरित्यनेन प्रयोगनियमः; प्रयोगनियमानामपि प्रयोगनियमो दृश्यते, तस्माद्व्यभिचार इति। उपसर्जनानामपि च विशेषणयोगो दृश्यते, देवदत्तस्य गुरुकुलमिति। चादीनां तु नैतत्कदाचिदप्यस्ति, व्याकरणे चार्थाः कथं नादिश्यन्त इति। शालीनकौपीने, अधृष्टाकार्ययोः, अगारैकदेशे प्रघणः प्रघाणश्चेति। निरुक्तेऽप्युच्चावचस्यार्थस्य केवलान्निपातादनुपलब्धेः पदान्तरोपादानात्तु तदर्थाभिव्यक्तेर्निपातो द्योत्यते। अतो द्योतका एव न वाचकाश्चादय इति। अथ गत्युपसर्गकर्मप्रवच-

नीयानां का वार्ता ? उच्यते । गतीनां तावत्सदसदादीनामादरानादरादिवाच्यनिर्देशेनैव गतिसंज्ञाविधानादनिर्दिष्टवाच्यानामप्यूर्यादीनां वाचकत्वमेव गम्यते । उपसर्गास्तु वाचकाः द्योतकाः विशेषकास्सहाभिधायकाः कार्यार्था निरर्थकाश्च भवन्ति । कर्मप्रवचनीयाः पुनर्निपातवत् द्योतका एव । तदाह—

क्रियाविशेषजन्यानां संबन्धानां प्रकाशने। कर्मत्वं करणत्वं च भेदेनैवाश्रितं कथम् ॥

इह खलु संबन्धाः क्रियापूर्वकत्वात् करणानुविधायितया क्रियोपदर्शितविशेषं कारकमाश्रयन्ति । तत्र च भिन्नजातीयस्य युगपदेकया विभक्त्या वक्तुं शक्यत्वात् शेषसंबन्धाभिधानवेलायामशब्दोपादानः क्रियाकारकसंबन्धश्शब्दवता शेषसंबन्धेनानुमीयमानसन्निधिरवतिष्ठते । तच्चानुमानं शेषसंबन्धस्य स्वरूपसामर्थ्यान्नियतक्रियाविषयमनियतक्रियाविषयञ्च । नियतक्रियाविषयं यथा— . . . ना जना कर्तर्यपेक्षितकर्मविशेषे शेषलक्षणं पितापुत्रसंबन्धमुत्पादयतीति । सैव तस्मादनुमीयते । तथा वृक्षस्य शाखेत्याधाराधेयनिबन्धना स्थितिरपेक्षितकर्तृविशेषेऽधिकरणेऽवयवावयविलक्षणं शेषसंबन्धं निबध्नातीति सैव प्रतीयते । अनियतक्रियाविषयं यथा— राज्ञः पुरुष इति स्वस्वामिसाधनाभरणक्रयणापजयादिरनियतानेका क्रिया कर्ताशेषसंज्ञकं स्वस्वामिसंबन्धं संनिवेशयति । स चानियतानेकाक्रियापूर्वकत्वादपर्याप्तः क्रियाविशेषमनुमापयितुमिति स्वनिमित्तक्रियासामान्यमेवानुमापयति । एवंविधे विषये क्रियाविशेषणप्रकाशनाय कर्मप्रवचनीयाः प्रयुज्यन्ते । यथा—शाकल्यस्य संहितामनुप्रावर्षवर्षणयोर्हेतुफलभावो नियमयति क्रियापूर्वकः इत्येतदमुना प्रकाश्यते । यतः क्रियापदस्य विभक्तेरशक्यं कल्पयितुं क्रियाविशेषप्रकाशनमपि क्रियापदसन्निधानायत्तमसति क्रियापदे न युक्तम् । संबन्धोऽपि नास्याभिधेयः । तस्य विभक्तिप्रत्ययनिबन्धनत्वात् । यदि च कर्मप्रवचनीयस्तमभिदधीत, प्रातिपदिकार्थस्य व्यतिरेकोपजनो न स्यात् ; यथा— राजस्वामीति । प्रतीयते च लोके कर्मप्रवचनीययोगो संबन्धस्य निमित्तविशेषावच्छेदः । तस्मात्स तस्य प्रयोजक इत्यवसीयते । तदुक्तम्—

क्रियाया द्योतको नायं न संबन्धस्य वाचकः । नापि क्रियापदाक्षेपी संबन्धस्य तु भेदकः ॥

इति । ननु च नाप्रतीतायां निशमयतिक्रियायां तया संबन्धस्यावच्छेदश्शक्यते कर्तुम् । तदयमनुः क्रियामप्रत्याययत् संबन्धमवच्छिनत्तीति न युज्यते । अथास्य क्रियाप्रकाशनमन्यत्रादर्शनान्न कल्प्यते । संबन्धावच्छेदोऽपि मा प्रकल्पि, अन्यत्रादर्शनादेव । उच्यते । क्रियाभेदसमधिगतमात्मातिशयसंबन्धस्यावगमयन्नर्थसामर्थ्यात् क्रियाविशेषः प्रत्ययनिमित्तमनुः । अतोऽस्य क्रियावचनत्वमन्यतः क्रियाप्रतीतेर्न कल्प्यते । यदि वा निमित्तभेदोपधेयविशेषापरामर्शेन रूपभेदं संबन्धस्यावगमयन्ति कर्मप्रवचनीयाः । यथा— अधि ब्रह्मदत्ते पञ्चालाः, अभिमन्युः अर्जुनतः प्रतीति स्वस्वामिभावस्साहदयं च कर्मप्रवचनीयात्प्रतीयते । विशिष्टाधिकरणव-

च्छेदास्तु संबन्धास्स्वरूपातिशयेन क्रियाभेदमधिगमयन्ति । यथा— पञ्चालानां परिपालनकरादानादयः कार्या ब्रह्मदत्तेन, अभिमन्युरध्यवसायसंप्रहरणादयस्सदृशा अर्जुनेन, प्रक्रान्तसंबन्धवशात् अपप्रियन्ते । तदयमनुः संहिताप्रवर्षणयोस्संबन्धं हेतुफलभावेनावच्छिनत्ति । अध्ययनविशेषरूपत्वात्तु संहितायाः । तस्य च शब्दातिशयप्रकाशसामर्थ्यान्निशमनमन्नार्थं गृहीतं न कर्मप्रवचनीयाधिगम्यमिति । तस्य तु दर्शनं, अनुः पश्चाद्भावाभिधाने प्रतीतसामर्थ्यो यथा—अनुरूपादानमिति । स इहापि तदर्थमेव भवितुमर्हतीति तस्य हेतौ विधीयमाना कर्मप्रवचनीयसंज्ञा न प्राप्नोति । संबन्धावच्छेदोऽप्येवमनुल्यम् । अथ विषयवशाद्धेतौ वृत्तिः कल्प्यते । पश्चाद्भावेऽपि अविरोधः, यतः पौर्वापर्यमिह हेतुफलविषयम् । अयमेव तर्हि संबन्धावच्छेदः यदनियताधिकरणं पौर्वापर्यमिह हेतुफलविषयतयावच्छिद्यते । एतदेव च संबन्धावच्छेदहेतुत्वं पृथक्करणनिमित्तं निपातेभ्यः कर्मप्रवचनीयसंज्ञानां । कथं तर्हि अधिपरी अनर्थकौ, सुः पूजायाम्, अतिरतिक्रमणे च, अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेष्वित्यमीषां कर्मप्रवचनीयत्वम् । न हि कश्चिदेभिस्संबन्धोऽवच्छिद्यते । सत्यमेतत् । किन्तु कार्यार्थमेषां अतद्धर्माणामपि शास्त्रे वाचनिककर्मप्रवचनीयत्वमभिहितमिति ।

ननु च जात्यादिप्रवृत्तिनिमित्तोपग्राहिणो वृक्षादयः सत्ववचनाः । तद्विपरीताश्चादयो असत्ववचना इत्युच्यते । न च जातिर्नाम प्रत्यक्षादिसमधिगम्यं किञ्चित्प्रमेयमस्ति । तथा हि; असौ न प्रत्यक्षाप्रत्यक्षस्य पूर्वापराननुस्यूतस्वलक्षणत्वाज्जातेश्च पूर्वापरानुस्यूतरूपत्वात् । तदाह—

समानवृत्तिता नाम सामान्यस्य विशेषतः । कथं स्पृशति सापेक्षमनपेक्षाक्षजा मतिः ॥

तं पृष्ठभाविनस्तु विकल्पास्स्वभावेनावस्तुविषयत्वान्न सामान्यसिद्धौ प्रभवन्ति । नाप्यनुमानं शब्दो वा सामान्यमवस्थापयति । तयोरपि विकल्पविषयत्वेन वस्तुव्यवस्थापकत्वायोगात् । वस्तुप्राप्तिस्तु भेदानध्यवसायनिमित्तवस्त्वध्यवसायाद्भविष्यति । इतश्च न व्यक्तिव्यतिरिक्तसामान्यं कुवलयामलकबिल्वादिवद्भेदेनानुपलम्भाद्घटपटादिवच्च देशभेदाग्रहणात् व्यक्त्यग्रहे च घटपटादिवदेव तदनुपलब्धेर्व्यक्तिवृत्तित्वात्सामान्यस्य तदग्रहे तदनुपलब्धिरिति चेन्न । वृत्त्यनुपपत्तेः । किं प्रतिपिण्डं कार्त्स्न्येन वर्तते जातिरुतैकदेशेन ? पिण्डे सामान्यमेकत्र यदि कार्त्स्न्येन वर्तते, तत्रैवास्य पदार्थत्वम् । न स्यात् पिण्डान्तरे ग्रहः । एकदेशेन वृत्तौ तु गोत्वजातिर्न कुत्रचित् ॥ समग्राऽस्तीति गोबुद्धिः प्रतिपिण्डं कथं भवेत् ॥ न चास्य निरवयवत्वादेकदेशा विद्यन्ते । न चैकपिण्डे समाप्त्या वर्तमाना पिण्डान्तरेऽपि समाप्त्यैव वर्तितुमर्हति । समाप्तस्य न पुनरुत्पत्तिं विना समाप्त्यन्तरानुपपत्तेः । न च तथाभूता काचिद्वृत्तिरुपलभ्यते । न च समवायात्मिका वृत्तिः । स ह्ययुतसिद्धानां भवति । अयुतसिद्धिस्सम्बन्धश्चेति विप्रतिषिद्धम् । द्रव्यगुणयोः अपृथक्सिद्धयोरपि सम्बन्धदर्शनान्नैवमिति चेन्न । तत्रापि गुणव्यतिरिक्तस्य गुणिनो भेदेनासिद्धेः ।

अवयवावयविनोरपि पृथक्सिद्धेरभावान्न सम्बन्धः । नापि रूपरूपिलक्षणस्सम्बन्धो भविष्यतीति वक्तव्यम्, रूपार्थस्य निरूपयितुमशक्यत्वात्। किमयं रूपशब्दश्शुक्लादिगुणवचनस्स्वभाववचनो वा। शुक्लादिवचनत्वे नीरूपाणां पवनमनःप्रभृतीनां द्रव्याणां सामान्यशून्यता स्यात् । आकारवचनत्वेऽप्यवयवसन्निवेशरहितानां तेषामेव सामान्यवचनं प्राप्नोति । स्वभाववचनत्वे तु जातिजातिमतोरव्यतिरेक एव भवेत्। 'भाति हि विभेदेन स्वभावो न स्वभाविनः । शब्दातिरिक्ततैवेयं न तु वस्त्वतिरिक्तता ॥' अपि चेयं जातिः,

सर्वसर्वगतापि स्यात्पिण्डसर्वगतापि वा। सर्वसर्वगतत्वेऽस्याः कर्कादावपि गोमतिः ॥
अश्वधीश्शाबलेयादावुष्ट्रबुद्धिर्गजादिषु । पदार्थसङ्करश्चैवमत्यन्ताय प्रसज्यते ॥
अथाभिव्यक्तिसामर्थ्यनियमान्नैष सङ्करः। हितकर्कादिपिण्डानां गोत्वाभिव्यक्तिकौशलम् ॥
मैवं खण्डाद्यभिव्यक्तमपि गोत्वमनंशकम् । सर्वत्रैव प्रतीयेत न वा सर्वगतं भवेत् ॥
तदंशग्रहणे तस्य न हि कश्चिन्नियामकः। दीपवद्व्यञ्जकः पिण्डो न तु तं पिण्डवृत्ति तत् ॥
सर्वत्रागृह्यमाणं च सर्वत्रास्तीति को वदेत् । सर्वसर्वगतं तत्र न गोत्वमुपपद्यते ॥
पिण्डसर्वगतत्वे तु काममेतददूषणम्। किन्तु नैवाद्य जातायां गवि गोप्रत्ययो भवेत् ॥
पिण्डेनासीदसञ्जाते जातिर्जातेऽपि विद्यते। संक्रामति न चान्यस्मात्पिण्डादन्यत्र निष्क्रिया ॥
आयान्त्यपि न तत्पिण्डमपोज्झितपुरातनम्। न चांशैर्वर्तते चेति केयं व्यसनसन्ततिः ॥

तस्मादपोहरूपमलीकमेव सामान्यं, न परमार्थसदिति । ततश्च तदभावात्तद्वतोऽनुपपत्तिरिति। अत्रोच्यते । किं जात्यादेर्बाह्यस्य शब्दार्थस्याभावादपोहे पक्षपातः, उत प्रतीतिबलेनेति । न तावत्प्रतीतिबलेन, प्रतीतेरनुगताकारविषयत्वेनापोहपरिपन्थित्वात् । नापि जातेरसत्त्वं प्रत्यक्षेण, स्वलक्षणवदावेदितस्वरूपत्वात् ।

आद्यमेव हि विज्ञानमर्थसंस्पर्शि चाक्षुषम् । न तदुत्तरभावीति किमिदं राजशासनम् ॥
तदेवास्तु प्रमाणं वा तेनापि त्वधिगम्यते। व्यावृत्तं वस्तुनो रूपं नानुगामीति का प्रमा ॥
भवेद्यदि विशेषैकविषयं निर्विकल्पकम् । सामान्याध्यवसायोऽयमकस्मात्कथमुद्भवेत् ॥

न चैतच्छाब्दरूपम् । यतः,

पश्यत्यनुगतं रूपमविज्ञातेऽपि वाचके । दाक्षिणात्य इवाकस्मात्पश्यन्नुष्ट्रपरम्पराम् ॥

अपि च शाबलेयपिण्डमवलोकितवतः कालान्तरे बाहुलेयपिण्डं पश्यतश्शाबलेयपिण्डस्मरणमुत्पद्यते। तत्सामान्याभावे न घटते । न ह्यन्यस्मिन्दृष्टेऽन्यस्मरणनिमित्तं किञ्चिदस्ति । तयोरनुगतरूपाभ्युप-

गमे तदुपपद्यते नान्यथेति । किञ्च व्यक्त्यन्तरदर्शनेऽपि स एवायं गौरिति प्रत्यभिज्ञायते । तदप्यनुगतरूपाग्रहणे न युज्यते । न च व्यक्तिरेव प्रत्यभिज्ञायते, व्यक्तिभेदस्य प्रत्यक्षसिद्धत्वात् । यत्र च लघुतरपरिमाणतिलमुद्गादिप्रचयसन्निधानेऽवच्छिन्नस्वलक्षणग्रहणं नास्ति । तत्रानुवृत्तमेव रूपमिन्द्रियेण गृह्यते । तस्माद्विशेषवत्सामान्यापह्नवो न युक्तः ।

तस्मात्पूर्वाक्षसम्पाते तुल्यत्वमवगम्यते । नानात्वं चेति सामान्यभेदौ द्वावपि वास्तवौ ॥
सामान्यमिदमित्येवमथ तत्रानुपग्रहः । व्यावृत्तमिदमित्येवं किंवा बुद्धिस्स्वलक्षणा ॥
समानवृत्तिसापेक्षं न च सामान्यवेदनम् । तत्र सन्निहितत्वात्तु व्यक्तिवन्नानुपग्रहः ॥
समानवृत्त्यपेक्षत्वात्सामान्यस्यानुपग्रहे । विशेषोऽपि च माग्राहि व्यावृत्तिं स ह्यपेक्षते ॥
अनुवृत्तिर्हि येष्वस्य का तेषां ग्रहणे गतिः । व्यावृत्तिरपि येभ्योऽस्य का तेषां ग्रहणे गतिः ॥
अथानुवृत्तिव्यावृत्तिनैरपेक्ष्येण केवलम् । वस्त्वेव गृह्यते कामं कीदृक्तदिति कथ्यताम् ॥
निर्विकल्पकवेलायां निर्देष्टुं तन्न शक्यते । तदुत्थास्तूभयत्रापि साक्ष्यं ददति निश्चयाः ॥
यच्च वृत्तिविकल्पादिदूषणं तत्र वर्णितम् । तत्प्रत्यक्षमहिम्नैव सर्वं प्रतिहतं भवेत् ॥

यत्तावदुक्तं कुवलयामलकादिवदनवभासादिति तत्र प्रतीतिभेदो दर्शित एव । यत्तु देशभेदेनाग्रहणात्, तदग्रहे तद्बुद्ध्यभावादिति तत्र जातेस्तदाश्रितत्वं कारणं, नासत्त्वम् । यदप्युक्तं वृत्त्यनुपपत्तेरिति तत्राप्युच्यते, प्रतिपिण्डं कार्त्स्न्येनैव जातिर्वर्तत इति पिण्डान्तरे तदुपलम्भो अस्त्येव । एकदेशास्तु जातेर्न सन्त्येव ।

केदमन्यत्र दृष्टं चेदहो निपुणता तव । दृष्टान्तं याचसे यस्त्वं प्रत्यक्षेऽप्यनुमानवत् ॥

किंनामधेया वृत्तिरियमिति चेन्न नामधेयमस्याः जानीमः, पिण्डसमवेता जातिरित्येव प्रचक्ष्महे । नन्वयुतसिद्धयोस्सम्बन्धः समवायः, स विप्रतिषेधादेव निरस्तः न शक्यते निरसितुम् ।

प्रतीतिभेदाद्भेदोऽस्तु देशभेदस्तु नेष्यते । तेनावकल्पते वृत्तिस्समवायस्सतूच्यते ॥

अवयवावयविनोर्गुणगुणिनोश्चेयमेव वृत्तिः । अर्थान्तरत्वं चैतयोर्जातितुल्यन्यायतया सिद्धमेव । देशभेदश्च तयोर्नास्तीति विस्पष्टमयुतसिद्धत्वम् । यदप्युच्यते— 'नानिष्पन्नस्य सम्बन्धो निष्पत्तौ युतसिद्धता ।' इति । तदपि परिहृतमाचार्यैः । जातिसम्बन्धं चेत्येकः काल इति वदद्भिः

या चेह वृत्तिस्तत्सूत्रभूतकण्ठगुणादिषु । जात्यादीनामनङ्गत्वात्ताभ्यां वृत्तिर्विलक्षणा ॥

तस्माद्वृत्त्यनुपपत्तेरित्यदूषणम् । यदपि सर्वसर्वगतत्वं पिण्डसर्वगतत्वं च विकल्प्य दूषितं तदपि यत्किञ्चित् यथाप्रतीति तदभ्युपगमात् सर्वसर्वगा जातिरिति तावदुपेयते ।

॥ श्रीः ॥

षष्ठः विभक्त्यर्थादिचतुष्टयप्रकाशः

विभक्त्यर्थस्त्रिधा, सङ्ख्या, कारकं, शेषश्च । तेषु कारकसम्बन्धिगतैकत्वद्वित्वबहुत्वानि सङ्ख्या । सा षोढा, आभिधानिकी, वैवक्षिकी, नैमित्तिकी, पारिभाषिकी, वैभाषिकी, पारिशेषिकी च । तत्राभिधानिकी यथा— आपः, दाराः, लाजाः, द्वयं, अनेकं, नियुतमिति । अत्राभिधानतो बहुवचनैकवचने एवेत्याभिधानिकी । वैवक्षिकी यथा— रोदसी रोदस्यौ, कबरी कबर्यः, स्तनौ स्तनाः, विशाखा विशाखे विशाखाः, दृक् दृशौ दृशः, जगत् जगती जगन्ति । अत्र विवक्षयैकत्वद्वित्वबहुत्वानीति वैवक्षिकी । नैमित्तिकी यथा— वृक्षः, शोभनः, दम्पती, पितरौ, अक्षाः, गभस्तय इति । अत्र वस्तुनो निमित्तस्य सद्भावान्नैमित्तिकी । पारिभाषिकी यथा— मार्दङ्गिकपाणविकं, पुरुषौ, खलतिकं, वनानि, गोदौ, ग्रामः, तिष्यपुनर्वसू, तारकाः, पञ्चाला जनपदः, स चाहं च पचाव इति । अत्र द्वित्वबहुत्वादिषु एकत्वादिपरिभाषणमिति पारिभाषिकी । वैभाषिकी यथा— अश्ववडवम्, अश्ववडवौ, प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः, पूर्वे फल्गुन्यौ, पूर्वाःफल्गुन्य इति । अत्र विभाषयैकत्वद्वित्वबहुत्वानीति वैभाषिकी । पारिशेषिकी यथा— एकः द्वौ बहवः, उभौ द्वित्राः, अर्धतृतीया इति । अत्रैकाद्युक्तसङ्ख्यापरिशेषे स्वादय इति पारिशेषिकी । तदुक्तम्—

निमित्तमेकमित्यत्र विभक्तानामधीयते । तद्गतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते ॥

कारकं षड्विधमभिहितं पुरस्तात् । तद्द्वितीयादिवाच्यत्वेन पृथक्पृथक् षट् प्रकारं प्रथते । तत्र कर्म द्वितीयावाच्यम्-कटं करोति । तृतीयावाच्यं-मात्रा सञ्जानीते । चतुर्थीवाच्यं— न त्वा शुने मन्ये । पञ्चमीवाच्यं— परि त्रिगर्तेभ्यो वृष्टो देवः । षष्ठीवाच्यं— मातुस्स्मरति । सप्तमीवाच्यं— अधीती व्याकरणे । कर्ता द्वितीयावाच्यः, गमयति ग्रामं देवदत्तम् । तृतीयावाच्यः, चैत्रेण कृतम् । चतुर्थीवाच्यः, मूत्राय कल्पते यवागूः । पञ्चमीवाच्यः, उपाध्यायादधीते । षष्ठीवाच्यः, व्यासस्य कृतिः । सप्तमीवाच्यः, ब्राह्मणेषु भुञ्जानेषु वृषला आसते । करणं द्वितीयावाच्यं, अक्षान्दीव्यति । तृतीयावाच्यं, दात्रेण लुनाति । चतुर्थीवाच्यं, शताय परिक्रीतः । पञ्चमीवाच्यं, स्तोकान्मुक्तः । षष्ठीवाच्यं, सर्पिषो जानीते । सप्तमीवाच्यं, अक्षेषु दीव्यति । सम्प्रदानं द्वितीयावाच्यं, देवदत्तमभ्यसूयति । तृतीयावाच्यं, दास्या सम्प्रयच्छते । चतुर्थीवाच्यं,

देवाय ददति । पञ्चमीवाच्यं, गुरोरारभ्य गाः प्रयच्छति । षष्ठीवाच्यं, भ्रतः पृष्ठं ददाति । सप्तमीवाच्यं, पुष्पेषु स्पृहयति । अपादानं द्वितीयावाच्यं, अर्जुनं योद्धारः । तृतीयावाच्यं, धनुषा विध्यति । चतुर्थीवाच्यं, श्राद्धाय निगृह्णते । पञ्चमीवाच्यं, ग्रामादागच्छति । षष्ठीवाच्यं कृष्णा गवां संपन्नक्षीरतमा । सप्तमीवाच्यं, भुक्त ओदनः कंसपात्र्याम् । अधिकरणं द्वितीयावाच्यं, ग्राममधिवसति । तृतीयावाच्यं, स्थमेन धावति । चतुर्थीवाच्यं, युद्धाय सन्नह्यति । पञ्चमीवाच्यं, क्रोशाद्विध्यति । षष्ठीवाच्यं, गवामीश्वरः । सप्तमीवाच्यं, तीर्थे उपवसतीति । कारकातिरेकी क्रियाकारकपूर्वकः संबन्धविशेषः । स त्रिधा, उक्तादन्यः, कारकेभ्योऽन्यः, कारकाणामविवक्षा च । तेषु उक्तादन्यत्वे भिन्नसम्बन्ध्यपेक्षः, अभिन्नसम्बन्ध्यपेक्षश्च । तयोराद्यो राज्ञः पुरुष इति यथा—

पत्युश्शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम् ।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान ॥

द्वितीया राहोश्शिर इति यथा—

शिखिच्छदच्छत्रपतत्रमण्डलीभरोपरुद्धं मुखमेणचक्षुषः ।
मुखेन राहोरभियोक्तुमुद्यतं कलापतौ बिम्बमिव व्यराजत ॥

कारकेभ्योऽन्यत्वे उपात्तक्रियोऽनुपात्तक्रियश्च । तयोराद्योऽन्नस्य हेतोर्वसतीति । यथा—

एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम् ॥

द्वितीयो ब्राह्मणस्य तुल्यो यथा—

कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः ।
त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन ॥

कारकविवक्षायां द्रव्यापेक्षः क्रियापेक्षश्च । तयोराद्यः साधोस्स्वं धनं रोचत इति, यथा—

दत्तमात्तमदनं दयितेन व्याप्तमातिशयिकेन रसेन ।
सस्वदे मुखसुरं प्रमदाभ्यो नाम रूढमपि च व्युदपादि ॥

द्वितीयो न माषाणामश्नीयादिति यथा—

निवार्यतामालि किमप्ययं वटुः पुनर्विवक्षास्फुरितोत्तराधरः ।
न केवलं यो महतां विभाषते शृणोति तस्मादपि यस्स पापभाक् ॥

सहार्थतादर्थ्यहेतुलक्षणोपपदसम्बोधनादयस्तु संबन्धविशेषा उपस्काराधिकारेऽभिहिता इति नेह प्रतन्यन्ते । ननु च सम्बन्धस्य क्रियाकारकपूर्वत्वात् कारकेष्वेव शेषसम्बन्धस्याप्यन्तर्भाव इति सङ्ख्याशक्तिश्च विभक्त्यर्थः । तत्र जातौ पदार्थजात्यभिधायिनः प्रातिपदिकस्य सङ्ख्याकारकाभिधायिन्या विभक्त्या सम्बन्धो न घटते । न हि जातेः सङ्ख्याशक्तियोगस्संभवति। उच्यते, जात्यविनाभावेन लक्षितायां व्यक्तेः सङ्ख्यासन्धियोगादेकार्थसमवायलक्षणस्सम्बन्धो भविष्यति । नैवम्; यथानन्त्यव्यभिचाराभ्यां भेदवर्तीं व्यक्तिमशक्ताः प्रकृतयोऽभिधातुमित्यभिन्नामव्यभिचारिणीं च जातिमाचक्षते । तदाधारभेदाद्भिन्नामानन्त्यव्यभिचाराभ्यामशक्ताः विभक्तयश्शक्तिं सङ्ख्यां चाख्यातुमतस्तदाधारां शक्तिसङ्ख्याजातिमाचक्षते । ततश्च प्रकृत्यर्थसम्बद्धाया अपि व्यक्तेर्विभक्त्यर्थेन शक्तिसङ्ख्यासामान्येनासम्बन्धादनुपपन्न एव प्रकृतिप्रत्यययोः समभिव्याहारः । नानुपपन्नः, एकार्थसमवेतसमवायेन तदुपपत्तेः । कथं पुनस्सामान्याभिधानेनाभिधीयमानयोस्सङ्ख्याद्रव्ययोः परस्परेण सम्बन्धः । यथाभिधीयमानयोः । यथाभिशब्देनाभिहितावर्थौ बुद्धौ विपरिवर्तमानौ मिथस्सम्बध्येते तथा शब्देनाभिहितादर्थात् प्रतीयमानावपि परस्परेण सम्बन्धमनुभविष्यत इति । किं पुनरियं सङ्ख्या शक्तिर्वा नियोगतो जातिमवच्छिनत्ति ? नेत्याह । न हि ग्रहं संमार्ष्टीति श्रूयमाणमेकवचनमेकत्वसङ्ख्यां क्रियाङ्गभावेन प्रतिपादयति । नापि सक्तून् जुहोतीति द्वितीयाश्रुतिः सक्तूनां होमक्रियायां कर्मशक्तिमभिधत्ते । अपि त्वक्षान्दीव्यतीतिवत्संबन्धसामान्यतिरोहितकर्मरूपात् सक्तून् साधकतमत्वेन होमकर्मणि नियुङ्क्ते । क्वचित्तु तद्रूपयैव विभक्तिश्रुत्या संख्याकर्मादिशक्तीनां क्रियास्वाङ्गभावोऽवबोध्यते । यथा पशुमालभेत व्रीहीनवहन्तीति । कुतः पुनरिदं श्रुत्युपात्ते अपि क्वचिदेव सङ्ख्याशक्ती विवक्ष्येते ? तत्र तावत्सङ्ख्यां प्रति श्रूयते सत्त्वभूतमिदंतदिति व्यपदेशयोग्यं वस्तु न शक्यते सङ्ख्यामन्तरेण शब्दैरभिधातुम्; ससंख्यानामेव शब्दानां सत्त्वाभिधायकत्वात् । अतो नान्तरीयकमुपादानं संख्याया इति सत्त्वनिर्देशे संख्या न विवक्ष्यते । यथा ब्राह्मणो न हन्तव्य इति । एवं च जात्यापि विना वस्तुमात्रस्य संप्रमुग्धत्वाद्विवेकेनाभिधानमशक्यम् । अतो नान्तरीयकं जात्युपादानमिति जातेरप्यविवक्षा प्राप्नोति । अपर आह, यत्र संख्यापदैरेकादिभिस्संख्या अभिधीयते, तत्र नियोगतः कर्माङ्गभावेन विवक्ष्यते । यथा— एकां गां ददाति, द्वाभ्यां खनति, त्रीन्पशूनालभत इति । एकादिशब्दरूपाद्धि सा प्रतीयमाना न शक्यमविवक्षितुम् । अन्यत्र तु शब्दसंस्कारमात्रपरत्वादेकवचनादेरविवक्षा यथा—गौः पदा न स्प्रष्टव्या । एतदपि नास्ति यस्योभयं हविरार्तिमार्च्छेदित्येवमादावुभयादिशब्दोपादानादप्यविवक्षादर्शनात् । अन्ये मन्यन्ते— जात्याख्यायामेकस्मिन्नन्यतरस्यामिति ज्ञापकादेकबहुवचनं च न विवक्ष्यते । द्विवचनं तु विवक्ष्यते । यथा-सारस्वतो भवन इति । तदप्ययुक्तं, द्विवचनस्यापि अविवक्षादर्शनात् । यथा-

यद्येतौ व्याधितौ स्यातां देयं स्यादिदमौषधम् ।

यतस्तदौषधमेकस्यापि दीयमानं वातादिविकारं शमयितुं शक्नोति ; एवं तर्हि यत्र पराङ्गतया जातिर्विधीयते, तत्र संख्या विवक्ष्यते । यत्र तु स्वसंस्कारप्रतिपत्तयेऽनूद्यते तत्र न विवक्ष्यते । यथा–पशुना यजेत, ग्रहं संमार्ष्टीति । तदेतदुभयमपि उदाहरणमात्रेणाशक्यं प्रतिपत्तुमिति युक्तिरभिधातव्या । सेयमुच्यते । पशुना यजेतेति यागस्य फलवत्तया प्राधान्यं तदङ्गं पशुः, अङ्गं च यत्प्रधानस्योपकरोति । एकेनैव पशुना कृतः प्रधानस्योपकार इति द्वितीयो नोपादीयते । यदि हि यस्य यावन्तः पशवस्सन्ति स तावत उपादत्त इत्याश्रीयते । प्रकृतस्य यागस्यैकेन पशुना समापितत्वादितरवैयर्थ्यं माभूदिति यागान्तराणि क्रियन्ते । गुणेन द्रव्येणाप्रधानं यागः प्रयुक्तस्स्यात् । न चैष न्यायो यद्गुणः प्रधानं प्रयुङ्क्ते । किञ्च पशुमालभेत पशुना यजेतेत्यादौ क्रियाङ्गभावेनाप्रज्ञातस्य पशोस्साधनभावप्रख्यापनायेदमुत्पत्तिवाक्यम् । तत्र शब्ददर्शनावसेयत्वादर्थस्य यथाभूतं शब्द आह तथाभूतस्सोऽर्थोऽनुगततया समाश्रीयते । शब्देऽन्वयव्यतिरेकाभ्यां प्रकृतेर्जातिरिव विभक्तेस्संख्याभिधेयत्वेनावधार्यते । यदि च द्वितीयस्य पशोरुपादानमन्तरेण शब्दार्थौ न समाप्येत, क्रिया वा न निवर्त्येत, तदोपादीयेतापि द्वितीयम् । परत्वजातेश्च प्रतिव्यक्त्यविकल्पात्मनः समाप्तत्वादेकपश्ववदानैश्च यागक्रियाभिनिर्वृत्तेर्द्वितीयो नोपादीयते । न च पशुना यजेतेत्यस्यास्संख्याया विरोधिनी संख्योत्पत्तिवाक्यगता काचिद्विद्यते । यदनुरोधादियं त्यज्येत, यस्मादिदमेव पशोरुत्पत्तिवाक्यं, अतश्शब्दवत्त्वात् सङ्ख्यान्तरेण चाविरोधात् । पशुना यजेतेत्यादौ सङ्ख्या विवक्ष्यते । ग्रहं संमार्ष्टीत्यत्र तु न विवक्ष्यते । यस्मात् प्राजापत्या नवग्रहा भवन्तीत्यादौ ग्रहाणामुत्पत्तिवाक्ये या अनेकत्वसङ्ख्या सा प्रधानविषया, तत्र ग्रहाणां विधीयमानत्वात् । ग्रहं संमार्ष्टीत्यत्र तु या एकत्वसंख्या सा शेषविषया, सम्मार्गस्य विधीयमानत्वात्, तदधिकरणसंपादनार्थत्वात् ग्रहशब्दस्य । न च युक्तं यत्प्रधानसम्बन्धिनी संख्या शेषस्संख्यया बाध्यते । ननु चोत्पत्तिवाक्यवशेनानेक एव ग्रहो गृह्येत । ग्रहमित्येतस्माच्चैकवचनादेकस्सम्मृज्येत । किमत्र बाधितं स्यात् ? एवं तर्हि विधानवाक्ये पूर्वमेव प्रज्ञाताङ्गभावाः सम्मार्गमपूर्वं विधातुं केवलं ग्रहमित्यनेन स्मृतौ संनिवेश्यन्ते । ग्रहस्मृतिश्चानुभवसामर्थ्यादुद्भवन्ती यथानुभूतानेवार्थान्दर्शयतीति नैको ग्रहस्संमृज्यते । ननु च यथा पूर्वानुभूतचमसाद्यनेकपदार्थसन्निधौ संमार्गविधानाय ग्रहश्रुतिर्ग्रहाणामेव स्मारयति न चमसादीनां तथैवानेकग्रहसन्निधावेकवचनमेकस्यैव स्मारयेत् । येन हि बहवोऽनुभूतास्तेनैकोऽप्यनुभूत एव । सत्यमेतत् । किन्तु प्रतीयमानोऽप्यसौ संख्याभेदः क्रियां प्रत्यविधीयमानत्वादसमर्थः क्रियामेकस्मिन्नवस्थापयितुम् । अविधीयमानश्च संख्याभेदः, यतोऽत्र श्रुत्या ग्रहस्य संमार्गो विधीयते । तदेतावति पर्यवसितं वाक्यम् । न चापरश्शब्दोऽस्ति, येनैकस्य स विधीयेत । न चैकश्शब्द उभयं शक्नोति विधातुम् ; अप्रज्ञातं संमार्गं प्रज्ञातस्य चैकत्वेन संबन्धमिति प्रवृत्तिभेदात् । अथ ग्रहैकत्वाभ्यां विशिष्टस्संमार्गो विधीयते । न भिद्येत प्रवृत्तिः ; अर्थस्तु नैवं, यतो ग्रहार्थः

संमार्गस्तस्य प्रयोजनवत्त्वात् । विभक्तिविशेषश्च प्राधान्यं ग्रहस्य दर्शयति । अतो न विधीयते सङ्ख्या । इह तर्हि कथं चित्रगवीं बध्नातीति चित्रो गुणो विधीयते, यतोऽत्रापि गोरस्वतन्त्रीकारस्तस्याश्च चित्राया इति भिद्यते प्रवृत्तिः; गुणद्रव्ययोगस्य श्रुत्यैवाभिधीयमानत्वात् तद्विषयत्वाच्च । क्रियाया नात्रापराध इति चेत् ग्रहमित्यपि श्रुतिरेव सङ्ख्यायास्तदधिकरणस्य च द्रव्यस्य क्रियाङ्गभावमभिधत्ते । तथा शोणं योजयेदित्येकशब्दोपादानयोर्जातिगुणयोरङ्गीकरणम् । एवं तर्हि स्वार्थायां प्रवृत्तौ सङ्ख्याभेदस्य विधातुमशक्यत्वादविवक्षिता सङ्ख्या । यथा ग्रहं संमार्ष्टीति । अत्र ग्रहार्थत्वात्संमार्गस्य प्रधानं ग्रहाः, तदङ्गं संमार्गः । पशुना यजेत, शोणं योजयेत्, चित्रगवीं बध्नातीत्यादौ तु यागादिकर्मार्थत्वात् पश्वादीनामप्रधानानां ससङ्ख्यानां सगुणानां च विशिष्टानामेव विधानमिति विवक्ष्यते सङ्ख्यागुणश्चेति । आचार्यप्रवृत्तिरप्येतदेव ज्ञापयति प्रधाने संख्या न विवक्ष्यते, गुणे तु विवक्ष्यत इति । तथा हि । सरूपाणामेकशेष इति कर्मसाधने शेषशब्दे शेषशब्दाभिधेयस्य द्रव्यस्य साधुत्वाद्याख्यानेनाभिधीयमानससंस्कारत्वात् प्राधान्यम् । अतः स्वार्थे प्रवर्तमानस्याविवक्षितसङ्ख्यात्वादेकशब्दोपादानं कृतमेकशिष्यत इति । तदेतल्लिङ्गं प्रधानस्याविवक्षिता संख्येति । एवं सुबन्तं सुबन्तेन समस्यत इति संख्याया अङ्गीकरणात् बहूनां समासो न भवति । यथा—महत्कष्टं श्रित इति । अत्र ह्येवंप्रकारावयवसन्निवेशावच्छिन्नस्समुदायस्साधुरित्यन्वाख्यायते । अतोऽवयवपरामर्शोपायेन समुदायस्य संस्काराधानप्रक्रमे प्रधानं समुदायस्तमुद्दिश्य प्रवर्तमाना अवयवा उपात्तसङ्ख्याविशेषाङ्गीकरणेन प्रवर्तन्ते । यत्र तु यत्नान्तरमारभते तत्र बहूनामपि भवति । यथा—कालाः परिमाणिनेति । बहुवचनात् द्व्यहजातः, इति । यथा च बहुव्रीहिद्वन्द्वविधावनेकग्रहणान्मत्तबहुमातङ्गं वनं, धवखदिरपलाशा इति । क्वचित्पुनर्गुणेऽपि सङ्ख्या न विवक्ष्यते । यत्र तदविवक्षया प्रधानान्तरस्य सिद्धिर्भवति । यथा—कर्तुरीप्सिततमं कर्मेति । अत्र हीप्सिततमस्य कर्मसंज्ञायां विधीयमानावच्छेदाया ईप्साया अवच्छेदायोपादीयमानः कर्ता यद्याश्रितैकत्वसंख्यः प्रतीयेत, अनेकस्येप्सितं वस्तु कर्मसंज्ञासंबन्धादपेयात् । अतः प्रधानसंस्कारोपरोधतिरस्काराय कर्तानपेक्षितसंख्याविशेषस्समाश्रीयते । ननु च प्रयोजनमिदं प्रधानान्तरसिद्धिः । तस्मादविवक्षायामुपपत्तिर्वक्तव्या । इयमुच्यते । सामान्यनिबन्धनत्वादीप्सिततमशब्दस्य संबन्धिनामविशेषेण प्रसक्तौ साधनान्तरोच्छित्तये कर्तृग्रहणं क्रियते । तदुपात्तविपरीतप्रतिषेधमात्रोपक्षयमसमर्थं संख्याभेदमङ्गीकर्तुमिति ।

शक्तिः पुनरप्रधाने प्रधाने वा संख्यावति विभक्त्या विधीयमाना विवक्षामेवानुरुध्यते । एवं च यथा पश्वादीनां ससंख्यानां तथा ग्रहादीनामसंख्यानामेव क्रियासु साधनभावो भवति । कथं पुनः पश्वादिगता संख्या साधनत्वेनावगम्यते, यावता प्रातिपदिकार्थस्य साक्षात्पारंपर्येण वा संबन्धिसाधनत्वं संख्या च विभक्त्या विधीयते । न तु संख्यासाधनत्वयोः परस्परेण संबन्धोऽस्ति । एवं तर्हि प्रथमतरं व्यक्तिस्संख्यया संबध्यते । संख्या संसर्गप्राप्तातिशया तु

साधनभावेन। सोऽयं साधनभावो विशिष्टे निपतद्विशेषणमपि साधनमित्यावेदयति । यथा सायुधेन जीतमिति । कुतः पुनरयं संख्यासाधनत्वयोरेकशब्दोपनिबन्धनयोरनिबन्धकारिकालभेदेन संबन्धः। न ह्येतदस्ति। संख्यया संसर्गमनवाप्य न शक्नोति साधनभावमासादयितुमिति। एवं तर्हि संख्यासाधनभावाभ्यां व्यक्तिस्संबध्यते । ताभ्यामुपहितात्मातिशयामाख्यातविभक्तिस्तां क्रियासु विनियुङ्क्ते। सा विशिष्टा क्रियासंबन्धमनुभवतीति विशेषणमपि क्रियासंबद्धं प्रतीयते। ननु च कर्मकरणादिकारकं विभक्त्यर्थस्तच्च क्रियासिद्धावुपात्तव्यापारत्वाच्छक्तिमद्द्रव्यमेव । तस्मिंश्च प्रातिपदिकेनैवोक्ते किं विभक्त्योच्यते शक्तिरिति ब्रूमः ? द्विधा हि द्रव्यं सत्त्वभूतमसत्त्वभूतञ्च । तयोश्शक्तिसङ्ख्याश्रयस्सत्त्वभूतं वृक्षाद्यर्थः । तदनाश्रयोऽसत्त्वभूतमव्ययार्थः । तदुभयमपि निरुपाध्येव प्रातिपदिकेनोच्यते। तदाश्रितास्तु सशक्तिसङ्ख्यासंबन्धोपाधयो विभक्त्येति। ननु च—

स्वरूपादुद्भवत्कार्यं सहकार्युपबृंहितम्। नैव कल्पयितुं शक्तं शक्तिमन्यामतीन्द्रियाम्॥

शक्तिर्हि कल्प्यमाना पदार्थस्वरूपवन्नित्या वा स्यात् । कार्यं वा तत्र नित्यत्वे नित्यमेव कार्योत्पादप्रसङ्गः। सहकार्यपेक्षा तु स्वरूपस्यैवास्तु किं शक्त्या । कार्यत्वे तु पदार्थस्वरूपमात्रकार्यतायां सदा शक्तेरुत्पादात् सदैव कार्योत्पादः । सामग्रीकार्यं तु कार्यमेवास्तु। किमन्तराले शक्त्या ? अशक्तात्कारकात्कार्यानिष्पत्तिरिति चेच्छक्तिरपि कार्यं, तदुत्पत्तौ शक्त्यन्तरकल्पनादनवस्था ; अन्यथाऽभ्युपगमव्याघातः । आह, दृष्टसिद्धये ह्यदृष्टं कल्प्यते । शक्त्यन्तरकल्पनायाः शक्तिश्रेणिनिर्माण एव, क्षीणत्वात् । कारकाणां माभूत्कार्यव्याघात इत्येकैव शक्तिः कल्प्यते । तत्कुतोऽनवस्था ? नैवम् ; अन्यथापि तदुपपत्तेः । यदि ह्यर्थतत्त्वं क्रियासु प्रतिहन्येत तदा तदतिरिक्तशक्तिकल्पना युक्तमिति। अप्रतिहताश्च सहकारिलाभादपि कार्योपजनश्चार्थव्यक्तयः । तत्किं वृथा शक्तिकल्पनयेति ।

ननु शक्तिमन्तरेण कारकं कारकमेव न भवेत्, भावतत्त्वस्य क्रियासु प्रतिघातात् । रूपमेव हि दृश्यते न रसादि, दर्शनायतनं पश्यति न रसनादि, रस एव रस्यते न रूपादि, रसनमेव रसयति न चक्षुरादि, आप एव पिपासामपनयन्ति न त्वग्निः, अग्निरेव शीतं शमयति न त्वाप इति। अप्रतिघाते हि वस्तुस्वरूपाविशेषात् सर्वस्मात्सर्वकार्योदयप्रसङ्गः । ततश्चक्षुरिव रसनमपि पश्येत्। रूपमिव रसोऽपि दृश्येत । रसनमिव चक्षुरपि रसयेत्। रस इव रूपमपि रस्येत । आप इवाग्निरपि पिपासामपनयेत् । अग्निरिवापोऽपि शीतं शमयेयुः । यथा च तैलार्थिना तिला उपादीयन्ते तथा सिकता अप्युपादीयेरन् । यथा वा पादपं छेत्तुमनसा परशुरुद्यम्यते तथा पादुकाद्यप्युद्यम्येत। अपि च विषदहनयोर्मारणे दाहे च शक्तावनिष्यमाणायां मन्त्रप्रतिबद्धायां यत्तयोस्स्वकार्यौदासीन्यं तत्र का युक्तिः ? चक्षुःश्रोत्रयोर्वा दर्शने श्रवणे च रोगादिना यत् स्वकार्याकरणं तत्र कोपपत्तिः ? न हि मन्त्रादिना रोगादिना वा तत्स्वरूपाणि

सहकारिणो वा प्रतिबध्यन्ते, तद्रूपेणैव तेषामुपलम्भात् । शक्तयस्तु प्रतिबध्यन्त इति सत्स्वपि स्वरूपसहकारिषु कार्यानुत्पादो युक्तः । तस्माद्यथा सुखादिकार्यानुमितमदृष्टं सातिशयबुद्धिनिबन्धनस्मृतिप्रत्ययहेतुस्संस्कारः क्रियाविशेषजनितः क्रियान्तरप्रसवोपयोगी वेग इत्याद्यपरमतीन्द्रियमेव कल्प्यते । भवद्भिस्तथा शक्तिरपि कार्यातिशयकारणमतीन्द्रिया कल्प्यतामिति । तदनुपपन्नम्; शक्तिमन्तरेणापि क्रियाप्रतिघातादीनामुपपत्तेः । स्वकारणपरंपरायातनियतस्वभावतयैव भिन्नस्वभावा रसादयो रूपादिभ्यस्ते कथं रूपादिसाध्यामर्थक्रियामतथाभूतास्साधयेयुः? नियोगतश्चैतदङ्गीकर्तव्यम्; शक्तिकल्पनायामपि तुल्यानुयोगित्वात् । कथमेतादृशक्तयो नियताधारा न पुनरवयवेन शक्तीर्व्याप्नुवन्तीति । पदार्थस्वरूपातिशयादिति चेत्कार्यभेदोऽपि तत एव सेत्स्यति । अपि चाश्रयस्य भेदे कथं शक्तिभेदः? यतो वा शक्तयः प्राप्तरूपभेदास्तत एवाश्रयरूपभेदेन कार्यभेदसिद्धेः, किं शक्तिभेदकल्पनेन? यास्तर्हि तुल्यरूपा व्यक्तयः कार्यमतुल्यं साधयन्ति तासु कथम्? यथा—गलवर्थाश्चन्द्रकान्तिभिः स्यन्दन्ते न सूर्यग्रावाणः, करका अर्कांशुभिर्विलीयन्ते न मुक्तामणयः, आन्तरं तेजः पश्यति न बाह्यम्, प्राणो वायुः प्राणिति न व्यानः, श्रोत्राकाशश्शृणोति न वक्त्राकाशः, विद्वान् क्रियास्वधिक्रियते नाविद्वानिति तुल्यजातीयत्वेऽपि तेषामदृष्टप्रतिनियमो द्रव्यान्तरसंपर्कभेदश्च कार्यभेदं व्यवस्थापयति । यास्तस्याभिन्नाभिन्नमर्थव्यक्तयः कार्यं साधयन्ति, तासु कथं; यथा– तदेव तेजो दहति प्रकाशयति शीतं चापनुदति ता एवापः प्लावयन्ति, क्लमं चापनयन्ति, तादृशः स तेजसः पयसो वा रूपातिशयः कर्मण इव संयोगवेगविभागवेगानुकूलता धर्मस्येव सुखज्ञानापवर्गकारणत्वमिति । उपादाननियमे तु न वयमन्यं कंचिदभिनवं भावनां कार्यकारणभावमुत्पादयामः । किन्तु यथाप्राप्तमनुसरन्तो व्यवहरामः । तत्र तैलोत्पादपादपच्छेदावन्वयव्यतिरेकाभ्यां वृद्धव्यवहाराद्वा तिलपरश्वथादेरेव कारणत्वमवगच्छाम इति । तदेव तदर्थिन उपादद्महे, न सिकतापादुकादीति । न च तिलादेः परश्वथादेर्वा स्वरूपे सत्यपि सदा कार्योदयः । स्वरूपवत् सहकारिसन्निधेरप्यपेक्षणीयस्य सर्वदानुपपत्तेः । सहकारिवर्गे च धर्मादिकमपि निपतति; तदपेक्षे च कार्योत्पादे कथं सर्वेसात्सर्वसंभवः? धर्मादीनां तु जगद्वैचित्र्यादिकार्यबलेन कल्पनमपरिहार्यम् । यदपि विषदहनयोः सन्निधाने सत्यपि मन्त्रोपयोगात्तत्कार्याजननं तदपि न शक्तिप्रतिबन्धनिबन्धनम् । अपि तु सामग्र्यन्तरानुप्रवेशहेतुकम् । ननु मन्त्रेणानुप्रविशता किं कृतम्? न किञ्चित्कृतम् । सामग्र्यन्तरं तु संपादितम् । काचिद्धि सामग्री कस्यचित्कार्यस्य हेतुस्स्वरूपं तदवस्थमेवेति चेदभक्षितमपि विषं कथं न हन्यात्? तत्रास्य संयोगाद्यपीक्षणीयमस्ति । मन्त्राभावोऽप्यपेक्ष्यतां दिव्यकाले धर्म इव मन्त्रोऽप्यनुप्रविष्टः कार्यं प्रतिहन्ति । शक्तिपक्षेऽपि वा मन्त्रस्य को व्यापारः । मन्त्रेण हि शक्तेर्नाशो वा क्रियते प्रतिबन्धो वा । न तावन्नाशः, मन्त्रापगमे पुनः कार्यदर्शनात् । प्रतिबन्धस्तु स्वरूपस्यैवास्तु ।

ननु स्वरूपस्य किं जातम्? शक्तेरपि किं जातम्? कार्यौदासीन्यमिति चेत्तदितरत्रापि

समानं स्वरूपमस्त्येव, दृश्यमानत्वात् । शक्तिरप्यस्ति पुनः कार्यदर्शनानुमेयत्वात् । एतेन चक्षुःश्रोत्रयोरपि रोगादिना दर्शनश्रवणशक्तेर्नाशप्रतिबन्धविकल्पो व्याख्यातः । अपिच व्यापारोऽपि अतीन्द्रियशक्तिवदिष्यते भवद्भिः । अन्यतरकल्पनयैव च कार्योपपत्तेः किमुभयकल्पनागौरवेण ? शक्तमप्यव्याप्रियमाणं न कारकमिति चेत् शक्तमिति कथं ज्ञायेत ? कार्यदर्शनादिति चेत् व्यापारादेव कार्यं सेत्स्यति ; पादुकादेर्व्याप्रियमाणादपि न पादपच्छेदं पश्यामि । प्रत्यक्षस्तर्हि नातीन्द्रियः, यतः कार्यदर्शनात्पूर्वमपि व्याप्रियमाणत्वं जानासि । कार्यानुमेयो हि व्यापारः कार्याद्विना न ज्ञायेतैव । कार्यं त्वन्यतरस्मादपि घटमानं नोभयं कल्पयितुं प्रभवतीत्यसंभवः । शक्तेरिति चेदत्रोच्यते । स्वरूपं स्वरूपमिति यद्ब्रूषे तत्र किमिदं स्वरूपं नाम ? न तावद्द्रव्यं ; द्रव्यस्य स्वरूपमिति भेदेनाभिधानात् । किं पुनस्तत्सजातीयेभ्यो विजातीयेभ्यश्च भेदको धर्म इति नस्तर्कः । तं हि भवन्तोऽपि अर्थतत्त्वं भावतत्त्वमिति भावप्रत्ययेन भाषन्ते । स च यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति गुणाभिधाने स्मर्यते । गुणो धर्मसामर्थ्यमर्थक्रियाकारित्वमतिशयश्शक्तिरिति चैकोऽर्थः ।

स तु द्रव्याद्विभिन्नो वा द्रव्यस्यात्मैव वा तथा । व्यतिरेकमुपाश्रित्य साधनत्वाय कल्पते ॥

परस्परतो हि व्यावर्तमानशरीराः करणादयस्साधनभेदाः कथमेकद्रव्यात्मतामुपयन्तो न सङ्कीर्येरन् ? असङ्करे वा कथममीषामेकद्रव्यात्मता युज्यते ? तस्मादेकद्रव्याधिकरणां करणातीतिरेवास्या द्रव्याद्भेदमापादयति । किञ्च—

विभक्त्यर्थेऽव्ययीभाववचनादवसीयताम् । अन्यो द्रव्याद्विभक्त्यर्थस्सोऽव्ययेनाभिधीयते ॥

तथा हि । विभक्त्यर्थे वर्तमानमव्ययमुत्तरपदेन समस्यते । यदि च विभक्त्यर्थ इत्यनेन शक्त्याश्रयस्सत्त्वभूतं द्रव्यमुच्यते, तदसत्त्ववाचिनाऽव्ययेन नाभिधीयेत । तस्य चार्थस्य प्रातिपदिकेनैवोक्तत्वात् तदभिधाय्यव्ययमप्रयोगार्हमेव स्यात् । एवञ्च, अधिस्त्रि, अधिकुमारीति न सिध्येत् । यत्र हि पदद्वयं सङ्गतार्थं प्रयुज्यते स विषयस्समाससंज्ञायाः । तस्मादनभिहितामधिकरणशक्तिमव्ययमभिदधदुत्तरपदेन समासमनुभवति । तेन चावधार्यते द्रव्यातिरिक्तां शक्तिमभिधत्ते विभक्तिरिति । भवतोऽपि युक्तमेवोच्यते । स्वरूपादुद्भवत्कार्यं ततोऽन्यां शक्तिमशक्यं कल्पयितुमिति । यतः, शक्तिवादिनोऽपि गुणादिशब्दवाच्यात् कारकत्वादेर्द्रव्यस्वरूपान्न शक्तिमन्यां मन्यन्ते । किन्तु कार्योपजननायार्थव्यक्तयः क्षमा इति न क्षमन्ते ; सर्वस्मादपि कार्योदयप्रसङ्गात् । स्वकारणपरंपरायातनियतस्वभावतां तु न विद्मः । कारणगुणोत्थः पदार्थातिशय इति चेत् सैव शक्तिः । तस्यास्तु नित्यत्वानित्यत्वविकल्पनं नोपयुक्तं ; यावद्द्रव्यभावित्वेन द्रव्यवदेव नित्यानित्यत्वात्सर्वदा कार्योत्पादः क्रियाकाल एव शक्तेरुन्मेषात् । अदृष्टप्रतिनियतसहकार्योदयस्तु शक्त्युन्मेषहेतवो नास्माभिरपि निराक्रियन्ते । येन तूपादाननियमे

अन्वयव्यतिरेकौ वृद्धव्यवहारशतेऽपि कार्यदर्शनावसेयशक्तिमूला एव वृद्धैरप्यन्वयव्यतिरेकोक्तेः नाशप्रतिबन्धो वा मन्त्रादिनेत्यादिविकल्पस्तु स्वरूपस्य शक्तित्वसिद्धौ निषिद्ध एव भवति। व्यापारस्तु धातुवाच्य एवातीन्द्रियो न वास्तवः, तेन ताभ्यां तथैव कारणत्वावगमात्। कार्यदर्शनान्यथानुपपत्तिकल्पिता शक्तिरतीन्द्रियायोपपन्नतरैवेति।

वृत्त्यर्थस्त्रिधा, अपदार्थः, एकपदार्थः, अनेकपदार्थश्च। तत्रापदार्थस्त्रिधा, धातुप्रत्ययार्थीयः, प्रत्ययप्रत्ययार्थीयः, प्रातिपदिकप्रत्ययार्थीयश्च। तेषु धातुप्रत्ययार्थीयो द्विधा, क्रियारूपः, कारकरूपश्च। तयोः क्रियारूपो यथा—कर्तुमिच्छति चिकीर्षति, कुर्वन्तं प्रयुङ्क्ते कारयति, अत्यर्थं पुनःपुनर्वा पचति पापच्यते। कारकरूपो यथा—पाकं करोति पचति, पाकेन क्रियते पच्यते, पाचकः पक्तव्यमिति। प्रत्ययप्रत्ययार्थीयो द्विधा, नित्यो वैवक्षिकश्च। तयोर्नित्यो यथा—कृत्रिमं सांराविणम्, व्यावक्रोशी भिदा, आभिजित्यः कौञ्जायन्य इति। वैवक्षिको यथा—चिकीर्षुः, कारणा, गार्ग्यायणः, काल्याणिनेयः, मालायाः, कुमार्या इति। प्रातिपदिकप्रत्ययार्थीयो द्विधा, व्यक्तिरूपः, शक्तिरूपश्च। तयोर्व्यक्तिरूपो यथा—अजा, कुमारी, ब्रह्मबन्धुः, वृक्षः वृक्षौ वृक्षाः, इति। शक्तिरूपो यथा—वृक्षं, वृक्षेण, वृक्षाय, वृक्षात्, वृक्षे, वृक्षस्येति। एकपदार्थस्त्रिधा, वस्तुरूपः, अवस्तुरूपः, क्रियारूपश्च। तेषु वस्तुरूपो द्विधा, सत्त्वभूतोऽर्थः, असत्त्वभूतोऽर्थश्च। तयोस्सत्त्वभूतोऽर्थो यथा—औपगवः, छान्दसः, लाक्षिकः, यौष्माक इति। असत्त्वभूतोऽर्थो यथा—आस्तिकः, उपत्यका, प्रकटं, तत्रत्य इति। अवस्तुरूपोऽपि पूर्ववदेव द्विधा। तयोः सत्त्वभूतोऽर्थो यथा—अग्निवत्, पञ्चकृत्वः, सर्वदा, बहुश इति। असत्त्वभूतोऽर्थो यथा—न तरां, प्राह तरां, पचतितरां, पचतिरूपमिति। क्रियारूपो द्विधा, संक्षिप्तो, विक्षिप्तश्च। तयोः संक्षिप्तो यथा—आत्मनः पुत्रमिच्छति पुत्रीयति, श्येन इवाचरति श्येनायते, अभृशो भृशो भवति भृशायते, सेनया अभियाति अभिषेणयतीति। विक्षिप्तो यथा—कंसवधमाचष्टे कंसं घातयति, आरात्रिविवासमाचष्टे रात्रिं विवासयति, पुष्यचन्द्रयोगं जानाति पुष्येण चन्द्रं योजयति, उज्जयिन्याः प्रस्थितो माहिष्मतीसूर्योद्गमं प्राप्नोति माहिष्मत्यां सूर्यमुद्गमयतीति। अनेकपदार्थस्त्रिधा, एकपदार्थाश्रयः, उभयपदार्थाश्रयः, अन्यपदार्थाश्रयश्च। तत्रैकपदार्थाश्रयो द्विधा, पूर्वपदार्थाश्रयः, उत्तरपदार्थाश्रयश्च। तयोः पूर्वपदार्थाश्रयो यथा—उपकुम्भं, पुरुषव्याघ्रः, गोमतल्लिका, पूर्वकायः, राजदन्तः, प्राप्तजीविक इति। उत्तरपदार्थाश्रयो यथा—राजपुरुषः, यूपदारु, कष्टश्रितः, श्वलेभ्यः, ब्रह्मजातः, अनेक इति। उभयपदार्थाश्रयो द्विधा, एकाधिकरणो भिन्नाधिकरणश्च। तयोरेकाधिकरणो यथा—नीलोत्पलम्, अग्निस्तोकः, पुरुषोत्तमः, सर्वश्वेतः, सप्तर्षयः, खञ्जकुण्डः, इति। भिन्नाधिकरणो यथा—धवखदिरौ, अश्ववडवौ, दधिपयसी, धवखदिरपलाशाः, काकोलूकं, गवाश्वमिति। अन्यपदार्थाश्रयो द्विधा, सतद्गुणोऽतद्गुणश्च। तयोस्सतद्गुणो यथा—उन्मत्तगङ्गं, शस्त्रीश्यामा, सहस्राक्षः, शूलपाणिः, द्वित्राः, अर्धतृतीया इति। अतद्गुणो यथा—

ऊढरथः, चित्रगुः, दक्षिणपूर्वा, उष्ट्रमुखः, गुडप्रियः, प्रियगुड इति ।

अथ ये वृत्तिं वर्तयन्ति किं त आहुः परार्थाभिधानं वृत्तिरिति ? कः पुनरस्यार्थः ? किं परार्थस्याभिधानमाहोस्वित्परार्थमभिधानमिति ? उभयथाऽपि न दोषः ; यदा तावदेतावद्दर्शनमनेकमप्यर्थमेक एव शब्दः प्रत्याययति, तदा वाक्यावस्थायां शब्दान्तराभिधेयतया प्रतीतमर्थात्मानं वृत्तिर्विषये तदुपसर्जनपदमभिधेयभावेनोपादत्ते । तदेतद्विभक्तपदावस्थायामभिधानशक्तिप्रतिघाताद्वृत्तौ परार्थस्याभिधानं परार्थाभिधानमुच्यते । यदा पुनरेष पक्षः एकश्शब्दो अनेकमर्थं न प्रत्याययति तदा पुरो वार्तमेवार्थं वृत्तिविषये तान्युपसर्जनपदानि परार्थमुपाददते । व्यक्तमेवास्मिन्दर्शने परार्थाभिधानम् । तत्र द्वयी गतिः । विहाय वा प्रसिद्धमर्थसम्बन्धमुपसर्जनपदान्यर्थान्तरमुपाददीरन् । अवस्थित एव वा प्राच्येऽर्थेऽर्थान्तरमभिदधीरन् । द्वयमपि हीदमन्यत्र दृश्यते । तद्यथा— दधिकलशे दध्यपनीय क्षीरं निधीयते । जलं तु सिकताकुम्भे सहैवावतिष्ठते सिकतादिभिः । तदाह तेषां परार्थाभिधानं वृत्तिरिति ब्रुवतां किं जहत्स्वार्था वृत्तिराहोस्विदजहत्स्वार्थेति ? किञ्चातः यदि जहत्स्वार्था राजपुरुष आनीयतामित्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति । औपगवमानयेति चापत्यमात्रस्य । अथाजहत्स्वार्था । उभयोर्भिद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति । तदेवमुभयत्रापि दोषदर्शनादुभयाप्रतिपत्तिः । तत्रैकेषां दर्शनम् । उपात्तार्थपरित्यागेनार्थान्तरनिवेशीन्युपसर्जनपदानि ; यतोऽर्थान्तरपराधीनस्य शब्दस्य प्राच्यमेवार्थमनुविधीयमानस्यार्थान्तराभिधानमशक्यम् । तस्मादर्थान्तरमभिदधता परित्याज्यमनेनोपात्तमर्थवस्तु । तदाह— का पुनर्वृत्तिर्न्याय्या, जहत्स्वार्थेति युक्तं पुनर्यज्जहत्स्वार्था नाम वृत्तिस्स्यात्? बाढं युक्तम् । एवं हि दृश्यते । लोके पुरुषोऽयं परकर्मणि प्रवर्तमानः स्वं कर्म जहाति । तद्यथा— तक्षा राजकर्मणि प्रवर्तमानः स्वं कर्म जहाति । एवं च यद्राजा पुरुषार्थे उपगुश्चापत्यार्थे वर्तमानः स्वमर्थं जह्यात् ।

ननु च यथा तक्षा कोशसमाहरणसन्निधापनादौ राजकर्मणि व्याप्रियमाणः स्वव्यापारापरित्यागेन राजकर्मणोऽनुष्ठातुमशक्यत्वात् स्वं दारुच्छेदचतुरश्रीकरणादिव्यापारं जहाति, तथा यद्युपसर्जनमप्यर्थान्तरप्रत्यायनादौ परार्थे व्याप्रियमाणं स्वार्थापरित्यागेन परार्थाभिधानं कर्तुमशक्यमिति पूर्वोपात्तमर्थं विशेषणत्वादि जह्यात् । तदुक्तोदाहरणयोः पुरुषमात्रस्यापत्यमात्रस्य चानयनं प्राप्नोति । नैष दोषः । यद्यपि स्वार्थावसर्गेण अर्थान्तरमुपसर्जनपदान्यभिनिविशन्ते, तथाप्याधाय प्रधाने रूपभेदमुपगृहीतार्थातिशयनिबन्धनमुत्तरकालं स्वार्थमुज्झन्ति । अतस्तदा रूपभेदानुगतः पुरुषार्थो निवृत्तेऽप्युपसर्जनपदार्थे विशिष्ट एव प्रतीयते । न ह्यतिशयाधायिनिमित्तसनिमित्तसन्निधानकालमात्रानुवर्तिनस्तदाहिता विशेषाः । अपि तु निमित्तव्यवाये अप्यनुवर्तन्ते । तत्र यथा शरदर्करश्मिसंतापोद्भूतेनान्तश्शरीरतेजसा ज्वरस्समुदीर्यमाणो नातपस्पर्शवर्जनमात्रेण प्रतिक्रियते । यथा वा प्रदीप्ततेजस्संयोगप्रतिलब्धजन्मानो रूपरसगन्धस्पर्शविशेषाः

दूरोत्सारितेऽपि तेजसि यावदाधारमवतिष्ठन्ते, तथोपसर्जनपदार्थोपाहितः प्रधानरूपातिशयः तदर्थास्तमयेऽपि प्रयास्यविशेषावच्छेदनिमित्तं भवति । यदिवोपसर्जनश्रुतिमर्थविशेषभिधानसामर्थ्यवतीमवधृतवतः तदवसायोपहितसंस्कारवृत्तिलाभप्रापितजन्मा तदर्थपरिच्छेदः परित्यक्तार्थायामपि श्रुतौ रूपसामान्यादपहृतबुद्धेरनवगतार्थपरित्यागस्य प्रवर्तते । ततस्तदुपाहितविशेषं प्रधानमेवेति । ननु च यदि तस्या एव श्रुतेः प्रयोगदर्शनाभ्याससामर्थ्यात्तमेवार्थं प्रतिपद्यते कः स्वार्थपरित्यागः । नहि श्रुतौ तस्यां भस्त्रायामिवोपकरणविशेषाः कृतसन्निवेशाः पदार्थाः । किं तर्हि ते शब्दरूपदर्शनानुमेयाः, तदिहापि तथैवेति किमवहीयते स्वार्थस्य? नैवम्; निवृत्तेऽपि स्वार्थेऽन्वयतोऽर्थाः प्रतीयन्ते । तद्यथा— घृतघटस्तैलघट इति । निषिक्तेपि घृते तैले वा अनयोः घृतं तैलं वा घटविशेषणं भवति । अयं घृतघटोऽयं तैलघट इति । विषय उपन्यासो भवति । तत्र या च यावती चार्थमात्रा अङ्ग हि भवानग्नौ निष्टप्य तृणकूर्चौ प्रक्षालयितुं न गम्यते स विशेषः; यथा तर्हि मल्लिकापुटश्चम्पकापुट इति । निष्कीर्णास्वपि सुमनस्सु तत्सम्पर्कोपहितगन्धविशेषाद्यनुप्रवृत्तेः प्रतीयते व्यपदेशः । अयं मल्लिकापुटोऽयं चम्पकपुट इति । तथेहाप्यन्वयादुपसर्जनार्थः परित्यक्तोऽपि विशेषणं भविष्यति । अथवा जहदप्यसौ स्वार्थं राजशब्दो नात्यन्ताय जहाति । कश्चिदेव भागः स्वार्थस्यापि हीयते । कथं विरोधादेषस्वार्थमवजहाति? ततो यावतास्य प्रधानार्थोपयोगविरोधस्तावन्तमेवार्थं जह्यात् । तदाह— यः परार्थविरोधी स्वार्थः तं जहाति । नहि प्रधानार्थोपयोगिनः स्वार्थस्य त्यागे निदर्शनमस्ति । नहि राजकर्मणि प्रवर्तमानः तक्षा राजकर्मैव जहाति; नहि हीतहसितकण्डूयितानि । न चायमर्थः परार्थविरोधिविशेषणत्वं नाम । तस्मान्न हास्यति ।

ननु चोपसर्जनपदानि प्रधानार्थावच्छेदव्यापारावेशवन्ति । प्रधानोपकारिणं विशेषणभावं न जहतीत्युच्यते । अयमेव चोपसर्जनपदार्थानामर्थो यत्प्रधानमवाप्तरूपभेदमवगमयन्ति । तथाहि । राज्ञः पुरुष इति स्वामिविशेषसम्बन्धोपाहितभेदः पुरुषार्थोऽवगम्यते राजपुरुष इति । न चापदार्थरूपभेदप्रधानस्याधातुं तदनवहीयमानस्वार्थमेवोपसर्जनपदमिति । किमुच्यते जहत्स्वार्था वृत्तिरिति? एवं मन्यते पदस्य स्वातिशयप्रतिपत्तौ स्वाधीनत्वं, तस्य त्यागात् स्वार्थापहानम् । यदि चोपसर्जनपदं न स्वार्थेन प्रधानस्योपकुर्यात्, स्वरूपमेवास्य हीयेत । यतः परोपकारिताकारणकमेवोपसर्जनत्वं प्रयोगवैयर्थ्यं चोपसर्जनस्य प्रसज्यते । प्रधानस्योत्तरपदेनैव प्रतीतत्वात् । न चानर्थकानां परेण सम्बन्धो घटते, सामर्थ्यनिबन्धना समाससंज्ञा च नोपपद्यते । तस्मान्न सकलार्थपरित्यागः । किं तर्हि विशेषणतया स्वपदोपधीयमानरूपातिशयप्रतिपत्तियोग्यतामात्रमस्यापहीयते । ननु च परित्यक्ताशेषार्थमपि उपसर्जनपदमर्थविशेषाभिधायिनस्समुदायस्य वर्णवदङ्गभावमापत्स्यते? नैवम्; एवं हि प्रतीयमानः प्रधानार्थोपयोगी पदार्थः परित्यक्तो भावी । न च परित्यक्तस्वार्थेभ्य उपसर्जनपदेभ्यः प्रधानविशेषो विशेषणविशेष्यावच्छिन्नः समुदायो वा

प्रतीयते। न चाप्रतीयमानश्शब्दार्थो न्याय्यः कल्पयितुमिति यत्किञ्चिदेतत्। यद्यपि चायं समुदायः एवाव्यपदेश्यपूर्वापरभागो भागभेदानुयात इवावसीयमानः संबन्धी पदार्थद्वयोपहितभेदं ह्यर्थमभिधत्ते। तथापि तदधिगमोपायः पूर्वोत्तरविभागदर्शनम्। तत्र च वृत्तौ समर्थाधिकारः क्रियते समर्थनामभेदो भेदस्संसर्गो वा। इह राज्ञ इत्युक्ते सर्वस्वं प्रसक्तम्। पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। इहेदानीं राजपुरुषमानयेत्युक्ते राजपुरुषं निवर्तयति अन्येभ्यः स्वामिभ्यः। पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यः एवमेतस्मिन्नुभयतोऽवच्छिन्ने यदि जहाति कामं जहातु। न जातु चित् पुरुषमात्रस्यानयनं भविष्यति। ननु च पुरुष इत्युक्ते न स्त्रीत्येतावता संप्रत्ययेन भवितव्यम्। सत्यमेवमेतत्। यदा तु पुरुष आकारविशेषाद्द्रव्यान्तरसम्बन्धाद्वा स्वातन्त्र्येण निर्ज्ञात उपलब्धं तत्प्रत्येतदुच्यते। राज्ञो हि निर्ज्ञातार्थत्वात् परार्थायां प्रवृत्तौ सामान्यसंसर्गविषयः प्रातिपदिकार्थव्यतिरेक उपजायते। पुरुषस्तु निर्ज्ञातार्थात् स्वामिविशेषसंबन्धादवध्रियमाणः पूर्वमव्यतिरिक्तप्रातिपदिकार्थः प्रथमान्तः स्वामिविशेषस्थं सम्बन्धमनुभवति। तस्मिन् प्रतिलब्धाविभक्तौ थ उत्तरो व्यतिरेक उपजायते वाक्यार्थः स भवति। इहेदानीं राजा पुरुषं निवर्तयति अन्येभ्यः स्वामिभ्यः। तत्र योऽसौ भेदस्तत्सामर्थ्यं तन्निमित्ता च वृत्तिः भेदनिमित्तायां च वृत्तौ सत्यां वृत्त्यभिमुखस्य भेदमुपजनय्य स्वार्थो निवर्तते। यस्यापि न निवर्तते पुरुषस्य सोऽपि स्वामिनं भिनत्ति। एवमेतयोर्द्वयोरन्योन्यक्लृप्तौ सत्यामुभयतो व्यवच्छेदेन निर्ज्ञाते पुरुषविशेषे समुदायार्थे चान्यस्मिन् प्रादुर्भूते यदि राजार्थो निवर्तते कामं निवर्तताम्। प्राक् वृत्तेरकृतार्थस्य निवृत्तौ वृत्तिरेव न स्यात्। वृत्तिनिमित्ता च निवृत्तिः। तस्माददोषः। अपर आह पुरुष एव हि राजपुरुषो ब्राह्मणादिपुरुषश्च। तत्र राजा स्वाम्यन्तरनिवृत्तिमात्रं करोति। न त्वसौ राजार्थमेव निवर्तयति। स्वाम्यन्तरनिवृत्तौ तु कृतायां पुरुष एव राजपुरुषार्थमाहेति। अथान्यमतं नावस्थितार्थपरित्यागेन शब्दोऽर्थान्तरं उपादत्ते। न ह्यपौरुषेयसंबन्धोपहितनिवेशमर्थानात्मानं रूपदर्शनावसीयमानं शरीरं शब्दाः परित्यक्तुमुत्सहन्ते। यथा हि ते स्वरूपमसमर्थास्त्यक्तुं तथार्थमपि नैव योगक्षेममपहातुं क्षमन्ते। न हि जलमनलसंस्पर्शोपचीयमानस्पर्शातिशयमप्यात्मीयं स्नेहं जहाति। निमित्तविशेषसन्निधानोपपादिते पुनरेषामर्थान्तराभिधानसामर्थ्ये कामचारस्तस्मादभ्युच्चय एवार्थान्तरस्य वृत्तावुपसर्जनपदानां प्रधानोपकारातिशयः। प्रधानोपकारस्तु स्वामिविशेषावच्छेदः पुरुषार्थस्य। स चापरित्यागेनैव स्वार्थस्य कर्तुं शक्यते। न ह्यत्यन्तमपाकीर्णस्वार्थं शब्दरूपातिशयमर्थान्तरे निवेशयितुं शक्नोति। रूपातिशयनिवेशनायां पदार्थनिबन्धनत्वादनङ्गीकृतस्वार्थानि च यान्युपसर्जनपदानि प्रधानार्थनिवेशीनि तमेवार्थं शब्दान्तरेण प्रतिपादयन्ति। न तैरतिशयः प्रधानस्य प्रतिपादितो भवति। ततश्च राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति। औपगवमानयेति चापत्यमात्रस्येति। तदवधार्यामहे; अथवा पुनरस्त्वजहत्स्वार्था वृत्तिः।

युक्तं पुनः यदजहत्स्वार्था नाम वृत्तिस्स्यात्? बाढं युक्तं ; एवं दृश्यते लोके भिक्षुकोऽयं द्वितीयां भिक्षामासाद्य पूर्वां भिक्षां न जहाति, सञ्चयायैव यतते।

ननु चोक्तमुभयोर्विद्यमानस्वार्थयोः द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। कस्याः पुनर्द्विवचनं प्राप्नोति? प्रथमायाः। न प्रथमासमर्थो राजा। षष्ठयास्तर्हि प्राप्नोति। न षष्ठीसमर्थः पुरुषः। प्रथमाया एव तर्हि प्राप्नोति। ननु चोक्तं न प्रथमासमर्थो राजाभिहितः, सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थस्संपन्नः। तत्र प्रातिपदिकार्थे प्रथमे प्रथमाया एव द्विवचनं प्राप्नोति। तत्र यथा धवखदिराविति पदार्थान्तरोपचये सङ्ख्याभेदोपजनकादेकवचनं प्रवर्तते तद्वदिहापि राजपुरुष इति पुरुषशब्दाद्द्विवचनं प्राप्नोति। नैवम्; धवखदिरावित्यवयवार्थसमवेतस्सङ्ख्याविशेषः, ततोऽवयवात्परस्या विभक्तेः कारणम्। इह तु एक एकपुरुषार्थस्तदेकवचनमेव पुरुषशब्दे न्याय्यः। न हि राजशब्देनासम्बध्यमाना विभक्तिस्तदर्थसमवेतां सङ्ख्यामभिधेयत्वेन अपेक्षते। द्वन्द्वपदानां तु प्रत्यवयवमनेकार्थाभिधानसामर्थ्यादनेकवचनं न विरुध्यते। अनुत्तरपदेष्वपि तर्हि तत्प्राप्नोति। प्राप्नोतु। 'सुपो धातुप्रातिपदिकयो' रिति लोपो भविष्यति। अथायमभिप्रायः। समुदायात्परा विभक्तिः, अतस्समुदायार्थसमवायिनीं सङ्ख्यामभिधत्ते। समुदायस्य चावयवात्मकत्वादवयवभेदनिबन्धनस्सङ्ख्याभेदः निमित्तमनेकवचनस्येति। तदेतत्क युज्यते? यत्र पदसमुदायेनार्थसमुदायः प्रत्याय्यते, यथा द्वन्द्वपदे। यत्र तु विशेषणविशेष्यभावावच्छिन्नमर्थान्तरमेवाभिधेयमवयवैः समुदायेनोपादीयते, यथा बहुव्रीहिपदे लोहितवसनः चित्रवेष्टन इति। तत्रावयवार्थाहितभेदस्य पदार्थस्य समुदायेनाभिधीयमानत्वात्। ततः परा विभक्तिस्समुदायार्थनिवेशिनीं सङ्ख्यामुपादत्ते। तदाह सङ्घातस्यैकार्थ्यान्नावयवसङ्ख्यातस्सुबुत्पत्तिः। अत्र हि समुदायाद्राजपुरुष इत्येतस्मात् विभक्त्योत्पत्तव्यम्। तेन समुदायेनैवैकार्थपिण्डोऽवयवार्थशक्त्यनुगृहीतः पृथगव्यपदेश्योऽवयवशक्तिरभिधीयते। तस्मिंश्च सङ्घातार्थे स्वामिविशेषपरिच्छिन्ने निवृत्तस्वाम्यन्तरसंबन्धे एकत्वं समवेतं, तेन विद्यमानायामप्यवयवसङ्ख्यायां तदाश्रया सुबुत्पत्तिर्न भविष्यति। तदेवमजहत्स्वार्थायां वृत्तौ तदुपसर्जनपदं स्वार्थातिशयावच्छिन्नं प्रधानार्थमभिदधाति। ततो विशेषणविशेष्यभूतार्थद्वयाभिधानमुपसर्जनस्य वृत्तौ भवति। यत्तु प्रधानार्थसंभवविशेषणं पाटलिपुत्रकादि तदस्य निवर्तते। अतो वृत्तिविषये राजार्थः तैर्विशेषणैर्नावच्छिद्यते। यदा तु वाक्यावस्थायामुपसर्जनं पदार्थः प्रधानसंस्पर्शाविभक्तः केवल एव भवति तदा युक्तमेव यद्विशेषणभावमनुभवति, यथा राज्ञः पाटलिपुत्रकस्य पुरुष इति। यदि वा—

उपायमात्रान्नानात्वं समूहस्त्वेक एव सः। विकल्पाभ्युच्चयाभ्यां तु भेदसंसर्गकल्पना॥

तत्रात्यन्ताजहत्स्वार्थायां वृत्तौ पुरुषशब्दे पुरुषार्थाभिधायिनि सर्वशब्देषु च प्रतिनियमार्थाभिनिवेशिषु भेद एव सामर्थ्यम्। अजहत्स्वार्थायां तु वृत्तौ पुरुषशब्दे पुरुमात्राभिधायिनि

सर्वशब्देषु च प्रतिनियतार्थाभिनिवेशिषु संसर्ग एव सामर्थ्यम् । नात्यन्तमजहत्स्वार्थायां वृत्तौ पुरुषादिषु संबन्धिशब्देषु सर्वशब्दानां चासमर्थयोनित्वाभ्युपगमे समासौ भेदसंसर्गौ सामर्थ्य-मित्याख्यायते ।

वृत्तिं वर्तयतामेवमबुधप्रतिपत्तये । भिन्नाः सम्बोधनोपायाःपुरुषेष्वनवस्थिताः ॥

नहि परमार्थतः पराकृतपूर्वोत्तरविभागसंस्पर्शेन सङ्घातेनातिशयवत्यर्थेऽभिधीयमाने भेदसंसर्गदर्शनावकाशः कश्चिदस्ति । तस्मादसत्येन भेदसंसर्गदर्शनेन सत्यस्समुदायार्थो निरूप्यत इति ।

पदार्थस्त्रिधा, जातिर्व्यक्तिराकृतिश्च । तत्र भिन्नेष्वभिन्नप्रत्ययनिमित्तं जातिः । सा त्रिधा, द्रव्यजातिर्गुणजातिः क्रियाजातिश्च । तासु द्रव्यजातिर्द्विधा, संस्थादिव्यङ्ग्या उपदेशव्यङ्ग्या च । तयोराद्या यथा— गौः पदा न स्प्रष्टव्या, संपन्नो व्रीहिस्सुभिक्षं करोतीति । द्वितीया यथा— ब्राह्मणो न हन्तव्यः, कठः प्रवक्ता भवतीति । गुणजातिर्द्विधा, प्रत्यक्षा अनुमेया च । तयोराद्या यथा— श्वेतं छागमालभेत, अम्लो रसः पाचनं दीपनीय इति । द्वितीया यथा— दक्षः श्रियं अधिगच्छति, कामी मण्डनप्रियो भवतीति । क्रियाजातिर्द्विधा, सामान्यरूपा विशेषरूपा च । तयोराद्या यथा— रैपोषं पुष्यति, नागरकवृत्तं वर्तेतेति । द्वितीया यथा— अष्टका कृता, विश्वजिता यजेतेति । जात्याधारो व्यक्तिः । सा त्रिधा, द्रव्यव्यक्तिः, गुणव्यक्तिः, क्रियाव्यक्तिश्च । तासु द्रव्यव्यक्तिर्द्विधा, शुद्धा मिश्रा च । तयोराद्या यथा– गां बधान, गां दोग्धि, त्वं पचसि, अहं पचामीति । द्वितीया यथा—

मगधेषु स्तनौ पीनौ कलिङ्गेष्वक्षिणी शुभे । बाहू प्रलम्बावङ्गेषु वङ्गेषु चरणौ मृदू ॥

इति । गुणव्यक्तिर्द्विधा, मुख्या गौणी च । तयोराद्या यथा— श्वेतिमा रूपं पश्यामि, मधुरं रसमास्वादयामि, सुगन्धि गन्धमाजिघ्रामि, शीतं स्पर्शमनुभवामीति । द्वितीया यथा—

'तीव्रः प्रतापो मधुरं वचस्ते यशोऽवदातं सुरभिः स्वभावः । इति ।

क्रियाव्यक्तिर्द्विधा, कर्त्राश्रिता, कर्माश्रिता च । तयोराद्या यथा— आस्ते देवदत्तः, प्रस्नुते गौस्स्वयमेवेति । द्वितीया यथा— पच्यते ओदनः, लूयते केदारः स्वयमेवेति । व्यक्तेः प्रतिरूप-माकृतिः । सा त्रिधा, द्रव्याकृतिः, गुणाकृतिः, क्रियाकृतिश्च । तासु द्रव्याकृतिर्द्विधा, श्रुतदृशा, दृष्टदृशा च । तयोराद्या यथा– अस्यां दृषदि वासुदेवः क्रियताम्, अस्यां भित्तौ कामदेवो लिख्यताम्, अत्र ध्वजे हनूमान् बध्यतामिति । द्वितीया यथा— अमी पिष्टपिण्डाः सिंहाः क्रियन्ताम्, अयं कूपे चन्द्रमाः, अयमाकाशे देवपथ इति । गुणाकृतिर्द्विधा, प्रत्यक्षाश्रया, अनुमेयाश्रया च । तयोराद्या यथा– वंध्रीका दर्शनीयो मनुष्यः, चञ्चा रमणीयः, तदेतद्घुणाक्षरं द्वितीया यथा— अहो दुःखं रूपं लेख्यस्य, विदग्ध आकारश्चित्तस्य, सौम्या मूर्तिः प्रतिमाया इति ।

क्रियाकृतिर्द्विधा, कायक्रियाधारा, मनःक्रियाधारा च । तयोराद्या यथा—ऋज्वागतमालेख्यम्, साचिमुखवर्तकः परावर्तकमुखस्थानमिति । द्वितीया यथा— भीता दृष्टिः, त्रस्त आकारः, सविकारं रूपमिति । ननु च जातिरेव शब्दार्थ इति जैमिनीयाः । जैमिनिर्हि,

जातिमेवाकृतिं प्राह व्यक्तिराक्षिप्यते यया । सामान्यं तच्च पिण्डानामेकबुद्धिनिबन्धनम् ॥

ननु च, सास्नादीनां सन्निवेश आकृतिः । न चासौ जैमिनिमतेऽपि न पृथगस्ति । यदाह भाष्यकारः– अथ गौरित्यत्र कश्शब्दार्थः सास्नादिविशिष्टा आकृतिरिति । ततश्च सैव शब्दार्थो भवति । नैवम्; एवं सति संस्थानस्य प्रतिव्यक्तिभिन्नत्वात्, आनन्त्यव्यभिचाराभ्यां संबन्धस्य ग्रहीतुमशक्यत्वात् । न च विद्यमानायामप्याकृतौ गामानयेत्युक्तश्चित्रपुस्तमयीं कश्चिद्गामानयति । ननु जातिपक्षेऽपि जातेस्सर्वगतत्वात्किमिति मृद्गवकानयनं न भवति; सास्नादिमतः प्राणिन एव गोत्वाभिव्यञ्जकत्वात् । अतो नाकृतिर्जातेः पृथक्छब्दार्थ इति । व्यक्तिरपि न शब्दार्थः, सा हि व्यक्तिमात्रं वा स्याद्विशिष्टा वा । न तावद्व्यक्तिमात्रं, अश्वादिव्यक्तावपि गौरिति ज्ञानाभिधानयोः प्रसङ्गात् । अथ गोत्वविशिष्टा । तद्गोत्वमवगतमनवगतं वा विशेषणं भवति, नानवगतमति-प्रसङ्गात् । अवगमस्तु शब्दात् प्रमाणान्तरतो वा । न प्रमाणान्तरतः, तदसन्निधानात् । शब्दतस्तु गोत्वावगमे तदेव प्रथमतश्शब्दोऽभिदधाति, नागृहीतविशेषणा विशेष्ये बुद्धिरिति न्यायात् । ननु जातिं विशेषणत्वेन विशेष्यत्वेन च व्यक्तिं गोशब्दो वक्ष्यति; न शक्नोति वक्तुमतिभारात् । तदाह—

विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे ॥ इति ॥

ननु दण्ड्यादिशब्दविशेषणं जातिविशेष्यं च व्यक्तिं गोशब्दादेव प्रतिपत्स्यामहे । तत्को स्यातिभारः? विषम उपन्यासः । तत्र हि प्रकृतिप्रत्ययविभागेन प्रकृत्यर्थविशिष्टः प्रत्ययार्थः अवगम्यते । गोशब्देन तु नैवमिति । न च व्यक्त्यवगतौ गतिरन्या नास्ति, येनोभयाभिधानं कल्प्यते । अविनाभावबलेन जातिप्रतीतावपि तत्प्रतीतिसिद्धेः । यदि च व्यक्तिश्शब्दार्थो भवेत्, व्यक्त्यन्तरे गोशब्दो न प्रयुज्यते, न च न प्रयुज्यते, तस्मात्सर्वव्यक्तिसाधारणो जातिरस्यार्थः, न व्यक्तिः । ननु च, व्यक्त्यन्तरमपि व्यक्तिरेव । सोऽयं व्यक्तौ गोशब्दः प्रयुक्तो न सामान्ये । नैवम् । एवं सति कर्कादिव्यक्तावपि प्रसङ्गः । यत्रास्य प्रयोगो दृष्टस्तत्र प्रयुज्यत इति चेत्, अद्य जातायां गवि प्रायोजि । अपि च व्यक्तौ पदार्थे इयमियं वा गौरिति प्रतीतिस्स्यात्; न पुनरियमियं चेति । न च आकृताविव व्यक्तावप्यानन्त्यव्यभिचाराभ्यां संबन्धग्रहणमुपपद्यत इति । कथं पुनरिमा जातयः परस्परतो व्यावर्तमानशरीरा भवेयुः । रूपमेव ह्यासां परस्परतो व्यावर्तते । विषयरूपानुरोधी च प्रत्ययस्स्वाकारभेदेन तदवच्छिनत्ति । तदनुविधायिनश्च शब्दास्तथैव तदुपाददते । एवं तर्हि नित्यत्वादासां तद्रूपावसायस्सदा प्रसज्येत । नैवम्;

असन्नियताश्रयाणामनभिव्यक्तेः । यद्येवमभिव्यञ्जकवशादवसायस्तासामिति सोपव्यञ्जनाश्शब्दैरभिधीयेरन् । तन्न । यथा काचादर्शोदकादिषु प्रतीयमानभेदो मुखादिरर्थः काचादिदर्शनापेक्षो न प्रतीयते । न च काचादिभिरुपदर्शितमर्थमभिदधानाः शब्दाः काचादीनुपाददते, तथा व्यक्तिभिरुपदर्शितरूपविभागा जातयस्ताभिरसंस्पृष्टा एव शब्दैः प्रत्याय्यन्ते । कथं पुनराश्रयाश्शब्देन असंस्पृश्यमानभेदा अपि जातिभेदावगमाय कल्पन्ते । यथा चक्षुरादयोऽप्रतीयमाना अपि रूपादिविषयविशेषप्रतिपत्तये । तदुक्तं—

यथा जलादिभिर्व्यक्तं मुखमेवाभिधीयते। तथा द्रव्यैरभिव्यक्ता जातिरेवाभिधीयते ॥
यथेन्द्रियगतो भेद इन्द्रियग्रहणादृते । इन्द्रियार्थेष्वदृश्योऽपि ज्ञानभेदाय कल्पते ॥
विनात्मरूपग्रहणाद्व्यञ्जिका व्यक्तयस्तथा । सामान्ये ज्ञानभेदानामुपयान्ति निमित्तताम् ॥

इति । व्यक्तिरेव शब्दार्थ इति व्याडीयाः । शब्दो हि पदं, तच्च विभक्त्यन्तमेव न प्रातिपदिकमात्रम् । विभक्तिः प्रातिपदिकादुच्चरन्ती प्रातिपदिकार्थगतमेव स्वार्थमाचष्टे । युगपच्च त्रितयं विभक्त्यर्थः–लिङ्गं सङ्ख्या कारकं च । न चैतत्त्रितयं प्रातिपदिकार्थे जातावन्वेति ; न हि जातेः कारकत्वं, अमूर्तत्वात् । न सङ्ख्यासम्बन्धित्वमभेदात् । न स्त्रीत्वादिसामान्ययोगो निस्सामान्यत्वात् ।

नन्वात्मनीयसामान्ये कारकत्वं भविष्यति । कक्ष्यान्तरितमित्येष युक्तो वैभक्तिकोन्वयः ॥

नैतत्सारम् । अमूर्तस्याप्यात्मनो ज्ञानप्रयत्नादियोगे कारकत्वमुपपद्यते । जातेस्तु न मनागपि व्यापारसंस्पर्श इति ।

ननु च व्यक्तिलक्षणया सर्वमुपपद्यते । नैवम् ; लक्षणा हि तत्र भवति, यत्र सकृत्प्रयुक्तं पदं किञ्चनार्थमभिधत्ते ; भूयश्चानुपपद्यमानमर्थान्तरं लक्षयति । लक्षिते च शक्तिसङ्ख्यादिकं निवेशयति । अत्र तु नान्यथानुपपत्त्यादि संवेद्यते । न च व्यक्तिप्रतीतिर्व्यवहितेति केचिन्मन्यन्ते । व्यक्तिमेव च शक्तिसङ्ख्यानुरञ्जितां कार्ययोगिनीं पश्यामः । अत एव चालम्भनप्रोक्षणविशसनादयो जातौ न विधीयन्ते । न च षट् देयाः द्वादश देयाः चतुर्विंशतिर्देया इति भेदसङ्ख्यया जातिर्युज्यते । अपि तु व्यक्तिरेवैनं भारमुद्वहति । किञ्च जातौ पदार्थे 'यदि पशुरुपाकृतिः पलायेतान्यं तद्वर्णं तद्वयसमालभेते' ति पशोरन्यत्वं न युज्यते ; जातेरभेदात् । अपि च,

चयापचयसङ्घातस्वस्वामित्वादिकल्पनाः । यान्ति जात्यभिधेयत्वपक्षे साक्षान्न सङ्गतिम् ॥

एतेन तुल्ययोगक्षेमत्वादाकृतिरपि न शब्दार्थ इत्युक्तं भवति ; तस्या अपि प्रोक्षणादिक्रियासाधनत्वायोगात् । न हि सन्निवेशः प्रोक्ष्यते आलभ्यते विशस्यते वा । ये च सङ्ख्यायोगादयः

चयापचयादयो वा ते जातावाकृतावपि न युज्यन्ते । किञ्च आकृतिवचनत्वे गोशब्दस्य शुक्लादिगुणवाचिभिः पदान्तरैस्सामानाधिकरण्यं न प्राप्नोति । न हि शुक्लादयो गुणाः आकृतिवृत्तयः । अपि तु व्यक्तिवृत्तय इति । न चैतद्वाच्यं व्यक्तिलक्षणाद्वारकमिदं भविष्यतीति लक्षणा हि मुख्याभावे प्रवर्तते । न खलु ऋजौ वहति वर्त्मन्यनृजुरध्वाऽऽश्रयितव्यो भवति । न चानन्त्यव्यभिचाराभ्यां सम्बन्धाग्रहणमिति वक्तव्यम् । तद्धि जातिमाकृतिं वोपलक्षणमाश्रित्य भविष्यति । यद्येवमुपलक्षणभूतां जातिमाकृतिं वाभिधाय शब्दो व्यक्तिमभिधत्ते । नैवम्; आस्तामभिधीयमानः विद्यमानमपि प्रतिपन्नमात्रमेव उपलक्षणं भवति । तद्यथा–कतमद्देवदत्तगृहं, यत्रायं काक इति । अत्र हि न काकलक्षणोपलक्षणद्वारेण प्रवृत्तो देवदत्तगृहशब्दः काकार्थमभिधत्ते । उपरते वा काकसंबन्धे तद्व्यवच्छिन्नवस्तुनिवेशितां जहाति । एवं जात्युपलक्षणद्वारेण व्यक्तौ प्रवर्तमानश्शब्दो जातिं च नाभिधास्यति । तद्व्यवच्छिन्नगोव्यक्तिविनिवेशं च न हास्यति । एतेनाकृतिरपि शब्देनानभिधीयमानैव व्यक्तिमुपलक्षयतीति लक्ष्यते । तद्यथा—कतरत्सुवर्णं, य एष रुचकः, स्वस्तिको वर्धमानक इति । न ह्यत्र रुचकाद्याकारद्वारेण प्रवृत्तस्सुवर्णशब्दो रुचकाद्याकारमभिधत्ते । उपरतेषु रुचकाद्याकारेषु तद्व्यवच्छिन्नस्वर्णार्थपरतां परित्यजति । तदुक्तं–

अध्रुवेण निमित्तेन देवदत्तगृहं यथा । गृहीतं गृहशब्देन शुद्धमेवाभिधीयते ॥
सुवर्णादि यथा युक्तं स्वैराकारैरुपाधिभिः । रुचकाद्यभिधानानां शुद्धमेवैति वाच्यताम् ॥
तथोपलक्षणे जातावाकृतौ वा समाश्रिते । व्यक्तयो यान्ति शब्दानां शुद्धा एवाभिधेयताम् ॥

एतेन यदुक्तं व्यक्त्यभिधानपक्षे सर्वे शब्दाः सर्वार्था भवेयुरिति तदपि निरस्तं भवति । तथा हि; यथा चक्षुरादिशब्दानामशेषरूपादिप्रकाशनसामर्थ्यं नलिकादिसुषिरवर्त्मनि युक्तं दर्शनस्य तदवकाशावस्थितरूपभेदोपरुद्धतया विषयान्तरेषु न विप्रकीर्यते तथा जात्याकृतिभ्यामवरुद्धविषया गवादिशब्दानामभिधानशक्तिर्नाश्वादिष्वतिप्रसज्यत इति । उक्तं च,

आकारैश्च व्यवच्छेदात्सार्वार्थ्यमवरुध्यते । यथैव चक्षुरादीनां सामर्थ्यं नलिकादिभिः ॥

यच्चोक्तं—यथावादिभिरादर्शैरभिव्यक्ताश्चन्द्रादय एव चन्द्रादिशब्दैरभिधीयन्ते । यथा चेन्द्रियभेदग्रहणमन्तरेणापि रूपाकारादिविषयज्ञानभेदो भवति, तथा व्यक्तिभिरुपव्यञ्जिता जातय एव गवादिशब्दैरभिधीयन्ते । व्यक्तिग्रहणे च तदुपव्यञ्जना जातिर्ग्रहीष्यति । तदपि न सम्यक् । यदा तावत्प्रतिबिम्बमुदकादिषु भावान्तरमेवोपजायत इति दर्शनं, तदा तु रूपभेदानुपातिनः शब्दाः किमिति उदकादीनुपाददीरन् । यतो नोदकादयस्तदानीं चन्द्रादीनामुपव्यञ्जनमपि तु रूपजननकारणम्; न च कार्यवचनात् शब्दाः कारणसंस्पर्शमनुभवन्ति । यदा तु दर्शनविप्लवः स तादृश इति प्रतिपत्तिः, तदा दूरोत्सारितावकाशो व्यङ्ग्यव्यञ्जकभावः । यदा तर्हि जलाद्या-

दर्शप्रतिघातात् परावृत्ते चक्षुषि स्ववक्त्रवच्चन्द्रादयोऽपि दृश्यन्त इति दर्शनं तदैतदुपपत्स्यते । तदाह्युदकादिवत् सन्निहितमुपव्यञ्जनं रूपभेदेन जातिमभिव्यक्तरूपभेदां दर्शयति । तदेव च शब्दोऽभिधत्ते । एतदप्यव्यभिचरितोपव्यञ्जनायत्तदर्शनजातयः कथं विनोपव्यञ्जनैः प्रतीयन्त इति पर्यनुयोगेनातिचतुरश्रं ; चन्द्रादीनामन्यथापि दर्शनोपपत्तेः । एवं जातिभेदप्रतिपत्तावपि यथा दर्शनादीन्द्रियायत्तोदयाः नीलाद्यर्थावसायाः कारणभेदमनुपरिवर्तन्ते । नैवम्; जातिपरिच्छेदाः व्यक्तिरूपप्रतिबन्धोत्पादाः, येन तद्भेदमनुविदध्युः । ततश्च गोत्वादयोऽपि परस्परतो न व्यावर्तेरन् । संवेद्यमानभेदश्च पदार्थः कथमकस्मादेक इति श्रद्धीयते ?

व्यक्तेरेव पदार्थत्वं तस्मादभ्युपगम्यताम्। तथा च बुद्धिस्तत्रैव श्रुतशब्दस्य जायते ॥
येषामर्थेषु सामान्यं न संभवति तैःपुनः । उच्यते केवला व्यक्तिराकाशादिपदैरिव ॥
एवं डित्थादिशब्दानां संज्ञात्वविदितात्मनाम् ।
अभिधेयस्य सामान्यशून्यत्वाद्यक्तिवाच्यता ॥
ये पुनः कल्पितानेकभेदवृत्तिं प्रचक्षते । वाच्यं तत्रापि सामान्यमतीव ग्राहयन्ति ते ॥
न हि डित्थत्वसामान्यं दृश्यते गगनत्ववत् ।
कल्पनायाश्च नाभूमिः काचिदस्ति विपश्चिताम् ॥ इति ॥

आकृतिरेव पदार्थ इति विन्ध्यवासिमतगन्धीयाः ।

तत्राकृतिपदेनेह संस्थानमभिधीयते । लोके शास्त्रे च दृष्टत्वान्न जातिर्जैमिनीयवत् ॥

लोके यथा— यत्राकृतिस्तत्र गुणा वसन्तीति । शास्त्रे यथा—

आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् ॥ इति ॥

उभयत्रापि चाकृतिशब्देनावयवसन्निवेशविशेष उच्यते । वृद्धाश्च व्यवहरन्तो यत्रार्थे यत्पदं प्रयुञ्जते स तस्यार्थो भवति । तत्र यदेष गोशब्दः सास्नादिमति प्रयुज्यते न केसरादिमति तदयमसाधारणसन्निवेशविषयतां द्योतयति । प्रत्यक्षविषये च गौरित्यादिपदं प्रयुज्यते । प्रत्यक्षं चाकृतिविषयम् । अश्वपिण्डसन्निवेशाद्धि विलक्षणो गोपिण्डसन्निवेश इन्द्रियेण प्रतीयते । तत्कृतमेव वस्तूनामितरेतरवैलक्षण्यात् । अतः प्रत्यक्षविषये गौरित्यादिपदं प्रवर्तमानमाकृतावेव प्रवर्तितुमुत्सहते । अपि च श्येनचितं चिन्वीतेति न जातिश्चीयते, न व्यक्तिः ; अपि तु आकृतिरेव । प्रदीपप्रवाहादीनां च शब्दानामाकृतिरेवार्थोऽभ्युपेयः । न ह्येषामर्थेषु व्यवस्थितं जातिरूपं व्यक्तिरूपं वा समस्ति । यदि चाकृतिश्शब्दार्थो न भवेत्, कथमिव गवादिशब्दैः गवाद्याकारमेव ज्ञानं जन्येत ? अपि तानेव शाटकानाच्छादयामो ये पाटलिपुत्रे, तानेव शालीन्भुञ्जामहे ये मधुरायामिति योग्यमेवंप्रकारो व्यवहारः, स आकृतावेव पदार्थे

सङ्गच्छते । यच्च व्रीह्यादेर्मुख्यस्याभावे नीवारादिभिः प्रतिनिधिभिः कर्म समाप्यते तदाकृतेः अशब्दार्थत्वे समापितमप्यङ्गहीनत्वादफलमेव प्राप्नोति । नीवारादौ व्रीह्यादिजातिव्यक्त्योरभावात् । यश्चायमर्चादिप्रतिकृतौ वासुदेवादिशब्दप्रयोगः, सोऽप्याकृतावेव पदार्थे युज्यते । किञ्चात्यन्तमदृष्टेष्वप्यर्थेषु शब्दादाकारविषयः प्रत्यय उपजायमानो दृश्यते । तद्यथा– इन्द्रस्कन्दो वैश्रवणः इति । तच्चाकृतेरेव शब्दार्थत्वमुपपद्यते । सम्बन्धग्रहणं चास्या जातिवदुपपत्स्यते । समस्तगवीष्वपि गोसंस्थानस्यैकरूपत्वात् मुख्यगौणभावे तु प्रसिद्धिरप्रसिद्धिश्च नियामिका भविष्यति । प्रोक्षणादिक्रिया शुक्लादिगुणयोगश्च व्यक्तिद्वारा आकृतेरुपपत्स्यते । न चामूर्तत्वादाकृतेरक्रियाङ्गत्वं, अमूर्तानामपि गुणकर्मणां क्रियाङ्गत्वात् । अरुणया क्रीणाति अभिक्रामं जुहोतीति । किञ्च,

यथाभूतेन्द्रियोत्पाद्यमात्मकर्तृकमिष्यते । तथा तल्लक्षितव्यक्तिसाध्यं तत्साध्यमुच्यते ॥

तस्मादाकृतिः पदार्थ इति । कथं तर्ह्याचार्याणां मतविरोधो जातिर्व्यक्तिराकृतिश्च पदार्थ इति गवादिशब्दैस्तद्वतोभिधानात् ? ननु कोऽयं तद्वान्नाम । तदस्यास्तीति तद्वानिति विशेष एवाकारसामान्यवानुच्यते । विशेषवाच्यत्वे चानन्त्यव्यभिचारौ तदवस्थौ । सामान्यं च शब्देनानुच्यमानं नोपलक्षणं भवति । उभयाभिधाने च शब्दस्यातिभार इत्युक्तम् । उच्यते, नेदन्तया निर्दिश्यमानः शाबलेयादिर्विशेषस्तद्वान् । किन्तु सामान्याश्रयः कश्चिदनुल्लिखितशाबलेयादिविशेषः तद्वानित्युच्यते । सामान्याश्रयत्वाच्च नानन्त्यव्यभिचारयोस्तत्रावकाशः । न च विशेषणमभिधाय विशेष्यमभिदधाति शब्द इत्युपगच्छामः । येनैनमतिभारेण पीडयेम । सामान्याश्रयत्वमात्रे सङ्केतग्रहणात् तावन्मात्रं वदतः शब्दस्य कोऽतिभारः ? किञ्च—

प्रत्यक्षं न च निष्कृष्टजात्यंशपरिनिष्ठितम् । तद्गोचरप्रवृत्तश्च शब्दस्तत्कथयेत्कथम् ॥
युगपन्ननु संवित्तिर्विशेषणविशेष्ययोः । प्रत्यक्षेऽपि न दृष्टैव न च युष्माभिरिष्यते ॥
कार्यकारणभावो हि तद्धि यो भवतां मते । तस्माद्विशेषणे जातौ पूर्वमिन्द्रियजा मतिः ॥
पदादपि तदायत्तसम्बन्धज्ञप्त्यपेक्षिणः । तत्रैव बुद्धिरित्येवं न व्यक्तेरपि वाच्यता ॥

उच्यते, प्रत्यक्षे तावद्द्वयोरपि विशेषणविशेष्ययोः इन्द्रियविषयतासामान्ये संयुक्तं समवायादीन्द्रियं प्रवर्तमानं विशेषणवद्विशेष्यमपि विषयीकरोति । न च सामान्यं प्रत्यक्षं विशेषोऽनुमेय इति व्यवहारः । एवं हि गुणमात्रग्राहिणीन्द्रिये गुणिनोऽनुमेयत्वं स्यात् । न चैवमस्ति । तस्माद्विशेष्यपर्यन्तं प्रत्यक्षं, तथापदमपि तत्तुल्यविषयं न सामान्यमात्रनिष्ठमिति युक्तम् । यत्तु,

सामान्यांशादपोद्धृत्य पदं सर्वं प्रवर्तते ॥

इति केवलव्यक्त्यभिधाने सत्यानन्त्यव्यभिचारभयादुच्यते । तद्वदभिधाने तु न तदुभयमस्तीति न शुद्धजात्यभिधेयतया शब्दव्यापारः सङ्कोचनीयः । ननु सर्वात्मना प्रत्यक्षतुल्यविषयश्चेच्छब्दः प्रतिपत्तिसाम्यं प्रसजेत् । न च शब्दादिन्द्रियाच्च तुल्ये प्रतिपत्ती भवतः । तदुक्तम् ।

अन्यथैवाग्निसंयोगाद्दाहं दग्धोऽपि मन्यते । अन्यथा दाहशब्देन दाहार्थस्संप्रतीयते ॥

उच्यते, परिहृतमेतत् सकलविशेषग्रहणाग्रहणाभ्यां प्रतिपत्तिविशेषसिद्धेः । नैतावता सामान्यमात्रनिष्ठः शब्दो भवति । अपि च निष्कृष्टसामान्यांशवचनत्वे गोशब्दाद्गोत्वशब्दाच्च तुल्ये प्रतिपत्ती स्यातां । गौः शुक्ल इतिवच्च गोत्वं शुक्लमिति बुद्धिः स्यात् । चातुर्वर्ण्यादिवच्च स्वार्थ एव गोशब्दात् भावप्रत्ययस्त्वतलादिः स्यात् । अथ मन्येथाः आक्षिप्तव्यक्तिकां जातिं गोशब्दो वक्ति, भावप्रत्ययान्तस्तु निष्कृष्टामिति । तदनुपपन्नम्, अनाक्षिप्तव्यक्तिकायाः क्वचिदपि जातेरदर्शनात् । अथ गोशब्दश्रवणवेलायां न व्यक्तिसंस्पर्शशून्या जातिरवगम्यते । भावप्रत्ययान्ते तु गोशब्दे श्रुते तच्छून्या शुद्धासौ प्रतीयत इति यद्येवमागतोऽसि मदीयं पन्थानं, आश्रयवती चेज्जातिरुच्यते जात्याश्रय उक्त एव भवति नान्यथा हि साश्रयवस्तुक्ता स्यात् । तदाश्रयपरिहारेणाश्रयिसामान्यमात्रविवक्षायां त्वतलादयः प्रयुज्यन्ते । तथा चाहुः, यस्य गुणस्य हि भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति गुणस्य भावाद्द्रव्ये शब्दनिवेशइत्यस्तत्पक्षसाक्षीण्यक्षराणि । सामानाधिकरण्यं च तत्रैवोपपद्यत इत्युक्तमेव । तस्मात्,

यथाविध्यन्तपर्यन्तो वाक्यव्यापार इष्यते । तथैव व्यक्तिपर्यन्तः पदव्यापार इष्यताम् ॥

अनुपरतव्यापार एव शब्दे तदवगमात्—

येनान्विताभिधानं च पदानामभ्युपेयते । सुतरां तेन वक्तव्या व्यक्त्यन्तं तावतो मतिः ॥

नहि व्यक्त्यनपेक्षाणां जातीनामितरेतरम् । अन्वयाभिधानमिति स्थितिः ।

गङ्गायां घोष इत्यादौ यथा सामीप्यलक्षणा । नैवं गौश्शुक्ल इत्यादौ विद्यते व्यक्तिलक्षणा ॥

प्रयोगप्रतिपत्तिभ्यां वृद्धेभ्यो व्यवसीयते । तस्माद्गवादिशब्दानां तद्वानर्थ इति स्थितम् ॥

अर्थेषु च प्रयोगेषु गां दोग्धीत्येवमादिषु । तद्वतोऽर्थक्रियायोगात्तस्यैवाहुः पदार्थताम् ॥

पदं तद्वन्तमेवार्थमाञ्जस्येनाभिजल्पति । न च व्यवहिता बुद्धिर्न च भारस्य गौरवम् ॥

सामानाधिकरण्यादिव्यवहारश्च मुख्यया । वृत्त्योपपद्यमानस्सन्नान्यथा योजयिष्यते ॥

तदिदमुक्तं भगवताक्षपादेन, व्यक्त्याकृतिजातयस्तु पदार्था इति तुशब्दो विशेषार्थः, किं विशेष्यते ? गुणप्रधानभावस्यानियमेन शब्दार्थत्वम् । अतः स्थितेऽपि तद्वतो वाच्यत्वे क्वचित्प्रयोगे जातेः प्राधान्यं व्यक्तेरङ्गभावः, यथा—गौः पदा न स्प्रष्टव्येति सर्वेगवीषु प्रतिषेधोऽवगम्यते । क्वचिद्व्यक्तेः प्राधान्यं जातेरङ्गभावः, यथा—गां मुञ्च गां बधानेति, नियतां काञ्चिद्व्यक्तिमुद्दिश्य प्रयुज्यते । क्वचिदाकृतेः प्राधान्यं व्यक्तेरङ्गभावः, जातिस्तु नास्त्येव । यथा—पिष्टमय्यो गावः क्रियन्तामिति, तत्सन्निवेशचिकीर्षया प्रयोग इति । गुणशब्दास्तु केचित् स्वजात्यवच्छिन्नं गुणमभिधाय तावत्येव विरमन्ति । केचित्तु गुणमभिधाय द्रव्यमप्याक्षिपन्ति । तत्सामानाधिकरण्ये प्रयोगदर्शनात् ।

गुणैकनियतास्तावद्गन्धरूपरसादयः । गन्धत्वादिव्यवच्छिन्नगन्धादिगुणवाचिनः ॥
तेषां न द्रव्यपर्यन्ता वृत्तिः क्वचन दृश्यते । न गन्धः पद्ममित्यस्ति सामानाधिकरण्यधीः ॥
गुणं शुक्लादिशब्दास्तु कथयन्तस्तदाश्रयम् ।
द्रव्यमप्याक्षिपन्त्येव शुक्लोऽश्व इति दर्शनात् ॥
क्रियाशब्दास्तु विविधाः केचित्कर्तरि कर्मणि । करणे च प्रयुज्यन्ते केचिद्भावेऽवधावपि ॥
कर्त्रादिवचनास्तावन्निमित्तीकृत्य कांचन । क्रियां तद्योगिनि द्रव्ये वर्तन्ते पाचकादयः ॥
यत्रापि तत्क्रियायोगस्तदानीं नोपलभ्यते । तत्रापि योग्यतां दृष्ट्वा शब्दं सन्तः प्रयुञ्जते ॥
अन्ये पूर्वापरीभूतस्वभावपरिहारतः । सिद्धरूपतया प्राहुश्शब्दाः पाकादयः क्रियाम् ॥
अन्यत्प्रवृत्तौ शब्दस्य निमित्तमवगम्यते । अभिधेयं ततश्चान्यदित्ययं प्रथमः क्रमः ॥

पाचकादिशब्दानां हि प्रवृत्तिनिमित्तं क्रिया । अभिधेयास्तु कर्त्रादयः । क्वचित्पुनर्यदेवास्य स्यात्प्रवृत्तिनिबन्धनम् ।

तस्यैव वाच्यता भावप्रत्ययान्तपदेष्विव । इतीयं लेशतस्तावन्नाम्नां वृत्तिरुदाहृता ॥
आख्यातानां तु वाच्योऽर्थः पुरस्तादुपवर्णितः । उपसर्गनिपातानां नाम्नामिव विभागतः ॥
प्रयोगप्रतिपत्तिभ्यामनेकोऽर्थोऽवगम्यते । उपसर्गवशाद्धातुरर्थान्तरविलासकृत् ॥
विहाराहारसंहारप्रहारपरिहारवत् । अन्वयव्यतिरेकाभ्यां तदर्थोऽप्यवगम्यते ॥
तदागमे तत्प्रतीतेस्तदभावे तदग्रहात् । अयमस्य पदस्यार्थ इति किं चिन्तितेन वा ॥
योऽर्थः प्रतीयते यस्मात्स तस्यार्थ इति स्थितिः ॥

वाक्यार्थस्त्रिधा, भावना विधिः प्रतिभा च । तत्रान्योत्पादानुकूलो भवन्तं प्रयुञ्जानः पुरुषव्यापारः करोत्यर्थो भावनेत्युच्यते । अनवच्छिन्नश्चानुष्ठातुमशक्य इति सान्निध्यात्समानपदोपात्तं धात्वर्थमवच्छेदकत्वेनापेक्षते । स चौदनं पचतीत्यादौ समानपदोपात्तत्वेऽप्ययोग्यत्वेन साध्यत्वात्प्रच्युतः करणांशेऽभिनिविशमानः प्रधानक्रियामोदनफलिकां निष्पादयति । करणं च केवलमसाधकत्वात् क्वचिदपि क्रियां न निष्पादयदुपलब्धम् । अतस्तत्साधकतमत्वसिद्धये काष्ठादीतिकर्तव्यतानुप्रवेशः । फलानुप्रवेशस्तु तदुद्देशेनैव भावनायाः प्रवृत्तेः । अतः फलकरणेतिकर्तव्यतावच्छेदात् किं केन कथमित्यपेक्षिणी त्र्यंशपरिपूर्णा भावना भवति । तत्र देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीत्यादौच ओदनं फलं, पाकः करणं, काष्ठादिकारकचक्रमितिकर्तव्यता, इति । तदुक्तम्—

ओदने साध्यमाने हि पाकः करणमिष्यते । स्थाल्यग्निचुल्लीकाष्ठानामितिकर्तव्यता मता ॥

स च प्रयत्नपरिस्पन्दादौदासीन्यप्रत्युपलक्ष्यमाणः पुरुषव्यापारः करोत्यर्थो भावना । कथं तर्हि काष्ठानां करणत्वं ? धात्वर्थस्य क्रियात्वात् । भावनायां तु धात्वर्थस्य करणत्वात् करणविभक्त्युपादाने च प्रधानान्तरेण सम्बन्धायोगात् । उच्यते, भावनासंबन्धाद्धात्वर्थोऽपि पूर्वापरीभूतो भवनात्मावगम्यत इति तदपेक्षया काष्ठानां करणत्वम् । अतः स्थितमेतत् त्र्यंशपरिपूर्णा भावना वाक्यार्थ इति । प्रवृत्तिनिवृत्त्योर्विधायकोऽर्थवादादिभिरुपक्रियमाणो लिङ्लोट्तव्यादिवाच्यः शब्दव्यापारो विधिः । तेन हि भावनायां पुरुषः प्रवर्त्यते निवर्त्यते वा । यथा यावज्जीवमग्निहोत्रं जुहुयात्, ब्राह्मणं न हन्यात्, प्रैषाननुब्रूहि, मापभाषस्व, होतुरष्टकाः कर्तव्याः, सुरा न पातव्या, पितरो वन्दनीयाः, गुरवो नावमान्याः, शिवं ते भूयात्, मा त्वा श्येन उद्वधीदिति । स च सर्ववाक्यानामर्थः सर्वं हि वाक्यं विधिनिषेधयोरेव पर्यवस्यति । यत्रापि च लिङादयो न श्रूयन्ते तत्रापि विधिनिषेधपरतया सर्ववाक्यानां वाक्यशेषभूतास्तेऽवगम्यन्ते । तद्यथेह देशे सुभिक्षमित्युक्तेऽत्रैव स्थातव्यमस्यांधो वर्तत इत्युक्ते, इहैव भोक्तव्यं सचोरः पन्था इत्युक्ते, न गन्तव्यं ग्राहाः सरित्यस्यामित्युक्ते न स्नातव्यमिति प्रतीयते । किञ्च महाकाव्यैरपि रामायणादिभिरिदमेव व्युत्पाद्यते । रामस्य पितुराज्ञां पालयतो वननिवासिनोऽपि तथाविधोऽभ्युदयः संवृत्तः । रावणस्य परदारानभिलष्यतस्त्रैलोक्यविजयिनोऽपि तथाविध उच्छेदः । तस्मात्पितुराज्ञां पालयेत् । परदारान्नाभिलष्येत् । रामवद्वर्तेत न रावणवदिति । नन्वाख्यातवाच्यत्वेन भावनैव विधिरित्युक्तं भवति । कथं च तत्रैव तस्य प्रवर्तकत्वं, स्वात्मनि क्रियाविरोधात्? तन्न, शब्दार्थभेदेन भावनाया द्वैविध्यात् । तदुक्तम्—

अभिधाभावनामाहुरन्यामेव लिङादयः । अर्थात्मा भावनात्वन्या सर्वाख्यातेषु गम्यते ॥

तत्र शब्दभावना प्रेरणात्मिका शब्दस्याभिधेया विधेया च । तदुक्तम्—अभिधत्ते, करोति चेति । सात्वर्थभावनांशद्वयविषया न फलांशविषया । तदुक्तम्—

फलांशे भावनायाश्च प्रत्ययो न विधायकः । अभिदध्युः स्वशक्त्याहि विधिमात्रं लिङादयः॥

तस्याश्च किं केन कथमित्यपेक्षायामर्थभावनाविषया पुरुषप्रवृत्तिः, प्रेरणाज्ञानं करणांशः, अर्थवादादय इतिकर्तव्यतांश इति त्र्यंशपरिपूर्णत्वम्, सा च फलकरणयोः साध्यसाधनभावमज्ञातं गमयन्ती गमकत्वात्प्रमाणं भवति । ननु च विधिलक्षणमेतावदप्रवृत्तप्रवर्तनं, अज्ञातज्ञापनं ह्येवं सर्वोऽपि हि विधिर्भवेत् । तथाहि–

साध्यसाधनसम्बन्धः सर्वाख्यातेषु विद्यते ।
सर्ववाक्येषु चाख्यातं तेनाकाङ्क्षा निवर्तनात् ॥

न च साध्यसाधनभावावगममन्तरेण प्रवर्तकत्वं न सिध्यतीति साध्यसाधनभावावगतिरवश्यकल्पनीया। प्रेरणाज्ञानजनकत्वेनैवास्य प्रवर्तकत्वात् किमित्यसौ निष्फले व्यापारे प्रवर्तत इति चेद्विधित एवेति ब्रूमः। सहि सफले निष्फले वा व्यापारे पुरुषं प्रवर्तयति ; एवं यच्च पुरुषेष्वप्रवर्तमानेषु अप्रामाण्यं तदपरिहार्यमेव। कल्पिते हि फले वैषयिकसुखद्वेषिणो वीतरागा न प्रवर्तन्ते। प्रवृद्धतररागास्तु न निवर्तन्त इति। उच्यते—यजेत स्वर्गकाम इत्यादौ विधिर्भावनायां पुरुषं प्रवर्तयति। भाव्यनिष्ठस्वभावको व्यापारो भावना। सा च साध्यादिस्वरूपपरित्यक्ता निरुपपत्तिकैव स्यात्। साध्यत्वं च समानपदोपादानसन्निधिवशाद्धात्वर्थस्याहोस्विद्विध्यमाणतया कामिपदोपात्तस्य स्वर्गादेः स्यादिति संशये योग्यत्वात्स्वर्गस्यैव, न धात्वर्थस्येति। तदुक्तम्—

विध्यपनाश्रिते साध्यः पुरुषार्थो न लभ्यते। श्रुतस्वर्गादिबाधेन धात्वर्थः साध्यतां व्रजेत्॥
विधौ कृतमतिक्रम्य स्वर्गादेः साध्यतेष्यते। तत्साधनस्य धर्मत्वमेवं सति च गम्यते॥

धर्मे ह्यदृष्टविषये चोदनैव प्रमाणम्। चोदनैव हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं वार्थमवगमयितुं शक्नोति। नान्यत्किञ्चनेन्द्रियमिति। एतेनापौरुषेयत्वेन यथार्थप्रतिपादकाप्तप्रणीतत्वेन वा निरस्तदोषांशस्य बाधकप्रत्ययरहितस्य वैदिकस्य लौकिकस्य च वाक्यस्यौत्सर्गिकं प्रामाण्यमुक्तं भवतीति विधिर्वाक्यार्थ इति। स्वं स्वमर्थमभिधायोपरतेषु पदेषु पदार्थप्रतिपत्त्यनन्तरमुपजायमाना इदं तदिति व्यपदेश्यानुपदेशसिद्धा हिताहितप्राप्तिपरिहारहेतुः प्रवृत्त्यनुकूला बुद्धिः प्रतिभा। तथाहि ; पदनिबन्धनानां पदावयवनिबन्धनानां चार्थप्रत्यवभासमात्राणां अविच्छेदेन प्रवृत्तौ पदार्थैः क्रमेण गृह्यमाणैराहितसंस्कारासु बुद्धिषु सर्वार्थप्रत्यवभाससंसर्गानुगृहीता प्रत्यस्तमितभेदप्रत्यवभासा प्रवृत्तिफलप्रसवाऽनुमेयाभिन्नजातीयैव प्रतिभा प्रत्यात्मं विवर्तते। यथा मद्यविषरसादिषु भिन्नानां द्रव्याणां पूर्वमदृष्टांशसंसर्गात् प्राप्तपरिपाकानां मदमरणसुवर्णादिरर्थक्रिया दृश्यते। तथा प्रतिपदं भिन्नानां शब्दानामुच्चारणेष्वदृष्टा, पुनः क्रमेणाविच्छिन्नानामुच्चारणे तासुतास्वितिकर्तव्यतास्वनुकूला प्राणिनां प्रतिभोपजायमाना दृश्यते। अयं चास्या भावनादिभ्यो विशेषः। यावत्किमत्र मया कथितं प्रतिपन्नमर्थरूपं वा परेण कथमनुसन्धीयत इति न विचार्यते, तावदनाख्येयेनोपायेन पूर्वोत्तरानुसन्धानमेषां प्रकल्पयति। प्रत्यक्षानुमानविषयेऽपि यावत्पूर्वापरप्रत्यवमर्शः शब्दोल्लेखवान् प्रतिभया न क्रियते तावत्प्रत्यक्षमनुमानं वा स्वकार्यं न प्रसाधयति। प्रतिभोपगृहीतानि सर्वप्रमाणानि प्रमाणतां लभन्ते। प्रतिभालोचनो हि लोक इतिकर्तव्यतासु प्रवर्तते। ननु च न प्रतिभा वाक्यार्थो यतो बालानां स्तन्यपानादिषु, हंसानां क्षीरविवेचने, जन्त्वादीनां कुलायादिकरणे, जातमात्राणामेव च पशुमृगसरीसृपादीनामुदकसन्तरणे, सुप्तानां च प्रबोधादौ, कुमार्याश्च श्वो मे भ्राता आगमिष्यतीति ज्ञाने, स्वभावतो वाक्यश्रवणमन्तरेणापि प्रतिभोपजायमाना दृश्यते। तथा कालविशेषात्पुंस्कोकिलानां स्वरविकारे, अभ्यासविशेषात् रत्नादिपरीक्षकाणां

तद्दोषगुणज्ञाने, अदृष्टाद्रक्षःपितृपिशाचादीनां परावेशान्तर्धानादौ, योगाद्योगिनां पराभिप्रायावगतौ, बाह्येन्द्रियवृत्तिनिरोधाद्वसिष्ठादीनामतीन्द्रियज्ञाने, कृष्णद्वैपायनाद्यनुध्यानात् सञ्जयादीनां दूरदर्शन-श्रवणादौ, कारणान्तरेभ्योऽपि प्रातिभमुपलभ्यते । उच्यते—यथैव साक्षात्पुरुषोपदिष्टवाक्यादर्थक्रियासु शब्दव्यापारेणोपसंहृता प्रतिपत्तॄणां प्रतिभा विवर्तते, तथैव बालादीनां स्तन्यपानादिषु पूर्वशब्दभावनानुगमाद्वाक्यार्थप्रतिपत्तिभिरविच्छिन्नैव प्रतिभोपजायते । येषामपि चाप्रसिद्धशब्दनि-बन्धनो व्यवहारः, तेऽपि हस्त्यश्वादयोऽपि जन्मान्तरीयशब्दभावनावशात् प्रत्युत्पन्नशब्दप्रत्ययाः प्रतिभामनुगच्छन्तः सर्वमारभन्ते । पूर्वशब्दानुभावनानुगमाच्च स्ववीजानामाभिमुख्येऽपि प्रकृष्टशब्द-व्यापारे कोकिलादीनां स्वरविकारादौ प्रतिभोपजायते । पूर्वजन्मजनितशब्दश्रवणसंस्कारोद्बोध-कानि त्वन्यानि कालाभ्यासादृष्टयोगध्यानानुध्यानादीनि साधनानि । इयांस्तु विशेषः । कचिद्वाक्यमुच्चरितमात्रमेव तमव्यपदेश्यमसत्त्वभूतं प्रतिभापदाभिधेयं स्वार्थं प्रकाशयति । क्वचित्तु चिरव्यवहितमपि विशिष्टप्रतिभाबीजभावनानिवेशान्निमित्तान्तरसान्निध्ये तदेव वाक्यं पारम्पर्येण प्रतिभाख्यं स्वार्थमाविर्भावयतीति प्रतिभावाक्यार्थ इति । ननु च क्रियापि नाम वाक्यार्थो विद्यते सोऽपि वक्तव्यो भवति । नैवं, पदार्थः क्रिया न वाक्यार्थः । पदार्थानां तु मिथः संसर्गे यदाधि-क्यमुपजायते स वाक्यार्थः । तदाह, यदत्राधिक्यं वाक्यार्थः स इति । स कदाचित्पुरुषव्यापार-रूपो भावनेति, कदाचिच्छब्दव्यापाररूपो विधिरिति, कदाचिद्बुद्धिव्यापाररूपः, प्रतिभेति । ननु च भावनापि पदार्थ एव धातोर्वा प्रत्ययाद्वा गम्यमाना पदार्थत्वं न व्यभिचरति । अथैवमुच्यते न पदार्थमात्रं भावना । अपितु परिदृश्यमानपूर्वापरीभूतविध्यादिभावार्थस्वरूपातिरिक्तः पुरुषव्या-पारः; सोऽपि धातुवाच्यत्वे प्रत्ययवाच्यत्वे वा न पदार्थत्वमतिक्रामति । उच्यते, यजेतेत्यादौ प्रकृत्यर्थः क्रियारूपो यागादिः, प्रत्ययार्थः प्रेरणारूपो विध्यादिः, न चैतदतिरिक्तो भावनाख्यः कश्चिदपि पुरुषव्यापारो दृश्यते, न च भावनावाचिनीं काञ्चिदपि विभक्तिं लिङादिमिव विध्यादौ स्मरति पाणिनिः । मैवं,

आस्तां विधिपदं तावद्वर्तमानापदेशिनः । शब्दाद्यजत इत्यादेर्भावना सावगम्यते ॥

पचत इत्यादेर्हि यथा पाकादिर्धात्वर्थः प्रतीयते तथा कर्तृव्यापारः करोत्यर्थोऽपि । पाकाद्युपरञ्ज-काभावेऽपि तत्प्रतीतेरनपायात् । यथा ह्यौपगवः, कापटवः, औपमन्यव इत्युपगुप्रभृतीनामावापो-द्वापयोरपि तस्यापत्यमिति प्रत्ययार्थोऽनुवर्तते तथा पचति पठति गच्छतीत्यादावपि करोत्यर्थोऽनु-वर्तमानो दृश्यते । तथाहि; यदा पचतीत्याख्यातपदस्य पदार्थो व्याचिख्यासितो भवति तदा पाकं करोतीति वाक्यं व्याख्यातारः प्रयुञ्जते । तत्र पाकशब्देन द्वितीयान्तेन साध्यं प्रकृत्यर्थं, कर्तृ-व्यापारं तु करोतीति पदेन व्याचक्षते । अपिच किं करोति देवदत्त इति पृष्टास्सन्तो द्वये वक्तारो भवन्ति पचतीति, पाकमिति । तदिदमुभयरूपमप्युत्तरमेकार्थं; अन्यथा न तेन प्रष्टा

प्रत्याय्येत । तस्मात्पाकं करोतीति पदद्वयस्य योऽर्थस्स एव पचतीत्येकपदस्येति, आह । न प्रत्ययात्कर्तृसङ्ख्याव्यतिरेकेण धात्वर्थातिरिक्तो व्यापारः प्रतीयते, प्रतीयते चेत् करोतीत्यत्रापि प्रतीयेत । तदुक्तम्—

यथा पाकं करोतीति व्यवहारो विभागतः ।
तथा कारं करोतीति प्रतीतिर्नास्ति लौकिकी ॥

तस्याः किं बीजमिति चेत् कृभ्वस्तीनां क्रियासामान्यवचनत्वम् । न च सामान्ये सामान्यानि भवन्ति, यथाहि यजेत दद्याज्जुहुयादिति करोतिसामान्यमवगम्यते नैवमस्ति भवति करोतीति । ननु च कथं करोत्यर्थः करोतिशब्दान्नावगम्यते । न नावगम्यते । किन्तु यागादिविशेषानवच्छिन्नो नानुष्ठानयोग्यो भवति । एवं तर्हि माभूत्प्रत्ययार्थो भावना । प्रकृत्यर्थो भविष्यति । यथाहि शाबलेयादीनामनुगतं गोरूपमवभासते व्यावृत्तं च शाबलेयादिरूपं एवं यागादिकर्मणामनुगतं व्यापाररूपमवभासते । परस्परविभक्तं च यागादिरूपं तत्र यदनुगतं करोतिसामान्यं सा भावना, यद्व्यावृत्तं यागादिकं स धात्वर्थः । यथा च शाबलेयादेः पृथग्दर्शयितुं गोत्वमशक्यमेवं भावनापि यागादेः पृथग्दर्शयितुं न शक्यते । तदुपरक्तत्वेन सर्वदोपलम्भात् । न चैतावतासौ नास्ति, नास्तितायां हि तस्याः किं करोतीति अनवगतविशेष्यव्यापारप्रश्ने पचति पठतीत्युत्तरमनुत्तरमेव भवति । किञ्च—

औदासीन्यदशायां तु पुमान्येन प्रवर्त्यते । स यत्नो यागहोमादौ भावनेत्यभिधीयते ॥

सा च सामान्यरूपापि न गोत्वादिवत्क्रिया क्वचिद्या सिद्धतयावभासते, येन विधेया न भवति । यद्येवं—

क्रियाविशेष एवासौ व्यापारोऽज्ञातुरान्तरः । स्पन्दात्मकबहिर्भूतक्रियाक्षणविलक्षणः ॥

क्रियायाश्च पदार्थत्वमिष्यत एव, ननुच पदार्थत्वेऽपि क्रियाया वाक्यार्थत्वमेव न्याय्यं-

यतः पदार्था वाक्यार्थभावमायान्ति संहताः । अपेक्षानुगुणान्योन्यव्यतिषङ्गविशेषिताः ॥

व्यतिषङ्गश्च प्रधानगुणभावे भवति—

साध्यं च साध्यमानत्वात्प्रधानमवगम्यते ।
क्रियातो नापरं तच्च वाक्यार्थोऽतः क्रियेष्यताम् ॥

यजेत दद्याज्जुहुयादधीयीतेति चोदितः । क्रियां साध्यतया वेत्ति तां च लोकोऽनुतिष्ठति ॥

यच्चाधिकारिपदं स्वर्गकाम इत्यादि तदपि भावनापेक्षितकर्तृसमर्पकत्वेन सङ्गच्छते । अस्यां क्रियायामयं कर्ता अनेनैषा क्रिया संपाद्येति ! न चात्र क्रिया प्राधान्यमुज्झति । नहि क्रिया कर्तृस्था, कर्ता तु क्रियार्थः, सहि तां निर्वर्तयन्नुपलभ्येत । शब्दोऽपि तथैवोपदिशति एष इदं कुर्यादिति । किमर्थं पुनरसौ क्रियामनुतिष्ठतीति चेत् शब्दादेवेति ब्रूमः ।

बुध्द्वेदमेव भगवान्ददर्श खलु बादरिः । न द्रव्यगुणसंस्कारव्यतिरिक्तेऽस्ति शेषता ॥

वेदाद्गुरुनियोगाद्वा शासनाद्वा महीभुजः ।
न सचेताः क्रियां कांचिदनुतिष्ठति निष्फलाम् ॥

अत्रोच्यते, शब्दप्रमाणका वयं यच्छब्द आह तदस्माकं प्रमाणं; तर्हि स्वर्गकामपदमपि शब्द एव। तस्याप्यत्रान्वयो वक्तव्यः । ननु च कर्तृपदमेकं कर्ता च क्रियार्थ इति, नैवम् । न कर्तृपदं स्वर्गकाम इति, अपि त्वधिकारिपदं । स्वर्गे कामोऽस्य स्वर्गं वा कामयते, स्वर्गकामनाविशिष्टः पुरुषोऽस्मात्पदादवगम्यते । तदत्र काम्यमानः स्वर्गः कथं यागक्रियया संबध्यते ? स्वर्गस्य निरतिशयप्रीतिरूपत्वात्, न प्रीतिरद्रव्यत्वात् क्रियाङ्गभावं भजते । न च प्रीतेः क्रियार्थत्वमुपपद्यते । प्रीत्यर्थमन्यन्नान्यार्था प्रीतिरिति । एवं च क्रियासाधनानुपदेशात् न कर्तृसमर्पकत्वेन स्वर्गकामपदसमन्वयः । अपि त्वधिकारिसमर्पकत्वेन । अथ कोऽयमधिकारी नाम ? कर्मणः स्वामी । ननु च कर्तैव कर्मणः स्वामी । नैवं स्वामी । स कर्ता न तत्स्वामी । ननु क्रियाकारकसंबन्धव्यतिरेकेण कोऽन्यः कर्मणः पुरुषस्य च सम्बन्धः । उच्यते, ममेदं कृत्यं अहमत्र स्वामीति स्वस्वामिभावमशक्यमाशङ्क्य पाश्चात्यः क्रियाकारकसम्बन्धो गम्यते । पाश्चात्य इत्यत्र किं प्रमाणामिति चेत् अनुपादेयविशेषणविशिष्टस्य पुंसो निर्देशस्तस्मादधिकृतस्य कर्तृत्वं, न कर्तुरधिकार इति । इत्थं च स्वर्गकामस्याधिकारो निर्वहति यदि तत्कर्म स्वर्गार्थं स्यात् स्वर्गोऽपि भोग्यो भवेत् । कथमहं स्वर्गं प्राप्नुयामित्येवं साध्यत्वेन स्वर्गमिच्छन् स्वर्गकाम उच्यते । यदि च न स्वर्गसाधनं कर्म स्यात् तद्विरुद्धमिदमापतति । स्वर्गं कामयते यागं करोति अन्यदिच्छत्यन्यत्करोतीति । अतः कर्मणि काम्यमाने साधनतां प्रतिपद्यमानः स्वर्गकामस्तत्रैवाधिक्रियते । न चानधिक्रियमाणस्तत्र सम्बध्यते । तदेवमधिकृतत्वेन स्वर्गकामस्य कर्मणि सम्बन्धात् स्वर्गयागयोश्च साध्यसाधनभावावगममन्तरेणाधिकारस्यानिर्वाहादवश्यं क्रियायां साधनत्वं स्वस्यैव साध्यत्वमभ्युपगन्तव्यम् । अतश्च क्रियायाः फलं प्रति गुणभावादप्राधान्यमप्राधान्याच्च न वाक्यार्थत्वम् । तदुक्तं—"कर्माण्यपि हि जैमिनिः फलार्थत्वा" दिति । का चेयं क्रिया ? वाक्यार्थ इत्युच्यते, य एष यागादिर्भावार्थो धातुवाच्य, उत प्रत्ययार्थः, कश्चिदतिरिक्त इति । तत्र भावार्थस्य काम्यमानसाधनत्वादप्राधान्यमुक्तमेव। प्रत्ययार्थस्तु काम्यमानभावार्थगतसाध्यसाधनसम्बन्धापरित्यागेनैव वाक्यार्थतां प्रतिपद्यते । तस्मान्न क्रियामात्रपर्यवसायी वाक्यार्थ इति ।

किमिदानीं फलस्यैव वाक्यार्थत्वं प्रचक्ष्महे । तद्धि प्रधानं साध्यं च तदर्थो ह्यखिलः श्रमः ॥

नैवम्; यथा क्रियायाः फलार्थत्वादप्राधान्यं एवं फलस्यापि पुरुषार्थत्वात् । नहि स्वर्गः स्वतन्त्र एव सत्तां लभतामिति पुरुषो यतते । अपितु स्वोपभोग्यतयैनमभिलषति, तदाह—" फलं च पुरुषार्थत्वात् " । तर्हि, पुरुष एव वाक्यार्थो भवतु । नैवं; यजमानसंमितौदुम्बरी भवतीति तस्यापि क्रियाङ्ग-

त्वात्। तदाह, पुरुषश्च कर्मार्थत्वादिति। हन्तैवं क्रिया फलार्था, फलं पुरुषार्थं, पुरुषः क्रियार्थ इति चक्रके पतिताः कस्य प्राधान्यं शिष्मः। उच्यते, पुरुषस्तावन्न वाक्यार्थः पदार्थानां मिथः संसर्गेऽपि अव्ययकारकविशेषणार्थोपगृहीतस्याख्यातार्थस्यैव प्राधान्येन वाक्यार्थत्वात्। ननु चाख्यातेऽपि यजेतेत्येवमादौ कर्तर्येव लकारः। मैवम्; योऽयं लकारो नाम सिद्धं हि साध्यायोपादीयत इति प्रत्ययार्थोऽपि कर्ता प्रकृत्यर्थे क्रियायामेव न्यग्भवति, फलमपि न वाक्यार्थः सिद्धासिद्धविकल्पानुपपत्तेः। सिद्धस्य तावत्फलस्याभिधानमेव नास्ति, काम्यमानत्वेन निर्देशात्॥

साध्यमानत्वपक्षे तु साक्षात्तत्सिद्ध्यवेदनात्। व्यापारएव तन्निष्ठो वाक्यार्थ इति युज्यते॥
अतएव हि वाक्यार्थं भावनां प्रतिजानते। यथोचितफलांशत्रयसंबन्धधुरन्धुराः॥

भाव्यनिष्ठो हि भावकव्यापारो भावनेति।

सैष द्वादशभेदोऽर्थः क्रियादिःप्राक्प्रकीर्तितः।
वाच्यो विशेष्यः शब्दस्य प्रत्याय्योह्यभ्युपेयते॥ ॥

नचैतद्वाच्यं; वाक्यस्यैव प्रत्यायकत्वं न पदानां, यतो यथा गुडशब्दो गुडद्रव्यमभिधत्ते तथा प्रत्याययत्यपि तदविनाभाविमाधुर्यं, यदि वा पदान्येव संहत्यार्थमभिदधति वाक्ये॥

आख्यातशब्दो वाक्यपदसङ्घातो वाक्यमित्यपि दर्शनानि विद्यन्ते। क्रियादयश्च पदार्थ एवान्तर्भवन्ति। तथाहि; धात्वर्थः क्रिया, तां कालो विशिनष्टि, प्रत्ययार्थः कारकं तत्पुरुषो विशेषयति। तस्योभयस्याप्युपाधयोऽप्यवच्छेदका भवन्ति; सम्भूय प्रकृतिप्रत्ययौ प्रत्ययार्थं ब्रूतः। यं तं प्रधानमामनन्ति स भेदाभेदाभ्यामुपस्कारार्थविशिष्टप्रातिपदिकार्थव्यपदेशं लभते। तस्य शक्तिसङ्ख्याभिव्यक्तये विभक्तिस्तदन्तं पदं पदानामपदानां च सामर्थ्ये वृत्तिः, वृत्तानामपि च कृत्तद्धितसमासानां पुनः प्रातिपदिकसंज्ञायां सुबुत्पत्तेः पदसंज्ञेति वाक्यं पुनरखण्डवाक्यार्थपक्षे वाचकमपि भवति। तत्र शब्दस्यार्थाभिधानसामर्थ्यं वाचकता। सा त्रिधा, मुख्या, गौणी, लक्षणा च। यथा—गौर्गच्छति, गौर्वाहीकः, गोषु निवसतीति। आसां च विशेषान् विशेषेणाग्रतो वक्ष्यामः। तेषु हि प्रबुद्धेषु प्रबुद्धाप्रबुद्धैः प्रसिद्धपदसामानाधिकरण्योपदेशवृद्धव्यवहारेभ्योऽधिगतेषु संज्ञासंज्ञिसम्बन्धबलेन शब्दस्तदस्य एव गोत्वमर्थं प्रत्याययति। तदाहुः—

प्रसिद्धपदसामानाधिकरण्यात्प्रतीयते। अप्रसिद्धपदस्यार्थं इचूते रौति पिको यथा॥
तथाहि रौति यश्चूते पिकः स इति निश्चयः। उपदेशाद्यथार्थोऽयं पनसाख्यः प्रकाशते॥
व्यवहारात्तु शब्दार्थसम्बन्धस्त्रिप्रमाणकः। वृद्धशब्दाभिधेयानि प्रत्यक्षेणात्र पश्यति॥
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया। अन्यथानुपपत्तौ च वेत्तिशक्तिद्वयाश्रयाम्॥ इति॥

स्वावच्छेदेन विशिष्टज्ञानजनकता विशेषणत्वम्। तत्त्रिधा, भेदकमनुरञ्जकमुपलक्षकं च। यथा— विश्वजिता यजेत, श्वेतं छागमलभेत, लोहितोष्णीषा ऋत्विजः प्रचरन्तीति। न च गोत्वादयः कदाचिदपि शब्दानुवेधवन्ध्यबोधाविषयतां प्रतिपद्यन्ते। तथाहि; 'आयं गौः पृश्निरक्रमीत्' इत्यादौ यथा जातिगुणक्रियावच्छिन्नविषयावभासिनि सविकल्पके, तथा निर्विकल्पके विज्ञाने शब्दविशिष्ट एवार्थः परिस्फुरति। तदाह—

न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते॥

नचैतद्वाच्यं;

अस्तीत्यालोचनाज्ञानं प्रथमं निर्विकल्पकम्। बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥

यतो बालादयो जन्मान्तरानुभवोपजनितनानासंस्कारजातयो जात्याद्युल्लेखेनैव तंतमर्थं प्रतियन्ति। तथाहि; तदहर्जायमानस्यापि बालकस्य पुरतो विदग्धवनिताः प्रदीपं न प्रस्थापयन्ति कर्कटोम्मा भविष्यतीति। अथ तथात्वातथात्वयोस्स्थितिं प्रति हेतुत्वात्प्रत्यायकत्वं कथं पुनरतथाभूतमर्थं शब्दस्तथा प्रत्याययति? शब्दशक्तिमाहात्म्यात्। शब्दशक्त्युपजनिता हि बुद्धयः स्वबीजपरिपाकवशादाकारविशेषवत्य उपजायमानाः सत्यपि वस्तुनोऽभेदे भेदमुपदर्शयन्ति। तद्यथा—राहोः शिरः, शिलापुत्रकस्य शरीरमिति। तदुक्तं—

मायेन्द्रजालप्रख्योऽयं प्रविभागः प्रकल्प्यते।
शब्दशक्तिमहिम्नैव निर्विभागेऽपि वस्तुनि॥

अन्ये त्वाहुः—"न वस्तुनोऽधिकं रूपं न शब्दस्याधिकार्थता। शब्दः शब्दान्तरोपाधेरधिकार्थः प्रतीयते॥" तद्यथा, पुरुष इति पुरुषमात्रं, राज्ञ इति शब्दान्तरसन्निधेस्तु स एव विशिष्टः प्रतीयते पुरुषविशेषोऽयं राजपुरुष इति। एवं भवतिपचतीत्यादावपि पचतीति क्रियामात्रप्रतीतिः, भवतीति तु पदोपाधिः कर्तृशक्तिप्रयुक्ता प्रतीयते। अपरे तु मन्यन्ते, सकलविकल्पोल्लेखविरहितेऽपि वस्तुनि शब्दाः स्वमहिम्नैव नानाविधबुध्युत्पत्तिकारणीभूताः शक्तीः सन्निवेशयन्ति, यद्वशादभिन्नरूपमपि वस्त्वन्यथाचावभासत इति। तथाहि, कथकः कंसं घातयतीत्युक्ते कंसवधमाचष्ट इति प्रतीयते। यदा त्विन्द्रः कंसं घातयतीति प्रयोगस्तदा कंसघ्नं तमुपेन्द्रं इन्द्रः प्रयुङ्क्त इति। अन्ये तु कथकः कंसं घातयतीत्यत्रापि प्रयोजकं व्यापारं ब्रुवते, । यतः—"शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान्। प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते॥" तेषां चोत्पत्तेःप्रभृत्याविनाशात् स बुद्धीराचक्षाणः परानपि तथैव प्रत्याययति। तथा वक्तारो भवन्ति गच्छ हन्यते कंसः, किं गतेन, हतः कंस इति। अथापरेषां दर्शनं;

विकल्पयोनयः शब्दा विकल्पाश्शब्दयोनयः ।
तेषामन्योन्यसम्बन्धो नार्थं शब्दाः स्पृशन्त्यपि ॥

तद्यथा—

गुणानुरागमिश्रेण यशसा तव सर्पता । दिग्वधूनां मुखे जातमकस्मादर्धकुङ्कमम् ॥
अत्रार्धकुङ्कमेत्युक्ते सौरभादिगुणान्विता । यशोऽनुरागयोर्वर्णप्रक्लृप्तिरवगम्यते ।
वधूशब्देन तु दिशां नायिकात्वं प्रतीयते । न च सम्बन्धगन्धोऽपि वास्तवस्तेषु विद्यते ॥

तदुपज्ञं चैष लौकिकःप्रवादः ।

अतहट्ठिएवि तहतहसंठिएव्वहिअअम्मि जाणिवेतसेइ ।
अत्थविसेसे सा जअइ विअउकइगोअरा वाणी ॥

भवतु नामशब्दस्य वाचकत्वपक्षेऽपि पक्षानुप्रवेशादर्थातथात्वेऽपि तथा प्रत्यायकत्वम् । विशेषणपक्षे तु कथमिवैतदुपपद्यते ? विशेषणेन हि प्रधानानुयायिना भवितव्यम् । प्रधानेन त्वविचलितस्वार्थेन । नैवं, विशेषणमपि शब्दोऽनुरञ्जकत्वेनार्थमध्यासीनः कुतश्चिदुपाधेरन्यथावभासमानः स्वाश्रयमप्यन्यथावभासयति । तद्यथा—

मगधेषु स्तनौ पीनौ कलिङ्गेष्वक्षिणी शुभे । बाहूप्रलम्बावङ्गेषु वङ्गेषु चरणौ मृदू ॥ इति ।

अत्र स्तनादयो जातिशब्दाः सव्यत्वदक्षिणत्वजातिद्वयैकार्थसमवायोपाधेरेकत्वयोगिनोऽपि द्वित्वेनावभासमानाः स्वाश्रयानपि तथैवावभासयन्ति । एतेन व्यक्तौ पदार्थे बहूनामपि द्वित्वावभासो व्याख्यातः । तद्यथा—

दैत्याधिपप्राणमुषां नखानामुपेयुषा भूषणतां क्षतेन ।
प्रकाशकार्कश्य गुणौ दधानाः स्तनौ तरुण्यः परिवव्रुरेनम् ॥

अत्र विशिष्टनखक्षतभूषादिविशेषोपादानात्तुल्यकैव स्तनशब्दस्य व्यक्त्यर्थतेति । एवं कदा पूर्वाः फल्गुन्य इति चन्द्रमसा सह योगे बहुत्वविवक्षायां द्वयोरपि बहुत्वेनावभासः । कदा तिष्यपुनर्वसू इति तारकानपेक्षनक्षत्रद्वित्वविवक्षायां बहूनामपि द्वित्वेनावभासो भवति । अथ यथा चन्द्रयोगस्याविवक्षायां तारकागतद्वित्वसङ्ख्यया पूर्वे फल्गुन्याविति भवति । एवं चन्द्रमसा सह योगस्य तारकासङ्ख्यायाश्च विवक्षितत्वे भवितव्यं, तिष्यपुनर्वसव इति प्रयोगेण न भवितव्यम् । नहि लोके तादृशी विवक्षा विद्यते; विवक्षा च कुलवधूरिव न लोकमर्यादामतिक्रामति ।

तद्यथा—

जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसंमिताक्षरम् ।
अदेयमासीद्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे ॥

ननु चार्थोपाधेरप्यर्थोऽन्यथाभासमानो दृश्यते । तद्यथा—

पायाद्वो रचितत्रिविक्रमतनुर्देवः स दैत्यान्तको
यस्याकस्मिकवर्धमानवपुषस्तिग्मद्युतेर्मण्डलम् ।
मौलौ रत्नरुचिः श्रुतौ परिलसत्ताटङ्ककान्तिक्रमात्
जातं वक्षसि कौस्तुभाभमुदरे नाभीसरोजोपमः ॥

ततश्च न ज्ञायते किमयमर्थोपाधिनिबन्धनोऽर्थस्यान्यथावभासः उत शब्दोपाधिनिबन्धन इति । चिरं जीव, यदवतीर्ण इव प्रतिपाद्यार्थपदवीं दृश्यसे, पृच्छाम्यायुष्मन्तं कएषोऽर्थोनाम, किं ब्रवीषि यःशब्देन प्रतिपाद्यते, अथ गौरित्यत्र कः शब्दार्थः ? किमात्थ सास्नादिमान्पिण्ड इति, कथं स्वरूपमपि पृष्टः शब्देनैव व्यपदिशसि । किमवोचत् शब्दाख्यविशेषणानुरक्तस्य कस्य स्वरूपमन्यथाख्यातुं न शक्नोमि । शब्दापरित्यागलब्धप्रकाशयैव च तदनुभूत्यानुभवामि । तर्हि शब्दात्पृथगर्थतत्त्वस्य व्यपदेष्टुमनुभवितुं चाशक्यत्वाच्छब्दस्यैवायमध्यासो विवर्तो विपरिणामो वार्थो नाम नान्यः कश्चिदिति निश्चीयताम्, युक्तं चैतत्, नहि निरूपयन्तोऽपि शब्दाद्विभिन्नमर्थतत्त्वमुपलभामहे । अन्येऽपि चैवमाहुः—

अविभागोऽपि बुध्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिवलक्ष्यते ॥
ग्रहीतृग्रहणग्राह्यमायापथपरिच्युताम् । नमामः परमानन्दज्योतीरूपां सरस्वतीम् ॥ इति ।

कः पुनरयं विवर्तो नाम । उच्यते, एकस्य तत्त्वादप्रच्युतस्य सन्निवेशविशेषादिभिरसत्यप्रविभक्तान्यरूपोपग्राहिता विवर्तः । तत्र यथा जलादयः कल्लोलादिरूपेण सर्पादयः कुण्डलादिरूपेण नीलादयश्चित्रादिरूपेण विवर्तन्ते तथा शब्दतत्त्वमविद्योपाधेस्तेनतेनार्थरूपेण तथातथा विवर्तन्ते । तद्यथा—

व्यपगतघनपटलमचलजलनिधिसदृशवपुरम्बरतलम् ।
अञ्जनचूर्णपुञ्जश्यामलं शार्वरं तमः ॥

इति । अथ यथा शब्दस्यार्थो विवर्तस्तथार्थस्य शब्दो यदि भवेत् को दोषः स्यात् ? न कश्चित् । किन्तु—

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती । न प्रकाश्यः प्रकाशेत साहि प्रत्यवमर्शनी ॥
इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥

ननु चाभिधीयमानतेव प्रतीयमानतापि वाक्यार्थधर्मो विद्यते । यथा चोच्यते,

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिद्धावयवातिरिक्तमाभाति लावण्यमिवाङ्गनासु ॥

तस्य च वाक्यार्थभावनोत्तरकालमवगतेरध्यासपक्षे विवर्तपक्षे वा कथमिवोपपत्तिर्भवति ? उच्यते, विपरिणामाद्भविष्यति वस्तुनो अवस्थान्तरगमनं विपरिणामः ; तत्र यथा मृदादयो घटादिरूपेण क्षीरादयो दध्यादिरूपेण चैत्रादयो युवादिरूपेण विपरिणमन्ते तथेदं शब्दब्रह्माप्यविद्योपाधेः तेनतेनार्थरूपेण तथातथा विपरिणमते । तद्यथा—सन्ति मे पञ्च पुत्राः, मातरं पितरं शुश्रूषितवानस्मि, योऽहं युवा द्रमिडदेशे द्रमिडकन्याभिः सहावसं सोऽहमिदानीं पश्चिमे वयसि गङ्गातीरे तपश्चरामीति । अत्र च शब्दार्थयोः पृथगवभासाद्वाक्यार्थस्याभिधीयमानतायां प्रतीयमानतायां वा नानुपपत्तिः, न चैतावता शब्दव्यापारो विरंस्यति । यतस्तात्पर्यमस्य ह्यग्रतो विशेषेण वक्ष्यमाणमास्ते । तस्योदाहरणमात्रं—

प्राप्तश्रीरेष कस्मात्पुनरपि मयि तंमन्थखेदं विदध्यात्
निद्रामप्यस्य पूर्वामनलसमहसो नैव संभावयामि ।
सेतुं बध्नाति कस्मादयमिह सकलद्वीपनाथानुयात-
स्त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः ॥

अत्र वर्णनीयराजविशेषस्य दिग्विजयिनो यथाश्रुतवाक्यार्थोऽभिधीयमानस्त्वय्यायाते इति पदे विष्णवध्यासावतारः समस्तीति प्रतीयमानस्तदवतारान्तराणां निद्रालसत्वादिदोषयोगादस्य च तद्व्युदासात् । ततो वैशिष्ट्यप्रतिपादनं तात्पर्यं यस्य काव्येषु ध्वनिरिति प्रसिद्धिः । तदुक्तं—

तात्पर्यमेव वचसि ध्वनिरेव काव्ये सौभाग्यमेव गुणसम्पदि वल्लभस्य ।
लावण्यमेव वपुषि स्वदतेऽङ्गनायाः शृङ्गार एव हृदि मानवतो जनस्य ॥

कः पुनः काव्यवचसोः ध्वनितात्पर्ययोर्विशेषः । उच्यते—

यदवक्रं वचश्शास्त्रे लोके च वच एव तत् । वक्रं यदर्थवादादौ तस्य काव्यमिति स्मृतिः ॥
यदभिप्रायसर्वस्वं वक्तुर्वाक्यात्प्रतीयते । तात्पर्यमर्थधर्मस्तच्छब्दधर्मः पुनर्ध्वनिः ॥
सौभाग्यमिव तात्पर्यमान्तरो गुण इष्यते । वाग्देवताया लावण्यमिव बाह्यस्तयोर्ध्वनिः ॥
अदूरविप्रकर्षात्तु द्वयेन द्वयमुच्यते । यथासुरभिवैशाखौ मधुमाधवसंज्ञया ॥ इति ॥

विभक्त्यर्थोऽथ वृत्त्यर्थः पदार्थश्चोपवर्णितः। भावनादिप्रभेदेन वाक्यार्थश्च प्रकीर्तितः ॥
क्रियायाश्च पदार्थत्वाद्वाक्यार्थत्वमुपाकृतम्। कृतं च भावनायास्तदपदार्थत्वहेतुकम् ॥

वाच्या विशेष्याः प्रत्याख्याः शब्दस्योक्ताः क्रियादयः।
अध्यासविपरीणामविवर्ताश्चास्य तान्प्रति ॥

विभक्तिवृत्त्यर्थवतोरुपस्क्रिया प्रधानयोर्धाम पदार्थ इष्यते ॥
पदं पदार्थस्य तु वाक्यगोचरो भवेद्यतोऽर्थस्तदतो निरूप्यते ॥

इति महाराजाधिराज श्रीभोजदेवविरचिते शृङ्गारप्रकाशे
विभक्त्यर्थादिचतुष्टयप्रकाशो नाम षष्ठः प्रकाशः

॥ श्रीः ॥

सप्तमः केवलशब्दसम्बन्धशक्तिप्रकाशः

तत्राभिधाविवक्षातात्पर्यप्रविभागव्यपेक्षासामर्थ्यान्वयैकार्थीभावदोषहानगुणोपादानालङ्कार-रसावियोगरूपाः शब्दार्थयोर्द्वादश समर्थाः साहित्यमित्युच्यते । तेषु शब्दस्यार्थाभिधायिनी शक्तिरभिधा । तया स्वरूप इवाभिधेये प्रवर्तमानः शब्दो वृत्तित्रयेण वर्तते, ताश्च मुख्या गौणी लक्षणेति तिस्रः । तत्र साक्षादव्यवहितार्थाभिधायिका मुख्या । गम्यमानशौर्यादिगुणयोगव्यवहितार्था गौणी । स्वार्थाविनाभूतार्थान्तरोपलक्षणा तु लक्षणेति । तथाहि; गौरित्ययं शब्दो मुख्यया वृत्त्या सास्नादिमन्तमर्थं प्रतिपादयति, सएव तिष्ठन्मूत्रतादिगुणसम्पदमपेक्षमाणो यदा वाहीके वर्तते तदा गौणीं वृत्तिमनुवदति । तदाह,

रूढ्या यत्र सदर्थोऽपि लोके शब्दो निवेशितः ।
स मुख्यस्तत्र तत्साम्याद्गौणोऽन्यत्र स्खलद्गतिः ॥

यदा तु शब्दः स्वार्थतः क्रियासिद्धौ साधनभावं गन्तुमसमर्थस्तदाभिधेयाविनाभूतमर्थान्तरं लक्षयति । तदा सा च लक्षणा वृत्तिः । यथा गङ्गायां घोषः प्रतिवसति । अत्र गङ्गाशब्दो विशिष्टोदकप्रवाहे निरूढाभिधानशक्तिः । स च घोषकर्तृकायाः प्रतिवसनक्रियाया अधिकरणभावं गन्तुमसमर्थः स्वार्थाविनाभूतं तटं लक्षयति । तदुक्तम्—

अभिधेयाविनाभूतप्रतीतिर्लक्षणेति या । सैषा विदग्धवक्रोक्तिजीवितं वृत्तिरिष्यते ।

प्रत्येकं चैतास्तिस्रोऽपि द्विधाभूय पृथक् षोढा भिद्यन्ते । तत्र मुख्या द्विधा, तथाभूतार्था, तद्भावापत्तिश्च । तयोः तथाभूतार्था षोढा, जातिविषया, व्यक्तिविषया, आकृतिविषया, गुणविषया, क्रियाविषया, संबन्धविषया चेति । तत्र गौरश्वः पुरुषो ब्राह्मण इत्यादिर्जातिविषया, यथा—

प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविचक्षणाः ।
भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः ॥

यथा वा—

थोरत्थणीए बहुणो हळाए सामए मंदगमणाए ।
कोरच्छिपेच्छिरीए वहुप्पए एक्कमहिसीए ॥

यथा वा—

निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता कापि ।
नीलोत्पलेषु विमृशति करमर्पयितुं कुसुमलावी ॥

चित्रबिम्बभ्रमक्रिमाद्यर्थवाचिन्याकृतिविषया यथा—

इङ्गुदीपादपः सोऽयं शृङ्गिबेरपुरे पुरा । निषादपतिना यत्र स्निग्धेनासीत्समागमः ॥

यथा वा—

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्पश्चात् ।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ॥

श्वेतः कर्कशः कृशः स्थूल इत्यादिर्गुणविषया यथा—

श्यामलाः प्रावृषेण्याभिर्दिशो जीमूतपङ्क्तिभिः । भुवश्च सुकुमाराभिर्नवशाद्वलराजिभिः ॥

यथा वा—

ताम्बूलबहलरक्तः प्रियभुक्तो धूसरः सपर्यन्तः ।
बालाधरोऽधिरोहति कुसुमरुचः काञ्चनारस्य ॥

पक्त्वा पचन् पक्वः पच्यमान इत्यादिक्रियाविषया यथा—

दातुःस्थातुर्द्विषां मूर्ध्नि यष्टुस्तर्पयितुः पितॄन् ।
युध्यभग्नविपन्नस्य किं दशास्यस्य शोचसि ॥

यथा वा—

कुविआओपसाण्णाओ ओरुण्णमुहीओ विहसमाणीओ ।
जहगहिआ तहहिअअं हरन्ति उच्छुण्णमहिळाओ ॥

पिता माता शत्रुः सूनुरौपगव इत्यादिः संबन्धविषया यथा—

सूर्याचन्द्रमसौ यस्य मातामहपितामहौ । स्वयंवृतपतिर्द्वाभ्यामूर्वश्या च भुवा च यः ॥

यथा वा—

सपदि सखीभिर्निभृतं विरहवतीस्त्रातुमत्र भज्यन्ते ।
सहकारमञ्जरीणां शिखोद्गमग्रन्थयः प्रथमे ॥

अर्थस्यातथात्वेऽध्यासादिभिस्तथात्वापादनं तद्भावापत्तिः । सापि षोढा, अध्यासात्मिका, कल्पनात्मिका, विवर्तात्मिका, विपरिणामात्मिका, विपर्ययात्मिका, प्रवादात्मिका चेति । तत्र ज्ञानवोऽव्यतासिंस्तदेतदित्यारोपणमध्यासः । यथा—

अइदिअर किंणपेच्छसि आआसं किमुहा पुळोएसि ।
जाआए बाहुमूळे मिअद्धअंदाणपरिपाडी ॥

यथा वा—

कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥

असतोऽप्युत्प्रेक्षाकल्पना यथा—

गुणानुरागमिश्रेण यशसा तव सर्पता । दिग्वधूनां मुखे जातमकस्मादर्धकुङ्कुमम् ॥

यथा वा—

अनिराकृततापसम्पदं फलहीनां सुमनोभिरुज्झिताम् ।
खलतां खलतामिवासतीं प्रतिपद्येत कथं बुधो जनः ॥

वस्तुनः सन्निवेशविशेषेणावस्थानं विवर्तः । यथा—

उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिरुहोद्भवः परागः ।
वात्याभिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम् ॥

यथा वा—

अस्मिन्नीषद्वलितविषमस्तोकविच्छिन्नभुग्नः किञ्चिल्लीनो विपिनविनतः पुञ्जितश्चोत्थितश्च ।
धूमोद्गारस्तरुणमहिषस्कन्धनीलो दवाग्नेः स्वैरं सर्पन् सृजति गगने गत्वरान्पत्रभङ्गान् ॥

वस्तुनोऽवस्थान्तरोपगमनं विपरिणामः । यथा—

य एते यज्वानः प्रथितमहसो येऽप्यवनिपाः मृगाक्ष्यो याश्चैताः कृतमपरसंसारिकथया ।
अहो ये चाप्यन्ये फलकुसुमनम्रा विटपिनो जगत्येवंरूपा विलसति यदेषा भगवती ॥

यथा वा—

च्युतामिन्दोर्लेखां रतिकलहभग्नं च वलयं समं चक्रीकृत्य प्रहसितमुखी शैलतनया ।
अवोचद्यंपश्येत्यवतु स शिवः सा च गिरिजा सच क्रीडाचन्द्रो दशनकिरणापूरिततनुः ॥

मिथ्याज्ञानं विपर्ययः । यथा—

हृतोष्ठरागैर्नयनोदबिन्दुभिः निमग्ननाभेर्निपतद्भिरङ्कितम् ।
च्युतं रुषा भिन्नगतेरसंशयं शुकोदरश्याममिदं स्तनांशुकम् ॥

यथा वा—

माभैः शशाङ्क मम शीधुनि नास्ति राहुः खे रोहिणी वसति कातर किं बिभेषि ।
प्रायोविदग्धवनितानवसङ्गमेषु पुंसां मनः प्रचलतीति किमत्र चित्रम् ॥

अवस्तुष्वपि वस्तुवन्मिथ्याप्रसिद्धिः प्रवादः । यथा—

गन्धर्वपुरसुरायुधकुरङ्गतृष्णान्धकाररूपाणि ।
असतामसत्यदुर्ग्रहदुरापमलिनानि वृत्तानि ॥

यथा वा—

रत्नच्छायाव्यतिकरमिव प्रेक्ष्यमेतत्पुरस्ता द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥

गौणी द्विधा, गुणनिमित्ता उपचारनिमित्ता च । तत्र यस्यां द्वयोर्वचनयोस्सामानाधिकरण्येन वैयधिकरण्येन वा प्रयोगः विशेषणविशेष्यभावान्यथानुपपत्त्यैकस्य प्रतीयमानाभिधीयमानगुणद्वारकः सम्बन्धो भवति । सा गुणव्यवहितार्था गुणनिमित्ता । तत्र च—

संसर्गिभेदकं यद्यत्सव्यापारं प्रतीयते । गुणत्वं परतन्त्रत्वात्तस्य शास्त्र उदाहृतम् ॥

गुणः स्वार्थो विशेषणं प्रवृत्तिनिमित्तमिति चैकोऽर्थः । स धर्मगुणक्रियाकृतिजातिस्वरूपादिभेदादनन्तः । तत्सम्बन्धेन यद्यपि तन्निमित्ता वृत्तिरनन्तप्रकारैवं कल्प्यते तथापि तस्याः षडेव विकल्पा भवन्ति । मुख्यविषयः, अमुख्याविषयः, भेदविषयः, अभेदविषयः, विशेषणविषयः, अविशेषणविषय इति । तत्र द्वयोरपि मुख्यविशेष्यार्थयोर्धर्मादिनिमित्तमेकस्येतरविशेषणत्वं भवति स मुख्यविषयः । स धर्मनिमित्तः समासे यथा—

यो हि दीर्घासिताक्षस्य विलासवलितभ्रुवः । कान्तामुखस्यावशगास्तस्मै नृपशवे नमः ॥

स एवासमासो यथा—

गौर्गौः कामदुघासम्यक्प्रयुक्ता स्मर्यते बुधैः । दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ॥

क्रियानिमित्तः समासो यथा—

कत्तोसंवडइमहं पिअसहिविअसगमोणिसीहेवि ।
जा जअइ गहिअकरणिअरकंखिरि चंदचंडालो ॥

स एवासमासो यथा—

किं द्वारि देवहतके सहकारकेण संवर्धितेन विषपादप एष पापः ।
अस्मिन्मनागपि विकासविकारभाजि भीमा भवन्ति मदनज्वरसन्निपाताः ॥

यत्र विशेषणविशेष्ययोः प्रथममेवैकममुख्यं भवति असावमुख्यविषयः । स विशेष्यस्यामुख्यत्वे सामानाधिकरण्येन धर्मनिमित्तो यथा—

हिमलवसदृशश्रमोदबिन्दूनपनयता किल तन्नवोढवध्वाः ।
कुचकलशकिशोरकौ कथं चित्तरलतया तरुणेन पस्पृशाते ॥

स एव क्रियानिमित्तो यथा--

मुखपङ्कजरङ्गेऽस्मिन्भ्रूलता नर्तकी तव । लीलयाङ्गनाभ्यां दृष्टौ सखि यूनां निषिञ्चति ॥

विशेषस्य मुख्यत्वे वैयधिकरण्येनाकृतिनिमित्तो यथा--

पडिपक्खमंतुपुंजे ळावण्णकुडे अणंगगअकुंभे ।
पुरिसअअहिअअधरिए कोसथणंतीथणेव्वहसि ॥

स एव क्रियानिमित्तो यथा—

ववसाअअरइपओसो रोसगइंददिढसिंखळापडिबंधो ।
कहकहवि दासरइणोजअकेसरिपंजरोगओघणसमओ ॥

यत्रैक एव शब्दोऽर्थे भेदप्रकल्पनया गुणनिमित्तं विशेषणविशेष्यभावमनुभवति असौ भेदविषयः । गौणमुख्ययोर्गुणनिमित्तो मुख्ययोश्च जातिनिमित्तो यथा—

तहकमळक्कमळचंदो चंदमुहि तुज्झमुहअंदो ।
कमलंउणकमळच्चिअ चंदोचंदोच्चिअवराओ ॥

मुख्ययोर्गुणनिमित्तो यथा—

ताळाजाअंति गुणा जालादे सहिअएण्हिघेप्पंति ।
रइकिरणाणुग्गहिआइ होंतिकमळाइकमळाइ ॥

मुख्ययोः क्रियानिमित्तो यथा--

ग्रसमानमिवौजांसि सदसो गौरवेरितम् ।
नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान्पुमान् ॥

स्वरूपनिमित्तो यथा—

अमृतममृतं चन्द्रश्चन्द्रस्तथाम्बुजमम्बुजं रतिरपि रतिः कामः कामो मधूनि मधून्यपि ।
इति न भजते वस्तुप्रायःपरस्परसङ्करं तदियमबला धत्ते भावान् कथं सकलात्मकान् ॥

साधर्म्यादिप्रसिद्धेर्यत्रोपमानमेवोपमेयं प्रत्याययत्यसावभेदविषयः । सोऽन्योऽक्तौ यथा—

पिबन्मधु यथाकामं भ्रमरः फुल्लपङ्कजे । अप्यसन्नद्धसौरभ्यं पश्य चुम्बति कुट्मलम् ॥

समासोक्तौ यथा—

अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः । अहो दैवगतिश्चित्रा तथापि न समागमः ॥

उभयोक्तौ यथा—

उपर्थ्वं तस्यान्था: पुनरपि सरोमार्गतिलकं यदासाद्य स्वेच्छं विलसथ विलीनक्लमभराः ।
इतस्तु क्षाराब्धेर्जठरमकरक्षारपयसौ निवृत्तिःकल्याणी न पुनरवतारः कथमपि ॥

अनुभयोक्तौ यथा—

अथेदं रक्षोभिःकनकहरिणच्छद्मविधिना तथावृत्तं पापैर्व्यथयति यथाक्षालितमपि ।
जनस्थाने शून्ये विकलकरुणैरार्यचरितैरपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥

यत्र विशेषणभूतं नाम सर्वनाम वा विशिष्टगुणधर्मादिकं प्रवृत्तिनिमित्तमुपादत्ते स विशेषणविषयः । स नाम्नो विशिष्टगुणनिमित्तत्वे यथा—

भवतु रुषि कठोरा किन्तु रम्या मृगाक्षी निरुपधिमधुराणां स्वादवोऽमी विकाराः ।
श्रयति कठिनभावः शुक्तिपात्रेष्वपो याः कुलवनबहुमानास्तासु मुक्ताफलं ताः ॥

संस्कारक्रियादिजनितं संज्ञामपि नामेव । तस्य यथा—

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाःकलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वंसहे
वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव ॥

सर्वनाम्नो विशिष्टगुणसम्पत्तिनिमित्तत्वे यथा—

स राजा तत्सौख्यं स च परिजनस्ते च दिवसाः
स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टेऽद्य सकलम् ।
विपाके घोरेस्मिन्न खलु न विमूढा तव सखी
पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति ॥

मुख्यवद्गौणस्यापिविशेषणं तद्विशेषणमेव तत्र सर्वनाम्नो गुणसम्पत्तिनिमित्तत्वएव यथा—

छदा . . वळअ दीहिअहिमंघल्लिहिनि अदेह । अन्नजीदिहरलोअणहोतहोमुहअंदहोरेव ॥

विशेषणमव्यभिचरितमविशेषणं तद्धर्मादिगुणयोगेन यत्र प्रवर्तते तदसावविशेषणाविपर्यासः—

. . . ज हणौ हलामओ विकण्णस्स कोणजीवेज्ज ।
सोउण तेण वि मओ रिहो सच्च पिअवइव्ळो ॥

चेतनप्रकृतेर्यथा—

सच्चं चिअकठमओ तुरणाहो जेणहळिअधूआए ।
हत्थेहि कमलदलकोमलेहि चित्तो न पल्लविओ ॥

अचेतनस्य यथा—

भवतु विदितमेतत्काष्ठमेवासि सत्यं किमपरमभिधास्ये कानने वर्धितोऽसि ।
कुवलयनयनायाः पाणिसङ्गोत्सवेऽस्मिन् मुसल किसलयं ते तत्क्षणाद्यन्न जातम् ॥

अचेतनस्यैव प्रभावतो यथा—

अन्विष्यद्भिरयं चिरात्कथमपि प्राप्येत यद्यर्थिभिः
नाथ त्वं पुनरर्थिनः प्रतिदिनं यत्नात्समन्विष्यसि ।
प्राप्तौ चिन्तितमात्रकं ददद्सौ चिन्तातिरिक्तप्रदं
त्वामालोक्य विदीर्यते यदि न तद्ग्रावैव चिन्तामणिः ॥

मुख्यया गौण्या वान्यविशेषणस्य सतोऽन्यत्रारोपणमुपचारः । तन्निमित्तकोपचारनिमित्ता ; सा तु गौणव्यवहितार्थत्वात् गौणी भवति, तस्या अपि धर्मगुणाकृतिक्रियास्वरूपजात्यादयः प्रवृत्तिनिमित्तभेदात्। सापि षट्प्रकारा भवति, धर्मनिमित्ता, गुणनिमित्ता, आकृतिनिमित्ता, क्रियानिमित्ता, स्वरूपनिमित्ता, जातिनिमित्ता च । तासु धर्मनिमित्ता यथा—

भवतु रुषि कठोरा किन्तु रम्या मृगाक्षी । .... ॥
तालैः शिञ्जद्वलयसुभगैर्नर्तितः कान्तया मे । .... ॥

अत्र कठोरसुभगशब्दौ मूर्तिमद्द्रव्यप्राणिविशेषयोर्विशेषणत्वेन रूढौ, रोषवलयशिञ्जयोरारोप्यमाणौ, तद्योगान्नायिकाकालयोरपि विशेषणभावमनुभवतः । गुणनिमित्ता यथा—

किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।
एसअवसाणविरसो ससुरेण सुओ वळअसद्दो ।

अत्र मधुरविरसशब्दौ वा स्वान्यविशेषणत्वेन रूढौ । तद्व्यवधानेन वर्णनयाऽऽकृतिवलयशब्दैरारोपितौ विशेषणभावमनुभवतः । आकृतिनिमित्ता यथा—

अङ्कुरिते पल्लविते कोरकिते कुसुमिते च सहकारे ।
अङ्कुरितः पल्लवितः कोरकितः कुसुमितश्च हृदि मदनः ॥

यथा वा—

पल्लविअं पिअअकरपल्लवेहिं पप्फुल्लिअंव णयणेहिं ।
फलिअं विअ पीणपओहरेहि अज्जाए—लाअण्णं ॥

अत्राङ्कुरितपल्लवितादयो मूर्तिमत्सु भूरुहादिषु आकृतिविशेषतो विशेषणत्वेन रूढास्तद्व्यवधानेनामूर्तयोर्मदनलावण्ययोरारोप्यमाणा गौणं विशेषणभावमनुभवन्ति । क्रियानिमित्ता यथा—

शशिनमसूत प्राची नृत्यति मदनो हसन्ति ककुभोऽपि ।
कुमुदरजःपटवासं विकिरति गगनाङ्गणे पवनः ॥

यथा वा—

अवऊहिअपुप्पदिसैमअं जेह्लाएसे विअ पओसमुहे ।
माइरज्झिन्तउ रअणीअपरदिसाभुत्तपत्थिअम्मि मिअंके ॥

अत्र सेवोपगूढादीनामन्यक्रियाणां तद्व्यवधानेनान्यत्रारोपणाद्विशेषणभावः । कथं पुनरयं भेदो गौण्याः पृथग्भवति यत्र प्रसिद्धेरुपमानोपमेयं गम्यते तां गुणव्यवहितार्थामगौणीयामन्योक्तिं समासोक्तिं वा वर्णयन्ति । यस्यां पुनरुपमेयेन गुणसाम्यादुपमानं गम्यते तां गौणव्यवहितार्थां गौणीयां समाधिमित्याचक्षते । तदुक्तम्—उक्तस्याप्राकरणिकत्वे समासोक्तिः, प्राकरणिकत्वे समाधिरिति । स्वरूपनिमित्ता यथा—

कस्य नावनतिं कुर्याद्दैन्यमाता दरिद्रता । कं वा न सदयत्येषा श्रीरुन्मादकुटुम्बिनी ॥

यथा वा—

आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः ।
उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः ॥

अत्र दरिद्रताया दैन्यजनकत्वेन मातृस्वरूपाध्यारोपादपत्यता व्यवधानेन सम्बन्धो दरिद्रता दैन्यं जनयतीति वाक्यार्थः । तस्य च शशिनमसूत प्राचीत्यादिवदुपचारोपपत्तिः । एवमुत्तरत्रापि योज्यम् ॥ जातिनिमित्ता यथा—

धृतिःक्षमा दमःशौचं सामर्थ्यं* वागनिष्ठुरा । भूतानामनभिद्रोहस्सखेताः समिधःश्रियः ॥

यथा वा—

येषां प्राणिवधः क्रीडा नर्म मर्मच्छिदोगिरः । परोपतापः कर्तव्यं ते मृत्योरपि मृत्यवः ॥

---

* औचित्यं – इति मूलपाठः.

अत्राग्निसमिद्धर्मेषु मर्त्यमृत्युधर्मेषु च श्रीभृत्यादिषु मृत्युदुर्जनेषु चारोपितेषु समिन्मृत्युजात्योरेव गुणभावो न त्वग्निमर्त्ययोरिति । अमीषां साक्षादसंबन्धे दीप्तिविनाशादिधर्मद्वारक उपचारः संबन्धाय कल्पते । तेनायमर्थः सम्पद्यते । भृत्यादयः श्रियं समेधयन्ति, दुर्जना मृत्युमपि मारयन्ति । सा चेयमन्यरूढा क्रियाऽन्यत्रारोप्यत इत्युपचारवृत्तिरेव भवति । यदुक्तं–

कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च ।
इति नेत्रक्रियाध्यासाल्लब्धा तद्वाचिनी श्रुतिः ॥

एवं
परार्थे यः पीडामनुभवति .... ।
एति जीवन्तमानन्दो नरं वर्षशतादपि ॥

इत्यादि च द्रष्टव्यम् । यद्येवं क्रियानिमित्तैषा कस्मान्न भवति ? क्रियाया एव द्रव्यजातिरूपेण विपरिणामात्, यथा—दैन्यमातेत्यादौ वृत्तिरूपेण । ननु च यथा गौरिव गौस्तथा समिध इव समिध इतीयमपि गौणी कस्मान्न भवति ? भवति यदि समिध इत्यनेन श्रिय इति नापेक्ष्यते श्रीवह्नेरिति वा वह्निशब्दप्रयोगो भवति । यथा—

पपसाअरूपसोधणसमओ अणंगगअकुंभेधणे ।

इति । एतेन दैन्यमाता दरिद्रता, ते मृत्योरपि मृत्यव इत्यादेरपि न गौणत्वमित्युक्तं भवति । आदिग्रहणान्नामसर्वनामादेरपि भेदाभेदाभ्यामुपचारे गौणव्यवहितार्थैव गौणी भवति । स भेदोपचारे नामाध्यारोपाद्यथा—

हे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणम ।
रामस्य गात्रमसि निर्भरगर्भखिन्नसीताविवासनपटोः करुणा कुतस्ते ॥

यथा वा—

स्थानेऽवसीदसि रघूद्वह किं विषादात् रम्यास्त्वयेक्षितमलक्षणमङ्कि कैरु ।
अद्यापि जीवसि दशानन हे हनूमन् कथं तवाभिमुखवर्तिगिराः प्रतीक्षा ॥

अभेदोपचारेण सर्वनामाध्यारोपाद्यथा—

चन्द्रज्योत्स्नाविशदपुलिने सैकतेऽस्मिन्सरय्वा वादद्यूतं चिरतरमभूत्सिद्धयूनोः कयोश्चित् ।
एको वक्ति प्रथमनिहतं कैटभं कंसमन्यः सत्यं तत्त्वं कथय भवता को हतस्तत्र पूर्वम् ॥

यथा वा—

प्रातश्रीरेष कस्मात्पुनरपि मयि तम्मन्थखेदं विदध्या-
न्निद्रामप्यस्य पूर्वामनलसमनसो नैवसम्भावयामि ।

सेतुं बध्नाति भूयः किमितिच * सकलद्वीपनाथानुयातः
त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः ॥

अत्राद्योदाहरणयो रामहनूमन्तौ नामशब्दाभ्यामतिनिष्करुणे परिभवासहिष्णौ च स्वमूर्तिभेदे संज्ञाविशेषणत्वेन रूढौ, तद्व्यवधानेन तद्विपरीतयोरुपचरितस्वमूर्तिभेदान्तरयोरारोपितावौपचारिकं विशेषणभावं भजेते इति गौणव्यवहितार्थोपचारनिमित्तोपचारनिमित्तेयं गौणी । यत्र तु न भेदोपचारस्तत्र व्यवधानाभावाद्गुणनिमित्तैव गौणी भवति, यथा— रामोऽस्मि सर्वसहे, तार्क्ष्यः सोऽपि समं निजेन विभुना जानाति मां रावणं ॥ इति । कथं पुनः शब्दार्थयोरभेदेऽपि भेदव्यपदेशः । सहि राहोः शिरः गोर्गोः कामदुघेत्यादौ शब्दार्थभेद एव दृश्यते । उच्यते, अस्तितावदेतन्मुख्याभावे सति प्रयोजने निमित्ते च सत्युपचारः प्रवर्तते । स चाभिन्नानां भेदव्यपदेशहेतुः, भिन्नानां चाभेदव्यपदेशहेतुर्भवति । तत्राभिन्नानां भेदो यथा—

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥

अत्र परमात्मव्यतिरिक्तवस्त्वन्तराभावात्कर्मादिकारकव्यतिरेकेण च ज्ञानादिक्रियानुपपत्तेरेक एव कर्तृकर्मकरणाधिकरणोपचारेण भिद्यते । सिद्धे च भेदे सादृश्यनिबन्धने मुख्यानामिवोपचरितानामप्युपमानोपमेयव्यवहारः प्रवर्तते । तद्यथा—

त्वन्मुखं त्वन्मुखमिव त्वद्दृशौ त्वद्दृशाविव । त्वन्मूर्तिरिव मूर्तिस्ते त्वमिव त्वं कृशोदरि ॥

वैसादृश्यनिबन्धनस्तु व्यतिरेको भवति । यथा—

नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान्पुमान् ।
रइकिरणाणुग्गाहिआइ होंति कमलाइ कमलाइं ।

ततश्च भिन्नार्थवत्सम्बन्धसम्बोधनविभक्त्यादेरुत्पत्तिर्यथा—रामस्य गात्रमसि, हे हनूमन्निति । एतेन मुख्यगौणयोरपि उपमारूपकादयो व्याख्याताः । यथा—

अयमालोहितच्छायो मदेन मुखचन्द्रमाः । सन्नद्धोदयरागस्य चन्द्रस्य प्रतिगर्जति ॥
चन्द्रमाः पीयते देवैर्मया त्वन्मुखचन्द्रमाः । असमग्रो ह्ययं शश्वदयमापूर्णमण्डलः ॥
अमृतात्मनि पद्मानि द्वेष्टरि स्निग्धतारके । मुखेन्दौ तव सत्यस्मिन्नितरेण किमिन्दुना ॥
न मीलयति पद्मानि न नभो व्यवगाहते । त्वन्मुखेन्दुर्ममासूनां हरणायैव यस्यति ॥

* " चाऽसौ कथमिव " इति पाठान्तरम् .

भिन्नानामभेदोपचारो यथोत्तरोदाहरणयोः, तत्र हि प्रतीयमानाभिधीयमानतुल्यगुणोपमानविशेषणमनेकं सर्वनामोपमानव्यवधानेनोपमेये प्रयुक्तमभेदोपचारेणोत्कर्षमारोपयति । नन्वियमन्योक्तिः समासोक्तिरुभयोक्तिर्वा कस्मान्न भवति ? तथाहि— प्रतीयमानाभिधीयमानोपमेयगुणविभूतयः सर्वनामाध्यासेऽप्यन्योक्तिसमासोक्त्युभयोक्तयो दृश्यन्ते । तत्रान्योक्तिर्यथा—

हा सौरभं क तत्ते क्व नु ते सन्तापहारि हा शैत्यम् ।
अङ्गारकारहस्ते चन्दन पतितोऽसि धिग्दैवम् ॥

समासोक्तिर्यथा—

मुग्धामजातरजसं कलिकामकाले बालां कदर्थयसि किं नवमालिकायाः ।
अन्यासु तावदुपमर्दसहासु भृङ्ग लोलं विनोदय मनः सुमनोलतासु ॥

उभयोक्तिर्यथा—

केनासीनः सुखमकरुणेनाकरादुद्धृतस्त्वं त्रिकेतुं वात्वमभिलषितः केन देशान्तरेऽस्मिन् ।
यस्मिन्वित्तव्ययभरसहो ग्राहकस्तावदास्तां नास्ति भ्रातर्मरतकमणे त्वत्परीक्षाक्षमोऽपि ॥

उच्यते, यत्रोपमानमेव प्रयुक्तं प्रतीयमानाभिधीयमानगुणमुपमेयं गमयति, तत्रैवान्योक्त्यादयो भवन्ति । इह तु नोपमानं प्रयुज्यते । किं तर्हि ? तद्विशेषणं सर्वनाम, तेन प्रथमोदाहरणे नान्योक्तिर्द्वितीयोदाहरणे तु न समासोक्तिरिति । यद्येवमध्यासात्मिका तद्भावापत्तिः कस्मान्न भवति ? यथैष बालाबाहुमूले बालचन्द्रमाः, यथा वा—किमहो नृपाः सममिमीभिरुपपतिसुतैर्न पञ्चभिः, वध्यमभिहथ, भुजिष्यममुं सहचानया स्थविरराजकन्ययेति । उच्यते, नात्र सर्वनाम्नामेव प्रयोगः । किं तर्हि ? विशेष्याणामपीति युज्यते तद्भावापत्तिः । चन्द्रज्योत्स्नेत्यादौ तु सर्वनामाध्यासे समाधिलक्षणयोगादुपचारगौण्येवैषा भवति, यथा च धर्मिणोऽप्यध्यासे समाधिरुपपद्यते तथाग्रतो वक्ष्याम इति ।

लक्षणा द्विविधा—लक्षणा लक्षितलक्षणा च । तयोर्यस्यामुपात्तशब्दस्यार्थस्य क्रियासिद्धौ साधनत्वायोगात् स्वार्थोऽविनाभूतमर्थान्तरं व्यवहितमेव लक्षयति सा लक्षणा, तद्व्यतिरिक्ता तु वक्ष्यमाणानेकरूपा लक्षितलक्षणेति । तत्र लक्षणा षोढा, सामीप्यलक्षणा, साहचर्यलक्षणा, सहचरितलक्षणा, हेतुलक्षणा, तादर्थ्यलक्षणा, परिमाणलक्षणा च । तत्र गङ्गायां घोषः प्रतिवसति, मञ्चाः क्रोशन्तीत्यादिषु स्वार्थाविनाभूतसमीपार्थान्तरप्रतीतिहेतुः सामीप्यलक्षणा । यथा—

यत्तालीदलपाकपाण्डुवदनं ।
अभिनवकरिदन्तच्छेदकान्तःकपोलः । इति ॥

अत्र पाकच्छेदयोः क्रियात्वेनामूर्तत्वात्पाण्डुत्वं कान्तत्वं चासम्भवत् समीपस्थं पक्वतालीपत्रं सद्यश्छिन्नं च हस्तिदन्तं लक्षयति । छत्रिणो गच्छन्ति, कुन्तान्प्रवेशयेत्यादिषु स्वार्थाविनाभूतसाहचर्योपलब्धार्थान्तरप्रतीतिहेतुः साहचर्यलक्षणा । यथा—

यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥

अत्र दोग्धृसाहचर्याच्छैलेष्वपि दुदुहुरिति प्रयुज्यते । यथा वा—

पदेपदे कूबरिणः शतंशतं शतंशतं मत्तगजान्रथेरथे ।
न्यवेशयद्वाजिशतं गजेगजे हयेहये कुन्तशतं शतक्रतुः ॥

यत्रोक्तधर्मसहचरितोऽन्योऽपि धर्मो लक्ष्यते सा सहचरितलक्षणा । यथा—

मधुपृषतिपिङ्गाः पयोबिन्दवः ।
कनकफलकस्फारजघना ॥ इति ।

अत्र पिङ्गत्वस्फारत्वसहकृतास्तदाश्रयाकारकान्त्यादयो लक्ष्यन्ते । अन्नं वै प्राणाः, आयुर्घृतमित्यादिषु स्वार्थाविनाभूतनिमित्तकारणार्थान्तरप्रतीतिहेतुर्हेतुलक्षणा । यथा—त्वं जीवितं त्वमसि मे हृदयं द्वितीयम्, इति । अत्र जीवितशब्देन हृदयशब्देन च जीवितचैतन्यहेतुः प्रियतमोच्यते । इन्द्रस्थूणामल्लिकाप्रदीपा इत्यादिषु तदर्थप्रतीतिहेतुस्तादर्थ्यलक्षणा । यथा—

आरूढो मलयाचलं जलनिधेः पारं परं नाटय
न्दोर्दण्डं नृपसिंहसिंहलपतेरुच्छेत्तुमच्छं यशः ॥ इति ।

अत्र दण्डशब्देन दण्डनाप्रहितो लोक उच्यते । प्रस्थं पलं क्रोश इत्यादौ परिमाणसाधनभूतार्थान्तरप्रतीतिहेतुः परिमाणलक्षणा । यथा—

यस्मादनर्घाणि हृतान्यनूनैः प्रस्थैर्मुहुर्भूरिभिरुच्छ्रितानि ।
आढ्यादिव प्राहुणिकादजस्रं जग्राह रत्नान्यमितानि लोकः ॥

अत्र प्रस्थशब्देन प्रस्थपरिमाणसाधनं मानभाण्डं काष्ठादिमयमुच्यते ।

लक्षितलक्षणापि षोढैव—रूढलक्षणा, प्रतीकलक्षणा, विवक्षितलक्षणा, विरुद्धलक्षणा, तदन्यलक्षणा, प्रकीर्णलक्षणा च । तासु यस्यां यथाकथंचिद्व्युत्पत्त्या लक्षितेनाभिधानेन रूढलक्षण एवार्थो लक्ष्यते सा रूढलक्षणा । दुरोदर श्चक्रवाको द्विरेफो भ्रमर इति । यथा—

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः । इति ।

अत्र दुरोदरत्वं द्विरेफत्वं च कुररेऽपि सम्भवति, नचात्र रूढा लक्षणेति । नायं लक्ष्यते । यत्र प्रतीकेनाभिधानैकदेशेन समुदायो लक्षित एव लक्ष्यते न यः कश्चित् सा प्रतीकलक्षणा । यथा—भीमो भीमपराक्रमः, सच्चा अपि होइ अइअद्दंसणतुरीआ । अत्र स्वेन भीमशब्दो भीमसत्यशब्दप्रतीकश्रवणात् भीमसेनः, सत्यभामेत्यभिधानयोः पूर्वलक्षितयोर्लक्षणा लक्ष्यते । न हि भवति

ज्येष्ठा ज्येष्ठेति, आर्द्रावार्द्रेति । यत्र यथाकथंचिच्छब्दप्रयोगे विवक्षितमेव लक्ष्यानुसारतो लक्ष्यते सा विवक्षितलक्षणा । यथा—

मनसिजजैत्ररथं विलोचनार्धं ।
चकितहरिणीहारिनेत्रत्रिभागः । इति ॥

अत्र नार्धशब्दस्य त्रिभागशब्दस्य अर्थः, किन्तु ताभ्यामसमग्रालोकनं लक्ष्यते । नहि भवति नेत्रचतुर्भागो नेत्रषड्भागो वेति । पदं केवलमन्यसन्निधेर्वा यत्राभिहितविरुद्धं लक्षितमेवार्थं लक्षयति सा विरुद्धलक्षणा । यथा विष्टिर्भद्रा, अङ्गारको मङ्गलः, पुण्यवत्यहं यस्यास्त्वमेवंविधः पतिरसीति । अत्र भद्रामङ्गलशब्दौ पुण्यवच्छब्दश्च अभद्रमङ्गलत्वे अपुण्यवत्त्वं च लक्षितमेव लक्षयन्ति । यथा वा— रत्नावल्यां राजा विदूषकमाह—महाब्राह्मणस्त्वमसि, कोऽन्य एवमृचामभिज्ञ इति । अत्र महाब्राह्मण इत्यनेन ऋचामभिज्ञ इत्यनेन च वृषलादप्यधमत्वं वैधेयत्वंच लक्ष्यते । यथाच मालतीमाधवे, लवङ्गिका मदयन्तिकामभिधत्ते । कहं णाम णववहूवीसंभेणापाअजाणअं लडहविअड्ढमहुरभासणं अरोसणं च भाद्दरं दे भत्तारं समासादिअ, पिअसही दुम्मणाइस्सदि । अत्र नववधूविस्रम्भणोपायज्ञत्वादयस्तद्विरुद्धमर्थं लक्षयन्ति । एवमन्येऽपि यथा—

इदमम्लानमानाया लग्नं स्तनतटे तव । छाद्यतामुत्तरीयेण नवं नखपदं सखि ॥

कुविआओपसण्णाओ ओरुण्णमुहिओ विहसमाणीओ ।
जहगहिआ नहहिअअं हरंति उच्छण्णमहिलाओ ॥

वयं तथा नाम यथात्थ किं वदाम्ययन्त्वकस्माद्विकलः कथान्तरे ।
कदम्बगोलाकृतिमाश्रितः कथं विशुद्धमुग्धः कुलकन्यकाजनः ॥

एतेष्वम्लानमानशब्देन मानभङ्गः, उत्सन्नशब्देनानुच्छेदाशीः, विशुद्धमुग्धशब्देनाविशुद्धिरमौग्ध्यं च लक्ष्यते । यत्राभिहितशब्दार्थतिरस्कारेणार्थान्तरं लक्ष्यते सा तदन्यलक्षणा । यथा—

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः । शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥

अत्र न सुवर्णशब्दार्थो, नापि पुष्पशब्दार्थः । किन्तु सुवर्णशब्देन सर्वपुरुषार्थमूलं हिरण्यं, पुष्पशब्देन च प्रसवार्थो लक्ष्यते । ताभ्यां च लक्षिताभ्यां व्यवसायिनां पुरुषविशेषाणां वसुमती सर्वान्कामान् प्रसूत इति । उक्ताभ्योऽन्या प्रकीर्णलक्षणा । यथा—

दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतम् ।
दशपूर्वरथं यमाख्यया दशकण्ठारिगुरुं विदुर्बुधाः ॥

हिरण्यपूर्वं कशिपुं प्रचक्षते ।
तुरङ्गकान्तामुखहव्यवाहज्वालेव हित्वा जलमुल्ललास ॥ इति ।

अन्ये पुनर्लक्षितलक्षणामन्यथा व्याचक्षते। लक्षणयोपचरितवृत्त्या गौण्याभिहितार्थेन यत्रार्थान्तरं लक्ष्यते सा लक्षितलक्षणेति। यथा—रथावयवायुधः, पङ्क्तिरथः, रथाङ्गनामेति, अत्र रथावयव-शब्देन चक्रं लक्ष्यते। तेन तदाकृतिः तन्नामावाऽऽयुधविशेषः, पङ्क्तिरित्यनेन दशाक्षरं छन्दो लक्ष्यते। तेन दशशब्दः, ताभ्यां चायुधसन्निधेश्चक्रायुधः, दशरथः, इति देवविशेषराजविशेषौ लक्ष्येते। रथाङ्गमित्यनेन रथैकदेशो लक्ष्यते; तेन चक्रशब्दः। नामेत्यनेन परिभाषणं लक्ष्यमाणार्थः, ताभ्यामन्योन्यसन्निधेश्चक्रवाक इति पक्षिविशेषो लक्ष्यत इति। अस्याश्च प्रबन्धेषु भूयसा प्रयोगः। तद्यथा—

सूईवेहेमुसलं विच्छुहमाणेन उद्धलोएण। एकग्गामेपिविओ इमेहिं अच्छिहिविअणदिट्ठो॥

अत्र सूचीवेधे मुसलप्रवेशो न सम्भवति, जनस्तु तमपि करोतीत्यनेन मुख्यया लक्षितेन तस्या-सम्भाव्यमानार्थवादिता लक्ष्यते। यथा—

चुंबिज्जइ सअहुत्तं अपवाहिज्जइ सहस्ससअहुंत्तं।
रमिअपुणो विरमिज्जइ पिएजणे णत्थि पुणरुत्तं॥

अत्र पुनरुक्तशब्दोऽप्यर्थवान् पुनः प्रयोगविशेषे निरूढशक्तिः क्रिया पुनः करणसामान्यं लक्षय . . . विपक्षिचुम्बना . . . णविशेषवैयर्थ्याय लक्षयति। एवं—

दूइ तुमं विअणिउणा कक्कसमहुआइ जाणसेवोलुं।
कंडुइअपंडरं जहणहोइ तहतं कुणिज्जासु॥

अत्र कण्डूयितपाण्डरमित्यनेन पारुष्यं लक्ष्यते। तेन तु स्नेहक्षतिरिति। अपि च—

गअणं च मत्तमेहं धाराळुळिअज्जणाइ णवणाइ।
णिरहंकारमिअंका हरंति नीलाओ विअ णिसाओ॥

अत्र मत्तनिरहङ्कारशब्दावनिभृतत्वं च लक्षयन्तौ चेतनेषु रूढावचेतनेषु प्रयुज्यमानौ तयोरपि तथाविधार्थयोगं लक्षयतः। किञ्च—

अण्णं लडहत्तणअं अण्णच्चिअअंगवढ्ढणच्छाआ।
सामासामण्णवआ पइस्सरेहच्चिहणहोइ॥

अत्र रेखाशब्देन चित्रालेख्यं लक्ष्यते, न च विशिष्टं रूपनिर्माणमिति। अपरं,

अगणिअ नअणाआसा माळिपुळोइज्जतजंतको होसि मअणस्स॥

अत्र मदनस्य को भवसीत्यनेन तत्सनाभित्वं लक्ष्यते। तेन च तदौपम्यमिति। तथा—

प्रतीच्छत्याशोकीं किसलयपरावृत्तिमधरः कपोलः पाण्डुत्वादवतरति तालीपरिणतिम् ।
परिम्लानप्रायामनुवदति दृष्टिः कमलिनीं नवीनस्तन्वङ्ग्या मनसिजविकारो विजयते ॥

अतः प्रतीच्छत्यवतरत्यनुवदतीति चेतनधर्मैरचेतनप्रयुक्तैरुपलक्षितेषु धारणप्राप्त्यनु . . . . . . किसलयपरावृत्त्या श्वासधूसरत्वं लक्ष्यते । तेनापि तत्सामीप्यादशोककिसलयौपम्यमिति तालीपरिणत्या कमलिनीपरिम्लानतया च विरहकार्श्यं, तेन च स्नेहातिरेक इति । एवं—

परिम्लानं पीनस्तनजघनसङ्गादुभयतस्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम् ॥

अत्र वदतीत्यनेनोपचारवृत्त्या ज्ञापयतीति, परिम्लानमित्यादिभिस्तद्धर्मैस्तस्यास्तनुसन्निवेशचारुत्वोत्कर्षो लक्ष्यते । अपि च—

निर्माल्यं नयनश्रियः कुवलयं वक्त्रस्य दासः शशी
कन्दर्पस्य धनुर्लता किमपरं द्वारि भ्रुवोर्धार्यते ॥ इति ॥

अत्र निर्माल्यदासशब्दाभ्यामुपचारवृत्त्या हीनत्वेन लक्षितेन नयनवक्त्रयोरुपमोत्कर्षो लक्ष्यते । कन्दर्पधनुर्लतायास्तु द्वारप्रवेशापाकरणोपलक्षणेन तयोरपि हीनत्वेन सुतरां ब्रूते । किञ्च—

यत्तालीदलपाकपाण्डु वदनं यद्दुर्दिनं नेत्रयोः
यच्चानर्तितकेलि पङ्कजदलं श्वासाः प्रसर्पन्ति च ॥

अत्र दुर्दिनं नेत्रयोरित्यत्र दुर्दिनशतवृष्टिमेघाहतशोभेऽह्नि रूढाभिधानशक्तिर्नेत्रयोरसम्भाव्यमानत्वेन स्वार्थाविनाभूतं पयःप्रवाहं लक्षयन्नश्रुप्रवाहं लक्षयति । अन्यच्च—

अतिक्रान्तसुखाः कालाः प्रत्युपस्थितदारुणाः ।
श्वश्वत्पापीयदिवसाः पृथ्वी* च गतयौवना ॥

अत्रातिक्रान्तसुखत्वादिति चेतनधर्मैरचेतनेषु कालादिष्वारोपितैस्तेषु तदसम्भवेन तदविनाभूतास्तद्गताः प्राण्यादयो लक्ष्यन्ते । तेनात्मनिर्वेद इति । अपरञ्च—

इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम् । निश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥

अत्र यथा अन्धे रूपविशेषाभिव्यक्तिर्न सम्भाव्यते एवं तमस्यपि यत्र नीरन्ध्रे रूपविशेषाभिव्यक्तेरसम्भवस्तदन्धंतम इत्युच्यते, तथा यथान्धो रूपग्रहणासमर्थ एवमादर्शोऽपि । यो रूपग्रहणासमर्थः

---

* अत्र ' श्वश्वःपा ' – ' पृथिवी ' – इति पाठान्तरम् .

सोऽन्ध इत्युच्यते । तत्रोपचरितवृत्तौ योऽन्धवन्न पश्यति स एवान्ध इत्युच्यते । इह यत्र किञ्चिन्न दृश्यते तत्रापि अन्धशब्दोपलक्षितलक्षणया प्रवर्तत इति । एवमन्यदपि यथा—

स्वल्पै रसावपि न दह्यत एव काष्ठैः ।

वअस्स तुमंपि थेव चंदणरसेण सामा . . . ज्जसि ॥

अत्र पूर्वस्मिन्यथाश्रुतार्थो वर्णनीये सम्भवः । यथा विक्रमादित्यस्तथायमपि महापुरुषविशेष इति लक्षयति । तेन च स्वल्पैर्वचोभिरनाख्येयं माहात्म्यादिगुणगौरवमुभयोरपि लक्षयति । उत्तरत्र तु स एवार्थो लक्षणया वैपरीत्येनाख्यायत इत्येवमयमनन्तो लक्षितलक्षणव्यापारः प्रबन्धेषु लक्षणीयः । यथा—

एक्काहिअद्धिहि सावणुअ नहि भद्दवओ । माहवुमहिअलपत्थ . . उत्थवेसरओ ॥

अंगहिगिंहसुगच्छडितिलवणेमग्गरूमुद्दहे । मुमुहुंपंकअसरे आवासिओसिसिरु ॥

नीहारजालमलिनः पुनरुक्तसान्द्राः कुर्वन्वधूजनविलोचनपद्ममालाः ॥

क्षुण्णः क्षणं यदुबलैर्दिवमातितांसुःपांसुर्दिशां मुखमतुत्थयदुत्थितोऽद्रेः ॥

शब्देष्वर्थेऽभिधानदानाभिप्रायो विवक्षा । यदाह—वक्तुर्विवक्षितपूर्विका शब्दप्रवृत्तिरिति । त्रिधा हि वाङ्मयः, अपौरुषेयमार्षं पौरुषेयं च । तत्र शब्दप्रधानमपौरुषेयं मन्त्रो ब्राह्मणं च । तत्र वक्तुरभावाद्विवक्षा नोपपद्यते । अर्थप्रधानमार्षं स्मृतिरितिहासश्च । तत्र विवक्षामात्रं प्रवर्तते—

लौकिकानां हि साधूनां वागर्थमनुवर्तते । ऋषीणां पुनराद्यानां वाचमर्थोऽनुवर्तते* ॥ इति ॥

प्रधानं पौरुषेयं च तदुभयमप्यभिनिविष्टबुद्धीनां विशिष्टविवक्षाभ्यो जायते । तद्यथा—विवक्षातः कारकाणि भवन्ति । अक्षान्दीव्यति अक्षैर्दीव्यति अक्षेषु दीव्यत इति । वलाहको विद्योतते, वलाहकस्य विद्योतत इति—

शक्तिमात्रा समूहस्य विश्वस्यानेकधर्मणः । सर्वदा सर्वथाभावात्क्वचित्किञ्चिद्विवक्ष्यते ॥

कारकेष्वप्यकारकविवक्षा यथा—मातुः स्मरति, सर्पिषो जानीते, न माषाणामश्नीयात् ।

नैते सुखस्य जानन्ति येन वत्स्यन्ति नन्दने ॥ इति ।

अत्र कर्मादिषु शेषत्वेन विवक्षितेषु सम्बन्धमात्रे षष्ठी न कर्मकरणकर्तृष्वपि कारकविभक्तिरिति । अकारकेषु कारकविवक्षा यथा—भवति पचति, भवति पक्ष्यति, भवत्यपाक्षीत् । अस्तिगच्छामो वयमिति । तथा स्मरसि काश्मीरेषु वत्स्यामः । एहि मन्ये न यास्यसि, पश्य मृगो धावति, इह पश्यामः, कर्मणि द्विवचनबहुवचनान्युदाह्रियन्त इति । क्रियायामपि कारकविवक्षा यथा—चोरस्य रुजति, चोरस्यामयति, चोरं ज्वरयति, चोरं संतापयतीति । अत्र रुजार्थानां

* 'धावति' इति पाठान्तरम् .

भाववचनानामज्वरिसन्ताप्योरिति भावस्यैव कर्तृत्वम् । अक्रियायां क्रियाविवक्षा यथा—नीलति वनम्, श्वेतते प्रासादः ॥

विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् । इति ॥

क्रियायां क्रियान्तरविवक्षा यथा—एषितुमिच्छति, कमितुं कामयते, भवेदपि भवेत्, स्यादपि स्यादिति ।

कारकेऽपि क्रियाविवक्षा यथा—द्रष्टुं चक्षुः, योद्धुं धनुः, गन्तुमनाः गन्तुकाम इति । अत्र क्रियायां क्रियार्थायामुपपदे तुमुन् भावउक्तः । स चक्षुरादीनां क्रियाविवक्षामन्तरेण न सिध्यतीति । असम्बन्धे सम्बन्धविवक्षा यथा—

साटोपमुर्वीमनिशं नदन्तो यैः प्लावयिष्यन्ति समन्ततोऽमी ।
तान्येकदेशान्निभृतं पयोधेरम्भांसि मेघान्पिबतो ददर्श ॥

अचेतनेषु चैतन्यविवक्षा यथा—नदीकूलं पिपतिषति, अश्मा लुनोधिमिच्छति । ... विवक्षा यथा—अश्वारोहः पिपतिषति । प्रधाने गुणविवक्षा यथा—बलाकायाः शौक्ल्यम्, काकस्य कार्ष्ण्यमिति । गुणे प्रधानविवक्षा यथा—मधुरो रस आप्याययति, आम्लो दीपयतीति । अवयवे समुदायविवक्षा यथा—ग्रामो दग्धः, पटो दग्धः, अक्ष्णा काणः, पादेन खञ्ज इति । समुदाये अवयवविवक्षा यथा—दोर्दण्डचण्डिममात्रारोपणीये धनुषि सति पदातिलवे लक्ष्मणेन प्रभुरार्यः मामपि तस्यैव सुगृहीतनाम्नो देवस्य भृत्यपरमाणुं विकुक्षिनामानमवधारयतु भवतीति । अभेदे भेदविवक्षा यथा—पटुभाषी भवान् पटुरासीत् । पटुतरः एषः । अन्य एवासीत्सम्पन्नः, राहोः शिरः, शिलापुत्रकस्य शरीरमिति । भेदेऽप्यभेदविवक्षा यथा—तानेव शालीनश्नीमो ये मधुरायां, तानेव शाटकानाच्छादयामो ये पाटलिपुत्र इति । असतो विवक्षा यथा—समुद्रः कुण्डिका, विन्ध्यो वर्धितकमिति । सतोऽप्यविवक्षा यथा—अनुदरा कन्या, अलोमिका एडकेति । सदसतोर्विवक्षा यथा—तदिदमपमेघोदयं वर्षं, सोच्छ्वासं मरणमिति । सदसतोरविवक्षा यथा—शैलाधिराजतनया न ययौ न तस्थाविति । स्तुत्या निन्दाविवक्षा यथा—

गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते । असञ्जातकिणस्कन्धः सुखंस्वपितिगौर्गली ॥

निन्दया स्तुतिविवक्षा यथा—

चपलो निर्दयश्चासौ जनः किं तेन मे सखि । आगःप्रमार्जनायैव चाटवो येन शिक्षिताः ॥

विधिना निषेधविवक्षा यथा—

गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥

निषेधेन विधिविवक्षा यथा—

माऽऽगच्छ प्रमदाप्रिय प्रियशतैर्भूयस्त्वमुक्तो मया
बाला प्राङ्गणमागतेन भवता प्राप्नोत्यवस्थान्तरम् ।
किञ्चास्याः कुचभारपीडनपरैर्यत्नप्रबन्धैरपि
त्रुट्यत्कञ्चुकजालकैरनुदिनं निस्सूत्रमस्मद्गृहम् ॥

एवमियमनेकधा विवक्षा विप्रथते तदेष लौकिकवादः—

*अस्मिन्नपारे संसारे कविरेकः प्रजापतिः । यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥

अपि च—

ठिअमट्ठिअंवदीसइ अ ठिअंपिजहट्ठिअंवपडिभाइ ।
जहसंट्ठिअंबवजसइ सुकइणइमाओपअईओ ॥

किञ्च—

क्वचित्स्वल्पेऽप्यर्थे प्रचुरवचनैरेव रचना क्वचिद्वस्तु स्फारं कतिपयपदैरर्पितरसम् ।
यथा वाच्यं शब्दाः क्वचिदपि तुलायामिव धृता स्त्रिभिः कल्पैरेवं कविवृषभसन्दर्भनियमः ॥

विवक्षा लोकव्यवहारे काव्यव्यवहारे च सुमतिभिरुन्नीयमाना त्रिधा विख्यायते, काक्वादिव्यङ्ग्या, प्रकरणादिव्यङ्ग्या, अभिनयादिव्यङ्ग्या च । तत्र काकुः स्वरो विच्छेद इति काक्वादयः । तेषु—

भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते ।

सा त्रिधा—नियतप्रतिबन्धा, अनियतप्रतिबन्धा, अप्रतिबन्धा च । तासु नियतप्रतिबन्धा द्विधा, साकाङ्क्षा निराकाङ्क्षा च । तयोर्वाक्यान्तरापेक्षिणी साकाङ्क्षा । सा त्रिधा—आक्षेपगर्भा, प्रश्नगर्भा, वितर्कगर्भा च । वाक्यान्तरभाविनी निराकाङ्क्षा । सापि त्रिधा, विधिरूपा उत्तररूपा निर्णयरूपा च । तदेव वाक्यं काकुविशेषेण साकाङ्क्षं, तदेव काक्वन्तरेण निराकाङ्क्षम् । तत्राक्षेपगर्भा यथा—

यदि मे वल्लभा दूती तदाहमपि वल्लभा । यदि तस्याः प्रिया वाचस्तन्ममापि प्रियप्रिया ॥

इयमेव निर्देष्टुर्विधिरूपा । प्रश्नगर्भा यथा—

गतः स कालो यत्रासीन्मुक्तानां जन्मवल्लिषु ।
वर्तन्ते साम्प्रतं तासां हेतवः शुक्तिसम्पुटाः ॥

इयमेवोपदेष्टुरुत्तररूपा । वितर्कगर्भा यथा—

---

* 'अपारे काव्यसंसारे' इति पाठान्तरम् ।

नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः सुरधनुरिदं दूराकृष्टं न तस्य शरासनम् ।
अयमपि पटुर्धारासारो न बाणपरम्परा कनकनिकषस्निग्धा विद्युत्प्रिया न ममोर्वशी ॥

इयमेवोपदेष्टुर्निर्णयरूपा । एवमन्या अपि—

सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी । रामा रम्ये वनान्तेऽस्मिन्मया विरहिता त्वया ॥

इत्यादयो द्रष्टव्याः । ता इमास्तिस्रोऽपि नियतप्रतिबन्धाः । अनियतप्रतिबन्धाः पुनरनन्ताः । तास्वभ्युपगमानुनयकाकुर्यथा—

युष्मच्छासनलङ्घनांहसि मया मग्नेन नाम स्थितं
प्राप्तानामविगर्हणां स्थितिमतां मध्येऽनुजानामपि ।
क्रोधोल्लासितशोणितारुणगदस्योच्छिन्दतः कौरवा-
नद्यैकं दिवसं ममासि न गुरुर्नाहं विधेयस्तव ॥

अभ्यनुज्ञोपहासकाकुर्यथा—

मथ्नामि कौरवशतं समरे न कोपाद्दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू सन्धिं करोतु भवतां नृपतिः पणेन ॥

विषान्नाद्याक्षेपकाकुर्यथा—

लाक्षागृहानलविषान्नसभाप्रवेशैः प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।
आकृष्य पाण्डववधूपरिधानकेशान् स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः ॥

एवमन्या अपि—

शल्यमपि स्फुरदन्तं सोढुं शक्येत हालहलदिग्धम् ।
धीरैर्न पुनरकारणकुपितखलालीकदुर्वचनम् ॥

इत्यादयो द्रष्टव्याः ॥ अप्रतिबन्धा तु एकगुणा द्विगुणा त्रिगुणा च । तत्रैकगुणा यथा—

भ्रुकुटिरारचिता गतमग्रतो हृतमथाननमुक्तमसाधु वा ।
इयमपि प्रभुता क्रियते बलादकुपितोपि हि यत्कुपितो जनः ॥

द्विगुणा यथा—

किं किरातेन यच्चक्रे समाकृष्य शिलीमुखान् ।
शिलीमुखान् समाकृष्य किं किरातः करोति तत् ॥

त्रिगुणा यथा—

सेयं पश्यति नो कुरङ्गकवधूत्रस्तेयमुद्वीक्षते
तस्याः पाणिरयं न मारुतचलः पत्राकृतिः पल्लवः ।
तारं रोदिति सैव नैष मरुता वेणुः समापूर्यते
सेयं मामभिभाषते प्रियतमा नो कोकिलः कूजति ॥

चतुर्गुणा खल्वपि यथा—

उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी ।
आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः ॥
किं गतेन नहि युक्तमुपैतुं कः प्रिये सुभगमानिनि मानः ।
योषितामिति कथासु समेतैः कामिभिर्बहुरसा धृतिरूहे ॥
सख्या वा नायिकाया वा सखीनायकयोरथ ।
भूयसीनां सखीनां वा वाच्ि काकुरिह स्थिता ॥

एवमन्या अपि कोऽहमित्यादयो द्रष्टव्याः । स्वरास्त्रिधा—प्लुतादयः, उदात्तादयः, प्रगृह्यादयश्च । तेषु प्लुतादयो यथा—

सुभ्रु त्वं कुपितेत्यपास्तमशनं त्यक्ताः कथा योषितां
दूरादेव विवर्जिताः सुरभयः स्रग्गन्धधूपादयः ।
कोपं रागिणि मुञ्च मय्यवनते दृष्टे प्रसीदाधुना
सर्वं त्वद्विरहाद्भवन्ति दयिते सर्वा ममान्धा दिशः ॥

तदेतत्प्रियतमाप्रसादनपरमपि वाक्यं दृष्टे इत्यत्र सम्बुद्धौ प्लुतस्वरकरणादुत्कुपितदृष्टिप्रसादनपरं सम्पद्यते । आदिग्रहणेन ह्रस्वदीर्घानुनासिकाः सङ्गृह्यन्ते । तत्र हि ह्रस्वस्वरकरणादर्थभेदो यथा—अश्ववदिति सम्बोधनं प्रतीयते । दीर्घकरणादर्थभेदो यथा—विश्वामित्रो विश्वानर इति ऋषिः संज्ञा च प्रतीयते । अनुनासिककरणादर्थभेदो यथा—गम्भीरआँ अपः ; आङोऽनुनासिकश्छन्दसीति ईषदादिरर्थः प्रतीयते, न स्थाणुः । दिनं यथा—

आ ज्ञातं स जटायुरेष जरसा क्लिष्टो वधं वाञ्छति ।

उदात्तादयो यथा-कलो रवोऽस्येति कलरवः, एकः पुत्रोऽस्येत्येकपुत्र इति । समासे बहुव्रीहिस्वरो भवति, स च पूर्वपदस्यान्तोदात्तः । कलश्चासौ रवश्च एकश्चासौ पुत्रश्चेति समासे कर्मधारयस्वरो

भवति। स च समासस्येति समासस्यान्तोदात्तो भवति। ताभ्यां चान्यपदार्थे उत्तरपदार्थश्च प्रतीयते। तदुक्तम्—

संशयाय दधतोः सरूपतां दूरभिन्नफलयोः क्रियां प्रति।
शब्दशासनविदः समासयोर्विग्रहं व्यवससुः स्वरेण ते॥

आदिग्रहणेनानुदात्तस्वरितैकश्रुतयः सङ्गृह्यन्ते। तत्रानुदात्तादर्थभेदो यथा—पूर्वोक्तयोरेवोदाहरणयोरन्यपदार्थः प्रतीयते, नचोत्तरपदार्थ इति। स्वरितादर्थभेदो यथा—भ्रातृव्य इति भ्रातुरपत्यं प्रतीयते, न सपत्नः। एकश्रुतेरर्थभेदो यथा—आगच्छ भो माणवकदेवदत्त[3]। अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं, अपां रेतांसि जिन्वतो . . . पुत्रैक। आश्रुतेर्यथा— . . . दूरादाह्वानयज्ञक . . . सन्धीयते। तत्स्वरोऽपि तात्स्थ्यात् प्रगृह्य इत्युच्यते। ततोऽर्थभेदो यथा—आलीक आगच्छामि तामित इति सखीभ्यामिवागन्तव्यमित्यर्थः प्रतीयते। नागन्तूनां पङ्क्तिरस्मरादिति, आदिग्रहणेन सन्धेयसंवृता वृद्धाः सङ्गृह्यन्ते। तत्र सन्धेयादर्थभेदो यथा-आङ्गिरस इति। विच्छेदस्त्रिधा—पदविच्छेदो वाक्यविच्छेदो यतिविच्छेदश्च। तेषु पदविच्छेदश्चतुर्धा, शृङ्खलाभङ्गः, परिवर्तकः, चूर्णकमिति। तेषु शृङ्खला यथा-कान्तारतरुतलासितमृगयुवरचितान्तराहरत्यटवी, इति। अत्र यदा कान्तारः तरुतलः आन्तरा इति पदच्छेदस्तदा प्रियसम्भोगमणितहर्षितव्याधप्रधानव्याताामध्ये इति। सेयं शृङ्खलेवान्योन्यसङ्कलाच्छृङ्खला। भङ्गो यथा—जाय . . . . . वाक्यं निन्दार्थं क्रियते सेयं पदद्वैधीभावो भङ्गः। परिवर्तको यथा—कलिकामधुगर्हणेत्यविकृतमेव विच्छिद्यते। कुटमलमकरन्दानिष्यन्देत्यर्थप्रतीतिः। यदातु कलिकामधुक् अर्हणेति तदा पूजनैव कलिकाले कामधेनुरिति। सोऽयं गकारककारयोः परिवर्तने परिवर्तकः। चूर्णकं यथा—पश्य सलिलं पयोधेर्दूरसमुन्मुक्तशुक्तिमीनाक्रान्तम्। मत्स्यानां वल्लभं पयोधेर्जलमवलोकयेत्यर्थः। यदा तु दूरसं उन्मुक्तशुक्तिमीनाक्रान्तमिति, तदा दुःखेन रसनीयं उद्भ्रान्तमौक्तिकाधारं मत्स्यचिह्नितपर्यन्तं जलमवलोकयेति। अत्र शुक्तीत्यस्य संयोगाक्षरस्य दूरसमित्यत्र रेफस्य च चूर्णनिमित्तं चूर्णकं। वाक्यविच्छेदोऽपि चतुर्धा—वाक्यसम्भेदो, वाक्यान्यथात्वं, वाक्यासमाप्तिः, वाक्यानुच्चारणमिति, तेषु वाक्यसम्भेदो यथा—

दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम्॥

अत्र वदन्त एव हि वयं रोमाञ्चिताः पश्यतेति वाक्यसंभेदो वक्तृभावकत्वेन गुणविशेषविज्ञानातिशयप्रकाशनं प्रतिपादयति। वाक्यान्यथात्वं यथा—

सहभृत्यगणं सबान्धवं सहमित्रं सबलं सहानुगम् ।
स्वबलेन निहन्ति संयुगे न चिरात्पाण्डुसुतः सुयोधनम् ॥

अत्र पाण्डुसुतं सुयोधन इति वक्तव्ये पाण्डुसुतः सुयोधनमिति भानुमतीविरहवैमनस्यप्रयुक्तस्य सुयोधनवाक्यस्यान्यथात्वमनुच्यमानं भाविनोऽर्थस्य तथात्वमवबोधयति । वाक्यासमाप्तिर्यथा—

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं त्वं कौमुदी नयनयोरमृतं त्वमङ्गे ।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां तामेव शान्तमथवा किमतःपरेण ॥

अत्र शान्तमथवा किमतःपरेणेति वासन्तीवाक्यासमाप्तिः सुहृद्विषये नामङ्गलं वक्तव्यमिति प्रतिपादयति । वाक्यानुच्चारणं यथा—

अक्षत्रारिकृताभिमन्युनिधनप्रोद्भूततीव्रक्रुधः
कीर्णाबाष्पकणैः पतन्ति धनुषि व्रीडाजडा दृष्टयः ।
पार्थस्याकृतशात्रवप्रतिकृतेरन्तश्शुचा मुह्यतो
हा वत्सेति गिरः स्फुरन्ति न पुनर्निर्यान्ति कण्ठाद्बहिः ॥

अत्र हा वत्सेति वाक्यानुच्चारणमकृतशत्रुप्रतिक्रियाणां महात्मनामनुचितं परिदेवनमिति ज्ञापयति । विरामो यतिः । स चतुर्धा, पदे पादे अर्धे स्थाने च । तस्यान्यथाकरणं यतिविच्छेदः । तत्र पदे यथा—

सम्पदो जलतरङ्गविलोला यौवनं त्रिचतुराणि दिनानि ।
शारदाभ्रदलचञ्चलमायुः किं धनैः परहितानि विदध्वम्* ॥

अत्र किं धनैरिति पदयतौ न्याय्योऽर्थः प्रतीयते, तस्यान्यथाकरणं किमित्यत्रैव विच्छेदः । तेन च किमिति धनैः परहितानि वितनुध्वमित्यन्याय्यः । पादे यथा—

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥

अत्र यदा पादेपादे यतिस्तदा न्याय्योऽर्थः प्रतीयते । यदात्वाज्ञासिद्धानि चत्वारि नेति पादमतिक्रम्य तदा अन्याय्य इति । अर्धे यथा—

उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी ।
आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः ॥

अत्र यदार्धे यति स्तदैकस्या एवेदं वाक्यमित्यन्योऽर्थः प्रतीयते । यदा तु तद्विच्छेदात्पाद एव यतिः क्रियते तदा द्वयोर्बह्वीनां वा एको वाक्येनान्य इति । स्थाने यथा—

---

* "तनुध्वं" इति वा पाठः ।

येन ध्वस्तमनोभवेन बलिजित्कायः पुरा स्त्रीकृतो
योगङ्गां च दधेऽन्धकक्षयकरो यो बर्हिपत्रप्रियः ।
यस्याहुश्शशिमच्छिरो हर इति स्तुत्यं च नामामराः
सोऽव्यादिष्टभुजङ्गहारवलयस्त्वां सर्वदोमाधवः ॥

अत्र द्वादशसु सप्तसु चाक्षरेषु यतिस्थानम्, तदतिक्रमेण बलिजित्काय इति शशिमच्छिरोहर इति च यतिकरणे उमाधवो माधवश्च त्वामव्यादित्यर्थौ क्रमेण प्रतीयेते इति । प्रकरणमर्थौ लिङ्गमौचित्यं देशः काल इति प्रकरणादयः । तत्र प्रकरणाद्यथा—सैन्धवः सामान्येन लवणेऽश्वे पुरुषे च वर्तमानः भोजनादिप्रकरणवशादर्थविशेषप्रतिपत्तिनिमित्तं भवति । देवो वर्षतीत्यर्थात् देवशब्दो मेघमभिधत्ते, रामलक्ष्मणाविति लक्ष्मणलिङ्गाद्रामशब्दो दाशरथौ वर्तते । पुण्डरीकमुखी-त्यौचित्यात्पुण्डरीकशब्दः कमलमाह । अमरावत्यां हरिरिति हरिशब्दो देशतः शतक्रतुं ब्रूते । रात्रौ पतङ्गं पश्यति, अत्र कालतः पतङ्गशब्दः शलभमभिधत्त इति । एवमन्येऽपि । तद्यथा—

भवतु विदितं शब्दा वक्तुर्विवक्षितसूचकाः
स्मरति च यतः कान्ते कान्तां हठात्परिचुम्बति ।
ननन ममममां मा स्प्राक्षीर्निषेधपरं वचो
भवति शिथिले मानग्रन्थौ तदेव विधायकम् ॥ इति ॥

अभिनयोऽपदेशो निर्देशः संज्ञा इङ्गितमाकार इत्यभिनयादयः । तेष्वभिनयो यथा—

एद्दहमेत्तत्थणिआ एद्दहमेत्तेहि अच्छिवत्तेहिं । एद्दहमेत्तावत्था एद्दहमेत्तेहिदिअएहिं ॥

अपदेशो यथा—

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् । विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥

निर्देशो यथा—भर्तृदारिके दिष्ट्या वर्धामहे, यदत्रैव कोऽपि कस्यापि तिष्ठतीति मामङ्गुलीविला-सेनाख्यातवत्यः । संज्ञा यथा—

अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनम् ।
वीक्षितेन परिगृह्य पार्वती मूर्धकम्पमयमुत्तरं ददौ ॥

इङ्गितं यथा—

कदा नौ सङ्गमो भावीत्याकीर्णे वक्तुमक्षमम् । अवेत्य कान्तमबला लीलापद्मं न्यमीलयत् ॥

आकारो यथा—

निवेदितं निश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते।
न विद्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथम्॥

एवमन्येऽपि, यथा—

आश्लेषे प्रथमं क्रमादथ जिते हृद्येऽधरस्यार्पणे
केलीद्यूतविधौ पणं प्रियतमे कान्तां पुनःपृच्छति।
सान्तर्हासनिरुद्धसम्भृतरसोद्भेदस्फुरद्गण्डया
तूष्णीं शारविसारणाय निहितः स्वेदाम्बुगर्भः करः॥

यत्परश्शब्दः स शब्दार्थ इति तात्पर्यम्। तच्च वाक्य एवोपपद्यते। पदमात्रेणाभिप्रायस्य प्रकाशयितुमशक्यत्वात्। तच्च वाक्यप्रतिपाद्यं वस्तु त्रिरूपं भवति। अभिधीयमानं प्रतीयमानं ध्वनिरूपं च। यत्र यदुपात्तशब्देषु मुख्यगौणीलक्षणाभिः शब्दशक्तिभिः स्वमर्थमभिधायोपरतव्यापारेषु आकाङ्क्षासन्निधियोग्यतादिभिर्वाक्यार्थमात्रमभिधीयते तदभिधीयमानम्। यथा—गौर्गच्छतीति वाक्यार्थावगतेरुत्तरकालं वाक्यार्थं उपपद्यमानोऽनुपपद्यमानो वार्थप्रकरणौचित्यादिसहकृतौ यत्प्रत्याययति तत्प्रतीयमानम्। यथा—विषं भुङ्क्ष्व माचास्य गृहे भुङ्थाः, इत्युक्ते वरं विषं भक्षितम्, न पुनरस्य गृहे भुक्तमिति प्रतीयते। अर्थशब्दोपायादुपसर्जनीकृतस्वार्थौ वाक्यार्थावगतेरनन्तरमनुनादरूपमप्रतिशब्दरूपं वाऽभिव्यञ्जयति तद्ध्वनिरूपम्। तच्च न सार्वत्रिकम्। तथाहि; यथा निवृत्तेऽभिघाते कस्यचिदेव कांस्यादेर्द्रव्यस्यानुनादो जायते, कस्यचिदेव कन्दरादेः प्रतिशब्दः। यथा कस्यचिदेव वाक्यस्य प्रतीयमानाभिधीयमानवाक्यार्थप्रतीतेरनन्तरं ध्वनिरुपलभ्यत इति। निमिषत्येषेत्युक्तेऽक्ष्णोर्निमेषोऽभिधीयते, देवी न भवतीति प्रतीयते। रूपातिशयश्च ध्वनति। अथैषां प्रयोगः, तत्राभिधीयमानं चतुर्धा—विधिरूपं निषेधरूपं विधिनिषेधरूपमविधिनिषेधरूपं च। तेषु विधिरूपं यथा—

दानं वित्तादृतं वाचः कीर्तिधर्मौ तथायुषः। परोपकरणं कायादसारात्सारमुद्धरेत्॥

निषेधरूपं यथा—

लोकयात्रा भयं लज्जा दाक्षिण्यं धर्मशीलता। यस्यैतानि न विद्यन्ते न तेन सह संवसेत्॥

विधिनिषेधरूपं यथा—

पक्वान्नमिवराजेन्द्र सर्वसाधारणाः स्त्रियः। तस्मात्तासु न कुप्येत न रज्येत रमेत च॥

अविधिनिषेधरूपं यथा—

न दानेन न मानेन न शाठ्येन न सेवया।
न शास्त्रेण न हृद्यास्ताः सर्वथा किमिव स्त्रियः॥

प्रतीयमानं पुनरनेकधा । क्वचिद्विधौ निषेधः—

भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ तेण ।
गोळाणईकच्छकुडुंगवासिणा दरिअसीहेण ॥

अत्र विस्रब्धो भ्रमेति विधिवाक्ये तत्र निकुञ्जे सिंहस्तिष्ठति । त्वं च शुनोऽपि बिभेषि । तस्मात्त्वया तस्मिन्न गन्तव्यमिति निषेधः प्रतीयते । क्वचिन्निषेधे विधिर्यथा—

अत्ता एत्तणिमज्जइ एत्थअहं दिवसअं पलोएहि ।
मापहिअ रत्तिअंधिअ सेज्जाए मह ण मज्जिहिसि ॥

अत्र शय्यायां मा निवत्स्यसीति निषेधवाक्ये इयं श्वश्रूशय्या, इयं मच्छय्येति दिवाभ्युपलक्ष्य रात्रौ त्वयेहागन्तव्यमिति विधिः प्रतीयते । क्वचिद्विधौ विध्यन्तरं यथा—

बहलतमाहअराई अज्ज पउत्थो पई घरं सुण्णं ।
तहं सेगज्ज सअंधिअ णजहाअंमेमुसिज्जामो ॥

अत्र यथा वयं न मुष्यामहे तथा जागृहीति विध्यभिधाने रात्रिरत्यन्धकारा पतिः प्रोषितो गृहं शून्यमतस्त्वमभयो मत्पार्श्वमागच्छेति विध्यन्तरं प्रतीयते । क्वचिन्निषेधे निषेधान्तरं यथा—

आसाइअं अणाए णजत्तिअं तत्तिएणबंधिधिहिं । ओरमसुविसमुएह्णिरक्किज्जहगहपईछत्तं ॥

अत्र गृहपतिक्षेत्रे दुष्टवृषवारणपरे निषेधवाक्ये उपपतिवारणं निषेधान्तरं प्रतीयते । क्वचिद्विधिनिषेधे विधिर्यथा—

महुएहिकिंवि पत्थिअजइहरसिणिअंमुअंणिअंबाओ ।
वाहेमि कस्सरुण्णे गामो दूरे अहं एक्का ॥

अत्र विधिनिषेधयोरनभिधाने अहमेकाकिनी ग्रामो दूर इति विविक्तोपदेशान्नितम्बवासोऽपि मे वरइति विधिःप्रतीयते । क्वचिदविधिनिषेधे निषेधो यथा—

जीविताशा बलवती धनाशा दुर्बला मम । गच्छवा तिष्ठवा कान्त स्वावस्था तु निवेदिता ॥

अत्र गच्छवा तिष्ठवेत्यविधिनिषेधाज्जीविताशा बलवती । धनाशा दुर्बला ममेति वचनात्त्वया विनाऽहं जीवितुं न शक्नोमीत्युपक्षेपेण गमननिषेधः प्रतीयते । क्वचिद्विधिनिषेधयोर्विध्यन्तरं यथा—

णिअदइअदंसगुणकिदवत्तपहिअअण्णेणदच्चसुवहेण ।
गहपइधूआदुक्कं घवा उराइहहअमामे ॥

अत्रान्येन पथा व्रजेति विधिनिषेधयोरभिधाने हे स्वकान्ताभिरूपताविकत्थन पान्थाभिरूपक इह ग्रामे भवतो गृहपतिसुता द्रष्टव्यरूपेति विध्यन्तरं प्रतीयते । क्वचिद्विधिनिषेधयोर्निषेधान्तरं यथा—

उच्चिणसु पडिअकुसुमं माधुण सेहालिअं हलिअसुह्ले ।
एस अवसाणविरसो ससुरेण सुओ वळअसद्दो ॥

अत्र पतितं कुसुममुच्चिनु मा धुनीहि शेफालिकामिति विधिनिषेधयोरभिधाने सखि चौर्यरत-प्रसक्ते वलयशब्दो न कर्तव्य इति निषेधान्तरं प्रतीयते । क्वचिद्विधावनुभयं यथा—

सणिअंवच्चकिसोअरिविहिवअत्तेणववसुसहिपट्टेदिं ।
भज्जिहिसिवित्थअत्थणिविहिणा दुक्खेणणिम्मविआ ॥

अत्र शनैर्व्रजेति विध्यभिधाने हि न विधिर्नापि निषेधः, अपि तु वर्णनामात्रं प्रतीयते । क्वचिन्नि-षेधेऽनुभयं यथा—

दे आ पसिअणि वत्तसु मुहससिजोह्णाविलुत्ततमणिवहे ।
अहिसारिआण विग्धं करेसि अह्णाणविहआसे ॥

अत्र निवर्तस्वेति निषेधाभिधानेऽपि न निषेधो नापि विधिः; अपि तु मुखेन्दुकान्तिवर्णनामात्रं प्रतीयते । क्वचिद्विधिनिषेधयोरनुभयं यथा—

वच्च महव्विअ एक्का एहोंतुणिसासरोइअप्पाइ ।
मा तुज्जवि तीअ विणा दक्खिण्ण हअस्स जाअन्तु ॥

अत्र ममैव निश्वासरोदितव्यानि भवन्तु मा तवापि तां विना तानि जायन्तामिति विधिनिषेधयोर-भिधाने न विधिर्नापि निषेधः; अपि तु कृतव्यलीकप्रियतमोपालम्भमात्रं प्रतीयते । क्वचिदविधिनि-षेधेऽनुभयं यथा—

गोलाणईए तूहे चखंतोराइ आएवत्ताइ ।

अत्र न विधिर्नापि निषेधोऽभिधीयते । नाप्येनयो ... रन्यकेतुकु टुंगे अभ्यागतो भवान्न गत इति तं ज्ञापयतीति प्रतीयते । प्रतीयमानाभिधीयमानवाक्यार्थानामानन्त्याद्भुनिरूपमप्यनेकप्रकारमेव । ध्वनिश्च द्विधा—अर्थध्वनिः शब्दध्वनिश्च । तयोरर्थध्वनिरनुनादध्वनिरूपः प्रतिशब्दध्वनिरूपश्च । तत्र योऽभिधीयमानवाक्यार्थानुस्यूतमेव कांस्यानुनादरूपमर्थान्तर ...—

शिखरिणि क्वनु नाम कियच्चिरं किमभिधानमसावकरोत्तपः ।
तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः ॥

अत्र यथाश्रुतवाक्यार्थोऽभिधीयमानो निःस्वफलाद्गणाश्वर इत्युपलक्षणेन रागातिशयं प्रत्याययन्नल्पपुण्यस्त्वदधरप्रतिनिधिमपि चुम्बतीति चाटुना वर्णनीयायाः स्वानुरागप्रकाशनं ध्वनति । एतच्च कांस्यध्वनिवदविच्छिन्नमेव ध्वनन्ननुनादरूपं प्रतीयत इत्यनुनादध्वनिः । तथा—

शान्त्यै वोऽस्तु कपालदाम जगतां पत्युर्यदीयां लिपिं
काचित्कापि गणाः पठन्ति पदशो नातिप्रसिद्धाक्षराम् ।
विश्वं स्रक्ष्यति कल्पति क्षितिमपामीशिष्यते शिप्यते
नागै रागिपुरंस्यति .... जगन्निर्वेक्षित .... ॥

अत्र गणाः कपाललिपिमप्रसिद्धाक्षरां पदशः पठन्तीति वाक्यार्थोऽभिधीयमानस्तानि कपालानि ब्रह्मादीनामिति प्रत्याययन् महाध्वोपसंहारे भगवतोऽनुपहतप्रभावस्यैकाकिनोऽवस्थानमिव ध्वनति। तच्च विश्वं स्रक्ष्यतीत्यादिपदार्थेनुस्यूतमेवानुनादयन्निरूप्यत इत्यनुनादध्वनिः । एवं—

अण्णत्त वच्चबालअ मज्जंतिं कीस मं पुलोएसि ।
एअं हो जायाभीरुआणं तित्थं पिआ णहोइ* ॥

अत्र किं मां मज्जन्तीं प्रलोकयसि, अन्यत्र व्रज, नेदं जायाभीरूणां तीर्थमित्यभिधीयमानो जायायास्त्वं बिभेषि, तेन मां न कामयस इत्युपालम्भार्थं प्रत्याययन्नस्नेहं विना युवतीनामीर्ष्यायितं भवतीति ध्वनति । तच्च तस्या अनुरागार्थं नातिस्यूतमेवानुनादरूपं ध्वनतीत्यनुनादध्वनिः । एवं अत्ता एत्थ णिमज्जइ इत्यादि वाक्ये निषेधविधिः प्रतीयमानः कदाचिदयमन्धकारे मद्भ्रान्त्या श्वश्रूं प्रतियायादित्युत्प्रेक्षमाणायाः स्खलितप्रतिविधानरूपं राज्यन्धपदाभिधानमपि न युवत्या वैदग्ध्यं ध्वनयति । तच्चाभिधीयमानप्रतीयमानयोरनुस्यूतेन प्रतीयत इत्यनुनादध्वनिः । तथा—

मद्दुएहि किं विपंथअ इत्यादावविधिनिषेधे विधिः प्रतीयमानो मधुकापचायिकायाः प्रार्थनावैदग्ध्यं ध्वनति । तच्च प्रतीयमानार्थानुस्यूतमेवानुनादमिहोपलभ्यत इत्यनुनादध्वनिः । अपि च, उच्चिणसुपडिअकुसुमं माधुणसेहालिअं हलिअ इत्यादि वाक्ये विधिनिषेधयोर्निषेधः प्रतीयमानः स्खलितगोपनेषु सखीवैदग्ध्यं ध्वनयति । स च शेफालिकापुष्पापचयव्याजेन पश्चाद्वाटमुपगताया हालिकस्नुषायास्तत्रागतेनोपपतिना सह प्रवृत्ते चौर्यरतकलहे कुड्यान्तरितश्वशुरावकर्ण्यमाननमनोहरवलयशब्द प्रतिषेधपरतया प्रवर्तमानः स्नुषानुस्यूतमेव शेफालिकाशाखावधूननं सवलयकरावधूननं च कांस्यध्वनिरूपेणानुनादो ध्वनिं प्रतिपादयन्ननुनादध्वनिव्यपदेशमासादयतीति । यः

---

* अण्णत्त वच्च बालअ तिह्लाअन्त कीसमंपुलोएसि ।
एअम् हो जाआभीरुआण तूहाण तित्थं अ णहोइ ॥ इति पाठः ॥

पुनरभिधीयमानवाक्यार्थात् पृथग्भूत इव गुहादिप्रतिशब्दानुरूपमर्थान्तरं प्रत्याययत्प्रतिध्वनति स प्रतिशब्दध्वनिः। यथा—

लावण्यसिन्धुरपरैव हि केयमत्र यत्रोत्पलानि शशिना सह संप्लवन्ते।
उन्मज्जति द्विरदकुम्भतटी च यत्र यत्रापरे कदलिकाण्डमृणालदण्डाः॥

गुहायां पौरुषादिशब्दानां प्रतिशब्दा जायन्ते, ते च ध्वनिं जनयन्त उपलभ्यन्ते। एवं लावण्यसिन्धुरित्येतस्मिन् पदार्थे उत्पलादिशब्दानां यथा स्वोपमेयलोचनाद्यर्थप्रतिशब्दा जायन्ते ते चार्थान्तरध्वनिं जनयन्त उपलभ्यन्ते। तत्रेह च यथा श्रूयमाणानामुत्पलादीनामर्थोऽभिधीयमानस्तस्य लोचनाद्यर्थैः सह सादृश्यं प्रत्याययद्वर्णनीयायाश्चारुत्वोत्कर्षप्रतीतिर्ध्वनति। सा ततः पृथगिवोपलभ्यमाना प्रतिशब्दध्वनिः। तथा—

एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्। यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत्॥

अत्र बहवः पुत्रा एष्टव्या इति वाक्यार्थोऽभिधीयमानः पुत्रैः पितृप्रीतये प्रयागगमनादयः कर्तव्या इति प्रत्याययत्पितृणां कामपूरणं परमपुरुषार्थ इति ध्वनयति। स च पितृव्यपदेशपरतया प्रवृत्तः पुत्रोद्देशरूपेण तत्प्रवृत्तिषु प्रतिशब्दायमानः पृथगिवोपलभ्यत इति प्रतिशब्दध्वनिः। एवं—

कस्स व ण होइ रोसो दट्ठूण पिआए सव्वणं अहरं।
सभरमकमलग्घाइणि वारिअवामे सहसु एह्णिं॥

अत्र सख्युपालम्भार्थोऽभिधीयमानः पत्युरीर्ष्योपशान्तये भ्रमरेणास्या अधरः खण्डितो नोपपतिनेति प्रत्याययन् स्खलितगोपनेषु सखीवैदग्ध्यं ध्वनयति। स चान्योपदेशपरत्वेन प्रवृत्तोऽन्यस्य चेतसि प्रतिफलित इति प्रतिशब्दध्वनिः। एवं भमधम्मिअवीसद्धो इत्यादिवाक्ये विधौ निषेधः प्रतीयमानः तस्या नदीकुञ्जकेन केनचित्सह सङ्केतार्थं ध्वनति। स वाक्यार्थात्पृथगिवोपलभ्यमानः प्रतिशब्दध्वनिः। आसाइअं अणाए णजत्तिअमित्यादिवाक्ये वृषनिवारणपरो निषेध उपपतिनिवारणार्थं प्रत्याययन्प्रयोक्तुर्वैदग्ध्यं ध्वनयति। सचान्याभिधानेनान्यमभिदधतः पृथगिवोपलभ्यमानः प्रतिशब्दध्वनिः। एवं गोलाणईएतूहे चक्कन्तोराइ आएवत्ताइ इत्यपि प्रतिशब्दध्वनिरिति। एवं शब्दध्वनिरपि द्विधैव। तत्रानुनादरूपो यथा—

भक्तिप्रह्वाय दातुं मुकुलपुटकुटीकोटरक्रोडलीनां
लक्ष्मीमाक्रष्टुकामा इव कमलवनोद्घाटनं कुर्वते ये।
लालाकारान्धकाराननपतितजगत्साध्वसध्वंसकल्याः
कल्याणं वः क्रियासुः किसलयरुचयस्ते करा भास्करस्य॥

अत्र भास्करकराः कल्याणं वः क्रियासुरिति वाक्यार्थः करशब्दशक्तिस्वाभाव्यात् किसलयरुचय इत्यादिसमस्ततुल्यविशेषणयोगाच्च हस्तेष्वनुनादं जनयत् भगवतस्तेजोरूपतां पुरुषरूपतां च ध्वनयति । तदुभयमपि तदनुस्यूतमेवेह निरूप्यत इत्यनुनादध्वनिः । एवं—

गर्भेष्वम्भोरुहाणां शिखरिषु च शितासेषु तुल्यं पतन्तः
प्रारम्भे वासरस्य व्युपरतिसमये चैकरूपास्तथैव ।
निष्पर्यायं प्रवृत्तास्त्रिभुवनभवनप्राङ्कणे पान्तु युष्मा
नूष्माणं सन्तताध्वश्रमजमिव भृशं बिभ्रतो ब्रध्नपादाः ॥

अत्र पादशब्दस्वाभाव्यात् सर्वमपि योजनीयम् । इयांस्तु विशेषः । पूर्वत्र साधर्म्यद्वारेणेह तु वैधर्म्यद्वारेणेति । अत्र चाप्रतिशब्दध्वनिर्यथा—

दत्तानन्दाः प्रजानां समुचितसमयाक्लिष्टसृष्टैः पयोभिः
पूर्वाह्णे विप्रकीर्णा दिशिदिशि विरमत्यह्नि संहारभाजः ।
दीप्तांशोर्दीर्घदुःखप्रभवभवभयोदन्वदुत्तारनावो
गावो वः पावनानां परमपरिमितां प्रीतिमुत्पादयन्तु ॥

अत्र दीप्तांशोर्गावो रश्मयः स्तूयमानाः शब्दशक्तिस्वाभाव्यात्तुल्यविशेषणयोगाच्च धेनुषु प्रतिशब्दं जनयन्त्यस्तास्वपि विशिष्टं माहात्म्यशेषं प्रतिध्वनन्ति । एवं—

मीलच्चक्षुर्विजिह्वं श्रुतिजडरसनं निघ्नितघ्राणवृत्ति
स्वव्यापाराक्षमत्वक्परिमुषितमनः श्वासमात्रावशेषम् ।
विस्रस्ताङ्गं पतित्वा स्वपदपहरतादश्रियं वोऽर्कजन्मा
कालव्यालावलीढं जगदगद इवोत्थापयन् प्राक्प्रतापः ॥

अत्रार्कजन्मा प्राक्प्रतापः कालव्यालावलीढं जगदुत्थापयन् अश्रियं वोऽपहरतादिति वाक्यार्थः । अर्कशब्दशक्तिस्वाभाव्यात्तुल्यकर्मक्रियापदादियोगाच्च अर्कवृक्षजन्मा अगदः कालव्यालदष्टमप्युत्थापयतीति प्रत्याययन्नर्को विषघ्नानां श्रेष्ठ इति प्रतिशब्दरूपं ध्वनिमुत्थापयतीति । एवमन्येऽपि महाकविप्रयोगेषु ध्वनिविशेषा गवेषणीया इति यदुक्तं, तात्पर्यमेव वचसि ध्वनिरेव काव्य इत्यादि । कः पुनः काव्यवचसोर्ध्वनितात्पर्ययोः विशेषः । ननूक्तं पुरस्तात्—

यद्वक्रं वचश्शास्त्रे लोके च वच एव तत् । वक्रं यदर्थवादादौ तस्य काव्यमिति स्मृतिः ॥

यदभिप्रायसर्वस्वं वक्तुर्वाक्यात्प्रतीयते । तात्पर्यमर्थधर्मस्तच्छब्दधर्मः पुनर्ध्वनिः ॥
सौभाग्यमिव तात्पर्यमान्तरो गुण इष्यते । वाग्देवताया लावण्यमिव बाह्यस्तयोर्ध्वनिः ॥
अदूरविप्रकर्षात्तु द्वयेन द्वयमुच्यते । यथा सुरभिवैशाखौ मधुमाधवसंज्ञया ॥ इति ॥

सत्यमुक्तम् । किन्तु नाद्यापि निदर्शनतः प्रतिपाद्यते । तर्हि श्रूयतामिदं प्रतिपादयामः । यस्तावदय-मनन्तरोग्रन्थः स सर्वः काव्ये ध्वनिरित्यवधार्यताम् । वचसि तात्पर्यं द्विधा—शास्त्रे लोके च । तत्र शास्त्रे यथा—आत्मस्थितं गुणविशेषमहङ्कृतस्येत्यादि । अत्र "आत्मस्थितं गुणविशेषमहङ्कृतस्य शृङ्गार-माहुरिह जीवितमात्मयोनेः ॥" इत्याप्तोपदेशरूप आगमः तस्यात्मशक्तिरसनीयतया रसत्वमिति संज्ञार्थानुगामि प्रत्यात्मवेदनीयं प्रत्यक्षम् । तथाहि योऽयं लोके रसोऽस्यास्तीति रसिकोऽयं, रसि-कोऽयमिति विना मधुरादीन्क्वचिदेव पुरुषविशेषेषु निरपवादः प्रवादः स नान्तरेण प्रत्यात्मवेद-नीयं रसाह्वयवस्तुसम्बन्धमुपपद्यते । सोऽयं विवक्षितार्थस्य प्रमाणत्रयेण प्रतिपादनं वाक्यार्थोऽभि-धीयमानः प्रतिपाद्यश्च त्रिप्रकारः पुरुषो भवति । अप्रतिपन्नो विप्रतिपन्नः संशयित इति, तत्र यथाऽऽतुरानातुरयोर्भोजनमनातुरः प्रतिपद्यत इति तथैव प्रकल्प्यते । तथेहाप्रतिपन्नानुरोधादि-तरयोरप्यागम एव प्रथममुपन्यस्यते । तत्र विप्रतिपन्नः संशयितो वागमं न मन्यते । अतस्तदर्थं सर्व-प्रमाणेभ्यो बलीयः । प्रत्यक्षमुपन्यसनीयं भवति, तदपि वैयात्याद्विप्रतिपन्नो न मन्यते । ततोऽस्य शासनाय ब्रह्मास्त्ररूपा सार्वलौकिकी युक्तिरुपन्यस्यत इति । स एव प्रमाणत्रयोपन्यासहेतुर्वक्तुरभि-प्रायः प्रतीयमानः प्रमाणत्रयोपन्यासादिना च साङ्ख्यदर्शनाश्रयेण शृङ्गाररसस्त्वेवाविर्भवति । नत्वसन्नुत्पद्यते, स च त्रिविधोऽश्रयानिति प्रतिपादनतात्पर्यम् । साङ्ख्या ह्येवमाहुः, "सदेवो-त्पद्यते, प्रकृतिरेव कर्त्री, पुरुषः पुनरुदास्ते, उदासीनमपि चैनं भोगसंपादनाय प्रकृतिरुपसर्प-तीति । ननु च साङ्ख्यानां दृष्टमनुमानमाप्तवचनं चेति प्रमाणोपन्यासक्रमः । इह त्वागमस्य प्रथ-ममुपन्यासे किं तात्पर्यम्? ननूक्तमप्रतिपन्नानुरोधादिति । अन्यदप्युच्यते, न तथा पदार्थाः प्रत्यक्षेण प्रतीयमानाः स्वदन्ते यथा वाग्मिनां वचोभिरावेद्यमाना इत्यागमस्य प्रथममुपन्यासेन सूचयति । न च सर्वथा साङ्ख्यदर्शनाश्रयिणो वयमिति प्रमाणव्युत्क्रमेण प्रतिपादयति, साहित्यस्य सर्व-पार्षदत्वात् । अथात्मनि प्रतिबिम्बताद्वारेणावस्थितस्याहङ्कारगुणविशेषस्य धर्मार्थफलभूततृतीय-पुरुषार्थजीवितस्य शृङ्गारस्याभिमानापरनाम्नो यान्याविर्भावकारणानि यानि च तत्कार्याणि तान्यनन्तरश्लोकेन निर्दिशति सत्त्वात्मनाममलजन्मविशेषजन्मेत्यादि । तत्रायमात्मनामनुगतेभ्यः सुकृतविशेषेभ्य उत्पद्यते, उत्पन्नस्य सर्वस्यात्मा आत्मगुणसम्पदो लक्ष्यमाणलक्षणाया उदयहेतु-र्भवति । अनेकजन्मानुभवजनितात्तु संस्कारादुत्कृष्यते । उत्कृष्टश्चात्मगुणसम्पद एव अतिशयहेतु-र्भवति । स चायमेक एवैवंविधोऽभिमानात्मा प्रकृतिविकार आत्मविशेषाणां तमोनिर्भेदस्थानेषु प्रतिबिम्बरूपेण सुप्तइव प्रतिबुध्यत इति वाक्यार्थोऽभिधीयमानः एकहेतुरित्यनेन च हेत्वन्तरा-

भावमात्मगुणसम्पदः प्रदर्शयन् अयमेव चतुर्वर्गकारणमिति ज्ञापयति। जागर्ति वा जागर्ति च सुप्तप्रबोधदृष्टान्तेन तस्यानाविर्भावावस्थायामपि स्तिमितरूपेणावस्थानादविद्यमानतां निराकरोति। कोऽपीत्यनेनाद्भुतप्रदर्शनद्वारेण तदुत्कर्षस्वसज्जन्मसहस्रेणाप्यनाख्येय इति ख्यापयति। मानमय इत्यनेन चास्याभिमान आत्मनोभिमान एव मूलमित्यन्यावष्टम्भं निराचष्ट इति। सोऽयमेवं प्रकारो वाक्यार्थः प्रतीयमान एवंविधं वस्तु वयं च वक्तुमुद्यताः। अतश्चतुर्वर्गार्थिनोऽपि प्रवर्तन्तामिति श्रोतृजनप्रोत्साहनादस्मिन्वचसि तात्पर्यमिति। एवं लौकिकेऽपि वचस्यभिधीयमानं प्रतीयमानं तात्पर्यं च पर्यालोचनीयमिति। एतेन काव्यवचसोर्ध्वनितात्पर्ययोश्च क्वचित्सम्प्लवोऽपि व्याख्यातः। तद्यथा—अच्छिन्नमेखलमलब्धदृढोपगूढमित्यादि। अत्र काव्यार्थस्तावत् कान्ताविमिश्रवपुषः पुरारेर्वपुरच्छिन्नमेखलमित्यादिविशेषणयोगाद्विप्रलम्भसम्भोगयोः सख्यसम्पादकमिवेत्युत्प्रेक्षमाणं रक्षत्विति वाक्यार्थोऽभिधीयमानः कान्ताविमिश्रवपुषोवपुरित्यनेन मूर्तिरेवास्य सांसारिकेषु कर्मस्वधिक्रियते न पुनरात्मेति प्रत्याययति। मूर्तिरिति च वक्तव्ये वपुरिति पदोपादानान्नकेवलं विश्वस्य रक्षणे सृष्टिसंहारयोरव्ययमेव व्याप्रियत इति प्रतिपादयति। वपुर्हि सृष्टौ संहारे च दृश्यते, बीजं वपति, केशान्वपतीति। कृतविप्रलम्भसम्भोगसख्यमिवेत्यनेन सहानवस्थानादिभिर्दुर्घटानप्ययं पदार्थान्मिथोघटयतीति ज्ञापयतीति। पुरारेरित्यनेन च कान्ताविमिश्रवपुरप्येवंविधेष्वरिवधादिव्यापारेषु समर्थ एवेति सत्यापयति, सोऽयमेवं प्रकारो वाक्यार्थः प्रतीयमानः। तदेवं प्रकारमपारमनन्यसाधारणं च यस्यैश्वर्यमसावेव नमस्कार्यो नान्य इति तात्पर्यार्थः। एवमुत्तरश्लोकेऽपि यथाश्रुतवाक्यार्थोऽभिधीयमानः यत्पादपङ्कजरजः परिमार्जितेष्विति प्रयोजकव्यापारो दर्शनाद्ध्यानेनानीय गणपतिर्मनस्यारोपणीय इत्युपदिशति। चेतस्सु दर्पणतलामलतां गतेष्वित्यनेन चादर्शतलानीव भस्मना स्मृत्युपहितेनापि तत्पादरजसा मनांसि निर्मलीभवन्तीत्यभिधत्ते। शब्दार्थसम्पद उदारतराः स्फुरन्तीत्यनेन तु दर्पणतलेष्विव निर्मलेष्वमीषु विश्वे पदार्थाः स्फुरन्तीत्यावेदयति। विघ्नच्छिदेऽस्तु भगवान् स गणाधिनाथ इत्यनेन पुनरुपन्यस्तन्यायेनाभिगामिकं गुणयोगमस्योपदर्शयन् अविघ्नप्रार्थनया चिकीर्षितं महान्तमारम्भविशेषमात्मनः प्रतिपादयति। सोऽयमेवंविधो वाक्यार्थः प्रतीयमानः यस्य पादपङ्कजस्मृतेरप्येतत्फलं तस्य साक्षादाराधनादेः किमुच्यत इति तात्पर्यार्थः॥

अथेदमेव श्लोकद्वयं शास्त्रादौ वचोरूपेण तात्पर्यपर्यन्तं व्याक्रियते। तत्राभीष्टदेवता स्तोतव्येति शिष्टाचारः। ततो हि विशिष्टादृष्टसम्पत्तेः समीहितफलावाप्तिर्भवति। अभीष्टदेवता च द्विविधा—अधिकृताऽनधिकृताच। तत्राधिकृताऽनधिकृतयोराधिकृतायां प्रतिपत्तिर्गरीयसीत्यधिकृतैः स्तूयते। शास्त्रे चेह शृङ्गारोऽभिधेयः, तत्र च यथा भगवान्महेश्वरः सर्वज्ञतया सौभाग्येन दयितजानितया स्वातन्त्र्येण परमपरिपूर्णतया समर्थत्वेन चाधिक्रियते नैवमन्यस्तद्विधेयवैभवः शक्रादिः। तत्र च प्रागुक्त एव प्रतीयमानः; तात्पर्यरूपस्तु निरूप्यते। तत्रेह शास्त्रे शृङ्गारो वक्तव्यः।

स द्विधा—सम्भोगो विप्रलम्भश्च। तत्र सम्भोगो विप्रलम्भमन्तरेण न प्रकर्षमधिरोहतीति विप्रलम्भ एव प्रथममभिधेयो भवति। स चतुर्धा—प्रथमानुरागो मानः प्रवासः करुण इति। विचित्रश्चैष सम्भोगादिति विस्तरेणोच्यते। चतस्रश्चास्यावस्था भवन्ति सत्ता जन्म अनुबन्धः प्रकर्ष इति। तमिमं चतुर्भेदं चतुरवस्थं विचित्रं च पूर्वार्धेन वक्ष्यमाणमुपलक्षयति। तत्राच्छिन्नमेखलमित्यनेन प्रथमानुरागं, मेखलाच्छेदावधिर्हि प्रथमानुरागः, अलब्धदृढोपगूढमित्यनेन मानं, नहि माने दृढोपगूढं लभ्यते। अप्राप्तचुम्बनेत्यनेन प्रवासं, नहि प्रवासे चुम्बनादयः प्राप्यन्ते, अवीक्षितवक्त्रकान्तीत्यनेन करुणं, नहि करुणे वक्त्रकान्तिर्वीक्ष्यते॥

अथैतदवस्थास्वर्पीमान्येव पदानि। तत्राच्छिन्नमेखलमिति विप्रलम्भसत्तायां। विप्रलम्भो हि मेखलायामच्छिन्नायामवश्यमेव सम्भोगार्थिनः सम्भवति, सास्य प्रथमावस्था। अलब्धदृढोपगूढमिति विप्रलम्भजन्मनि विप्रलम्भवान् हि मेखलाच्छेदात् सम्भोगमलभमानः प्रेयसीं प्रार्थयते, अयि प्रियतमे, यदि मे मेखलाच्छेदं न मन्यसे तदालिङ्गनमपि गाढं प्रयच्छ, तदप्रतिपद्यमानायां च तस्यामस्य विप्रलम्भो जायते, सास्य द्वितीयावस्था। अप्राप्तचुम्बनमिति विप्रलम्भानुबन्धे विप्रलब्धो हि सर्वाङ्गीणं प्रियासंश्लेषमलभमानः वक्त्रमात्रसंयोगमप्यभिलषति। तदलाभे चैनं विप्रलम्भोऽनुबध्नाति, सास्य तृतीयावस्था॥

अवीक्षितवक्त्रकान्तीति विप्रलम्भप्रकर्षे अपेक्षणीयालिङ्गनाद्यनवाप्तौ हि कामिनः प्रियामुखावलोकनमपि बहु मन्यन्ते। तदुपरागानुवतामेषां विप्रलम्भः प्रकृष्यते। सास्य तुरीयावस्था॥

सोऽयं चतुर्विधश्चतुरवस्थश्च विप्रलम्भश्चातुर्विध्येन चातुरवस्थ्येन पृथक्पृथगभिधीयमानो विचित्र इत्युच्यते। सम्भोगोऽपि चतुर्धैव—प्रथमानुरागानन्तरो, मानानन्तरः, प्रवासानन्तरः, करुणानन्तर इति। तस्यापि ता एव चतस्रोऽवस्थाः सत्ताजन्मानुबन्धः प्रकर्ष इति। सोऽयमपि चतुर्भेदश्चतुरवस्थश्च कान्ताविमिश्रवपुष इत्यनेनापि चित्रत्वात्संक्षेपेणैवोपलक्ष्यते। तत्र व्युपसर्गस्य क्रियाविशेषणार्थवाचकत्वाद्येन येन विशेषेण प्रथमानुरागानन्तरे मानानन्तरे करुणानन्तरे च कान्तया सह मिश्रीभावः साध्वसोत्कम्पः सेर्ष्याकषायं सौत्सुक्यरभसं सहर्षविस्मयं च जायते। स सर्व उद्दिष्टो भवति। सोऽयं विमिश्रपदेन सम्भोगश्चतुर्विधोऽप्याक्षिप्तः। कान्तापदेन पुनरस्य चतस्रोऽवस्थाप्यन्ते। तत्र यदा कान्ताशब्दः स्त्रीपर्यायस्तदा—

नामापि स्त्रीति संह्लादि विकरोत्येव मानसम्।

इति संभोगस्याद्यावस्था सत्तासंज्ञिका प्रतीयते।

यदा तु कान्ताशब्दो मनोज्ञापर्यायस्तदा "किं पुनर्दर्शनं तस्या विलासोल्लसितभ्रुवः" इति न्यायात्सम्भोगस्य द्वितीयावस्था जन्मसंज्ञिका प्रतीयते।

यदा पुनः कान्ताशब्दो वृषस्यन्तीपर्यायस्तदा—

पुनरपि सुलभं तपोऽनुरागी युवतिजनः खलु नाप्यतेऽनुरूपः ।

इति न्यायात्सम्भोगस्य तृतीयावस्थानुबन्धसंज्ञिका प्रतीयते ।

यदा तु कान्ताशब्दो वल्लभापर्यायस्तदा—

यदेव रोचते मह्यं तदेव कुरुते प्रिया । इति वेत्ति न जानाति तत्प्रियं यत्करोति सा ॥

इति न्यायात्सम्भोगस्य तुरीयावस्था प्रकर्षसंज्ञिका प्रतीयते । सोऽयं चतुर्भेदश्चतुरवस्थश्च विप्रलम्भः। सम्भोगश्चाग्रतो विशेषेण वर्णयितुमुपक्रान्तो दिङ्मात्रेणात्र सूचित इति तात्पर्यम् ॥

अथात्र विशेषाधिकारिनिर्णायकविशेषणानां का वार्ता? कान्ताविमिश्रवपुष इत्यस्य तन्त्रेण व्याख्यान्तरे तेऽपि सूचिता एव । तत्र हि भगवतो वपुर्विप्रलम्भसंम्भोगयोः कृतसाहाय्यकमिव कान्ताविमिश्रवपुषः पुरुषान् स्त्रियश्च पात्विति व्याख्या भवति । विमिश्रशब्देन च संयोगिन इव वियोगिनोऽप्युच्यन्ते, व्युपसर्गस्य क्रियाविशेष इव क्रियावैपरीत्येऽप्युपलम्भात् । तद्यथा विभक्तो विक्रीत इति । एवं च कान्ताभिर्विमिश्रवपुषः पुरुषाः कान्तैरविमिश्रवपुषो योषितः संयुक्ता वियुक्ताश्च शृङ्गाराधिकारिण उभयेऽपि नायकविशेषाः प्रतीयन्ते । वपुश्शब्देन पुनरिह पुरारेरपि विशेषणपक्षे यौवनपल्लवितलावण्यलक्ष्मीकं समग्रात्मगुणसम्पदाश्रयः शरीरमुच्यते । न तु देवादिकर्तृवत्सृष्टिसंहारकादि वपुर्हि सृष्टिसंहारयोरिव कान्तावपि दृश्यते। तद्यथा—गोभिर्वपावान्वपुष्टं मानामाप्सरो विशेष, इति । तत्राच्छिन्नमेखलमित्यादीनि कान्ताविमिश्रवपुष इति समासपदान्तर्गतयोर्विभक्तिसंयुक्तिक्रिययोर्गमकत्वाद्विशेषणानि भवन्ति । यथा कर्तुमनाः कटं, गन्तुकामो ग्राममिति ॥

अथ सम्भोगपक्षे अच्छिन्नमेखलमित्यादीनि कथं सम्बध्यन्ते ? उच्यते । एवं नामरागान्धतया कान्ताभिः सह ते संयुक्ताः येन मेखलाच्छेदमालिङ्गनं चुम्बनमालोकनं च परमानन्दमग्नाः कर्तुं न पारयन्ति, तद्यथा प्रियया स्त्रिया परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति, यथा च—

धन्याः स्थ याः कथयथ प्रियसङ्गमेऽपि विस्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किञ्चिदपि स्मरामि ॥

एवमयं प्रथमश्लोकः । पदान्येव संहत्यार्थमभिदधति वाक्यमिति पक्षे व्याख्यायते ।

अथाखण्डवाक्यार्थपक्षे व्याख्यायते । तथाह्येवमिह पदानामन्वयो भवति, पातु किं ? विश्वम् । कुतः? अपायेभ्यः । किं तत् ? वपुः । कस्य ? पुरारेः । कीदृशस्य ? कान्ताविमिश्रवपुषः । किं विशिष्टं ? अच्छिन्नमेखलं, अलब्धदृढोपगूढं, अप्राप्तचुम्बनं, अवीक्षितवक्त्रकान्ति । कथमुत्प्रेक्ष्य-

माणं ? कृतविप्रलम्भसम्भोगसख्यमिवेति । अत्र चायमच्छिन्नशब्दो बहुव्रीहिश्च समासोऽध्याह्रियमाणपदद्वया द्वादशपदा नान्दी पदाविश्लेषविशेषोक्तिगर्भ उत्प्रेक्षावांश्चाशीरलङ्कारो मङ्गलार्थः। तेऽमी चत्वारोऽपि मङ्गलार्थाः शास्त्रादौ प्रयुक्ताः कर्तुः श्रोतुरध्येतुरध्यापयितुश्च मङ्गलमावहन्ति । यदाह—मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राण्यव्याहतप्रसराणि आयुष्मच्छ्रोतृकाणि च भवन्ति । ननु च नेह विश्वमपायेभ्य इति कर्मापादानपदयोः श्रवणमस्ति । तत्कथमिवेयं द्वादशपदा नान्दीति ? उच्यते, पात्विति श्रुतिपदमेतत् श्रुतेश्चानेकपदनिबन्धन एकशब्दविषयो विध्यादिरर्थः स चान्यथानुपपद्यमानः स्वसिद्धये कर्मकरणकर्त्रधिकरणादिकं यदाक्षिपति स सर्वश्रुतिपदार्थो भवति । तत्रोपादीयमानमपि कर्तृकर्मादिकं नियमायानुपादाय वा विज्ञायते । तद्यथा सामान्याक्षेपे विशेषपदमुपादीयमानं नियमाय भवति। पातु वः परमज्योतिरिति विशेषाक्षेपे तत्र तदनुपादाय विज्ञायते देवो जलं वर्षतीति । इहतु यथाष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयेदिति वचनात् स्वाध्यायोऽध्येतव्य इत्यत्र द्विजेनाचार्यादित्यनुपात्तमप्यवश्यमेव सन्निधीयते, तथेहाप्यपायनिर्हरणरूपत्वात्पात्वर्थस्य स्थितेऽपीश्वरकर्तृकस्य सृष्टिसंहारयोरिव विश्वविषयत्वादपायेभ्यो विश्वमिति पदद्वयमनुपादीयमानमपि नियमेन सन्निधीयते ॥

ननु चाशरीरिणो महेश्वरस्य विश्वोत्पत्तिस्थितिप्रलयकारणत्वाभ्युपगमेऽपि कथमिवोच्येत वपुः पात्विति । अशरीरिणोऽपि वैश्वरूप्येण तदुपपत्तेः । सह्येवं तत्त्वविद्भिः स्तूयते—

मूलजालमधिभोक्तृचेतना शक्तयस्त्वदभिभोक्तृसंहतिः ।
ज्ञानमेतदधिनायकव्रजस्त्वत्स्मृतौ युगपदेव भासते ॥

अत एव कान्ताविमिश्रवपुष इति पुरारेर्विशेषणं तन्त्रेणान्यथा व्याचक्षते। तद्यथा—कं पानीयमन्तेऽस्या इति कान्ता पृथ्वी, कं सुखमन्तेष्वासामिति कान्ता आपः। को वायुरन्ते अस्येति कान्तो वह्निः । कं तोयमन्तरिति कान्तो वायुः । कं ब्रह्म अन्तेऽस्येति कान्तमाकाशम्, कान्तिर्दीप्तिस्तदतिशयवान् कान्तः सूर्यः, कान्तिः कमनीयकं तदतिशयवांश्चन्द्रमाः, कान्तिर्वाल्लभ्यं तदतिशयवान् कान्त आत्मेति कान्तशब्देनाष्टापि भगवतो मूर्तय उच्यन्ते । ता अवन्तीत्येवं शीलाभवोग्रभीमादयो मूर्तिपतयः कान्ताविनः । मिश्रशब्दः पूजावचनः । तेनैषां प्रशंसावचनैश्चेत्यार्यमिश्रादिवत् समासः । ततःकान्ताविमिश्रं वपुर्यस्येति बहुव्रीहौ वैश्वरूप्यसिद्धेर्विवक्षितार्थसिद्धिः ॥

अथात्राच्छिन्नमेखलमित्यादीनां कथमन्वयः ? तान्यपि वपुषो विशेषणानि भवन्ति । तत्राच्छिन्नमेखलमित्यनेन परमुच्यते । मेखला हि जघनपरिक्षेपसूत्रम्, तदपरिच्छिन्नं यस्येति । अलब्धदृढोपगूढमित्यनेनागाधत्वस्य दुरवगाहत्वमाख्यायेत, दुंहतीति दृढ आधारस्तस्योपगूढमुपश्लेषः प्रतिष्ठास्थानं, तदनुपलब्धं यस्येति । अप्राप्तचुम्बनमित्यनेनोच्चैष्ट्वस्य निरवधित्वं कथ्यते, चुम्बनं हि वक्त्रसंयोगः, तदप्राप्तं यस्येति । अवीक्षितवक्त्रकान्तीत्यनेनाप्रतिमघोरस्य परिसूक्ष्मत्वमभिधत्ते ।

वक्ता कुतस्त्याकुतोमुखीवेत्यविज्ञायमाना कान्तिर्यस्येति, कृतविप्रलम्भसम्भोगसख्यमिवेत्यनेन त्वविज्ञातपरमार्थत्वेन विप्रलभमानमिव पृथिव्यादिप्रसिद्धरूपतया संभुज्यमानं संभुञ्जानमिव च, तदेवोच्यते यदित्थमेनमाहुः—

त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतम् ।
वेद्यं वेदयिता चासि ध्याता ध्येयं च तत्परम् ॥

अयमप्याह—

विदितं वो यथा स्वार्था न मे काश्चित्प्रवृत्तयः ।
ननु मूर्तिभिरष्टाभिरित्थं भूतोऽस्मि सूचितः ॥

तदमुना विशेषणपञ्चकेनैतदुक्तं भवति—

णमहअवड्डिअतुंगं अविसारि अवित्थं अअणोणअगहिरं ।
अप्पलहु परिसह्लं अणाअपरमत्थपाअडं महुमहणं ॥

ननु च पात्विति नायं विधौ लोट्; अपित्वाशिषि । सा च विशेषस्याश्रुतौ स्वरूपादेवात्मविषयतया तिष्ठत इति कथं विश्वविषया भवति । उच्यते—

अयं निजः परो वेति विकल्पो लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

यदिवा नास्य वाक्यस्य यः कश्चिद्वक्ता, किं तर्हि पूर्वजैः क्रमागतविश्वपालने नियुक्तो महामहेश्वरः कोऽपि पुंविशेषः । स च ग्रन्थविरचनाव्यग्रे मयि माभूद्वर्णाश्रमाचारस्थिते व्याकोप इति महेश्वरमेव तत्समर्थं प्रार्थयते । अतोऽत्र विश्वस्यैव कर्मत्वमवगम्यते । रक्षितो राजा राज्यं रक्षतीति च न्यायादात्मन्यपि रक्षणीयताशीर्भवति । आत्मनि तिस्रश्चैषणा भवन्ति, प्राणैषणा वित्तैषणा परलोकैषणा च । राज्ञो याह्येव प्राणैषणा सा वित्तैषणा सैव परलोकैषणेति भवति । तस्य प्रकृतिकं राज्यं शरीरं तदेव च वित्तं तस्य ह्यसौ स्वाम्यमनुभवति । यथोक्तदण्डकरादानादिसम्भृतं वसु यशश्च वित्तं सएव च धर्मः तेन ह्यसाविममुं च लोकं जयति, तदेतत्सर्वमपायेभ्यो विश्वरक्षयोपहितं भवति । इष्टा देवता स्तोतव्येति शिष्टाचारः, नचाशीस्स्तुतिः । एवमेतत्; किन्तु गुणोत्कर्षप्रकाशनेन सर्वत उपर्यारोपणं स्तुतिः । सा च यथाऽऽशास्यमानाभिमतफलैकहेतुताप्रकाशनेन प्रत्याय्यते । नैवं, नमस्तस्मै स जयतीत्येवमादिभिरित्यभिप्रायः ॥

अथाखण्डवाक्यार्थपक्षावलम्बिनो द्वितीयश्लोकस्य व्याख्या—

स भगवान् गणाधिनाथो विघ्नच्छिदेऽस्तु यत्पादपङ्कजरजः परिमार्जितेषु ।
चेतस्सु दर्पणतलामलतां गतेषु शब्दार्थसम्पद उदारतराः स्फुरन्ति ॥ इति ॥

इहापि पङ्कजदर्पणार्थसम्पद्भगवदादयः शब्दाः गौणीयवृत्त्या मङ्गलार्थाः, इयमपि द्वादशपदा नान्द्येव । इहापि रूपकोपमाश्लेषसमाधिगर्भः कारणमालाङ्गवानाशीरलङ्कार इति योजनीयः । ननु च सम्बन्धिनोऽध्याहारात्त्रयोदशेह पदानि । नैवं, विभक्त्यादिपरिमाणेन शब्दार्थसम्पत्परिस्फुरणस्यैवात्र सम्बन्धित्वात् । तथाह्येवमियं कारणमाला समाप्यते । भगवतः पादपङ्कजमार्जने मार्जनस्य नैर्मल्ये नैर्मल्यस्य शब्दसम्पदामर्थसम्पदां च परिस्फुरणे तस्य च प्रबन्धविघ्नच्छिदे कारणं भवतीति रूपकोपमाश्लेषपदानि चेह पादपङ्कजदर्पणतलामलरजांसि प्रतीयन्ते । तत्रोदारतरा शब्दार्थसम्पदः परिस्फुरन्तीति च समाधिरपि प्रकाशते । आदर्शतलेषु हि किलोदारदर्शनाः स्त्रियः स्वलङ्कृतमात्मानमवलोकयन्ति । एतच्च वक्तुरुदारवाचां सूचनापरमित्यवधार्यमाणमस्य वचसस्तात्पर्यं भवति, तदिदमुक्तं तात्पर्यमेव वचसीति । कः पुनरिह रूपकोपमयोर्विशेषः ? उच्यते । यत्रात्यन्तसादृश्यादभेदोपचारेणेवादिशब्दविकलमुपमानपदमेवोपमेये प्रवर्तमानं गौणीं वृत्तिमनुभवत्सामानाधिकरण्येन विशेषणत्वमनुभवति तद्रूपकम् । यथा मुखचन्द्रः, पादपङ्कजमिति । यत्र तु मुख्यानुभवरूपेयमात्मनोपमेयस्य साम्यमभिधत्ते सोपमा । यथा—चन्द्र इव मुखमादर्शतलामलं चेति ॥

अथ यथेषदसमाप्तिप्रकृत्योर्बहुच्कल्पबादयः कनादयो वा अत्यन्तसादृश्यादुपमेयवृत्तिभ्य एवोपमानशब्देभ्यः स्वार्थिका विधीयन्ते तदा किमुपमाने प्रत्यय आहो उपमेय इति । किञ्चातः यद्युपमाने गुडकल्पा द्राक्षा कुशाग्रीया बुद्धिरित्युपमेयलिङ्गं न प्राप्नोति तदा उपमेये बहुगुडो द्राक्षा चञ्चा च लिङ्गं न प्राप्नोति । लिङ्गमशिष्यं लोकाश्रयत्वात् । स्वार्थिकाश्च क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते, यथा—देव एव देवता, चत्वार एव वर्णाश्चातुर्वर्ण्यमिति, किमेतद्वक्तव्यं कथमनुक्तं गम्यते, आचार्यप्रवृत्तिर्ज्ञापयति । यदियं कर्मव्यतिहारे णच्स्त्रियामिति णचं विधाय तदन्तात् स्वार्थिकविधाने णचः स्त्रियामञिति पुनः स्त्रीग्रहणं करोति । अभेदोपचारेणैव च प्रकृतिलिङ्गवचनं या लुम्मनुष्य इति लुकमतिक्रम्य प्रकृतिवचनेभ्यो लुपं शास्ति । कथंपुनरीषदपरिसमाप्ताविवे प्रतिकृताविति इवार्थे वा विधीयमानः प्रत्यय उपमान उपमेये वा शङ्क्येत ? ईषदपरिसमाप्ते क्रियात्वेन इवार्थस्यचासत्त्वभूतत्वेन लिङ्गवचनायोगात् प्रत्ययान्तरेषु च लिङ्गसङ्ख्यावशादीषदपरिसमाप्तौ प्रतिकृतौ चेवार्थे वर्तमानात्प्रातिपदिकात् स्वार्थे प्रत्ययो भवतीति विज्ञायते । किं पुनरिह न्याय्यं उपमाने प्रत्यय इति ॥

ननु च गुड इवायं गुडो द्राक्षा, चञ्चेवायं चञ्चा पुरुष इति गुडादिशब्दा माधुर्यादिगुणयोगेन द्राक्षादिषु वर्तन्ते । ततश्च द्राक्षादयः प्रकृत्यर्था भवन्ति । प्रकृत्यर्थे चोपमेये स्वार्थिकाः कल्पबादय इति कथमुपमाने प्रत्यय इति । मैवम् ; न हि द्राक्षायास्तत्रापरिसमाप्तिरपि तु गुडस्य । येन हि गुणेन माधुर्यादिना गुडशब्दो द्राक्षायां वर्तमानो गौणीं वृत्तिमनुभवति तस्यैवेषदसमाप्तौ प्रत्ययो विधीयते । अद्यैवं गुडस्येषदपरिसमाप्तौ वर्तमानस्य स्वार्थे प्रत्ययविधानात् बहुगुडो द्राक्षेति । सोऽयमित्यभिसम्बन्धाद्व्यतिरेक इति चेद्व्यतिरेकमूलत्वादव्यतिरेकस्य पक्षे व्यतिरेक-

प्रसङ्गः, यथा शुक्लः पटः पटस्य शुक्लइव। नैवं; उपपद्यमानव्यतिरेकाणामुभयं भवति। नचात्र तदुपपत्तिः, न हि यथा शुक्लगुणोऽस्तीति मतुब्लोपादपृथक्सिद्धशुक्लगुणवाचिना शुक्लशब्देन पटोऽभिधीयते, तथा गुड इत्यनेन। सहि द्रव्यशब्दो द्रव्यान्तरसामानाधिकरण्यान्यथानुपपत्त्या गौणीं वृत्तिमाश्रित्य स्वनिबन्धनं द्रव्यान्तरे व्यतिरेकमुपनिधत्ते। तत्र सामानाधिकरण्यभ्रंशात् गुणवृत्तेरपि भ्रंशोमाभूदिति न व्यतिरेकलक्षणा षष्ठी भवति। न च गुणवचनानामपि केषांचिल्लोके व्यतिरेक उपलभ्यते। न हि भवति पटुः पटुकल्पोऽयं देवदत्तस्येति। कथं पुनर्गुणवृत्त्याप्युपमेये वृत्ते गुडशब्दात्स्वार्थे विधीयमानः प्रत्यय उपमानं प्रत्याययति, द्रव्यवत् प्रवृत्तिनिमित्तस्यापि स्वार्थत्वात्। तथा हि चञ्चा तृणमयः पुरुषो यःक्षेत्ररक्षणाय क्रियते तस्य च पुरुषे प्रवर्तमानस्य स्वाकारः प्रवृत्तिनिमित्तम्। अतः इवे प्रतिकृतावितीवार्थे तत्रैव प्रत्ययो भवति॥

ननु च यदि प्रतिकृतौ वर्तमानात् प्रातिपदिकात् स्वार्थे प्रत्ययः किमिवार्थ इत्यनेन, अथे. वार्थेकृतं प्रतिकृताविवत्यनेन? उच्यते; उपचरितशब्दानां शक्तिमहिम्नैव त्रयी गतिर्भवति। क्वचिदि- वार्थ एव स्वार्थिकः कुशाग्रीया बुद्धिः शैलेयं दधीति, क्वचित्प्रतिकृतावेव वासुदेवो भीमसेन इति, क्वचिदिवार्थे प्रतिकृतौ च यथावरोरुः पीवरोरुरिति। अत्र यदि वरशब्देन पीवरशब्देन वा ऊर्वोरेव गुणोऽभिधीयते तदा ऊरूत्तरपदादौपम्ये इत्यूङ् सिध्यति। ततश्चौपम्याय कर्तव्योऽत्र यत्नःस्यात्। यदि वरशब्दः पीवरशब्दो वा वरे पीवरे च रम्भास्तम्भस्तम्बेरमकरादौ वर्तित्वात्तत्सादृश्यात्तदुपमे- ययोरूर्वोर्वर्तेत तच्चेवार्थे प्रतिकृतौ वर्तमानयोस्तयोः प्रत्ययलुग्विधाने भवति। अन्यथाहि वरत्वं पीवरत्वमेव च लभ्यते, न संस्थानविशेष इति न भवितव्यम्। प्रत्ययमन्तरेणापि स्वस्रादीनामिव तस्य ताच्छीलिकान्तत्वेन स्त्रीत्वाभिधानमेव ऋन्नेभ्यो ङीबित्यस्य न षट्स्वस्रादिभ्य इति प्रतिषेधः प्रत्याख्यायते। किं पुनरमी उपमानशब्दा लुप्तप्रत्ययत्वेन गुणीभूता एव कल्पबादीनामुत्पत्ति- निमित्तं भवन्ति। बाढम्। अजादी गुणवचनादेवेत्यतो हि गुणवचनादित्यधिक्रियते। ततश्च बहुच्कल्पब्देश्यदेशीयर ईषदसमाप्तिमेवं प्रशंसायां रूपप् विधीयमानः पचति रूपं पचतो रूपं पचन्ति रूपमिति क्रियालक्षणस्य गुणस्यैव प्रशंसां द्योतयन्ति। अन्यथा हि सर्वत्रैकवचनं न स्यात्। न च द्रव्यस्य समाप्तिः कुत्सा प्रशंसा वा स्वतः सम्भवति, अपि तु गुणतः। अतश्च गौण्या मुख्यया वा मन्दमध्योत्कृष्टेषु गुणेषु वर्तमानात्प्रातिपदिकादीषदसमाप्तौ द्योत्यायां कल्पबादयो भवन्ति॥

ननु च निर्ज्ञातस्यार्थस्य समाप्तिरसमाप्तिर्वा भवति। गुणश्च निर्ज्ञातः, लोकतो गुणस्य निर्ज्ञानं। तद्यथा—पटुरयं ब्राह्मणः। यो लघुनोपायेनार्थं निर्वर्तयति, पटुकल्पोऽयं यो नातिलघुनेति। एवं पटुतरः शुक्लतमः कनीयान्पटिष्ठः उत्कृष्टतरः वैयाकरणपाश इत्यादिषु तरबादयोऽपि गुण- वचनेभ्यो विधीयमाना गुणगतमेव प्रकर्षं द्योतयन्ति। कथं पुनरतिशायनादौ विधीयमानास्तरबा- दयो गुणप्रकर्षे भविष्यन्ति, न पुनर्द्रव्यप्रकर्ष इति; नैवं; द्रव्यस्य प्रकर्षः संभवति। किं तर्हि? गुणस्य

च प्रकर्षोऽस्ति, तस्य प्रकर्षो भविष्यति ? कथं ज्ञायते गुणस्यैव प्रकर्ष इति ? एवं हि दृश्यते लोके समान आयामे विस्तारे च पटस्यान्योऽर्थो भवति काशिकस्यान्यो माथुरस्य गुणान्तरं खल्वपि शिल्पिनः प्रकर्षायोत्पाद्यमानस्तमेव द्रव्यान्तरेण प्रक्षालयन्त्यन्येन शुद्धं धौतं कुर्वन्त्यनेन शेफालिकमन्येन माध्यमिकमिति । तर्हि शुक्लात्कृष्णो माभूदिति समानग्रहणं कर्तव्यम् । न कतर्व्यम् । स्पर्धा वै प्रकर्षः, सा च समानगुण एव भवति, न ह्याढ्याभिरूपौ स्पर्धेते । पाचकेन खल्वप्युत्पत्तव्यम् । न च शुक्लात्कृष्णे उत्पद्यमानो वाचकः स्यात् । यत्र तत्स्यात्, तत्रोत्पद्यत एव यथा शुक्लात्कृष्णो भासुरतर इति न तर्हीदानीमिदं भवति । अध्वर्युर्वै श्रेयान् पापीयान् प्रतिप्रस्थाता अन्धानां काणतमो राजेति समानगुण एवैषा स्पर्धा । अध्वर्युर्वै श्रेयानन्येभ्यः प्रशस्तेभ्यः पापीयान् प्रतिप्रस्थाता अन्येभ्यः पापेभ्यः काणतम इति, कणिरयं सौक्ष्म्येवर्तते । सर्वइमे काणाः किञ्चित्पश्यन्ति, अयं तु किञ्चिदपि न पश्यतीति काणतम उच्यते । तस्मादूरविप्रकर्ष इति वक्तव्यम् । सर्षपाद्धिमवतो महत्त्वं माभूदिति न वक्तव्यम् । जननेन या प्राप्यते सा जातिः । न चैतस्यार्थस्य प्रकर्षाप्रकर्षौ स्तः ॥

अथ शुक्लतर इत्यादिषु किमेकं शौक्ल्यं आहोस्विन्नाना । किञ्चातः यद्येकः प्रकर्षो नोपपद्यते, नहि तेनैव तस्य प्रकर्षो भवति । अथ नाना समानगुणग्रहणं कर्तव्यं शुक्लात्कृष्णो माभूदिति एकं शौक्ल्यं तत्तु विशेषवत्, किंकृतो विशेषः ? अल्पत्वबहुत्वकृतः, अथवा पुनरस्त्वेकं निर्विशेषं च । ननूक्तं प्रकर्षो नोपपद्यते गुणान्तरेण प्रच्छादनात् भविष्यति । अथेहास्य शुक्लानि वस्त्राणि अस्यातिशयेन शुक्लानीति शुक्लतरवस्त्र इति प्राप्नोति । शुक्लवस्त्रतर इति चेष्यते । उक्तमत्र— किमुक्तं पूर्वपदातिशय आतिशायिकाद्बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थः उत्तरपदातिशय आतिशायिको बहुव्रीहेर्बह्वाढ्यतराद्यर्थ इति ॥

अथ यत्र त्रीणि शुक्लानि प्रकर्षापकर्षयुक्तानि तत्र पूर्वपूर्वमपेक्ष्य द्वे तरबन्ते, तत्र शुक्लतरशब्दादुत्पत्तिः प्राप्नोति । शुक्लशब्दे शुक्लशब्दोऽप्यस्तीति शुक्लादेवोत्पत्तिर्भविष्यति । नैतद्विवदामहे, शुक्लतरशब्दे शुक्लशब्दोऽस्त्युत नास्ति । किं तर्हि ? शुक्लतरशब्दोऽप्यस्ति, तत उत्पत्तिः प्राप्नोति तदन्ताच्चातिशायिको दृश्यते । तद्यथा—देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे, युधिष्ठिरः श्रेष्ठतमः कुरूणामिति । अयं तर्हि परिहारः ; मध्यमाच्छुक्लशब्दात् पूर्वपरापेक्षात् प्रत्ययेनोत्पत्तव्यम् । मध्यमश्च शुक्लशब्दः पूर्वमपेक्ष्य प्रकृष्टः परमपेक्ष्य न्यूनः प्रकर्षाय प्रवर्तते । न च बहूनां प्रकर्षे तरपा भवितव्यम् । केन तर्हि ? तमपा । श्रेष्ठतमाय, श्रेष्ठतम इति छन्दस्येव भवति, वाचकेन खलु ह्युत्पत्तव्यम् । न च शुक्लतरशब्दादुत्पद्यमानो वाचकः स्यात् । उक्तं च—

अपेक्ष्य मध्यमः पूर्वमाधिक्यं लभतेऽस्तितः । परन्तुन्यूनतामेति न च न्यूनः प्रवर्तते ॥
अस्तु वाऽपि तरस्तस्मान्नापशब्दो भविष्यति । वाचकश्चेत्प्रयोक्तव्यो वाचकश्चेत्प्रयोज्यताम् ॥

अथ यद्यातिशायिका गुणप्रकर्ष एवोत्पद्यन्ते किमर्थमुच्यते अजादी गुणवचनादेवेति ? एतौ गुण-विशेषवचनेभ्य एव यथा स्यातामिति। गुणाः खल्विह द्विप्रकारा विप्रथन्ते–तत्स्थाश्च, तद्विशेषणानि च। यदाह—तत्स्थैश्च गुणैः षष्ठी समस्यते ; न तु तद्विशेषणैरिति। तत्र ये भावप्रत्ययोत्पत्तिमन्तरेण द्रव्यात्पृथगाख्यातुमशक्याः स्वशब्दैर्द्रव्यपरतयैवाभिधीयन्ते ते तत्स्थाः। तद्यथा—पटुः पुमान्, मृदुःशय्या, गुरु द्रव्यम्, लघुरुपायः। एवमणुर्महान्दीर्घो ह्रस्वः पृथुः कृशो दृढः स्थूल इत्यादयो वक्तव्याः॥

ये तु स्वशब्दैः पृथक्प्रख्यायमानामतुब्लोपादिना द्रव्यं विशेषयन्ति ते तद्विशेषणानि। तद्यथा—शुक्लगुणयोगाच्छुक्ला बलाका, कृष्णगुणयोगात्कृष्णःकाकः, तीक्ष्णगुणयोगात्तीक्ष्णः कण्टकः, दक्षगुणयोगाद्दक्षः पुरुषः। एवं शीतोष्णस्वादुसुरभिवत्सलोत्सुकरभसमत्सरादयो वक्तव्याः। तत्र यथा—बलाकायाः शुक्लः, काकस्य कृष्णः, कण्टकस्य तीक्ष्णः, पुरुषस्य दक्ष इत्यादौ। तथा बलाकायाः शौक्ल्यम्, काकस्य कार्ष्ण्यम्, कण्टकस्य तैक्ष्ण्यम्, पुरुषस्य दाक्ष्यमित्यादावपि समासो न भवति। गन्धरसरूपस्पर्शसङ्ख्यापरिमाणादयस्तु न तत्स्थाः, नापि तद्विशेषणानि। तेषां शुक्लादिसङ्घातेषु शास्त्रकारसङ्केतात् द्रव्यवचनत्वेनैव राजपुरुषादिवत् षष्ठीसमासा भवन्ति। तद्यथा–चन्दनगन्धः, चूतफलरसः, कन्यारूपं, कुचस्पर्शः, पुरुषसङ्ख्या, सेनापरिमाणमिति। यैश्च तीव्रादीं स्तद्विशेषणत्वेनोपन्यस्य घृतस्य तीव्रश्चन्दनस्य मृदुरित्युदाहृत्य च तीव्रमृदुगुणयोगात् गुणवृत्त्या गन्धस्पर्शविशेषणत्वेन सापेक्षत्वे सत्यसामर्थ्याल्लब्धेऽपि समासाभावे यदा प्रकरणवशात्तीव्रशब्द एव विशिष्टगन्धवृत्तिस्तदा तदर्थोपचित एव व्यतिरेके षष्ठीसमासप्रसङ्ग इति प्रतिषेधोपपत्तिरुक्ता। त एवं प्रष्टव्याः कथं प्रकरणाद्यपेक्षायामपि सापेक्षत्वस्य तादवस्थ्यान्नासामर्थ्यमिति ? तदेवं तत्स्थै-र्गुणैः षष्ठी समस्यते पटुत्वादिभिः, न तु तद्विशेषणैः शुक्लादिभिरिति, किं वक्तव्यमेतत् ? न हि कथ-मनुक्तं गंस्यते आचार्याणां च प्रवृत्तयो गमयन्ति ? तत्रार्थैकत्वं गोसहस्रमित्यादिष्वर्थैकत्वादेकं वाक्यं शतसहस्रान्ताश्च निष्कात्कोशशतयोजनशतयोरुपसङ्ख्यानं ; तत्समुदायः खारीशतमपि न प्रसूतमि-त्यादिजैमिन्यादिमुनिचतुष्टयवचनात् सङ्ख्यया परिमाणेन च समासो न निषिध्यते। वर्तमान-सामीप्ये वर्तमानवद्वा अपरस्पराः क्रियासातत्ये उत्तरपदार्थप्राधान्ये तद्यत्नगौरवं प्रसज्येतेति सूत्रकारभाष्यकारप्रयोगाच्च कुसुमसौकुमार्यादिशब्दसिद्धिः तेनावगम्यते तत्स्थैर्गुणैरेवं प्रकारैः षष्ठी-समस्यत इति। नन्वेवमपि,

द्विरदमदजलौघासारसौरभ्यगर्भः कुचकलशमहोष्माबद्धरेखस्तुषारः।
तुहिनगिरिशिलायां शैत्यसङ्क्रान्तिमत्यां ...., ...॥

इत्येवमादीनामनुपपत्तिः। सप्तमीसमासा इमे भविष्यन्ति। कथं पुनः सौरभ्यादीनामाधारतः पृथ-गुपलम्भे सप्तमी भवति। उच्यते, समस्तमूर्तिमद्द्रव्याणां पाञ्चभौतिकत्वे वायुना विभक्तावयवा अप्य-

पार्थिवादिद्रव्यसूक्ष्मभागा यत्रयत्र सञ्चार्यन्ते तत्रतत्रैतेषु घ्राणादिसम्बन्धनिबन्धनाद्युपलब्धिरित्यधिकरणविभक्तेर्नानुपपत्तिः। एवमपि भागानामेवाधिकरणत्वं, न भागवताम्; न हि निकृत्तस्य हस्तपादादेः पुरुषादिव्यपदेशो भवति। एवमेतत्, किन्तु पृथक्स्थितानामप्यवयवानामवयविव्यपदेशो दृश्यते, तद्यथा—राहोः शिरो राहुः, शिवस्य लिङ्गं शिव इति। न चैतद्वाच्यम्, एवं सति समुद्गकादिस्थस्य कर्पूरादेर्बहिरुपलभ्यमानबहुलपरिमलस्य कालान्तरेणोपक्षयः स्यात्; तद्वदेव दृष्टसन्निधेस्तत्रान्यभागानामुपनिपातात्। अत एव पुराणद्रव्याणां गन्धरसरूपस्पर्शगौरवप्रभावविपाकवीर्यविपर्यया युज्यन्त इति॥

तदेवं यैः सह षष्ठीसमास इष्यते तेभ्य एवेयसुनिष्ठनोर्विधानमिति नानर्थकं गुणवचनादेवेति। ननु च गुणमुक्तवान् मतुबुत्पत्तेः पूर्वमिति गुणवचनः शुक्लादिर्गुणं वक्ष्यति भावप्रत्ययोत्पत्त्येति गुणवचनः पट्वादिः। विशेषवचनत्वाविशेषे यावदजादी पट्वादिभ्य उत्पद्येते तावच्छुक्लादिभ्यः किमिति नोत्पद्येयाताम्। न च समासविधाविवेह ज्ञापनादीनि सन्ति। कथं न सन्ति? तद्यथा—प्रशस्यस्य श्रः, ज्यच, वृद्धस्य च, अन्तिकबाढयोर्नेदसाधौ, युवाल्पयोःकनन्यतरस्यामिति। अपिचेष्ठेमेयस्स्वित्यधिकृत्य यदयं स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं लुप्यते पूर्वस्य च गुणो भवतीत्यभिधत्ते। प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्दाः, इत्याह। बहोर्लोपो भूचबहोरिति ब्रूते। र ऋतो हलादेर्लघोरित्यत्र पृथुमृदुदृढकृशभृशपरिवृढानामिति परिगणनं करोति। तद्ज्ञापयति तत्स्थगुणवचनेभ्य एवेयसुनिष्ठनौ भवत इति। ततश्च यथा शुक्लतरः कृष्णतम इत्यादि भवति, नैवं शुक्लीयान् कृष्णिष्ठ इत्यादि। यथा च मृदिष्ठः पटीयानिति भवति, नैवं कारकिष्ठः पाचकीयानिति। कथं तर्हि ओजिष्ठः पापीयानिति? विन्मतोर्लुगिति ज्ञापकेन तदन्ताद्भविष्यति।

अथ यथा चन्द्रकल्पं मुखं, गुडकल्पा द्राक्षा, तथा चन्द्रतमं गुडतमेति कस्मान्न भवति? प्रकर्षाभावात्। न हि केनचिद्गुणेनोपमेयवृत्तीनामुपमानशब्दानामतज्जातीयेषु वर्तमानानां स्वार्थापेक्षया प्रकर्षः सम्भवति। यत्र तु तज्जातीयेषु गुणाभिधानं तत्र भवत्येवातिशयि तत्। तद्यथा—गौरयं यः शकटं वहति गोतरोऽयं यः शकटं सीरं च। गौरियं या समां समां विजायते गोतरेयं या समां समीचीना जीववत्सा च। दृश्यते हि जातिवाचिनस्तज्जातीयेष्वपि गुणाभिधायित्वम्॥

सङ्ग्रामेषु चरत्येष पुरुषः पुरुषो यथा।
नाम यस्याभिनन्दन्ति द्विषोऽपि सपुमान्पुमान्॥ इति॥

यद्येवं चन्द्रगुडादिभ्यः कल्पबादयोऽपि न स्युः। नैवं तेषामीषदसमाप्तावेव विधानात्। तर्हि कृतकल्पं भुक्तकल्पमिति क्तान्तेभ्यः नचास्ति सम्भवो यद्भूतं च स्यादसमाप्तं च, आशंसायां भूतवच्चेति वचनाद्भविष्यति॥

॥ प्रविभागः ॥

पदे वाक्ये प्रबन्धे वाऽस्यैतावतः शब्दस्यायमर्थोऽस्मिन्नर्थे चायमेतावच्छब्द इति शब्दार्थयोर्मिथः सम्बन्धितया पृथक्त्वेनावधारणं प्रविभागः। स द्विविधोऽन्वयव्यतिरेकाभ्यां इह खल्वत्यन्तसंसृष्टानां पदार्थानां प्रविभागेऽन्वयव्यतिरेकाभ्यां नान्यो हेतुरस्ति। यथा–लोके बधिरोऽपि चक्षुषा न लोकयति, सत्यपि श्रोत्रे उपहतचक्षुर्नालोकयतिरूपमित्यन्वयव्यतिरेकाभ्यां चक्षुश्श्रोत्रसन्निधाने रूपालोकनं चक्षुष एव व्यवस्थाप्यते न श्रोत्रस्य, तथा शब्दशास्त्रेऽपि, सुबन्तेषु तिङन्तेषु च पदेष्वत्यन्तसंसृष्टा अर्थात्मानः शब्दाश्च प्रकृतिप्रत्ययादयो मिथस्सम्बन्धित्वेनान्वयव्यतिरेकाभ्यामेव प्रविभज्यन्ते। तत्रावस्थितस्यानुवृत्तिरन्वयः, तद्विपर्ययो व्यतिरेकः, स द्विविधो जन्महानिभ्याम्। तद्यथा–वृक्ष इत्युक्ते कश्चिच्छब्दः श्रूयते वृक्ष इत्यकारान्तः सकारश्च प्रत्ययः, अर्थोऽपि कश्चिद्गम्यते शाखादिमत्त्वमेकत्वं च। ऋक्ष इत्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी। वृक्षशब्दो हीयते ऋक्षशब्द उपजायते सकारोऽन्वयी, अर्थोऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी, शाखादिमत्त्वं हीयते सटादिमत्त्वमुपजायते एकत्वमन्वयीति। वृक्षावित्युक्ते सकारो हीयते औकारः उपजायते वृक्षशब्दोऽन्वयी। अर्थेऽप्येकत्वं हीयते द्वित्वमुपजायते शाखादिमत्त्वमन्वयीति। तिङन्तेषु खल्वपि पचतीत्युक्ते कश्चिच्छब्दः श्रूयते पच इति चकारान्तः अतिशब्दः प्रत्ययः अर्थोऽपि कश्चिद्गम्यते विक्लित्तिः कर्तृत्वं च, पठतीत्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयीति। पच्छब्दो हीयते पठशब्द उपजायते अतिशब्दोऽन्वयी। अर्थोऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी, विक्लित्तिर्हीयते पठिक्रियोपजायते कर्तृत्वमन्वयी। पच्यत इत्युक्ते अतिशब्दो हीयते यशब्द उपजायते पच्छब्दोऽन्वयी, अर्थोऽपि कर्तृत्वं हीयते कर्मत्वमुपजायते विक्लित्तिरन्वयिनीति। ते मन्यामहे यश्शब्दो हीयते तस्यासावर्थोऽन्वयीति। एवं वाक्येऽपि गामानयेत्युक्ते केनचिच्छब्दः श्रूयते गामिति द्वितीयान्तः आनयेति च लोडन्तः, अर्थोऽपि कश्चिद्गम्यते सास्नादिमान् कर्मत्वमापन्नः आनयेति क्रियार्थत्वविधित्वमापन्नः, अथाश्वमानयेत्युक्ते गवार्थो हीयते अश्वार्थ उपजायते आनयनार्थोऽन्वयी, गांबधानेत्युक्ते आनयनार्थो हीयते बन्धनार्थ उपजायते गवार्थोऽन्वयी। एवं गौरानीयतामश्व आनीयतां गौर्बध्यतामश्वो बध्यतामित्यादिषु कर्मकर्तृत्वयोर्हानिरूपजनिश्चाभ्यूह्यः। एतेन प्रबन्धोऽपि व्याख्यातः। कश्चिदाह, मारीचो रामेण हतः। कश्चिदाह, लक्ष्मणेनेति। तत्र मारीचमृगघाते रामो हीयते लक्ष्मण उपजायते लक्ष्मणो वा हीयते राम उपजायते, रामायणं पुनरन्वयीति॥

ननु च वृक्षऋक्ष इति वकारो हीयते ऋ उपजायते वा; पचति पठतीति चकारो हीयते ठकार उपजायत इति वक्तव्ये किमर्थमुच्यते वृक्षशब्दो हीयते ऋक्षशब्द उपजायते, पच्छब्दो हीयते पठशब्द उपजायत इति? शब्दस्यार्थवत्ता यथास्यात् न वर्णानाम्। किं पुनर्न वर्णाः शब्दः? बाढम्। अर्थावसानप्रसवनिमित्तं शब्द इत्यभिहितं पुरस्तात्॥

नन्वेवमपि वृक्षादीनामर्थवत्ता नोपपद्यते, किं कारणम्? केवलेनावचनात्। न हि वृक्षादिना केवलेन कश्चिदर्थो गम्यते किं तर्हि स प्रत्ययकेन। किमुक्तं भवति, पचत्यादिष्वर्थवत्तासहचरिता केवलवचनता दृष्टा वर्णेषु चानर्थक्यसहचरितं केवलावचनत्वम्। न चैते पचत्यादिवद्दृश्यन्ते, तस्माद्वर्णवद्वृक्षादीनामर्थवत्ता नोपपद्यत इति। सप्रत्ययस्योपपद्यत इति चेन्नैवम्, इह यद्यस्य निमित्तत्वेनोपादीयते स तस्मिंस्तेन प्रवर्तितव्यम्। अर्थवत्ता च प्रातिपदिकसंज्ञाया निमित्तम्। सा च द्विधा लौकिकी पारिभाषिकीति च। तयोर्लोके विदिता लौकिकी, क्रियाप्रधानमाख्यातम्, सत्त्वप्रधानानि नामानीति। शास्त्रे व्यवहारार्था पारिभाषिकी। दाधाघ्वदाप्, तरप्तमपौ घ इति। तत्र लौकिकी तावदर्थोपलब्धिगम्या, येषां च प्रातिपदिकसंज्ञा विधीयते तेन कदाचित्केवला उपलभ्यन्ते। पारिभाषिकी तु परिभाषया भवत्यर्थवच्छब्दरूपं तच्च प्रातिपदिकसंज्ञमिति। एवं च शब्दत्वाविशेषाद्वर्णानामपि प्रसज्यते। इयं च परिभाषा न प्रवर्तते अर्थवद्ग्रहणे नानार्थकस्येति, तदेवमर्थवत्ताया निमित्तस्याभावे प्रातिपदिकसंज्ञा न प्रवर्तते; तदप्रवृत्तौ तु कथं प्रत्ययोत्पत्तिरिति? नैवम्। प्रत्ययेन नित्यसम्बन्धात् केवलस्याप्रयोगः, नित्यसम्बन्धावेतावर्थौ प्रकृतिः प्रत्यय इति, अतो नित्यसम्बन्धात् केवलस्य प्रयोगो न भविष्यति॥

ननु च भवानाम्रान्पृष्टः कोविदारानाचष्टे, अर्थवत्ता नोपपद्यते केवलेनावचनादिति पृष्टः केवलस्याप्रयोगे हेतुमाह नाभिप्रायापरिज्ञानात्॥

नन्वेवं ब्रवीमि यदितावत् केवलेनावचनादित्येवमयं हेतुरुपन्यस्तः यस्मात्केवलो न प्रयुज्यते तस्मादनर्थक इति। तदेवं वक्तव्यं केवलस्याप्रयोगादिति। न वक्तव्यं केवलेनावचनादिति। केवलस्य प्रयोगः शास्त्रसमयान्नास्ति न केवला प्रकृतिः प्रयोक्तव्या। न च केवलः प्रत्यय इति। न च लौकिका एवं प्रयुञ्जते अत उक्तं नित्यसम्बन्धादयं केवले न प्रयुज्यते नत्वानर्थक्यादिति॥

अथैवमुपन्यस्तः केवलेन प्रयुज्यमानेन नोच्यतेऽसावर्थ इति, क्व पुनरयं भवता केवलः प्रयुज्यमानोऽर्थमब्रुवन् दृष्टः। यदि च प्रयुज्येत नचार्थ उपलभ्येत, स्यादयं हेतुः केवलेनावचनादिति, अन्यद्भवान्पृष्टोऽन्यदेव प्रतिविधत्ते। मया ह्येवमुच्यते, समुदायस्यार्थे प्रयोगादवयवार्थानामप्रसिद्धिरिति। यतो वर्णास्तावदनर्थका भवताभ्युपगताः तेषां च समुदायतन्त्राणां केवलानां प्रयोगो नास्ति। यद्यपि प्रयुज्येरन् अनर्थकानामेव प्रयोगः स्यात्। एवं प्रकृतीनामपि समुदायतन्त्राणां नास्ति केवलानां प्रयोगः प्रयोगे वा सत्यनर्थकाः प्रयुज्येरन्। अथैवम्भूतानामर्थवत्ता, को नाम मत्सरो वर्णेष्विति? को न मत्सरः, यदेषामर्थवत्त्वेऽर्थवत्कार्याणि प्राप्नुवन्ति, कान्यर्थवत्कार्याणि? अर्थवत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा, प्रातिपदिकादिति स्वाद्युत्पत्तिः, सुबन्तं पदमिति पदसंज्ञा च। तत्र को दोषः? प्रत्यवयवं विभक्तेः श्रवणं प्राप्नोति। नैवं, यदैवावयवानां प्रातिपदिकसंज्ञा

प्रकृतिरेव सर्वानर्थानभिदधाना अधुना इयान् अस्यापत्यं इरिति प्रत्यय एव वा सर्वार्थाभिधायी, हैयङ्गवीनं, श्रोत्रियः, क्षेत्रियः, इत्युभयमुभयार्थाभिधायीति । अतः किं न सार्थीयोऽर्थवत्ता सिद्धा भवति ? यदाहि प्रकृतिरेव स्वार्थादिषु वर्तते प्रत्ययो वा तदा सुतरामर्थवत्ता सिध्यति । न ब्रूमोऽर्थवत्ता न सिध्यति । तौ त्वन्वयव्यतिरेकौ नावतिष्ठेते । ततश्च कुत एतत्स्यादयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इति ? न पुनः प्रकृतेरेवोभावर्थौ प्रत्ययस्योभयस्य वेति सामान्यशब्दा एते । एवं स्युः सामान्यशब्दाश्च नान्तरेण विशेषं प्रकरणं वा विशेषेऽवतिष्ठन्ते, यतस्तु खलु नियोगतः प्रकरणादिमन्तरेणापि वृक्ष इत्युक्ते स्वभावतः कश्चिदर्थो गम्यते, अतो मन्यामहे न इमे सामान्यशब्दाः, प्रकृतिः प्रकृत्यर्थे वर्तते, प्रत्ययः प्रत्ययार्थे वर्तत इति । यदिहि सु औजस् इत्येता एव स्वार्थद्रव्यलिङ्गसङ्ख्याकर्मादिवचनाः, सहायमात्रं प्रकृतिः, स्वादिभिः सर्वेषामर्थानामुपादानात् वृक्षः वृक्षौ वृक्षा इति किमर्थं नियोगेन वृक्षार्थ एव गम्यते, न पुनस्सर्वे अर्थाः प्रतीयेरन् ? पर्यायेण वा कदाचित्कश्चिन्न यौगपद्यं न पर्यायः । तस्मादन्वयव्यतिरेकाभ्यां समुदायस्थाः शब्दाश्चापोद्धर्तव्या अर्थाश्चेति व्यवस्थिताः, अन्वयव्यतिरेकाभ्यां व्यावहारिक्यर्थवत्ता । तत्रेदमपरिहृतं प्रकृतिरेव सर्वानर्थानभिदधाना दृश्यते प्रत्ययः सर्वार्थाभिधायी उभयं वोभयार्थाभिधायीति । तत्र परिहारः दधि मधु अग्निचिदित्येवमादिषु वचनान्तराणामिकारादीनां श्रूयमाणत्वादन्येषां च सविभक्तिकानां प्रयोगदर्शनात् ॥

अधुना इयानित्येवमादिषु प्रत्ययान्तरपरायाः प्रकृतेरवस्थानात् प्रकृत्यन्तराणां वा लोपदर्शनात् इहाप्यकेवलस्यैवार्थाभिधानं प्रसक्तं लोपादिद्वारेण शास्त्रदृष्ट्या केवलस्य विज्ञायते ॥

ननु न केवला प्रकृतिः प्रयोक्तव्या, न केवलः प्रत्यय इति शास्त्रसमयः । सत्यमेतत्, किन्तु यत्र प्रकृतिनिमित्ता प्रत्ययप्रवृत्तिस्तत्र केवलापि प्रकृतिः प्रयुज्यते । यत्र वा प्रत्ययनिमित्ता प्रकृतिनिवृत्तिस्तत्र केवलोऽपि प्रत्यय इत्यभ्यनुज्ञायते । हैयङ्गवीनं, श्रोत्रियः, इत्यादिषु तु संज्ञाशब्दे ह्योगोदोहस्य विकार इति, श्रोत्रियश्छन्दोऽधीत इति, परक्षेत्रे चिकित्स्य इति, प्रकृतिप्रत्ययविभागकल्पनया व्युत्पत्तिर्यथाकथंचिद्धर्मनियमाय क्रियते । एवं यावकादिष्वपि स्वार्थिकेषु प्रत्ययार्थस्याव्यतिरेकात्प्रकृत्यन्तरयोगे प्रातिपदिकानां च यावकादीनामर्थभेदात्प्रत्ययान्तरयोगे प्रकृतेः कल्पितायामर्थवत्तायां स्वार्थिकत्वं विज्ञायते । एको द्वौ बहव इत्यत्र प्रत्येकं वचनान्तराभावात्कर्मादिविषयावन्वयव्यतिरेकावाश्रीयेते । सामान्यतो दृष्टाच्चानुमानात्प्रकृत्यन्तरवदेकादीनां प्रवृत्तौ भिन्नरूपाणि वचनान्यसङ्करेण व्यवस्थां प्रकल्पयन्तीति प्रतीयते ॥

नन्वेवं सति शब्दस्यैकार्थोपक्षयस्यार्थान्तरेण असम्बन्धादर्थस्याप्येकशब्दोपक्षयस्यान्यत्रासङ्क्रान्तेः कूपसूपयूपादिवदेवान्वयव्यतिरेकौ नावकल्पेते । न हि य एवैकत्वसंबन्धी स द्वित्वादिसंबन्धी, योवा प्रातिपदिकत्वेनार्थमात्रप्रवृत्तिः स्वशक्त्यन्तरसम्बन्धी न भवितुमर्हति । न खलु शब्दः कश्चिदुत्तरकालमर्थान्तरं परित्यजत्युपादत्ते वा । तदुक्तम्—यस्य न विभागोऽस्ति कुतोऽर्थस्य

भविष्यति ? विभागैः क्रियाभेदमविद्वान्प्रतिपद्यते । एवमेतत् । किन्तु त्रिविधः शब्दो निर्वर्त्योऽन्वाख्येयः प्रतिपादकश्च । तेष्वधर्महेतुरपभ्रंशो निर्वर्त्यः । धर्महेतुर्लोकवेदयोः प्रयोगार्होऽन्वाख्येयः । प्रकृतिप्रत्ययादिविभागकल्पनया तत्स्वरूपावबोधकृत्प्रतिपादकः । तदर्थमन्वयव्यतिरेकावविद्यमानावपि व्यवस्थार्थं कल्पितौ शास्त्रार्थव्यवहारनिबन्धनं सम्पद्यते । शास्त्रव्यवहारो ह्यर्थवत्प्रातिपदिकं क्रियावचनो धातुरित्यादिरनाश्रितयोरन्वयव्यतिरेकयोरसुकर एव । तदाह—

भागैरनर्थकैर्भिन्नाः पचतीत्येवमादयः ।
अन्वयव्यतिरेकौ तु व्यवहारनिबन्धनम् ॥ इति ॥

अभिधा च विवक्षा च तात्पर्यं च विभागवत् ।
चतस्रः केवला ह्येताश्शब्दसम्बन्धशक्तयः ॥
यापेक्षा यच्च सामर्थ्यमन्वयो यश्च तैर्मिथः ।
ऐकार्थ्यं यच्च तास्तस्य ससहायस्य शक्तयः ॥
उक्ताश्चतस्रः प्रथमाः क्रमेण क्रमादथान्याः प्रकटीक्रियन्ते ।
अखण्डवाक्यार्थविवेचकानां शब्दार्थसंवित्परिशुद्धिहेतोः ॥

इति महाराजाधिराज श्रीभोजदेवविरचिते शृङ्गारप्रकाशे
केवलशब्दसम्बन्धशक्तिप्रकाशो नाम
सप्तमः प्रकाशः ॥

॥ श्रीः ॥

अष्टमः सापेक्षशब्दशब्दशक्तिप्रकाशः

॥ व्यपेक्षा ॥

तत्रोद्भूतसम्बन्धव्यतिरेकाणां पदार्थानामितरेतरत्मत्याकाङ्क्षा व्यपेक्षा । सा च सन्निहिते योग्ये च भवति । तद्यथा—देवो वर्षतीति वर्षणक्रियाकर्तारमन्तरेणाभवन्ती सन्निहितं योग्यं च देवमपेक्षते । यत्र तु सान्निहितस्य न योग्यता तत्र व्यवहितमपि योग्यमेवापेक्ष्यते । यथा—प्रविशपिण्डीमित्यत्र न प्रवेशनक्रियासान्निहितायामप्ययोग्यायां पिण्ड्यामसम्भवन्ती व्यवहितमपि योग्यं गृहादिकमपेक्षते । पिण्डीमित्येतदपि कर्मपदं प्रविशेत्यस्मिन्नसम्भवद्योग्यमेव भक्षयेत्यादिक्रियापदमपेक्षत इति । सेयं व्यपेक्षा संक्षेपतः पदार्थानां त्रेधा सम्भवति—आभिधानिकी, नैयायिकी । नैषेधिकी च । तत्र श्रुतिसमारोपवाक्यविकल्पसमुच्चयातिदेशादिभिरभिधीयमाना आभिधानिकी । ऊहाविपर्ययविपरिणामाध्याहारवाक्यविशेषव्यवहितकल्पनादिभिरुपकल्प्यमाना नैयायिकी । वचनासम्भवविरोधकृतार्थपरिसङ्ख्यावधारणादिभिर्निषिध्यमाना नैषेधिकी । तास्वाभिधानिकी तावद्यत्र द्वयोः साधर्म्यार्थमावृत्त्या विभक्तिश्रुतिभेदेन च विशेषणविशेष्यनिर्देशः सा श्रुत्याभिधानिकी । यथा—

> अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं
> सास्रेणास्रद्रवमविरलोत्कण्ठमुत्कण्ठितेन ।
> उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती
> सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥

यत्रापि साधर्म्यार्थादेव द्वयोस्तन्त्रेण च विभक्त्यभेदेन च विशेषणविशेष्ययोगः, सा च श्रुत्याभिधानिकी । यथा—

> दैवादपत्रमच्छायं फलार्थिभिरसेवितम् । सानुजं शाखिनमिव दृष्ट्वा रामं रुरोद सा ॥

यत्र पदेन वाक्येन वा संज्ञार्थो विधीयते सा समाख्याभिधानिकी । सा पदेन यथा—

> असौ शरण्यः शरणागतानामगाधसत्त्वे मगधप्रतिष्ठः ।
> राजा प्रजारञ्जनलब्धवर्णः परन्तपो नाम यथार्थनामा ॥

वाक्येन यथा–

सच्चं धन्नाधन्ना जातइआ केसवेण गिरिधरणे ।
गुरुभारपावडेण विअ अज्जुअअच्छं च्चिरं दिट्ठा ॥

यत्र व्यपेक्षोत्थापकवाक्यमभिधाय तदुपपादकमभिधीयते, उपपादकं वाभिधाय व्यपेक्षोत्थापकं सा वाक्याभिधानिकी । तयोराद्या यथा–

साउप्पन्नीगोटी डइनवस्विकवि ..... ति ।
भडुपच्चह्नि इसोमरहजासुननलश्शइकंठि ॥

द्वितीया यथा–

वाणिधमोडिअच्चरुणरूओ दारेएं तु न दिट्ठ । माएणजहुके मलडोल्लाहिअ इवइट्ठ ॥

वैकल्पिकाभिधानप्रभवा विकल्पाभिधानिकी यथा—

अंबुरुखोच्चिअसमुद्दुतेरेसिलदुहिडोग्गरुकाणि ।
तहिमोहिपतयीओकलहिओजेवरुच्च इते वअणि ॥

समुच्चयिकाभिधानप्रभवा समुच्चयाभिधानिकी । यथा—

हिअ इखुकइगोडरी मअणे हुडुक्क इमोहु ।
वासरत्तपवास अछं हसमासं कडुएहु ॥

सामान्यविशेषातिदेशप्राप्तधर्माणां यत्राग्रतः पश्चाद्वाभिधानं सातिदेशाभिधानिकी । तत्र सामान्यातिदेशप्राप्तधर्माभिधानमग्रतो यथा—

हिअ इति रिच्छिवहि समुहलच्छइगहिअकडवच्छ ।
पहिअहएकजिशोरडीनं चउभट्टअरच्छ ॥

एवं पश्चादपि द्रष्टव्यम् । विशेषातिदेशप्राप्तधर्माभिधानं पश्चाद्यथा—

महिलत्ताणणिव्वाहि उअएकलविज्जप्पिआइ ।
णेहक्क उविअविर हुनम्मे विदट्टणजाइ ॥

आदिग्रहणाद्यत्रैकमभिदधानः प्रसङ्गेनान्यदप्यभिधत्ते सा प्रसङ्गाभिधानिकी । सापि द्विधा—पदतो वाक्यतश्च । तयोराद्या यथा—

सावसलोणीगोरडी ... अहोमडुरइ साओ ।
तिक्खअप्पपलोव्वणएविरडुजिकडि अकसाओ ॥

अत्र रूपं वर्णयन्प्रसङ्गतः षड्रसानभिमतानभिमतत्वं च तेषां निर्दिशति । द्वितीया यथा—

प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणा
मात्मव्यापारगुर्वी जनितजललवा जृम्भणैः साङ्गभङ्गैः ।
नागाङ्कं मोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानं
निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः ॥

अत्र मुद्राराक्षसे चाणक्येन कौमुदीमहोत्सवे निषिद्धे राक्षसयुक्तो वैतालिकः प्रभाते मङ्गलानि पठन् शरदवतारो वर्तत इति चन्द्रगुप्तस्यागुप्तमावेदयति ।

अथ नैयायिकी । यत्र पूर्वोक्तमेव वाक्यमर्थान्तरे वक्रतरादिभिरूहयित्वा निवेश्यते तामूहनैयायिकीमामनन्ति । तद्यथा—कालिदासः "किं कुन्तलेश्वरः करोतीति" विक्रमादित्येन पृष्ट उक्तवान् ।

असकलहसितत्वात्क्षालितानीव कान्त्या मुकुलितनयनत्वाद्व्यक्तकर्णोत्पलानि ।
पिबति मधुसुगन्धीन्याननानि प्रियाणां त्वयि विनिहितभारः कुन्तलानामधीशः ॥

इदमेवोहयित्वा विक्रमादित्यः प्रत्युवाच—

पिबतु मधुसुगन्धीन्याननानि प्रियाणां मयि विनिहितभारः कुन्तलानामधीशः ॥

यत्र पाठक्रमेण संबन्धानुपपत्तावर्थक्रमेण विपर्यस्य पदानि योज्यन्ते सा विपर्ययनैयायिकी । यथा—

स्वयंविशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णामिति तां पुराविदः ॥

अत्रातस्तां प्रियंवदामपर्णां वदन्ति पुराविद इति पर्यायेण पदानि योज्यन्ते, यत्र तुल्यार्थपदप्रयोगे विभक्तिविपरिणामेन विशेषणविशेष्ययोर्योज्यन्ते सा विपरिणामनैयायिकी । यथा—

दन्तोज्ज्वलासु विमलोपलमेखलान्तास्सद्रत्नचित्रकटकासु बृहन्नितम्बाः ।
अस्मिन् भजन्ति घनकोमलगण्डशैला नार्योऽनुरूपमधिवासमधित्यकासु ॥

अत्र सप्तम्यन्तानि प्रथमान्तानि च विशेषणानि नारीरधित्यकाश्च विभक्तिविपरिणामतो विशेषयन्ति । एतेन वचनविभक्तिपरिणामो लिङ्गविपरिणामश्च व्याख्यातः । तयोराद्यो यथा—

हस्तस्थिताखण्डितचक्रशालिनं द्विजेन्द्रकान्तं श्रितवक्षसं श्रिया ।
सत्यानुरक्तं नरकस्य जिष्णवो गुणैर्नृपाः शार्ङ्गिणमन्वयासिषुः ॥

द्वितीयो यथा—

रोचिष्णुकाञ्चनचयांशुपिशङ्गिताशा वंशध्वजैर्जलदसंहतिमुल्लिखन्त्यः ।
भूभर्तुरायतनिरन्तरसन्निविष्टाः पादा इवाभिबभुरावलयो रथानाम् ॥

यत्राकाङ्क्षानिवृत्तयेऽर्थान्तरमध्याह्रियते, साध्याहारनैयायिकी । यथा—

न दानेन न मानेन न शाठ्येन न सेवया ।
न शस्त्रेण न शास्त्रेण सर्वथा किमपि स्त्रियः ॥

अत्र वशीभवन्तीत्यादिरध्याहारः । यत्र लिङादेरश्रुतौ विधिर्निषेधो वा सर्ववाक्यानां विधिनिषेधपरत्वे न प्रकल्प्यते सा वाक्यशेषनैयायिकी । यथा—

तदेतत्काकतालीयं तदेतद्घा घुणाक्षरम् । यदनात्मवतामायुर्यच्चानीतिमतां श्रियः ॥

तस्मादात्मवता नीतिमता भवितव्यमिति वाक्यशेषः । यत्र सन्निहितानुपपत्तौ व्यवहितमाश्रीयते सा व्यवहितविकल्पनानैयायिकी । यथा—

दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् । पूर्वं प्रधूपितो राज्ञां हृदयेऽग्निरिवोत्थितः ॥

अत्राग्नेर्निशमनाक्रियासम्भवात् पूर्वकालत्वायोगे तं निशम्यापि राज्ञां रजतामिति व्युत्पत्तिकालार्थो व्यवहितो व्यपेक्ष्यते । तेनायमर्थः सम्पद्यते । तं राज्ये प्रतिष्ठितं निशम्य राजाभिमान मुद्वहतां हृदयेऽग्निरिवोत्थित इति । एतेन गुणकल्पना नैयायिक्यपि व्याख्याता । यथा—

चंदणिहिएक्कचलणाणहभमिरमराळणि हिणुअवरवआ ।
कमळवणदिण्णहत्था अणुसिरीभुवणमोअरइ ॥

आदिग्रहणादपोद्धारवाक्यभेदादयो गृह्यन्ते । तेषु यत्र वृत्तिच्छन्नस्य सर्वनामादिभिरपोद्धृत्यानुसन्धानं क्रियते सा अपोद्धारनैयायिकी । यथा—

विपत्प्रतीकारपरेण मङ्गलं निषेव्यते भूतिसमुत्सुकेन वा ।
जगच्छरण्यस्य निराशिषः सतः किमाभिराशोपहतात्मवृत्तिभिः ॥

अत्र वृत्तिच्छन्नयोर्विपद्विभूतिपदयोराभिरिति सर्वनाम्नानुसन्धाने जगच्छरण्यस्य किं विपद्भिः, निराशिषः किं विभूतिभिरित्यर्थः सङ्गच्छते, एकवाक्यत्वेऽप्यपेक्षितानवाप्तौ यत्र वाक्यान्तरमुपकल्प्यते सा वाक्यभेदनैयायिकी । यथा—

तुहअसमं सोहग्गं अमहिलसरिसं च साहसं मज्झ ।
जाणइ गोलाऊरो तासारत्तद्धरत्तोअ ॥

अत्र तवासमं सौभाग्यमस्त्रीजनोचितं च मे साहसं गोदावरीपूरो जानातीत्येतावदेकं वाक्यं नैकः साक्षी प्रमाणमित्यपेक्षायां वर्षारात्रार्धरात्रश्चेति द्वितीयम् । अन्यथा ह्येकवाक्यतायां यथासङ्ख्यमनुदेशस्समानामिति गोदावरीपूरस्त्वत्सौभाग्यं वर्षारात्रार्धरात्रस्तु मत्साहसं जानातीत्ययमर्थः सम्पद्यते । यदि चायमपि न यथासङ्ख्यस्य विषयः कोऽन्यो भविष्यति ? तत्र को दोष इति चेद्विवक्षितार्था सिद्धिः । यथासङ्ख्यपक्षे हि येषु त्वं पल्लवितलताप्रतानापवारितेषु गोदावरीतटगुहागृहेषु कामपरवशाभिर्वराङ्गनाभिरभिसार्यमाणो विहरसि पूर एव, तेषु यदि प्रवेष्टुमीष्टे याति चाहं प्रसुप्ताशेषजनपदे प्रवर्षद्दम्भोधरान्धकारनिस्सञ्चारे प्रावृण्णिशीथे परिभ्रमन्ती महासाहसानि वर्षारात्रार्धरात्र एव यदि द्रष्टुं शक्नोति, न पुनरन्यस्यैतत्सामर्थ्यमित्ययमर्थः सङ्गच्छते । न चायमस्या विवक्षितः अपि त्वेवं नाम त्वं सुभगो सएवं नाम चाहं साहसिनी यार्धरात्रे वर्षासुपूरपूर्णां गोदावरीमुल्लङ्घ्यागणितप्राणसंशया त्वामभिसारितवत्यस्मि, तस्मात्कृतज्ञतामनुरुध्यमानेन सौभाग्यातिशययोगाद्बहुवल्लभेनापि त्वयानुरक्तायां मय्यनुक्रोशो न मोक्तव्य इति ॥

अथ यत्र साधर्म्यादिभिरर्थान्तरेऽनुवृत्तः पदार्थधर्मो वचनेन निवर्त्यते सा वचननैषेधिकी, सा तु प्रतीयमाननिवृत्तिनिमित्ता च । तयोराद्या यथा—

मूले कण्टकसन्ततिरुपरि च विकचानि रक्तकुसुमानि ।
एतावतैव शल्मलिरनुहरति न पङ्कजवनस्य ॥

अत्र शल्मलिसादृश्यं कण्टककुसुमसाधर्म्यात्पङ्कजवनेऽनुवृत्तं प्रतीयमानसौगन्ध्यादि गुणभावसूचकेन वचनेन निवर्त्यते । द्वितीया यथा—

कार्यज्ञः प्रष्टव्यो न पुनर्मान्यो मम प्रियो वेति ।
गुरुरस्त्रासनसेव्यः प्रियानितम्बः कदा मन्त्री ॥

अत्र यो यस्य मान्यः प्रियो वा स तस्य मन्त्री सामान्येन मान्यत्वप्रियत्वाभ्यां मान्यप्रियाप्रियानुवृत्ता प्रष्टव्यता प्रियानितम्बदृष्टान्तावष्टम्भशोभिनाभिधीयमानकार्यज्ञत्वाभावसूचकेन वचनेन निवर्त्यते । यत्रासम्भवेन विधेयं निषिध्यते सा असम्भवनैषेधिकी । सा द्विधा, अप्रस्तावनिमित्ता, अनुत्पादनिमित्ता च । तयोराद्या यथा—

वेविरसिण्णकरंगुलि परिग्गहक्खलिअळे हणीमग्गे ।
सोत्थिच्चि अणसमप्पइ पिअसहिळेहम्मि किंळिहिमो ॥

अत्र स्वस्तीति पदस्यासमाप्तौ सन्देशदानादेस्तदुत्तरकालभाविनोऽप्रस्ताव इति तन्निमित्तत्वेनासम्भवेन लेख्यस्य विधेयत्वं निषिध्यते । द्वितीया यथा—

लइवप्पडवि उदुदुत्थडाकउ अह्माणइएसि पुत्तमह ।
च्छ . . . जलदहि उजंमे विजिम आआसि ॥

अत्र वृध्नोऽप्यनुत्पत्तौ तदुत्तरकालभाविनस्तक्रोत्पादस्यासम्भवेन तक्रपानस्याविधेयत्वं निषिध्यते। यत्र विरोधिना शब्देनार्थेन वा कार्यं निवार्यते सा विरोधनैषेधिकी । तयोराद्या यथा—

तेपुच्छिज्जहिपत्तडि जेतहि दिसिहि न एंति । जेहीसदिट्ठिगोरधीतेदुकरुजीअंन्ति ॥

अत्र ते वार्ता प्रष्टव्याः । ये तस्या दिशो नायान्तीति पूर्वापरविरोधिना वाक्येन केनचित्प्रथमा न प्राप्नोति यथा नीलशब्दस्तावदयं स्वार्थसामान्यवचनो व्यतिरेकात्प्रातिपदिकार्थस्य प्रथमयैव सम्बध्यते, तथैवोत्पलशब्दोऽपि । यदेव केवलमव्यतिरेकार्थाभिधायि पदं पदान्तरसन्निधानेऽपि तत्तदेव ततो यमर्थमभिधातुं योग्यमवधृतमस्य रूपं तमेव पदान्तरसन्निधावपि प्रत्याययति । रूपभेदान्नहि रसनमसन्निधौ दर्शनस्य मधुरादिव्यञ्जकदर्शनसन्निधौ नीलादिव्यक्तिसामर्थ्यं लभते । किन्तु पदयोः परिच्छिन्नार्थः पुमांस्तयोः सन्निधौ प्रयोगसामर्थ्यादर्थयोः परस्परोपश्लेषयोग्यत्वादेकवाक्यरूपानुग्रहाच्चान्योन्यं प्रधानोपसर्जनभावेन विशेषणविशेष्य एवमपैति । तथा हि । यत्र विशेषणं विशेष्यं चैकस्मिन्नर्थे संभेदं प्रतिलभते तत्र यश्शब्दः स पूर्वोत्तरपदाधिष्ठानमेनं प्रत्याययति । उत्पलशब्दोऽभिप्रवर्तमानः सर्वोत्पलावग्रहरूपेण प्रवर्तते । तत्रैव नीलशब्दः प्रवर्तमानो विशिष्टावग्रहरूपेणावच्छिनत्ति । यदि वा नीलमित्येतत्प्रवर्तमानन्यूनाधिकभावमनपेक्षमाणमनेनैव धर्मेण सर्वयोग्यं सदुत्पलमिति शब्दान्तरेण विशिष्टायां योग्यतायां नियम्यते । अथवा यथा कृष्णः शुक्लश्चायं मृगः सारङ्गः शाबल इति वा, तथा नीलोत्पल इत्युभयरूप एवार्थात्मा ह्युभयं सन्निवेश्यते । नीलं चोत्पलं चैकं नीलोत्पलमिति तौ यस्मिन्नुभयगुणमनुविभागमाप्यमानौ संमूर्च्छिताविवार्थौ भवतः तत्तयोरेकमधिकरणं । यदिवा नीलशब्दः प्रवर्तमानो नीलगुणमात्रमुपादाय प्रवर्तते नत्वनेनोत्पलादय उपात्ता अपि परित्यक्ताः । एवमुत्पलशब्दो विजातियोगमात्रमुपादाय प्रवर्तते । न नीलादींस्त्यजति । नोपादत्ते । तत्र यदैव भिन्नेऽर्थरूप इदमिति सर्वनाम्ना प्रत्यवमृश्यमाने उपश्लिष्येते नीलमुत्पलं चेदं द्रव्यमिति, तदा शब्दभेदाद्भिन्नमेव द्रव्यं विशेषणं विशेष्यमधिक . . . कः पदद्वयसन्निधानायत्तत्वाद्विशेषणविशेष्यभावस्य वाक्यार्थत्वं, न पदार्थता । तदिदमुक्तं— यदत्राधिकृतं वाक्यार्थः स इति . . . नीलमुत्पलमिति । विशेषणविशेष्ययोरुभयस्य च विशेष्यत्वादुपसर्जनत्वाप्रसिद्धिः यथा ह्युत्पलशब्दो नीलशब्देनाभिसम्बन्ध्यमानो विशेषवचनस्तथा नीलशब्दोऽप्युत्पलशब्देनाभिसम्बध्यमानो विशेषवचनः सम्बध्यते, नैवम् । एकस्यात्र प्राधान्यं विवक्षितं अपरस्य उत्पलस्यचात्राप्राधान्यं विवक्षितं नीलशब्दस्योपसर्जनत्वमिति । यदा तर्हि नीलस्य प्राधान्येन विवक्षा उत्पलस्य चोपसर्जनत्वेन तदा कर्तव्यं सामानाधि-

करण्यं, न ह्यसौ द्वन्द्व उत्पलं च नीलं चेति। नापि षष्ठीसमास उत्पलस्य नीलमिति, अपि तु द्वाविमौ प्रधानशब्दावेकस्मिन्नर्थे युगपदुपरुध्येते। न च द्वयोः प्रधानयोरेकस्मिन्नर्थे युगपदुपरोधे प्रयोजनमस्तीति प्रयोगसामर्थ्याद्गम्यते। नूनमेकमिह प्रधानं तद्विशेषकं चापरम्॥

एतावांस्तु सन्देहः किं विशेष्यं? किं विशेषणमिति। तत्र द्रव्यं विशेष्यं गुणो विशेषणं द्रव्यस्यान्यानपेक्षिणः साक्षात्क्रियासूपयोगेन प्राधान्यात्॥

ननु गुणस्यापि साक्षात्क्रियासूपयोगो दृश्यते यथा 'श्वेतं छागमालभेते'ति, नैवम्। इह श्वेताभावे कृष्णमपि छागमालभते न तु श्वेतां पिष्टपिण्डीमालभ्य कृती भवति। एवमुपचारप्रवृत्तावपि पुरुषव्याघ्र इत्यादौ यद्यन्तर्भूतोपमानसम्बन्धप्रतीतभेदो व्याघ्रादिशब्दैरुपमेयः पुरुषादिरभिधीयते तदा सामानाधिकरण्योपपत्तौ उपमितं व्याघ्रादिभिः सामान्याप्रयोग इति समासो भवति। एवं प्रपचति साधु पचतीत्यादयो द्रष्टव्याः। कथं पुनः सामानाधिकरण्येन क्रियाविशेषणत्वे साध्वादयोऽसत्त्ववचना भवन्ति। उच्यते, उपसर्गाणामिव क्रियाविशेषणानामप्यसत्त्वभूतानामेव क्रियां प्रति गुणभावो भवति, यथा पच्यादिकं विशेषे स्थापयन् असत्त्वार्थः प्रशब्दो विशेषणत्वं लभते, एवं साधुशब्दोऽपि क्रियात्मकभूतं धर्ममुत्कर्षादिकं क्रियास्थमसत्त्वभूतं क्रियानुप्रविष्टमभिदधानः क्रियानुरोधादेवासत्त्वभावमापन्नः क्रियाविशेषणत्वं लभते, कथं पुनः प्रपचतीत्यादौ प्रादेरुभय विशेषणत्वे क्रियाभागेनैव सम्बन्धो भवति? सति वा कथमुभयविशेषणत्वम्॥

उच्यते। यथा मासोजातस्येति मासाख्यः क्रियाकलापः कथं प्रथमकुक्षिवियोगाख्यस्य जन्मनोऽवधिभावेन परिच्छेदको भवति जन्मप्रतिलब्धां वा सत्तां समावृत्त्या परिमिमीते, यथा च कष्टश्रित इत्यत्रोपात्तक्रियाविशेषपरिच्छिन्नः कर्ताऽभ्यन्तरीकृतसाधनसम्बन्धः क्रियायोगे श्रयतिक्रियासंबन्धात्कष्टे कर्मत्वमिति श्रयणक्रियापूर्वं कष्टेन सम्बन्धमनुभवति, यथा च वृकाद्भीत इत्युपात्तक्रियावच्छिन्नः कर्ता भयक्रियासंबन्धाद्वृकस्यापादानत्वमिति भयक्रियापूर्वकं वृकेन संबध्यते, तथेहाप्युपात्तपच्यादिक्रियाविशेषपरिच्छिन्नः कर्ताऽभ्यन्तरीकृतसाध्यसाधनसम्बन्धः क्रियायोगे प्रादीनामुपसर्गत्वमिति क्रियापूर्वकं प्रादीनां सम्बध्यत इति। सर्वेऽपि च समुदायसम्बन्धिनोऽवयवस्पर्शेनैव तद्गता समुदायेन सम्बध्यन्ते। तदुक्तम्—

समुदायेन सम्बन्धो येषां गुरुकुलादिना। संस्पृश्यावयवांस्ते तु युज्यन्ते तद्गता सह॥इति॥

व्यपेक्षादिभिरेकार्थपरतयोपात्तानां पदार्थानां मिथोऽभिग्रथनमन्वयः। स त्रिधा—शाक्तो वैभक्तः शक्तिविभक्तिमयश्च। तेषु कर्मादिशक्तिभिर्निर्वृत्तः शाक्तः, सम्बन्धादिविभक्तिभिर्वैभक्तः, उभाभ्यां पुनः शक्तिविभक्तिमयः। तत्राख्यातसुब्विभक्तिभ्यां कर्तृकर्मणोरभिधाने शाक्तो यथा—

अध्यासामासुरुत्तुङ्ग हेमपीठानि यान्यमी । तैरूहे केसरिक्रान्तत्रिकूटशिखरोपमा ॥

कृदाख्याताभ्यां भिन्नकालस्थकर्तृशक्तिद्वयाभिधाने सुब्विभक्तिभिः कर्मकरणसम्प्रदानाभिधाने च शाक्तो यथा—

अजित्वा सार्णवामुर्वीमनिष्ट्वा विविधैर्मखैः । अदत्वा चार्थमर्थिभ्यो भवेयं पार्थिवःकथम् ॥

आख्यातविभक्त्या हेतुशक्त्यभिधाने सुब्विभक्त्याच कर्मकर्त्रपादानाधिकरणशक्त्यभिधाने यथा—

स सेतुं बन्धयामास प्लवगैर्लवणाम्बुधौ । रसातलादिवोत्तीर्णं शेषं स्वप्नाय शार्ङ्गिणः ॥

स्वप्नायेति कर्तरि षष्ठी न सम्बन्धे, भावएव चतुर्थी न तादर्थ्ये । आख्यातेन कर्त्रभिधाने तद्धितेन कृते च कर्माभिधाने सुपा कथिताकथितकर्माभिधाने च शाक्तो यथा—

विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा । अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते ॥

सम्बन्धविभक्त्या वैभक्तो यथा—

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः ॥

शेषविभक्त्या वैभक्तो यथा—

भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः । बुद्धिमत्सु नराःश्रेष्ठा नरेषु ब्रह्मवादिनः ॥

उपपदविभक्त्या वैभक्तो यथा—

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे । त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥

सम्बोधनविभक्त्या च वैभक्तो यथा—

अवनिपवनवह्निव्योमतोयान्तरात्मन्नहिमकर हिमांशो विश्व विश्वैकयोने ।
हर भव शिव शर्व त्र्यम्बकेशान रुद्र त्रिनयन वृषकेतोऽनन्तमूर्ते नमस्ते ॥

कारकविभक्तिः सम्बन्धोपपदशेषसम्बोधनविभक्तिभिश्च शाक्तिविभक्तिमयो यथा—

तीर्थेषु सत्सु द्विजसत्तमेभ्यः श्रियं द्विषाविष्टजनानुपास्ताम् ।
समाधिनामानमजस्रमेव कस्य प्रदातुं त्वदृतेऽस्ति शक्तिः ॥

यत्र लुप्तास्वपि विभक्तिषु शक्तयोऽवभासन्ते विभक्तयश्च साक्षादुपलभ्यन्ते सोऽपि शक्तिविभक्तिमयः । यथा—

वित्रस्तशत्रुः स्पृहयालुलोकः प्रपन्नसामन्त उदूढसत्वः ।
प्रतिष्ठितः कार्यसमाधिसत्रे जितावनिः कोऽत्र भवानिवान्यः ॥

यत्रैकतः शक्तिरन्यतो विभक्तिस्सोऽपि शक्तिविभक्तिमयो यथा—

निरीक्ष्य संरम्भनिरस्तधैर्यं राधेयमाराधितजामदग्न्यम् ।
असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्षपातः ॥

अत्र यदि जनिक्रियातो निरीक्षणक्रियायाः पूर्वत्वं तदा कर्तृभेदान्नास्ति क्त्वाप्रत्ययः । अभिधाव्यापारस्तु विघटते षष्ठ्यभिहितस्य कर्तुः पक्षपातक्रिययैव सम्बन्धः, न निरीक्षणक्रियया । कर्तृकर्मणोः कृतीति षष्ठ्या न लोकाव्ययनिष्ठाखलर्थतृनामिति प्रतिषेधात् । स च विभक्तिपरिणामाध्याहारविपर्ययवाक्यभेदव्यवहितकल्पनागुणकल्पनाभिरुपपद्यते । तत्र राधेयं निरीक्ष्य मृत्युरपि भयेषु पक्षपाती भवतीति विभक्तिविपरिणामः राधेयं निरीक्ष्य स्वसामर्थ्यं विमृशतो मृत्योरपि भयेषु पक्षपातो जायेतेति वाक्यभेदः । राधेयं निरीक्ष्य मारयतीति मृत्योरपि भयेषु पक्षपातो जायेतेति व्युत्पत्तिकालाश्रिताया व्यवहितायाः क्रियायाः व्यवहारकालेऽप्याश्रयणात् व्यवहितकल्पना । निरीक्ष्येव निरीक्ष्येति पक्षपातस्याचेतनस्यापि चेतनगुणाध्यारोपेण गुणकल्पना । यदाह—मुख्याभावे सति प्रयोजने निमित्ते च सत्युपचारः प्रवर्तते, दृष्टश्चाचेतनेऽपि प्रेमादौ चेतनादिक्रियोपचारो यथा—

प्रेम पश्यति भयान्यपदेऽपि ।
अवस्था वस्तूनि प्रथयति च सङ्कोचयति च ॥

अथ किमभिहितानां पदार्थानामन्वय उतान्वितानामभिधानम् । उच्यते अस्त्यत्र मतभेदः, तत्रैके वर्णयन्ति, अन्वितानामभिधानमभिहितानां चान्वयः । केचिद्ब्रुवते, नान्वितानामभिधानं, न चाभिहितानामन्वय इति ॥

तत्राभिधानवादिन एवमाहुः । व्युत्पत्तिबलेन हि शब्दोऽर्थमवबोधयति वृद्धव्यवहारात् व्युत्पत्तिश्च वृद्धाश्च वाक्येनैव व्यवहरन्ति न पदेन, यच्चार्थप्रकरणादिगम्यपदार्थान्तरसहकृतं पदं प्रयुञ्जते तदपि वाक्यमेव—

यदप्येकं पदं दृष्टं चरितार्थक्रियं क्वचित् । वाक्यं तदपि मन्यन्ते सम्बोधनपदादिवत् ॥
यच्च कोऽयमिति प्रश्ने गौरश्व इति वोच्यते । तत्र लभ्यत इत्यादिः प्रश्नोक्तैव क्रियेष्यते ॥

वाक्यं चैकार्थपरं पदसमूहसंहत्यार्थमभिदधाति स तानि पदान्युच्यन्ते समूहश्चैवमेकार्थःस्यात्, एवं च संहत्यार्थमभिदध्युः पदानि। यद्येकैकं पदमभिन्न एवार्थे व्याप्रियते तत्र यथा त्रयोऽपि ग्रावाण उखां धारयन्ति, चत्वारोऽप्युद्यन्तारः शिबिकामुद्यच्छन्ति, सर्वाण्यपि कारकाणि पाकं साधयन्ति, तथा पदान्यपि सर्वाणि वाक्यार्थमन्ववगमयन्ति, वाक्यार्थश्च क्रियाकारकसंसर्गरूपः। तत्र कारकाणां क्रियासम्बन्धोन्मुखतया क्रियाणां च कारकविरहासहिष्णुत्वेनान्वितानामेव स्वशब्दैरभिधानं भवति। एवं च सति वाक्यार्थस्य साक्षादेव शाब्दत्वमुपपद्यते नत्वभिहितान्वयपक्षवत्पारम्पर्येणेति। तदभिहितान्वयवादिनो न मृष्यन्ते, ते ह्येवमाहुः, अनवगतपदार्थकस्य वाक्यार्थसम्प्रत्ययादर्शनात्पदार्थप्रतिपत्तिपूर्विकैव वाक्यार्थप्रतिपत्तिः, तां प्रतिपत्तिं पदार्थप्रतिपत्तिश्चैवमवकल्पते। यदि तावानेव सोऽर्थः पदेनाभिधीयते पदार्थान्तरान्विते तु तस्मिन्नभिधीयमाने कदम्बकरूपार्थप्रतिपत्तेः पदार्थप्रविभागो न प्रकल्पेत। अस्य पदस्य जातिरर्थोऽस्य द्रव्यमस्य गुणोऽस्य क्रियेति आवापोद्वापाभ्यां तदवधारणमिति चेत् नैवम्, तत्रापि कदम्बकरूपार्थप्रतीतेरनपायात्॥

किञ्च प्रतियोगिनामनन्ततयान्वयस्यानन्त्यात्तदन्वयानन्त्येनान्विताभिधायिन्याः सम्बन्धग्रहणमशक्यमिति दुरवगमः पदार्थयोः सम्बन्धग्रहः, तदनपेक्षत्वे प्रथमश्रुतादपि तदर्थप्रतिपत्तिः प्राप्नोति। गामानयेति वाक्यादश्वबन्धननियोगः प्रतीयेत, वृद्धव्यवहारेषु च वाक्यादपि भवन्ती व्युत्पत्तिः पदपर्यन्तैव भवति। इतरथाहि प्रतिवाक्यं व्युत्पत्तिरपेक्ष्येत सा चानन्त्याद्दुरुपपादेति शाब्दव्यवहारोच्छेदः स्यात्। दृश्यते चाभिनवकविश्लोकात् वाक्यार्थप्रतीतिः; सा च पदपदार्थयोरेव व्युत्पत्तावुपपद्यते, न वाक्यार्थयोरिति नास्त्यन्विताभिधानम्॥

अपिचान्वयस्यान्वितविशेषणत्वात्तदभिधानमन्तरेणान्वितोऽभिधातु न शक्यत इत्यन्वयाभिधानमङ्गीकरणीयम्। न च तदेकया शक्त्या शक्यतेऽभिधातुमिति शक्त्यन्तरकल्पनाप्रसङ्गः॥

अपिच गामानयेत्यत्र यदा गोशब्देनानयत्यर्थविशिष्टः स्वार्थोऽभिधीयते तदा गवार्थस्याप्राधान्यम्, यदाच आनयतिना गवार्थविशिष्टः स्वार्थः तदा तदर्थस्येत्येतस्मिन्वाक्ये प्रधानद्वयोपनिपाताद्वाक्यभेदापत्तिः॥

अपिच प्रकृतिप्रत्यययोरन्योन्यान्वितस्वार्थाभिधानलब्धपदभावयोः पदार्थान्तरान्वितार्थवाचकत्वमिति द्विरभिधानं स्यात्॥

किञ्च पदेनान्वितः स्वार्थोऽभिधीयमानः किमभिहितेन पदार्थान्तरेणान्वितोऽभिधीयते उतानभिहितेन। अभिहितेन चेदेकस्मादेव पदात्तदर्थोपरञ्जकद्वितीयपदार्थावगतेः पदान्तरोच्चारणवैयर्थ्यम्। एवंचैकमेव पदमखिलपदाभिधेयार्थवादि सम्पन्नमिति तेनैव व्यवहारः स्यात्। न चासौ सम्पद्यते। गौरिति ह्युक्ते सर्वगुणक्रियावगमान्नज्ञायते किमुपादीयतामिति, नियतगुणक्रियानुरक्तस्वार्थप्रतिपादने तु न हेतुरस्ति। पदान्तरसन्निधानं नियमहेतुरिति चेत् तदपि जपमन्त्रा-

दिपदवत्स्वरूपमात्रेण सन्निधानान्न विशिष्यते । अथाभिहितेन तदपि तर्हि पदमन्विताभिधायितया पदान्तरोत्थमर्थाभिधानमपेक्षते ततश्चेतरेतराश्रयमनवस्थाचक्रकं वा प्राप्नोति ॥

अथ द्वितीयमनन्वितमेव स्वार्थमभिधत्ते प्रथमेन किमपराद्धम् । एवं च सर्वपदे स्वार्थमात्राभिधानादभिहितान्वय एव भवति ॥

किञ्चाङ्गुल्यग्रे हस्तियूथशतमिति नास्त्यन्वयो योग्यत्वाभावात्, अन्विताभिधानवादिनां त्वन्वितस्याभिधानात्तत्राप्यन्वयः प्राप्नोति ॥

अपि चान्विताभिधानवादिनां पुरुषवाक्यादेवमयं पुरुषो वेदेति भवति प्रत्ययो नैवमर्थं प्रति सिद्धान्तः । तेह्येवमाहुः । वाक्यात्कार्यभूतात्प्रत्ययितस्य वक्तुस्तदर्थविषयं पूर्वविज्ञानं कारणभूतमनुमीयते तस्य च ज्ञानस्य ज्ञेयाव्यभिचारित्वात् ज्ञेयभूतार्थनिश्चय इति न वाचकशक्त्यार्थावगमः । एवं च वाचकशक्तिरेव नावधार्यते कुतोऽन्विताभिधानमिति तस्मादभिहितानां पदार्थानामन्वय इति युक्तम् । पदानि हि स्वमर्थमभिधाय निवृत्तव्यापाराणि ॥

अथेदानीं पदार्था अवगता वाक्यार्थं गमयन्तीति । अत्रान्विताभिधानपक्षे कदम्बकरूपार्थप्रतिपत्तेः प्रतियोगिनां चानन्ततया सम्बन्धग्रहणस्याशक्त्या दुरवगमः पदार्थप्रतिभाग इति, तदिदं व्युत्पत्त्यनभिज्ञस्य चोद्यम् । नह्येवं व्युत्पत्तिः । गोशब्दस्य शुक्लान्वितोऽर्थ इति, स हि व्यभिचरति कृष्णान्वितस्यापि तदर्थस्योपलम्भात्, नापि सर्वान्वितः, आनन्त्येन दुरवगमत्वात्, किन्त्वाकांक्षितसन्निहितयोगार्थान्तरानुरक्तोऽस्यार्थ इति, एतां च व्युत्पत्तिं वाक्यान्येव पदावापोद्वापविरचनावैचित्र्यभाञ्जि सञ्जनयन्ति । यतः—

ओप्यन्ते चोद्ध्रियन्ते च स्वार्थाः स्वान्वयशालिनः ।
अन्विते स्वे च सामर्थ्यं पदानां तेन गम्यते ॥

तत्र च—

यद्यदाकांक्षितं योग्यं सन्निधानं प्रपद्यते । तदन्वितः पदेनार्थः स्वकीयः प्रतिपाद्यते ॥

पदार्थपर्यन्तापि च भवन्ती व्युत्पत्तिरीदृशी दृश्यते न शुद्धपदार्थविषया । तथाहि—

नियतं साधनं साध्ये क्रियानियतसाधना । ससन्निधानमात्रेण नियमः सम्प्रकाशते ॥
गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते । साध्यत्वेन निमित्तानि क्रियापदमपेक्षते ॥

एवं च सन्निहितयोग्याकांक्षितोपरक्ते स्वार्थे क्वचिद्गृहीतसम्बन्धः सर्वत्र गृहीतो भवतीति नानन्त्यव्यभिचाराभ्यां सम्बन्धाग्रहणम् । न च कदम्बकार्थप्रतीतेः पदार्थात्प्रविभागः । तदुक्तम्—

आकाङ्क्षासन्निधिप्राप्तयोग्यार्थान्तरसङ्गतान्। स्वार्थानाहुः पदानीति व्युत्पत्तिः संश्रिता यदा॥

आनन्त्यव्यभिचाराभ्यां तत्र दोषो न कश्चन । कदम्बकार्यरूपायाः प्रतीतेश्च न सम्भवः ॥

इति । ततश्च पदपदार्थयोस्सम्बन्धग्रहणोपपत्तौ न प्रथमश्रुतादपि पदार्थप्रतीतिर्न गामानयेति वाक्यादेश्च बन्धननियोगः, न प्रतिवाक्यं व्युत्पत्त्यपेक्षा, न चाभिनवकविश्लोकवाक्यार्थप्रतीतिर्भवतीति । यदपि चान्विताभिधाने शक्तिद्वयकल्पनागौरवमाशङ्कितं तदपि नास्ति । अन्वयवत्ता ह्यन्वितता । तदभिधानेनान्वितोऽभिहितः स्यात् । न हि दण्डीत्यत्र दण्डो नाभिधीयत इति सम्भवति परं विशेषः तत्र प्रकृत्या विशेषणाभिधानं इह तेनैवान्यतस्तदलाभात् । अतोऽन्विताभिधानशक्त्यैवान्वयोऽप्यभिधीयत इति नास्ति शक्तिद्वयकल्पनागौरवम् । तदुक्तम्—

व्यतिषक्तार्थबुद्ध्या हि व्यतिषङ्गे [ङ्गो] निशम्यते । अपरं तु न संसर्गप्रतीतेरस्ति कारणम् ॥

प्रतिपत्त्याऽन्वयं यस्मात्प्रतीयादन्वितः पुमान् । व्यक्तिं जातिमिवार्थोऽसाविति संपरिकीर्त्यते ॥

योऽपि प्रधानद्वयशङ्कया वाक्यभेदलक्षणो दोषः सोऽपि नोपपद्यते । यतोऽन्वितः सम्बन्ध उच्यते तत्र कश्चित्प्रधानतया सम्बन्धः कश्चिद्गुणतया, यश्च यथा सम्बन्धः स तथैवोच्यत इति नैकस्मिन्वाक्ये प्रधानद्वयप्रसङ्गाद्वाक्यभेदलक्षणदूषणोत्पत्तिः । तदुक्तम्—

प्रधानगुणभावेन लब्धान्योन्यसमन्वयात् । पदार्थावेव वाक्यार्थं सङ्गिरन्ते विपश्चितः ॥

प्रतिपत्तिर्गुणानां तु प्रधानैकप्रयोजना । तत्प्रतीत्येककार्यत्वाद्वाक्य . . . कर्ममुच्यते ॥

यच्च प्रकृतिप्रत्यययोः पदस्य चाभिधाने द्विरभिधानमुक्तं तदपि न सम्यक् प्रकृत्यान्वितस्यार्थो विधीयते, प्रत्ययश्च प्रकृत्यर्थान्वितं पदार्थान्वितं च स्वार्थं ब्रवीति, प्रत्ययार्थस्य प्रकृत्यर्थान्वितस्य पदापेक्षित्वादिति कुतो द्विरभिधानम् । नन्वेवं पदस्यान्विताभिधायित्वं न स्यात्, प्रत्ययस्यैव प्रकृतिसहितस्य पदत्वात् ॥

किञ्चायमभिहितान्वयवादिनोऽपि तुल्यो दोषः । ततश्च—

यश्चोभयोः समो दोषः परिहारोऽपि वा समः । नैकः पर्यनुयोक्तव्यस्तादृश्यर्थविचारणे ॥

प्रकृतिप्रत्ययौ ब्रूतः प्रत्ययार्थं सहेति च । यदाहुः सूरयस्तेन प्रत्ययं [तदन्तं] पदमिष्यते ॥

यच्चानभिहितपदार्थान्तरान्वितस्वार्थाभिधानपक्षे पदान्तरोच्चारणवैयर्थ्यमित्यादि, अभिधानपक्षे पुनरितरेतराश्रयादिदूषणमुक्तं तदुभयपक्षानभ्युपगमेनैव निरस्तम् । यतो नास्माकमयं पक्षः, प्रथमश्रुतान्येव पदानि स्वार्थानन्योन्यमन्वितानभिदधति । अपि तु यस्य यावन्तोऽर्थाः सम्भवन्ति तच्छ्रवणे तावन्तः स्मृतावुपस्थाप्यन्ते, ततश्चाकाङ्क्षासन्निधियोग्यतादिसम्पादितनियतमिथस्समन्वयाः पदैरेव स्मृत्युपारूढैरभिधीयन्ते । तथाहि—यस्तावदगृहीतसम्बन्धो यस्य च सम्बन्धग्रहणसंस्कारो नोत्पन्नः प्रध्वस्तो वा स वाक्यार्थप्रतिपत्तौ नाधिक्रियते, यस्त्वनवभ्रष्टसम्बन्ध

ग्रहणसंस्कारः सपदं पदं श्रुत्वा नूनं तावदिदं स्मरति इदमिदमस्यार्थस्याकाङ्क्षितसन्निहितपरिजनविधित्सितः प्रियाप्रवृत्तिप्रश्नो निषिध्यते । द्वितीया यथा—

पिअसंगम किं वहि हृडिपि अहोपरोक्खहोक्केत्र । मइवेन्निविन्नासि आणिद्दणएव न तेव ॥

अत्र समस्तप्राणद्वन्द्वेदसाधारण्येन प्रवृत्तो निद्रार्थस्तद्विरोधिभ्यां प्रियसङ्गमवियोगाभ्यां निषिध्यते, यत्रार्थित्वाप्रवृत्तमन्येनैव तत्कार्यसिद्धौ निषिध्यते साकूतार्थत्वनैषेधिकी । यथा—

किं तस्स पारएणं किंमग्गिणा किं वगब्भप्परएण ।
जस्सउरम्मि णिसम्मइ उह्माअं तत्थणी जाआ ॥

अत्र प्रावारविलासाग्निगर्भगृहकाणि हैमनशीतार्तिनिवृत्तये प्रवृत्तानि तदर्थकारिणोपारूढयौवनोपगूढप्रियाकुचोष्मणा निवर्त्यन्ते । यत्र परिसङ्ख्यातेनार्थेन शेषं निषिध्यते सा परिसङ्ख्यानैषेधिकी । यथा—

वेवावल्लचि उदेद्दमुहे सज्जिअतिलइतकंड । कअकण्णाप्पलिंपचसरतहकामहो कोअंड ॥

अत्र जगज्जिगीषया चक्रीकृतकामकोदण्डानुकारिणि मुखे विबुद्धेऽपि लोचनोत्पलद्वयस्यैव प्रकाशमानत्वात्कुसुमसायकस्य द्वावेव बाणौ न त्रयो न पञ्चेति सज्जिततिलके त्रय एव न द्वौ न पञ्चेति कृतकर्णोत्पले पञ्चैव न द्वौ न त्रय इति परिसङ्ख्यातेनार्थेन शेषं निषिध्यते । यत्रैकावधारणेनान्यत्पराक्रियते सा नियमनैषेधिकी । यथा—

तेच्चिअजीआतेच्चे अमग्गणासा अजस्सधनुइट्ठी ।
दिट्ठिअकुवलअविलोअणा णसो जअइ कंदप्पो ॥

अत्र ज्यामार्गणधनुर्यष्टीनामन्यत्र भेदेनोपलम्भात्कन्दर्पविषयेपि तद्भेदोऽनुवृत्तः कुवलयविलोचनादृष्टेस्तेनतेन संस्थानेन तत्तत्कार्यकरणात्सैव सर्वात्मिकेत्यवधारणं निवर्त्यते, एतेन नियमसदृशफलो विनिग्रहोऽपि व्याख्यातः । यथा—

भवतु समदना रतये तिलकवती चारुचम्पक च्छाया ।
घनचन्दनधवलकुचा कान्ता तव विद्विषा मटवी ॥

आदिग्रहणादसम्भवनियमो विशेषे प्रत्यक्षश्रुतिरित्यादयो गृह्यन्ते, तयोरसम्भवनियमो यथा—

हारो थणाणसवणा ण कुण्डलामेहला णिअंबस्स ।
अच्छीणउणो विभवे विमण्डणं कज्जलसलाआ ॥

विशेषप्रत्यक्षश्रुतिर्यथा—

इयं गेहे लक्ष्मीरिय ममृतवर्तिर्नयनयो रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकरसः किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥

येयमुद्भूतसम्बन्धव्यतिरेकेण पदपदार्थानामितरेतरं प्रत्याकांक्षासन्निधियोग्यतापेक्षिणी व्यपेक्षेत्युच्यते। का पुनरियमाकांक्षा नाम? प्रतिपत्तुर्जिज्ञासा। सा कथं पदार्थानामुपपद्यते? कारणे कार्योपचारात्। तथाहि—अभिधानपर्यवसानमभिधेयपर्यवसानं च जिज्ञासोत्पत्तिकारणं, तच्चोपचारेणाकाङ्क्षेति व्यपदिशन्ति। तत्राभिधानपक्षे द्वारमित्येकपदप्रयोगेऽभिधानमेव न पर्यवस्यति। नह्यनुच्चरिते योग्यप्रतियोगिनि सन्निधायिनि पदे संव्रियतामपाव्रियतामित्यादावन्विताभिधानं भवति। वृद्धव्यवहारे चान्वितार्थान्येव पदानि प्रतीयन्ते, बालो हि व्युत्पद्यमानः प्रयोज्यवृद्धस्य शब्दश्रवणसमनन्तरभाविनीं विशिष्टचेष्टानुमितां शब्दकारणिकां प्रतीतिमन्वितार्थविषयामवगच्छन्नन्वित एवार्थे पदानामभिधानसामर्थ्यमवधारयति। विश्वजिता यजेतेत्यादौ पुनरेकपदप्रयोगालब्धेऽन्विताभिधानेऽभिधेयमेव न पर्यवस्यति अत्रानुष्ठेयतयावगतस्य वाक्याभिधेयस्यार्थस्यानुष्ठातारमन्तरेणानुपपत्तेस्तदुपपत्तये युक्तैवानुष्ठातृजिज्ञासा तस्यां च सत्यामपरिपूर्णत्वावगमाल्लोकवदध्याहारे कर्तव्ये योग्यत्वात्स्वर्गकाम एवानुष्ठाताध्याह्रियते। अभिहितान्वयवादिपक्षेऽपि पदार्थान्तरमन्तरेणान्वयासामर्थ्यात्तदुपपत्तये युक्तैव प्रतियोगिजिज्ञासा, तस्यां च सत्यामपरिपूर्णवाक्यपरिपूरकतयान्विताभिधानवदेव प्रकरणादिवशेन योग्याध्याहारः क्रियते॥

नन्वेवं सति यत्र पदत्रयं प्रयुज्यते गामानय शुक्लामिति लोके तत्राभिधानाभिधेयापर्यवसानयोरसम्भवान्नाकाङ्क्षास्तीति कथमन्विताभिधानम्? वाक्यस्य गामानयेत्यैतावतैव परिपूर्णत्वात्। सत्यम्, पदानुच्चारणमेवमेतत्। उच्चरिते सत्येतस्मिन्नस्याप्यानयतिसन्निधानात्तदेकवाक्यत्वावगमादानयत्यन्वितस्यार्थाभिधायित्वावधारणादाकाङ्क्षां च विना तदसम्भवादानयतेराकाङ्क्षा परिकल्प्यते। उक्तं च भाष्यकृता—भवति च सा रक्तं प्रत्याकाङ्क्षेति। तेन तत्रान्विताभिधानसिद्ध्यर्थमेवाकाङ्क्षा, यदि परमयं विशेषः, द्वारमित्यादौ तस्यैव पदस्यान्विताभिधानाकाङ्क्षा, गामानय शुक्लामिति तु पदान्तरस्येति। उक्तं च (श्लो) 'अन्वितस्याभिधानार्थमुक्तार्थघटनाय वा। प्रतियोगिषु जिज्ञासा या साऽऽकाङ्क्षेति गीयते।' इति। सा चेयमाकाङ्क्षा विभागे सति भवन्ती व्युत्पत्तावुपलक्षणमाश्रीयते। किमिति पुनः सन्निधियोग्यतैव नाश्रीयते? निराकाङ्क्षेणान्विताभिधानादर्शनात् अयमेति पुत्रो राज्ञः पुरुषोऽयमपसार्यतामिति पुत्रसम्बन्धनिराकाङ्क्षो राजा न पुरुषेणान्वीयते। कस्मात्पुनरुभयोः पुत्रपुरुषयोः सन्निधियोग्यत्वाविशेषेऽपि पुत्रेणैव राज्ञः सम्बन्धो न पुरुषेण? उच्यते, न्यायसापेक्षत्वाद्वाक्यार्थप्रतिपत्तेः नित्यसापेक्षेणैव राजा संबध्यते तेन सम्बन्धनिराकाङ्क्षा न पुरुषेण सम्बन्धमनुभवतीति आकाङ्क्षाऽपि व्युत्पत्तावुपलक्षण माश्रीयते। परिपूर्णेन योग्यस्य समीपस्याप्यनन्वयः व्युत्पत्तौ तेन शब्दानामाकाङ्क्षाऽप्युपलक्षणं, सा चेयमाकाङ्क्षा प्रतियोगिषु न सर्वेषु सहसैव युगपदुपजायते, अपि तु कारणोपनिपातात्क्रमेण। तथाहि – क्रियया कर्तारमन्तरेणासम्भवात्तदवगतौ कर्ता प्रथममपेक्ष्यते, स च निष्फले व्यापारे न प्रवर्तत इति कर्मापेक्षते। व्यापारश्च करणमन्तरेणाशक्यः साधयितुमिति करणापेक्षा। एवमधिकरणादयः क्रियाकारकविशेषणादय

आपेक्षणीया इति कारणोपनिपातः स्यात् । क्रियादिषु यथा—

जिज्ञासा जायते बोद्धुः सम्बन्धिषु तथा तथा ।
यद्यदाकाङ्क्षितं योग्यं सन्निधिं प्रतिपद्यते । तदन्वितः पदेनार्थः स्वकीयः प्रतिपाद्यते ॥

॥ अथ सन्निधिः ॥

योग्यस्याकाङ्क्षितस्य यदानन्तर्यं, स सन्निधिः । स द्विधा–अभिधानविषयः अभिधेयविषयश्च । तत्रोच्चारणनिमित्तोऽभिधानविषयः, अविनाभावनिमित्तोऽभिधेयविषयः । तयोराद्यो यथा—

लीलास्मितेन शुचिना मृदुनोदितेन व्यालोकितेन लघुना गुरुणा गतेन ।
व्याजृम्भितेन जघनेन च दर्शितेन सा हन्ति तेन गलितं मम जीवितेन ॥

अत्र लीलास्मितादिभिः शुच्यादीनि विशेषणानि यथासान्निध्यमपि सम्बध्यते । द्वितीयो यथा—

मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा ।
वाहिनीजलभरः कुलिशं वा स्वस्ति तेऽस्तु लतया सह वृक्ष ॥

अत्र दहत्वित्यादिका क्रिया तदविनाभावनिमित्तकात्सान्निध्याद्ध्याहृतानलादिभिः सम्बध्यते ॥

ननु च सन्निधिवदाकाङ्क्षाप्यविनाभावनिमित्ता किमिति नेष्यते, यद्धि येन विना न भवति नियोगतस्तेन तदाकाङ्क्ष्यते । क्रिया हि कारकाविनाभाविनी तं प्रतीत्य कारकं जिज्ञासते । एवं कारकमपि बुध्वा क्रियामिति, तदयुक्तम् । जिज्ञासाविरामानुपपत्तेः यथा ह्यविनाभावेन कारकजिज्ञासाप्युपपद्यते अतः प्रयोजनाभावात् कारकातिरिक्तमन्यन्न जिज्ञास्यते, तर्हि क्रियामात्रावगमेऽपि यत्र कारकज्ञानेन प्रयोजनं नास्ति तत्र जिज्ञासा न स्यात् । अनुष्ठेयतया हि क्रियायामवगतायां कारकोपादानमन्तरेण तदनुष्ठानानुपपत्तेः । कारकज्ञानात् प्रयोजनवद्वर्तमानापदेशादौ त्वननुष्ठेयतया नास्ति कारकज्ञानेन प्रयोजनम् ॥

अथ च तत्रापि वाक्यमपरिपूर्णं मन्यन्ते साकाङ्क्षार्थाभिधायितया चापरिपूर्णता । अत एव च तत्राध्याहारमपि कुर्वन्ति, तत्रापि चानुष्ठेयावगतिस्तत्रापि निश्शेषकारकाजिज्ञासा स्यात् । तथा च देवदत्त गामानयेति करणानुपादानादपरिपूर्णता स्यात् ॥

अथैककारकज्ञानेनापि तावदनुष्ठानोपपत्तेर्न कारकान्तरजिज्ञासा देवदत्त गामभ्याज दण्डेनेति प्रयुक्तेऽपि दण्डशब्दे तदाकाङ्क्षा न स्यात् । ततश्चानाकाङ्क्षितत्वात्तस्य तदन्वयो वाक्यार्थे न स्यात् ॥

अथ दण्डपदोच्चारणात्तत्राकाङ्क्षा परिकल्प्यते ; अन्यथा दण्डपदस्यानन्वये तत्पदोच्चारणमनर्थकं स्यादिति । एवमरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीत्यन्वयप्रसङ्गः । न हि वेदपदोच्चारणेनानर्थकेन भवितव्यमिति किञ्चन प्रमाणमस्ति । न च तत्राकाङ्क्षोदये किञ्चित्कारणान्तरमस्तीति सोमं क्रीणातीत्यतोऽधिकस्यानन्वयिता स्यात् । अतो नाकाङ्क्षायामविनाभावो निमित्तत्वेनाश्रीयत इति । आकाङ्क्षावच्च सन्निधावपि सन्निधापकक्रमेणैव क्रमो वेदितव्यः । तदनुसारेण चान्विताभिधानमपि तथैवेति ॥

सन्निधिश्शब्दजन्मैव व्युत्पत्तौ नोपलक्षणम् । अध्याहृतेनाप्यर्थेन लोके सम्बन्धदर्शनात् ॥
सहसैव न सर्वेषां सन्निधिः प्रतियोगिनाम् । सन्निधापकसामग्रीक्रमेण क्रमवानसौ ॥
यथायथा सन्निधानं जायते प्रतियोगिनाम् । तथातथा क्रमेणैव शब्दैरन्वितबोधनम् ॥

॥ योग्यता ॥

अथ का योग्यता ? यदेतत्सम्बन्धार्हत्वं नाम । तद्द्विधा–मुख्यार्थद्वारकं जघन्यार्थद्वारकं च । कः पुनर्मुख्यार्थः जघन्यार्थ इति ? श्रवणसमनन्तरं साक्षादेव शब्दाद्यत्रार्थः प्रतीयते स मुखमिव प्रथमं भवतीति मुख्यः । यस्तु गुणसम्बन्धादिव्यवधानेन शब्दादवगम्यते स जघनमिव पश्चाज्जायत इति जघन्यः । तयोर्मुख्यस्त्रिधा–जात्यादिमुख्यः, आकृत्यादिमुख्यः, भ्रान्त्यादिमुख्यश्च । तेषु जातिगुणक्रियाभिधायिभिः शब्दैर्योऽभिधीयते स जात्यादिमुख्यः । गौः पदा न स्प्रष्टव्या, शुक्लां गामभ्याज, पाचकमानय यज्ञदत्तं भोजयेति । स एवाऽऽलेख्यप्रतिकृतिप्रतिमाप्रतिबिम्बादिविषयः आकृत्यादिमुख्यः । यथा–भवनभित्तौ कामं चित्रिताः गावः क्रियन्तां, विष्णुं पञ्चामृतेन स्नपय, अप्सु चन्द्रमसं पश्येति । विपर्ययाध्यासविवर्तविपरिणामादिविषयो भ्रान्त्यादिमुख्यः । कोयंकोयमनाकाशे शशी, स एष बालाबाहुमूले बालचन्द्रमाः, तदेतदलातचक्रं विस्फुरति, तदिदमिन्द्रायुधं विलोक्यत इति । जघन्योऽपि त्रिधा–गौण उपचरितो लाक्षणिकश्च । ययोर्द्रव्यवाचिभिस्सामानाधिकरण्यप्रयोगे विशेषणविशेष्यभावः प्रतीयते स गौणः । यथा—गौर्बाहीकः, सिंहो माणवकः, तृणं लक्ष्मीः, गोष्पदं समुद्र इति । समानाधिकरणशब्दप्रयोगे योऽन्यविशेषणत्वेन प्रसिद्धः कुतश्चिन्निमित्तादन्यविशेषणत्वं लभते स उपचरितः । यथा—शुक्लं यशः, मधुरं वाक्यम्, सुरभि शीलं सुभगः स्वभाव इति । यस्तु शब्दोपात्तेनार्थेन क्रिया . . . . समर्थेनाविनाभावात् सहचरणादि . . . . लाक्षणिको यथा यष्टीः प्रवेशय, छत्रिणो गच्छन्ति, मञ्चाः क्रोशन्ति, गङ्गायां घोषः प्रतिवसतीति ॥

नन्वेवं सति जात्यादिशब्दार्थाः सर्वे लाक्षणिका भवेयुः, तेऽपि हि स्वरूपेण क्रियां साधयितुमपर्याप्तैर्जात्यादिभिरविनाभूतव्यक्तिरूपतयोपलक्ष्यन्ते । नैवम्, जात्यादिप्रवृत्तिनिमित्तानां

क्रियासिद्धिषु गङ्गातीराद्यर्थानामपि समन्वयो दृश्यते । नैवम्; गौरालभ्यतां प्रोक्ष्यतां विशस्यतामित्यादौ अनपेक्षितव्यक्तीनां गोत्वादिजातीनामपि । एतेनारुणया क्रीणाति, अभिक्रामं जुहोतीत्यादौ गुणक्रिययोर्द्रव्यव्यवधानेनापि क्रियासमन्वये द्रव्याणामलाक्षणिकत्वमेवेत्यभिहितं भवति ॥

ननु च जातिगुणक्रियापाकेन जीवतीति नैवम् । अत्र जात्यादीनां विशेष्यते न द्रव्यरूपत्वात्। तदुक्तम्—

वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते । द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः ॥

कृदभिहितश्च भावो द्रव्यवत्प्रकाशत इति। एवं च मुख्यवृत्तीनां जघन्यवृत्तीनां च शब्दानां प्रयोगे योऽर्थो यत्र सम्बन्धित्वेन उपलम्भात् । यद्येवं यजेत स्वर्गकाम इत्यादौ स्वर्गयागयोः सम्बन्धित्वेनानुपलम्भात्कथं योग्यत्वेनावधारणम्, अनवधारितयोग्यतयोश्च कथमन्विताभिधानम्? उच्यते—

सामान्येनैव योग्यत्वं लोके यदवधारितम्। यदन्विताभिधानस्य व्युत्पत्तावुपलक्षणम् ॥
साध्यसाधनयोर्लो . . . . ॥

सामान्यात्मकसामर्थ्याख्यसम्बन्धो मुख्यता व्यपेक्षेत्युच्यते । व्यपेक्षावतां पदार्थानां मिथः सम्बन्धिरूपता सामर्थ्यम्। तत्त्रिधा–भेदः, संसर्गः, उभयं च । तत्र राज्ञो भृत्य इत्यादौ यदा तावदेतदवधृतं परायत्तार्थवृत्तिरयं भृत्यशब्दो न स्वतन्त्रार्थवृत्तिरिति, तदा सामान्येन स्वामिसंसर्गस्यावधृतत्वात् स्वामि . . . . यति स्वयं स्वाम्यन्तरव्यवच्छेदो भेद इत्युच्यते । यदा तु राजपुरुष इत्यादावनवगतपरायत्तभावस्य पुरुषस्य स्वामिसम्बन्धद्योतनाय राजशब्दः प्रयुज्यते तदा विशेषसंसर्गस्य शब्दोपादानत्वादनवकाशो विशेषान्तरसम्पातः तदा ह्यशब्दा स्वाम्यन्तरनिवृत्तिरर्थादवसीयते । यदात्वर्थावगतसामर्थ्ययोः प्रतिपत्तिनिबन्धनयोरभेदापेक्षायां समासावेव भेदसंसर्गेण सामर्थ्यं भवति । यदा नीलं च तदुत्पलं च नीलोत्पलमिति। यत्र तु न सम्बन्धयोग्यता न तत्र सामर्थ्यं यथा–क्रियते वस्त्रं नीलमुत्पलमालिकर्णे, नेह कश्चित्पुरुषः, व्याघ्रः सरति, पल्लीं पश्य, सखे कष्टं दूरं गच्छ त्वं, यूपाय दारु शोभनं, शैलान्निवर्तस्व, व्याघ्राद्भयं देवदत्तस्य, यज्ञदत्तस्य भार्या, राज्ञः पुरुषः, ब्राह्मणस्य सक्तत्वं, अक्षेषु शौण्डः, पिबति पानागारे, अयं दण्डः हराऽनेन फलानि, अन्तरा त्वां च मां च कमण्डलुः, अन्तरेण तक्षशिलां पाटलिपुत्रं च स्रुघ्नस्य प्राकार, ओदनं पच तव भविष्यतीति । अत्र प्रथमेष्वभिन्नवाक्यत्वात् तिङ्ङतिङ इति निघातो न भवति । कः पुनरयं सम्बन्धो नाम? अहानिर्व्यपेक्षा व्यतिषङ्ग इति । तथा हि—सम्पूर्वो बध्नातिरह . . . गर्गैः सम्बन्धोऽस्ति नोवत्सैः सम्बन्ध इति । तथा व्यतिषङ्गे वर्तते, योऽयसा रज्ज्वा वा कीलादौ व्यतिशतौ

व्यतिषक्तो भवति स सम्बन्ध इत्युच्यते, तत्र यदा सम्बन्धस्याहानिरर्थः तदा ऊरीकरोति कारिकाकरोति शुक्लीकरोति पटपटाकरोति चकासाञ्चकार, विदाङ्कुर्वन्तु लुनीहिलुनीहीत्येवायं लुनाति भ्राष्ट्रमट मठमट खमादयः प्रयोगा भवन्ति। न ह्येते कदाचिदप्यन्योन्यं जहतीति। यदा सम्बन्धशब्दस्य व्यपेक्षा अर्थः तदा गुरुकुलं देवदत्तस्य, सूर्यमपि न पश्यन्ति असूर्यम्पश्या राजदाराः, किञ्चिदपि न कुर्वाणः अकिञ्चित्कुर्वाणः, शङ्कुलया कृतः खण्डः शङ्कुलाखण्डः, दध्नोपसिक्तओदनो दध्नोदनः, अश्रेणयः श्रेणयः कृताः श्रेणीकृताः, कण्ठे कालोऽस्य कण्ठेकालः, केशेषु च गृहीत्वा प्रवृत्तं युद्धं केशाकेशीत्यादयः प्रयोगा भवन्ति। एतैः समासावस्थायामपि देवदत्तादीनपेक्षन्ते। यदा तु सम्बन्धशब्दस्य व्यतिषङ्गोऽर्थस्तदोपकुम्भं, नीलोत्पलं, गौगर्भिणी, पूर्वकायः, सप्तर्षयः, प्लक्षन्यग्रोधौ, कष्टश्रितः, काकः कृष्ण, इति च मिथो विशेषणविशेष्यभावेन व्यतिषज्यन्ते। यत्र हि पूर्वोत्तरपदयोः सङ्गतार्थता तत्सामर्थ्यं सम्बन्धः। स विशेषणविशेष्यभाव इत्याख्यायते, तत्र चैकस्य प्राधान्यमन्यस्योपसर्जनत्वं। न हि प्रधानयोरुपसर्जनयोरेव वा सम्बन्धः कल्पते प्रधानस्यापरार्थत्वादुपसर्जनस्य परार्थत्वात् सम्बन्धोपलक्षितपदद्वयं परस्परं प्रधानोपसर्जनभावेन विशेषणविशेष्यभावमासादयति। स च प्रधानोपसर्जनभावः कदाचिच्छब्दनिबन्धनः कदाचिदशब्दोपादानः सामर्थ्येनावसीयते। शब्दनिबन्धनो यदा वैयधिकरण्यं उपसर्जनशब्दा हि प्रधानोपकाराय परिणतं स्वार्थमाचक्षाणाः सम्बन्धिनमभिदधानाः प्रथमयैव संस्क्रियन्ते अशब्दोपादानो यदा सामानाधिकरण्यं अपरार्थतया हि प्रातिपदिकस्याव्यतिरेके वृथाविर्भवति शब्दैस्तदुभयोर्द्रव्यशब्दतायामुपपद्यते, सा च गुणादीनां मतुब्लोपादिना भवति। सोऽयं विभक्तिभेदतः सामर्थ्यतश्च प्रधानोपसर्जनभावो द्विप्रकारः कल्प्यमानो मुख्यवृत्त्या उपचारवृत्त्या च। सम्बन्धविभक्त्या यथा—राज्ञः पुरुषः यूपाय दारु, कारकविभक्त्या तु श्रूयमाणक्रियोऽश्रूयमाणक्रियश्च। श्रूयमाणक्रियो यथा—कष्टश्रितः, व्याघ्राद्भयम्। अश्रूयमाणक्रियो यथा—शङ्कुलयाखण्डः, अक्षेषुशौण्डः। मुख्यवृत्त्या यथा—नीलमुत्पलं, वीरपुरुषः। उपचारवृत्त्या यथा—पुरुषो व्याघ्रः, सिंहो माणवकः। विशेषणविशेष्ययोरुपसर्जनप्रधानभावः सामानाधिकरण्ये विभक्त्यभेदादशक्यः शब्दतोऽवधारयितुं, सम्बन्धसामर्थ्यात्तु प्रतीयते। न हि सम्बन्धः प्रधानयोरेव वा सम्भवति॥

ननु च नीलमुत्पलमित्येकैकपदप्रयोगादनवच्छिन्नानुपहिताश्रयमाधाराधेयसामान्यं पदद्वयात्तु परस्परोपहितव्यवच्छेदं प्रतीयते, तत एव योग्यतादि सम्प्रति योग्यान्वितस्य वाचकमिति। एवं च स्मरता स्मृतमेव अनन्वितमपि स्वरूपमन्वयवादिनोऽपि नायं नियमः श्रूयमाण एव पूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णः प्रत्यायक इति। बालिशाधीतात् प्रागनवधृतार्थादपरिज्ञाने संस्कृतस्य पश्चात्स्मृतादपि भेदार्थावगमदर्शनात्, तेन स्मृत्यारूढस्यागमकत्वमदोषः, श्रूयमाणेन हि पदेन प्रतियोगिसापेक्षत्वादन्विताभिधानस्य प्राक्सहकारि विरहादर्थोऽभिहितः पश्चादभिधीयत इति किमनुपपन्नम्। तथा चाह—

पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम् । न्यायसम्पादितव्यक्ति पश्चादन्वितबोधकम् ॥
स्मृतिसन्निहितैरेवमर्थैरन्वितमात्मनः । अर्थमाह पदं सर्वमिति नान्योन्यसंश्रयम् ॥

कथं पुनरन्विताभिधायिना पदेन स्वरूपमात्रं स्मारयितुं शक्यते ? उच्यते—अन्वितस्याप्यभिधानस्वरूपमात्रस्य विद्यमानत्वान्नायं नियमः, यावद्गृहीतं तावत्स्वकर्तव्यं, अपित्वगृहीतं तु न स्मर्यत इति ॥

ननु च शब्दस्य स्वरूपाभिधानशक्त्यभावादप्रामाण्ये कथं शब्दश्रवणात्स्वरूपस्मरणं भवति ? उच्यते, न हि यत्प्रमाणं तत्स्मृतिकरणं, किन्तु प्रमाणमेव तत् । यस्य तु येन सह काचित्प्रत्यासत्तिः प्रतीतपूर्वा स तत्र संस्कारोद्बोधद्वारेण शक्नोत्येव स्मृतिमाधातुम् । अस्ति च स्वरूपस्यापि तदभिधेयान्तर्गत्या शब्देन सह प्रत्यासत्तिरिति शक्नोति तत्रापि स्वरूपप्रतीतिं जनयितुं । यथा निर्विकल्पकदशाप्रतीतमर्थस्वरूपमात्रमभिधेयमपि शब्दं स्मारयति तथा शब्दोऽप्यर्थमिति न किञ्चिदनुपपन्नम् । तथा चाहुः—

अन्वितस्याभिधानेऽपि स्वरूपं विद्यते सदा । तेन स्वरूपमात्रेऽपि शब्दो जनयति स्मृतिम् ॥
यथार्थेन प्रमाणेन स्वपदं स्मार्यते क्वचित् । पदेनाप्यप्रमाणेन तथार्थः स्मारयिष्यते ॥

नन्वेवं यथा स्मृतिसन्निहितत्वमाश्रित्यान्विताभिधानं पदैः क्रियते तथा स्मरणस्य प्रत्यासत्तिनिबन्धनत्वादनेकेषां च स्मरणिनां प्रत्यासत्तिसम्भवात्तेषु स्मृतिसन्निहितेष्वगृह्यमाणविशेषत्वादुखायां पचतीति नोखापचत्यर्थान्वितैव केवलाभिधीयेत, सा हि कलायनिर्वापादान्वितापि प्रतिपन्नेति स्मरणात्तदन्विताप्युखाभिधीयेत । तथा पचत्यर्थोऽपीष्टकादिकर्मकोऽवगत इति तत्स्मरणान्नोदनान्वितोऽभिधीयेतेति । तत्र शब्दैः स्मारितानामन्वयबोधकत्वाद्वृद्धव्यवहारेऽपि तथा दर्शनाद्य एव हि शब्देन स्मारितोऽर्थस्तेनैवान्विताभिधानमिति कलायनिर्वापाद्यन्वितान्यभिधीयत इति ॥

किञ्चान्वितार्थाभिधान एवेदं प्रतिनियतार्थान्वयित्वमुपपद्यते । यत्पदान्तराभिधेयतया स्मार्यते तदन्वितस्यैव वृद्धव्यवहारे वाच्यत्वदर्शनात्, यत्रापि चाध्याहारस्तत्रापि सन्निधापितांशेन विशेषान्विताभिधानलाभ इति लोक एव ज्ञानमिति न कश्चिद्दोषः । अपि च ज्ञानं तावदनेनायमर्थोऽन्वितो वाच्य इति तत्र यद्यनेनाप्यन्विताभिधानं स्यात् वाक्यभेदो भवेत्, न चासावेकवाक्यत्वसम्भवे न्याय्यः । तदुक्तम्—

सम्भवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते ॥ इति ।

यच्चोक्तमन्विताभिधानपक्षेऽन्वितस्यैव पदार्थस्याभिधानादङ्गुल्यग्रादिवाक्येष्वप्यन्वयः प्राप्नोति । तत्र स्मृतानामप्यर्थानामयोग्यत्वेनान्वयाभावादनभिधानमेव, पदार्थप्रतिपत्तिस्तु स्मृत्यैवोपपद्यत इति । यत्पुनः पुंवचसामर्थ्ये प्रामाण्याभ्युपगमात्पदानां वाचकत्वशक्तिरेव नावधार्यते । कुतोऽन्विताभिधान-

मित्येतदेव तावद्वक्तव्यं ; न वयं पुरुषवाक्यानामर्थे प्रामाण्यमभ्युपगच्छामः । येषामपि चाभ्युपगमस्तेषामपि न दोषः, यतः पदमन्विताभिधायकत्वेन व्युत्पन्नं व्यभिचाराशङ्कया लोके न तन्निश्चायकं पश्चादाप्तत्वालोचनयानुमितेऽर्थेऽनुवादकं तदिति प्रामाण्यमेव नासादयति ॥

ननु च वाचकत्वमपि जहाति ; पश्य बालो हि व्युत्पद्यमानः प्रयोज्यवृद्धव्यवहारस्य शब्दश्रवणानन्तरभाविनीं विशिष्टचेष्टानुमितां क्रियामन्वितशब्दकरणिकां तावदवगच्छति स तथाव्युत्पन्नः कदाचिदनन्वितार्थपदरचनामुपलभते । तत्रोपलभमानस्य तस्यैव विमर्शो जायते, सम्भाव्यमानानन्वितार्थपदवचनमिदं वाक्यं कथं वृद्धस्यार्थनिश्चयः प्राकृतवद्वृद्धस्यापि हि पुरुषायत्तवाक्येनान्वितार्थपदरचनाशङ्कायामयमेव समभवन्निति तस्यैवं विचिकित्सायां पुनरेष निश्चयो जायते । कृतमनेनायं वक्ता इत्थमवधारितोऽन्विताथन्यिेव पदानि प्रयुङ्क्ते । तथाविधपदप्रयोगश्च नास्यानुपलब्धेऽन्वय उपपद्यत इत्येवमन्वयोपलम्भमनुमायानेनान्वयो निश्चितः, निश्चितेवान्वये वाक्यमेतदनुवादभूतमध्येति । एवंचेदनुवादकतया तस्यार्थस्य तद्वाक्यं वाचकमेवेति वाचकशक्तिज्ञानपूर्वकं नानर्थमिति मन्यते । यदि परं मया प्रागनुमापुरस्सरोऽर्थनिश्चयोऽस्येति नावगतं, यापि चेयमस्यानिश्चितेऽन्वये विशिष्टवक्तृज्ञानानुमा, साऽपि पदानां स्वरसतः सामान्यावगमादेव नोपपद्यते, किन्तु विशेषावगमात् । न च शक्तेरन्यः पदानां विशेषोऽवकल्पते । अतो मयेवानेनाप्यमीषां पदानां वाचकशक्तिरवधारिता । तेन विशिष्टान्वयवाचकपदप्रयोगात्तद्विषयं वक्तुः पूर्वं विज्ञानमनुमितवानिति ॥

नन्वनन्तप्रतियोग्यन्वितस्वार्थबोधनविषया अनन्ता एव शब्दस्य शक्तयः परिकल्पयितव्याः स्युः । अभिहितान्वयवादेत्वेकस्मिन्नर्थे शब्दस्यैकैकैव शक्तिरिति तन्न । एकयैवाकाङ्क्षितसन्निहिततत्तत्पदगतस्वार्थाभिधानशक्त्या प्रतियोगिभेदेन चक्षुरादीनामिव कार्यभेदोपपत्तेः । यथैकयैव दर्शनशक्त्या चक्षुः घटादिप्रतियोगिसहायभेदान्नानाज्ञानानि जनयति, तथा शब्दोऽपि प्रतियोगिभेदादिति मन्तव्यम् ।

पदैरेवान्वितस्वार्थमात्रोपक्षीणशक्तिभिः । पदार्था बोधिता बुद्धौ वाक्यार्थेऽपि तथासति ॥

इति । एवं चैतदप्युपपद्यते संहत्यार्थेऽर्थमभिदधति पदानि एकार्थपरः पदसमूहो वाक्यमिति सङ्घातार्थपारतन्त्र्यात्पदानां स्वार्थाभिधानं न सम्भवति । न च सङ्घातकार्यमकुर्वन्ति क्वचिदपि पदानि दृश्यन्ते, न ह्येषां सङ्घातकार्ये स्वकार्ये च पृथक्प्रयोगो विद्यते, सर्वथा सङ्घातकार्य एव प्रयोगान्नैवं संहतानां सङ्घातकार्यवत्स्वकार्यस्याप्युपलम्भात्, यथा शकटाङ्गानामयमंशोऽनेन कुतोऽयमनेनेति । न च शकटाङ्गान्यपि पृथक्प्रयुज्यमानानि स्वकार्यं कुर्वन्ति दृश्यन्ते । किं पुनः पदानां स्वकार्यं स्वार्थप्रतिपत्तिः ? किं वा सङ्घातकार्यं यासौ वाक्यार्थप्रतिपत्तिः ? तच्च पदानामेकैकस्य कृत्स्नफलपर्यन्तव्यापारकारित्वात् । तथा ह्येकैकस्मिन् सति कृत्स्नफलपर्यन्तो व्यापारो निवर्तते एकैकेन विना निवर्तत इति एवं कृत्स्नकारिभवति किमत्र पदान्तरेण

क्रियत इति चेत् सर्वकारकेष्वपि तुल्योऽयमनुयोगः। तत्र यथा संहत्य कुर्वन्ति कारणादीनि कार्याण्युच्यन्ते तथा संहत्याप्यभिदधति पदान्यभिधायकान्युच्यन्ते ॥

नन्वाकाङ्क्षासन्निधियोग्यताभिश्चेदन्वयोपपत्तिरभिहितान्वय एवास्तु किमन्विताभिधानेन ? पदेषु ह्यनन्वितमपि स्वमर्थमभिधायोपरतव्यापारेष्वाकाङ्क्षादिभिः पदार्थानामन्वयप्रतीतिर्भविष्यतीति। उच्यते, कस्येयमाकाङ्क्षा शब्दस्यार्थप्रमातुर्वा ? शब्दार्थयोस्तावदचेतनत्वान्नाकांक्षा, प्रमातुस्त्वयं तत्र वाचो युक्तिः, शब्दः शब्दान्तरमाकाङ्क्षत्यर्थोऽर्थान्तरं स्वतन्त्रस्याऽऽकांक्षा न प्रमाणं, पुरुषेच्छाया वस्तुस्थितेरयुज्यमानत्वाच्छब्दप्रमाणपृष्ठभावित्वं, नत्वर्थेषु पुरुषस्याकाङ्क्षा भवन्ती भवत्यर्थानां संसर्गहेतुरित्येवं शब्दस्यैवायमिषोरिव दीर्घदीर्घो व्यापारः उपरतव्यापारे तु शब्दे पुरुषस्याकाङ्क्षामात्रं न सम्बन्धकारणं अशाब्दत्वप्रसङ्गात्साक्षाच्च शाब्दत्वसम्भवे व्यवधानाश्रयणस्यायुक्तत्वात्, अतो नान्यदन्विताभिधानात् संसर्गप्रतीतेस्साधनमस्ति। न खल्वानयगांशुक्लामित्यादि वाक्येषु संसर्गपदं प्रयुज्यते यतः संसर्गप्रत्ययः स्यात्। प्रयुज्यमानमपि दशदाडिमादिवाक्यवदनन्वितार्थमेव स्यात्। तस्मात्पदानामन्विताभिधानमेव न्याय्यमिति ॥

अभिहितान्वयवादिनः पुनरित्थमाचक्षते। स्वंस्वमर्थमभिधाय निवृत्तव्यापाराणि पदानि भवन्ति। अथेदानीं पदार्था अवगताः आकाङ्क्षासन्निधियोग्यताभिरन्वयमुपयन्तो वाक्यार्थमवगमयन्ति ॥

नन्वेवमशाब्दः स्यात्, पारम्पर्येणापि प्रतिपादयतां पदानां वाक्यार्थे सामर्थ्यस्याविघातात्। तदुद्देशेन प्रयुक्तानां पदार्थप्रतिपादनमवान्तरव्यापारो भविष्यति। न चावान्तरव्यापारस्य कारकान्तरेष्वपि व्यवधायकत्वमिष्यते। तदाह ॥

न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः। तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते ॥
वाक्यार्थमात्र एतेषां प्रयुक्ते नान्तरीयकम्। पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥

इति ॥ तत्र च क्रियापदानि क्रियामात्रमभिदधति, कारकपदानि तु कारकमात्रम्, न वा मिथस्संसर्गं न ह्येकपदोच्चारणकाले पदान्तरार्थप्रतीतिरस्ति। नचाप्रतीयमानेनापि संसर्गप्रतीतिरस्ति। ननु च वृद्धव्यवहारात्पदानां अर्थावधारणम्। वृद्धाश्च वाक्येनैव व्यवहारन्ति। न पदेन, वाक्येष्वन्वितानामेव पदार्थानामुपलम्भात्, कथमुच्यते क्रियामात्रं पदेभ्योऽवगम्यत इति ? उच्यते, सत्यं वाक्येभ्य एव पदानां व्युत्पत्तिः, सा तु किमेकघटनाकारकसंहतवाक्यार्थनिष्ठा, किं वा पदार्थपर्यन्तेति चिन्तनीयम् ? पूर्वस्मिन् पक्षे प्रतिवाक्यं व्युत्पत्तिरपेक्षणीया। सा चानन्त्यव्यभिचारादिभिर्बहुप्रमादा। पदार्थपर्यन्तायां च व्युत्पत्तौ नूनं निर्धारणीयमियानस्य पदस्यार्थ इति। अन्वितार्थाभिधानवादिनोऽपि नियतः . . . विकरणीयः पदार्थनियमानपेक्षणे हि गामानयेति विवक्षुरश्वपदमपि निमित्ततयोपाददीत। न हि तस्यानपेक्षितपदपदार्थप्रविभागो

वैयाकरणवद्वाक्यार्थप्रत्यय उदेति । तस्माद्यावानावापोद्वापपर्यालोचनया पदस्यार्थो निर्धार्यते तावानेव तस्यार्थ इति ।

नन्वाकाङ्क्षितयोग्यसन्निहितार्थोपरक्तस्तस्यार्थो भवतु सर्वदा संहत्य व्याप्रियमाणत्वात् । नैवम्; सर्वदा संहत्य व्याप्रियमाणस्यास्तु तावान्, यावत्यभिधात्री तस्य शक्तिः । कीयती च तस्याभिधात्री शक्तिः यावन्तमर्थमाकाङ्क्षितैर्योग्यैः सन्निहितैश्च संयुज्यमानं वियुज्यमानं च न मुञ्चति क्रियामात्रं कारकमात्रं च । अतस्तावत्येवाभिधात्री शक्तिरन्वयव्यतिरेकाभ्यां तस्य निर्धार्यते । तदुक्तं, 'अव्यभिचाराद्धि तन्मात्रमेव तदर्थो नाधिकं व्यभिचारात्' इति । नन्वत्र शक्तित्रयकल्पनागौरवलक्षणो दोषः प्राप्नोति । पदार्थानां हि शब्दान्यता प्रमाणदृष्टेति शब्दाभिधेयानां तेषां तदवबोधकत्वशक्तिः कल्पनीया । तस्याश्चोत्पत्तौ शब्दसंस्पर्श एव हेतुरित्याश्रयणीयम् । शब्दो हि विशिष्टार्थप्रतिपत्तिपरतया लोके प्रयुज्यमानो दृष्टः, न चासौ साक्षाद्वाक्यार्थप्रतिपादने समर्थ इति पदार्थानवान्तरव्यापारीकरोति । ते च यद्यन्यान्वय-बोधनसमर्थास्तदा तेषामवान्तरव्यापारता स्यान्नान्यथा । पदार्थानामपि विशिष्टार्थावबोधपर-शब्दसंस्पर्शादेषा शक्तिराविर्भवतीति शब्दस्यापि पदार्थगतशक्त्याधानशक्तिरनुमन्तव्येति । स्यादेतदेवं, यदि मानान्तरावसेयानां पदार्थानामन्योन्यान्वयावगमसामर्थ्यं नावधार्यते । अवधार्यते च श्वैत्यस्यानवधारिताश्रयविशेषस्याप्रत्यक्षोपलब्धस्याश्वस्य चाप्रतिपन्नगुणविशेषस्य हेषाशब्दानुमितस्य श्वेतोऽश्वो धावतीत्यन्वयः । तदाह—

पश्यतः श्वैतिमं रूपं हेषाशब्दं च शृण्वतः । पदनिक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः ॥

दृष्टावाक्यविनिर्मुक्तेति । अरूपमित्यव्यक्तरूपम् । तेन गुणविशेषो न प्रत्यक्षेणावसीयत इति उक्तं भवति । अत्रेदं पर्यनुयुज्यते किं येन पुरुषेण श्वैत्यसमानाश्रयौ हेषाध्वनिपदनिक्षेप-शब्दाववगतौ तदपादानध्यवसायस्तस्यापीति किमतः ? यदि तावदप्रत्याकलितहेषाध्वनि-पादविहारनिर्घोषापादानस्येत्युच्यते तदा प्रतीतिविरोधः स ह्येवं प्रतिपद्यते भवितव्यमस्मिन् देशे नूनमश्वेन भाव्यं केनचिद्धावतेति ।

अथाश्वसम्बन्धिनमेव खुरपुटटङ्काररवमभ्यासपाटववशादवैति तदासावश्ववर्तिनीं वेगवतीं गतिमनुमिनोति न पुनः केवलामेवावगम्य तस्मिन् प्रतिबुध्यते, योऽप्यस्मिन् देशे नास्त्यन्योऽश्व इति निश्चित्य पारिशेष्यादपादानानध्यवसायेऽपि हेषाध्वनेः श्वैत्यसमानाधिकरणमश्वत्वं अन्तर्गृह-दर्शनमिव बहिर्भावावगतावर्थापत्तिः । योऽश्वेतः स एवाश्व इति प्रमाणम् । यस्तु श्वेतत्वसमाना-धिकरणहेषाध्वनिखुरपुटटङ्काररवावध्यस्यति तस्याश्वत्वे वेगवति च गमने श्वेतद्रव्यवर्तिन्येकानु-मानं तत्सम्बन्धावगतार्थानां न क्वचिदनुमानार्थापत्तिव्यतिरेकेणान्वयबोधकत्वं प्रतीतम् ।

अपि च यदि पदार्थावगतिमात्रादेवान्वयावगमस्तदा कस्मिन् प्रमाणेऽस्यान्तर्भाव इति वाच्यम् ? न तावच्छब्दे शब्दाभावात् पदार्थाभिधानावान्तरव्यापारेण हि यच्छब्दादन्वयज्ञानं न तच्छाब्दमित्यभिहितान्वयवादिनां सिद्धान्त इति कथं शब्दे अन्तर्भावः ? प्रमाणान्तराभ्युपगमे तु शब्दस्योच्छेदः शाब्दस्य पदार्थविषयतया प्रमापितस्यैव प्रामाण्यप्रसङ्गात् । तस्माच्छब्दानभिहितानां पदार्थानामन्यत्राद्दष्टं वाक्यार्थावबोधनसामर्थ्यमपि परिकल्पयितव्यम् । तदाधानशक्तिश्च शब्दानामपीति कल्पनालाघवाच्छब्दानामेवान्वितस्वार्थबोधनशक्तिमात्रं कल्पयितुं न्याय्यम् ।

अथोच्यते, आकाङ्क्षासन्निधियोग्यतावन्तः पदार्था एव वाक्यार्थीभवन्ति, न पुनर्वाक्यार्थमवबोधयन्तीति । तदतिमन्दम् ; वाक्यार्थावगतेः कारणाभावप्रसङ्गात् । अनपायत्वे हि पदानामन्वयप्रतीतौ पदार्था अपि चेन्न कारणं अकारणीवान्वयप्रतीतिरापद्येत ।

स्यान्मतं ; क्रियापदेन कारकपदेन वा साकाङ्क्षेऽर्थे पूर्वाभिहिते यदेव पदान्तरेण योग्यं प्रतियोगिपदार्थान्तरं सन्निधाप्यते, तदेव तत्र सम्बन्धित्वेनावतिष्ठत इति । सत्यमेवम् ; अवगतिस्तु तत्सम्बन्धस्य किं निबन्धनेति वाच्यम् । अथ पूर्वपदार्थे साकाङ्क्षे यत्पदार्थान्तरमुच्चरति तत्सम्बन्धितयैव स्वार्थमुपनयति प्रत्याययत् । यथा प्रकृत्यर्थे पूर्वप्रतीते प्रत्यय उच्चार्यमाणः स्वार्थं तद्विशिष्टमेवाभिधत्ते तथा पदार्थान्तरमपीति । तदुक्तं— प्रकृतिप्रत्ययौ प्रत्ययार्थं सहब्रूत इति । प्रकृतिः स्वार्थं प्रत्ययार्थे विशेषणत्वेनोपनयन्ती प्रत्ययेन सह तदर्थमाहेत्यर्थः । तथाचोक्तम्—

नित्यं विशिष्ट एवार्थे प्रत्ययो यत्प्रयुज्यते। तत्पूर्वतरविज्ञातुः प्रकृत्यर्थविशेषणात्॥ इति ।

अङ्गीकृतं तर्हि द्वितीयस्यान्विताभिधानं प्रथमस्य तथापि नास्तीति चेन्न, वाक्ये पदानां प्रयोगक्रमनियमाभावात् । यदेव कदाचित्प्रथमं तदेव कदाचिद्द्वितीयमिति सर्वपदानामन्विताभिधानमापतितम् । किञ्च प्रत्ययश्चेदन्विताभिधायी तदा तदविशेषात् पदानामन्विताभिधायिता किमिति नाभ्युपेयते, किमर्धवैशसेन ?

अत्राभिधीयते ; लाक्षणिका एव सर्वे वाक्यार्थाः, ततश्च न पदार्थानामन्वयबोधने शक्तिगौरवम् । अनन्वितावस्थो हि पदेनार्थोऽभिहितोऽन्वितावस्थां स्वसम्बन्धिनीं लक्षयति । अवस्थावस्थावतोर्हि संबन्धादवस्थावत्यवगते भवत्यवस्था बुद्धिस्था सर्वत्र संबन्धिनि दृष्टे सम्बन्ध्यन्तरे बुद्धिर्भवतीति सिद्धमेव । तेन नास्तिपदार्थानामन्वितबोधने शक्तिकल्पनेति ।

तदाह— वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति लक्ष्यते । इति ।

कथं पुनरियं लक्षणा ?

वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः । तत्सम्बन्धवशप्राप्तस्यान्वयो लक्षणोच्यते ॥

तद्यथा— गङ्गायां घोषः प्रतिवसतीत्यादिश्रौतस्य गङ्गार्थस्य वाक्यान्वयासम्भवात्तत्परित्यज्य

तत्सम्बन्धवतः सन्निधेः कूलस्य वाक्यान्विततांध्यवसीयते । अत एव चाहुः– अनुपपत्त्या सम्बन्धेन च लक्षणा भवति । इह च गामानयेत्यादौ श्रौतस्यान्वयायोग्यत्वं, नाप्यन्वितावस्थस्यानयनसम्बन्धार्हता । अन्वितस्यान्वयान्तराभावात् ।

अपि च सर्ववाक्यार्थानां लाक्षणिकत्वे मुख्यस्यैव परित्यागापत्तिः । अथ माभूदेषा लक्षणा । किन्तु क्रियावगतकारकान्वयिनीचाऽऽत्मनो दशामवगमयत्यविनाभावित्वादित्युच्यते । शाब्दत्वं तावदित्थमपहस्तितं भवत्यनयाऽवगम्यस्य । किन्तु सामान्यतोदृष्टानुमानगोचरताऽभ्युपगता भवति । तथा च विशेषावगतिरनुपपन्नमूलाऽऽपद्येत ।

अथ विशेषान्वयं विना व्यवहारानवकल्पनादनर्थकं शब्दोच्चारणमिति तदाश्रयणम् । एवमपि प्रेक्षापूर्वकारिणां सार्थकमात्र . . . गुणां वचना . . . देत्वानर्थक्येन भवितव्यमिति प्रमाणाभावान्न शक्यते विशेषान्वयो वक्तुम् । न च लोकेप्यानर्थक्यमापद्यत इत्येतावता कारणेनोपायान्विनापि विशेषाध्यवसानं युक्तम् । न हि दग्धुकामस्यौदनोपादानमनर्थकमिति जलस्य दाहकशक्तिराविर्भवतीति काममानर्थक्यम् । न पुनः सामान्यतो दृष्टस्य विशेषान्वयिता ।

अथाकाङ्क्षितसन्निहितयोग्यान्वयपरता वृद्धव्यवहारेण पदानामवगतेति तदन्वयावगमः । तन्न, वृद्धव्यवहार एव कथं तत्परता पदानामुपायाभावे निर्वहत्विति चिन्ता ; सा हि पदानां पदार्थानां वा शक्तिकल्पनां विनानुपपन्नेति मन्यामहे । सा च पदानामेवोचिता । यदाह—

प्राथम्यादभिधातृत्वात्तात्पर्यावगमादपि । पदानामेव सा शक्तिः परमित्यवगम्यताम् ॥

प्रथमभावीनि हि पदान्यतिलङ्घिषु पदार्थेषु वाक्यार्थाववोधनशक्तिरहितानि, तेन तेषामभिधानशक्तिस्संप्रतिपन्नैवेति तस्या एवान्वयपर्यन्तता कल्पयितुं सुकरा । पदार्थानां तु बोधनशक्तिरेव, तेन धर्मिकल्पनातो धर्मकल्पना लघीयसीति अन्विताभिधानशक्तिःपदानामेव कल्पयितुमुचिता ।

किञ्च पदान्यभिधायकानीष्यन्ते । तत्र यदि स्वरूपमात्रविषयामेव बुद्धिमादध्युरभिधायकता हीयेत, तस्या बुद्धेः सम्बन्धग्रहणसमुपजातसंस्कारोऽवश्यं हि सम्बन्धस्मरणसिद्ध्यर्थं सम्बन्धिभूतार्थसाधारणसंस्कारोऽङ्गीकरणीयः । तस्मात्सम्बन्धग्रहणसमयानधिगतानान्वितार्थप्रतिपादनाभ्युपगम एव शब्दानामभिधायकतेति तामङ्गीकुर्वता पदानामन्विताभिधायिताऽऽश्रयणीया । यस्तु,

पदमभ्यधिकाभावात्स्मारकान्न विशिष्यते । भावनावचनस्तावत्तां स्मारयति लोकवत् ॥

इत्यार्यवचने दर्शनात् । अभिधानशक्तिवत्स्मारकतामेव पदानामभिधायकतां मन्यते । नापि तावत्पदानां वाक्यार्थपरताभ्युपगन्तव्या, अन्यथा वाक्यार्थस्याशाब्दत्वप्रसङ्गात् । एवं चेत्पदानामेव साक्षाद्वाक्यार्थबोधने शक्तिरस्तु । किं परम्पराश्रयणेन ? एवं च पदपदार्थेषु पदानां स्मारकत्वा-

तिरिक्तं येऽभिधायकत्वमाहुस्तेषां शक्तित्रयकल्पना । एका तावत्पदानामभिधानशक्तिः बोधशक्त्याधानशक्तिः पदार्थानामन्वयज्ञापनशक्तिरिति स्मारकत्ववादिनां त्वभिधानशक्तिं हित्वा शक्तिद्वयकल्पना । अन्विताभिधाने पुनरेकैव शक्तिरिति शक्तिकल्पनालाघवादन्विताभिधायीन्येव पदानीति न्याय्यं, न पुनरभिहितानामन्वय इति ।

अत्रोच्यते ; यत्तावत्पदार्थानामन्वयबोधकत्वे शक्तित्रयकल्पनागौरवमित्युक्तं तत् न सम्यक् प्रमाणान्तरावगतानां पदार्थानामन्वयावबोधकत्वदर्शनात् दृश्यते ।

पश्यतः श्वैतिमं रूपं हेषाशब्दं च शृण्वतः । खुरनिक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः ॥

न चैतद्वाच्यं ; अर्थापत्त्यनुमानयोरयं व्यापारः, तद्विषयायाः प्रतीतेरिह विवक्षितत्वात् । यत्र ह्याकाङ्क्षादित्रयोपेताः पदार्था एवान्योन्यमन्वयं गमयन्ति, न तत्रार्थापत्त्याद्यनुमानयोर्व्यापारः । यथा— सुरभि चन्दनं, स्वादु सहकारमिति । न चात्र विशिष्टप्रतिपत्तौ प्रत्यक्षमेव व्याप्रियते ; चक्षुरादीनां रूपादिनैयत्येन परस्परविषयेणाज्ञातत्वात् । तथा हि— न गन्धाद्युपलब्धौ चक्षुः व्याप्रियते । नापि रूपाद्युपलब्धौ घ्राणमिति । अस्ति च सुरभिचन्दनमित्यादौ विशिष्टार्थप्रतिपत्तिः । एवं श्वेतोऽश्वो धावतीत्यत्रापि द्रष्टव्यम् ।

यच्चात्रोक्तं— कस्मिन् प्रमाणेऽस्यान्तर्भाव इति तेन न कस्मिंश्चित्प्रमाणेऽन्तर्भावः । किन्तु प्रमाणफलमेतत् । यदि वा पदार्थ एवात्र प्रमाणम् , तेषां च शब्द एवान्तर्भावान्न सप्तमप्रमाणापत्तिः । पदार्था हि शब्दात्प्रमाणान्तरतो वा प्रतिपन्ना आकाङ्क्षासन्निधियोग्यताभिः क्रियाकारकादिरूपेण चेत्प्रतीयमानाः संसर्गबुद्धिं जनयन्ति । शाब्दमेवैतद्भवति ।

यत्पुनराकाङ्क्षासन्निधियोग्यतावन्तः पदार्था एव वाक्यार्थीभवन्तीत्युपन्यस्य दूषितं, तत्र न वयमेवं ब्रूमः पदार्था एव वाक्यार्थीभवन्तीति । किन्तर्हि गमयन्ति । यच्च प्रत्ययदृष्टान्तेन द्वितीयपदस्यान्विताभिधायित्वेऽर्धवैशसमुक्तं तदपि नास्ति प्रकृतिप्रत्यययोरपि पदवदेवान्वयव्यतिरेकावधारितव्यतिरिक्तशक्तिकयोरभिहितान्वयस्यैवोपपत्तेः ।

पाकं हि पचिरेवाह कर्तारं प्रत्ययोऽप्यकः । पाकयुक्तः पुनःकर्ता वाच्यो नैकस्य कस्यचित् ॥
प्रकृतिप्रत्ययौ ब्रूतः प्रत्ययार्थं सहेति च । भेदेनैवाभिधानेऽपि प्राधान्यादेवमुच्यते ॥

लाक्षणिकवाक्यार्थविषये तु मृषैवोपलब्धाः स्मः । नहि गामानयेत्यादौ लक्षणास्माभिरिष्यते । गङ्गायां घोष इत्यादौ न चैषा प्रतिषिध्यते, तेन न मुख्यलाक्षणिकवाक्यार्थप्रविभागानुपपत्तिः ।

यदपि क्रियाऽवगता कारकान्वयिनीमात्मनो दशामवगमयत्यविनाभावित्वादित्यस्मिन् पक्षे विशेषानवधारणमशाब्दत्वं च दोष इत्युक्तं तदप्यनुमतमेव । न ह्यविनाभावतो विशिष्टा

वाक्यार्थप्रतीतिरिति मन्यामहे, अपित्वाकाङ्क्षासन्निधियोग्यतावलेन। आकाङ्क्षादिसद्भावे च शाब्दत्वं भवत्येवेत्यभिहितं पुरस्तात्।

यच्च प्राथम्यादिभिः पदानामेवान्वयबोधनशक्तिरस्त्विति वादितच्चाभिधानशक्तिः पदानामिष्यत एव। अन्वयपर्यन्तता तु तस्या नेष्यते, वाक्यार्थप्रतीतेरन्यथाप्युपपद्यमानत्वात्। वाक्यार्थे हि तात्पर्यशक्तिः पदानां व्याप्रियते, नाभिधात्री। तच्च प्रथमदर्शां विविञ्चता भवतान्विताभिधानमभ्युपगतम्। तच्च न युक्तम्। सर्वत्राभिधात्र्याः शक्तेरविशेषेण प्रवृत्तौ पदार्थनैयत्यानवधारणे पदान्तरोच्चारणवैयर्थ्यादिदोषप्रसङ्गात्। पदान्तरानुच्चारणे त्वयैणान्वितमर्थमभिदधाति गोशब्दः। स नाभिधीयते तत्संसर्गश्चाभिधीयत इति प्रतिषिद्धम्। तदभिधाने तु तद्वत्संबन्धाभिधानमित्येकमेव गोपदं सर्वार्थं स्यात्। तस्मान्न सर्वत्राभिधात्री शक्तिः शब्दस्योपपद्यत इति नान्विताभिधानम्।

एतेन यदुक्तं पदार्थानां बोधनशक्तिरेव कल्प्या, पदानां तु क्लृप्तानामेवान्वयपर्यन्ततेति धर्मिकल्पनातो धर्मकल्पना लघीयसीति अन्विताभिधानमेव युक्तमिति, तदपि निरस्तं भवति। यच्चोक्तं सम्बन्धस्मरणावगतसम्बन्धिप्रतिपत्तिसिद्धान्वितार्थगोचरैवाभिधानशक्तिरस्त्विति; तदप्यनुपपन्नम्। सम्बन्धस्मरणसव्यपेक्षस्य पदस्याभिधायकत्वात्। न चान्विते सम्बन्धस्मरणं भवति। प्रतियोगिनामानन्त्येन सम्बन्धस्य ग्रहीतुमशक्यत्वात्। तस्मान्निष्कृष्टपदार्थमात्रविषयत्वमेवाभ्युपगमनीयम्।

यत्त्वधिगतविषयत्वं दूषणमुक्तं तदिष्यत एव। अत एव न पदं पदार्थे प्रमाणं; अधिगतविषयत्वात्। अनधिगतार्थगन्तृ हि प्रमाणं भवति। न च पदस्य स्वार्थे स्मारकत्वमेव। यदाह—

पदमभ्यधिकाभावात्स्मारकं न विशिष्यते।

नतु स्मारकमेव भवति। तस्मात्पदानामभिहितान्वय एव न्याय्य इति।

उभयवादिनस्त्वेवमामनन्ति, सामान्यतोऽन्विताभिधानं विशेषतोऽभिहितान्वय इति। गोशब्दो हि स्वार्थमनवगतविशेषगुणक्रियासामान्यान्वितमभिधत्ते। तदेतत्सामान्येनान्विताभिधानम्। शुक्लादिगुणविशेषस्तु पदान्तरादवगम्यते। सोऽयं विशेषेणाभिहितान्वय इति।

अपि च क्रियाकारकसंसर्गरूपो वाक्यार्थः क्रियासम्बन्धमन्तरेण कारकत्वानुपपत्तेः। विशेषेषु चानन्त्यव्यभिचारादिदोषात्क्रियासामान्यान्वित एव। कारके कारकपदानां सम्बन्धग्रहणं, संबन्धानुसारेण चाभिधानात्। सामान्येऽन्विताभिधानमेव घटते। व्यवहारकाले च क्रियाविशेषान्वितानामेव कारकाणामुपलम्भात्। क्रियाणामपि च कारकविशेषान्वितानां प्रतीतेः शब्दव्यापारस्य सामान्यान्वयाभिधानेनैव परिसमाप्तेर्विशेषेष्वभिहितान्वय एव युज्यते। एवं च पदान्तरोच्चारणमपि न व्यर्थं भवति, अपेक्षितक्रियाकारकविशेषसमर्पकत्वेनार्थवत्त्वात्।

यद्यपि चात्र क्रियाकारकमात्रान्वयाभिधाने क्रियाकारकमात्रसम्बन्धित्वं क्रियाकारकसामान्याभिप्रायम्। तथाहि; स्वार्थमात्रोपादायिनः सर्वभेदान्प्रति योग्यता; तदेवानुगुण्यमात्रं सामान्यं, न हि तथान्यथा सर्वथा वेति सामान्यमवस्थितरूपं किञ्चिदस्ति, सर्वे एव ते विशेषा एव। तस्यास्तु सामान्यावस्थायां भेदस्य कस्यचिदनिरूपणादत्यागाच्च या सर्वभेदोपग्रहयोग्यतया परिप्लवमानार्थकल्पना तां सम्बन्धो विषयान्तरादवच्छिद्य विशिष्टे विषये नियमयति। तदुक्तम्—

सर्वभेदानुगुण्यं तु सामान्यमपरे विदुः। तदर्थान्तरसंसर्गाद्भजते भेदरूपताम्॥

भेदानाकाङ्क्षतस्तस्य सा पारिप्लवमानता। अवच्छिनत्ति सम्बन्धं तां विशेषे निवेशयन्॥

अत एव च नानेकवाक्यार्थप्रतीतिः। सर्वेषां कारकाणां कर्मादिभावेन व्यवस्थितानामेव क्रियासम्बन्धात्। न च प्रथमश्रुतादप्यर्थप्रतीतिः, विद्यमानस्याप्यन्वयस्य सम्बन्धग्रहणमन्तरेणानुपलब्धेः। न चैकपदोच्चारणकाले सकलवाक्यार्थप्रतीतिः, तदानीं विशेषसमर्पकपदप्रयोगायोगात्।

यद्येवं सामान्येनान्विताभिधानमेवास्तु, किं विशेषेणाभिहितान्वयेन। वृद्धव्यवहारप्रसिद्धसम्बन्धो हि शब्दोऽर्थस्य वाचकः। अन्वयव्यतिरेकाभ्यां च सम्बन्धावधारणम्। न च विशेषान्वयविषयौ तौ सम्भवतः। क्रियापदं हि कारकतासामान्यव्यभिचारिण्या क्रियया सहान्वयव्यतिरेकौ भजते, विशेषान्वये विशेषान्तरव्यभिचारात्। एवं कारकपदमपि। तन्न; विशेषान्वयेऽपि आकाङ्क्षासन्निधियोग्यत्वोपाधिवशेन सम्बन्धग्रहणं सुकरमिति तदभिधायितैव युक्ता पदानाम्। यदि चासौ नेष्यते तदा वाक्यार्थप्रतीतिरेव नोपपद्यते, वाक्यार्थस्य विशेषान्वयरूपत्वात्।

ननु च सामान्यान्वयोऽभिहितो विशेषस्य सामान्यस्यैव प्रत्येतुमशक्यत्वात्। मैवम्। यथा जातिर्व्यक्तिमाक्षिपन्त्यपि न प्रतिनियतं विशेषमाक्षिपति, तथात्रापि नियतविशेषाभावान्नियतविशेषात्मकवाक्यार्थप्रतीतिरुपपन्ना।

ननु विशेषणमात्राक्षेपेऽपि य आकाङ्क्षितः सन्निहितो योग्यश्च विशेषः पदान्तरेण समर्प्यते स एव गृह्यत इति। तदतिक्रमे प्रमाणाभावात्। एतदपि न सम्यक्। सामान्यान्विताभिधानवादिनो हि मते पदानि तावत्तन्मात्रपर्यवसितशक्तीनि; पदार्थानामपि चान्वयबोधनशक्तिर्नाङ्गीक्रियते। न च सामान्याक्षेपोऽपि नियतविशेषमास्कन्दति। तेनाकाङ्क्षिते योग्ये च विशेषपदान्तरेण सन्निधापिते तदन्वयबोधकप्रमाणाभावादन्वयो न प्रतीयते। अत आकाङ्क्षासन्निधियोग्यत्वान्यनुपयोगीन्येव।

विशेषान्विताभिधानवादिनस्तु मते सम्बन्धग्रहणं प्रत्युपाधित्वेनानुप्रविष्टानि वाक्यार्थप्रतिपत्तावुपयुज्यन्ते। पदात्पदार्थः पदार्थान्तरसम्बन्धो बोद्धव्य इत्यस्यां व्युत्पत्तावुपाधित्वेन

योग्यत्वादिकर्मानुप्रविशद्विशेषान्विताभिधानवादिनः पक्षमपाकरोति, न सामान्याभिधानवादिन इति । किञ्च क्रियाकारकस्वभावालोचनयापि कारकमात्रेणान्वयसिद्धेर्वृथा सामान्यमात्रान्वयाभिधायकता शब्दस्याङ्गीक्रियते । तस्मात्तदुक्त एव न्यायः श्रेयान्, सामान्येनान्विताभिधानं, विशेषेणाभिहितान्वय इति । युक्तं चैतत्पदस्य प्रकृतिप्रत्ययात्मकत्वात् । पदे हि पचतीत्यादौ प्रकृत्यर्थः प्रत्ययार्थश्च सामान्यविशेषावगमरूपमन्योन्यान्वितं प्रतीयते । तत्र पचीत्येषा प्रकृतिः सिद्धसाध्यत्वादिधर्मविनिर्मुक्तं प्रत्ययार्थमात्रान्वययोग्यं पाकसामान्यमात्रमभिदधाति । अतिप्रत्ययस्तु पौर्वापर्यनियमान्न प्रकृतिवत्स्वतन्त्रः सामान्यमात्रे धियमादधाति । अपि तु प्रकृतार्थापेक्षयाचक्षाणः स्वार्थं विशेषमेव समर्पयतीति । अनुभववादिनः पुनरित्थं समर्थयन्ते नान्विताभिधानं किन्तर्हि समुदितैः पदैरेको वाक्यार्थः प्रत्याय्यते । स च गुणभूतेतरपदार्थसंसृष्टः कश्चित्पदार्थ एवेति ।

ननु किमयमन्विताभिधानपक्षः पुनरुत्थापयितुमिष्टः । मैवम्; नेदमन्विताभिधानम् । किं तर्हि संहत्यकारिता पदानाम्? उच्यते, संहत्यकारिताप्यस्ति । न चान्विताभिधानम् । अन्वितमर्थं पदानि संहत्य संपादयन्ति । न त्वन्वितमभिदधति । किमिदानीं कुर्वन्ति वाक्यार्थं पदानि, घटमिव मृदादीनि? एतदपि नास्ति, ज्ञापकत्वात्तेषाम् । का तर्हीयं वाचो युक्तिः? संहत्यकारीणि पदानि, न चान्वितमभिदधतीति इमानि पदान्यन्वितं प्रत्याययन्ति, नाभिदधतीति नाभिधात्री शक्तिरन्वितविषया, किन्त्वन्वयव्यतिरेकावगतनिष्कृष्टस्वार्थविषयैव । तात्पर्यशक्तिस्तु तेषामन्वितावगमपर्यन्ता सह व्यापारात् व्यापारस्य तदीयनिराकांक्षप्रत्ययोत्पादनपर्यन्तत्वात् । तथाहि—

अन्यथैव प्रवर्तन्ते प्रत्यक्षान्युद्भवाद्धियः । अर्थं पूर्वमपूर्वं वा दर्शयन्त्यः पुरः स्थितम् ॥
अन्यथैव मतिश्शाब्दी विषयेषु विजृम्भते । प्रतिपत्तुरनाकाङ्क्षप्रत्ययोत्पादनावधिः ॥
अत एव पदं लोके केवलं न प्रयुज्यते । नहि तेन निराकाङ्क्षा श्रोतुराधीयते मतिः ॥

नन्वभिधानव्यतिरिक्तः कोऽन्यः शब्दस्य कृत्स्नफलपर्यन्तप्रत्यायनात्मा व्यापारः । अस्ति कश्चिद्यः सर्वैरेव संसर्गवादिभिरप्रत्याख्येयः । नहि संसर्गोऽभिधीयते । प्रतीयते च वाक्यात् । ननु संसृष्टाभिधाने सति संसर्गः प्रतीयते, नान्यथा । नैतदेवम्, संहत्यकारित्वादेव संसर्गावगमसिद्धेः । न हि संसर्गकारणं न संसृष्टं च कार्यं क्वचिद्दृश्यते ।

अपि च प्रकृतिप्रत्ययौ हि परस्परसापेक्षमर्थाभिधायिनौ । न च प्रकृत्या प्रत्ययार्थोऽभिधीयते, नियोगस्य धातुवाच्यत्वात् । न च प्रत्ययेन प्रकृत्यर्थोऽभिधीयते, यज्यादेर्लिङाद्यर्थानुपपत्तेः । न च तौ पृथक्स्वकार्यं कुरुतः । एवं पदान्यपि परस्परापेक्षीणि संहत्य कार्यं

करिष्यन्ति । न च परस्परस्यार्थमभिधास्यन्ति वाक्यान्यपि प्रकरणपतितान्येवमेव । तदुक्तम्—

प्रकृतिप्रत्ययौ यद्वदपेक्षेते परस्परम् । पदं पदान्तरं तद्वद्वाक्यं वाक्यान्तरं तथा ॥

इति । अयमेव च पक्षः श्रेयान् । संहत्यकारित्वं पदार्थानां सङ्कीर्णानाञ्च ।

निरपेक्षप्रयोगे या सकला कल्पना भवेत् । तदन्विताभिधाने तु पदान्तरमनर्थकम् ॥
संहत्यकारिपक्षे तु दोषो नैकोपि युज्यते । तेनायमुपगन्तव्यो मार्गो विगतकण्टकः ॥
अभिधात्री मता शक्तिः पदानां स्वार्थनिष्ठिता । तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधिः ॥
तेनान्विताभिधानं हि नास्माभिरिह मृष्यते । अन्वितप्रतिपत्तिस्तु बाढमभ्युपगम्यते ॥

संहत्यकारित्वाच्च पदानां न स्वार्थ एव तात्पर्यार्थमुच्चारणं, अपितु प्रधानकार्यमेव कर्तुम् । तदुक्तम्—

वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम् । पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥

तस्मान्नान्विताभिधानं नाप्यभिहितानामन्वयः । किन्तु यथोपन्यस्तपक्ष एव श्रेयानिति ।

तदेवमाकाङ्क्षासन्निधियोग्यतावन्तः पदार्थाश्चतुष्प्रकारमन्वयमनुभवन्तो वाक्यार्थीभवन्ति । ननु चायोग्यतायामप्यन्वयो दृश्यते, भवति पश्य मृगो धावतीति । नहि साध्यैकस्वभावायाः साध्यत्वं साधनत्वं च युज्यत इति । नैवम्; साध्यत्वेनैव साधनत्वात् । क्रियाभ्युपपत्तिरूपेण भवनस्वभावा साध्यस्वभावेनैव कर्मरूपा । यदेव चास्या अनिदन्तानिर्देश्यमपरिनिष्ठितं भवनं साध्यैकरूपं तेनैवैषात्र साध्यभावं साधनभावं च प्रतिपद्यत इति सिद्धतावभासः कुत इति चेत्? कर्तर्युत्पन्नो लकारस्तां सिद्धत्वेनावभासयति । यथा चोरस्य रुजतीति । धात्वर्थ एव रोगलक्षणः, कर्त्रन्तराश्रवणात् साध्यरूपेणैव कर्तृभावमनुभवत्सिद्धतयावभासते ।

यदि वा पदस्य न पदरूपमेवाधिकार्थता किन्तर्हि वाक्यरूपात्? तद्यथा— पुरुष इति पदकाले पुरुषो व्यतिरिक्त उच्यते । यदा तु राज्ञः पुरुष इति विशेषणसन्निधियोग्यस्तदाऽस्य व्यतिरेको भवति, पुरुषविशेषोऽयं राजपुरुष इति । एवं पचतीति नैतस्मात्पदरूपादेवाधिकार्थत्वम् । यदा तु भवतीति पदान्तरसन्निधिः तदा वाक्यकाले पुरुषस्येव व्यतिरेक उपजायत इति । यदि वा न कदाचिदपरा तदतिरेकिणी भवनक्रिया, कश्चिदपरो वा कर्ता विरोधहेतुरस्ति । अपितु सैव व्यपदेशिवद्भावन्यायेन क्रियारूपतां भवितृत्वं च दर्शयन्ती चकास्ति ।

अपि चैकस्याप्यर्थस्य विषयभेदेन द्विधर्मत्वं दृश्यते, यथा— राज्ञः पुरुषस्य पुत्र इति पुरुषः, शेषी च भवति शेषश्चेति राजानं प्रतिशेषी । अविचलितस्वार्थपुत्रार्थान्तरे विचलितस्वार्थः शेषत्वमापद्यते । एवं भवति पचतीत्यत्र भवतोऽकर्तृत्वं साध्यत्वं च भविष्यति । पश्य

मृगो धावतीत्यत्र च मृगे कर्तरि साध्यभावे प्राधान्यं चाजहत्सरणं दृशावङ्गत्वं साधनत्वं च गमिष्यतीति ।

अथवायमर्थः साधनमयं साध्यमिति रूपसिद्धिमात्रमेतत् । यथा पदे अयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इति एक एवासावर्थो विशिष्टो वा खण्ड एव प्रतीयते । यथा मुण्डयति चर्चयतीति । अत्र मुण्डयति माणवकमिति मुण्डिः केशच्छेदनवचनः । अस्य तु व्युत्पत्तिः मुण्डं करोतीति करोतिं सामान्यप्रवृत्तं विशेषे मुण्डशब्दोऽवस्थापयति । करोतिविशेषोऽयं यस्मिण्णिजुत्पद्यते न करोतिमात्रम् । एवं चर्चा करोति चर्चयतीति । अतः केचिन्मुण्डिचर्चादींश्चुरादिषु पठन्ति मुण्डकेशखण्डनेषु मुण्डयति चर्चयतीति । एवं पश्य मृगो धावतीति । इदमत्र साधनपदमिदं साध्यमित्युत्प्रेक्षेपा । इदं त्वर्थसतत्वम् । नात्र सरणं, न दर्शनं, न मृगः । किन्तर्हि मृगकर्तृको दृशिकर्मा सरणविशेषोऽयं खण्डो वाक्यार्थ इति ।

एतेन पुत्रमिच्छति पुत्रीयतीत्यादयोऽपि व्याख्याताः । व्यपेक्षावतां समर्थानामन्वितार्थानां च पदार्थानां तिलतण्डुलवत् क्षीरनीरवत् पांसूदकवच्च यदविभागरूपेण भवनं स एकार्थीभावः । लक्षणं चैतत्समस्तं व्यस्तं च । तेन सापेक्षासमर्थसमासादीनामुपसङ्ग्रहः । कः पुनरस्य व्यपेक्षातो भेदः ? उच्यते, व्यपेक्षायां सङ्ख्याविशेषे व्यक्ताभिधानमुपसर्जनविशेषणं च योगः क्रमानियमो व्यवधानं यथेष्टमन्यतरेणासम्बन्धः शब्दान्तरप्रयोगश्च भवति । एकार्थीभावेत्वेकपद्यमेकशब्द्यमेकस्वर्यमेकविभक्तित्वमेकवद्भाव एकशेषः । अनेकविधानामैक्यमेकविधानं चानैक्यमिति । तद्यथा व्यपेक्षायां सङ्ख्याविशेषः राज्ञः पुरुषः, राज्ञोः पुरुषः, राज्ञां वा पुरुषः । एकार्थीभावे तु तदभावो राजपुरुषः । व्यपेक्षायां व्यक्ताभिधानं राज्ञः पुरुषः ; एकार्थीभावे तु राजपुरुष इत्यत्र लोण्मध्यमपुरुषैकवचनं विभक्तिलोपोवेति नाभिधानव्यक्तिः व्यपेक्षायामुपसर्जनस्य विशेषणं, ऋद्धस्य राज्ञः पुरुषः । एकार्थीभावे तदभावः, राजपुरुषः । व्यपेक्षायां च योगः, राज्ञः पुरुषो ब्राह्मणस्य च । एकार्थीभावे तु राजपुरुषः, व्यपेक्षायां क्रमानियमो राज्ञः पुरुषः पुरुषो राज्ञः । एकार्थीभावे तु राजपुरुषोयमित्येव । व्यपेक्षायां यथेष्टमन्यतरेणाभिसम्बन्धः, राज्ञः पुरुषो भार्या वेति । एकार्थीभावे तु नियमतः पुरुषेणैव सम्बन्धो न भार्यया । व्यपेक्षायां शब्दान्तरप्रयोगो दध्नोपसिक्तं परिग्लानोऽध्ययनाय । एकार्थीभावे तु नैवम्, दध्योदनं पर्यध्ययन इति । एकार्थीभावे ऐकपद्यं यथा— आत्मना तृतीयः कण्ठे काल इति । ऐकशब्द्यं यथा— पितरौ भ्रातराविति । ऐकस्वर्यं यथा— चित्रगुः, ब्राह्मणकम्बल इति । एकविभक्तित्वं यथा— नीलोत्पलं, राजपुरुष इति । एकवद्भावो यथा— गवाश्वं, प्लक्षन्यग्रोध इति । एकशेषो यथा— अक्षा वृक्षा इति । अनेकविधानामैक्यं यथा— पुत्रमिच्छत्यात्मनः पुत्रीयति, मुण्डं करोति मुण्डयतीति । एकविधानामनैक्यं यथा— कंसवधमाचष्टे कंसं घातयति, पुष्यचन्द्रयोगं जानाति पुष्येण चन्द्रं योजयतीति । व्यपेक्षायां तु नैवमिति ।

सोऽयमेकार्थीभावो व्यपेक्षावैलक्षण्येन विप्रथमानस्समानस्समासतद्धिताख्यादिषु त्रिषु त्रिधा विख्यायते, वाक्यतुल्यार्थः वाक्याधिकार्थः वाक्यान्यार्थ इति । वाक्यतुल्यार्थो यथा— वीरः पुरुषो वीरपुरुषः, कष्टं श्रितः कष्टश्रित इति । वाक्याधिकार्थो यथा— गुडेन मिश्रा धानाः गुडधानाः, शङ्कुलया कृतः खण्डः शङ्कुलाखण्ड इति । वाक्यान्यार्थो यथा— कुशं लातीति कुशलः, प्रकृष्टो वीणायां प्रवीणः ।

अथायं त्रिप्रकारोऽप्यनेकधा भिद्यते । तद्यथा— नित्यसमासः, नित्यासमासः, असमर्थसमासः, अलुक्समासः, सापेक्षसमासः, निरपेक्षसमासः, पूर्वपदप्रधानः, उत्तरपदप्रधानः, उभयपदप्रधानः, अन्यपदप्रधानः, अन्यथाप्रधानः, अन्यथोपसर्जनः, तिङ्समासः, प्रातिपदिकसमासः, उपपदसमासः, प्रादिसमासः, नञ्समासः, एकदेशिसमासः, सामान्यसमासः, विशेषसमासः, समानाधिकरणः, भिन्नाधिकरणः, उपमानसमासः, उपमेयसमास इति । तेषु

नित्यसमासो यथा— लोहितशालिः, गौरखरः, उद्दालपुष्पभञ्जिका, दन्तलेखक इति ।

नित्यासमासो यथा— अकिञ्चित्कुर्वाणः, अमाषं हरमाणः, अगाधमुत्सृप्ताः, छात्राणां पञ्चम इति ।

असमर्थसमासो यथा— असूर्यपश्या राजदाराः, अपुनर्गेयाः श्लोकाः, अश्राद्धभोजी ब्राह्मणः, अलवणभोजी भिक्षुरिति ।

अलुक्समासो यथा— स्तोकान्मुक्तः, आत्मना तृतीयः, पश्यतो हरः, कण्ठे काल इति ।

सापेक्षसमासो यथा— यज्ञदत्तस्य भ्रातृभार्या, विष्णुमित्रस्य गुरुकुलम्, चूतस्य फलरसः, प्रियायाः स्तनस्पर्श इति ।

निरपेक्षसमासो यथा— वर्षशतमायुरस्य शतायुः, शाकप्रधानः पार्थिवः शाकपार्थिवः, अश्वयुक्तो रथोऽश्वरथः, अश्रेणयः श्रेणयः कृताः श्रेणीकृता इति ।

पूर्वपदप्रधानो यथा— उपकुम्भम्, निर्मक्षिकम्, बहिर्ग्रामम्, पारेगङ्गमिति ।

उत्तरपदप्रधानो यथा— आरूढवानरो वृक्षः, ऊढरथोऽनड्वान्, चित्रगुर्देवदत्तः, मत्तमातङ्गं वनमिति ।

अन्यथाप्रधानो यथा— उन्मत्तगङ्गं, पञ्चकपालः, द्विशाः, कृष्णशार इति ।

अन्यथोपसर्जनो यथा— शाकप्रति, प्राप्तजीविकः, गोगर्भिणी, अग्निस्तोक इति ।

तिङ्समासो यथा— अस्तिक्षीरा, एहिवाणिजा, अश्नीतपिबता, स्वादतमोदतेति ।

प्रातिपदिकसमासो यथा— दधिसेक्, चर्मक्रीती ।

उपपदसमासो यथा— कुम्भकारः, पङ्कजम्, उष्ट्रक्रोशी, सहयुद्धेति ।

प्रादिसमासो यथा— निष्कौशाम्बिः, उत्पश्यः, दुरासदः, सुप्रबोध इति ।

नञ्समासो यथा— अब्राह्मणः, अनेकः, अमार्थः, अपचसीति ।

एकदेशिसमासो यथा— चन्द्र इव मुखमस्याश्चन्द्रमुखी, मृगीव चपला मृगचपला, शस्त्रीव श्यामा शस्त्रश्यामा, अनन्येन सदृशी अनन्यसदृशी ।

उपमेयसमासो यथा— व्याघ्र इव पुरुषः पुरुषव्याघ्रः, करीव कलभः करिकलभः, शार्दूल इव राजा राजशार्दूलः, चन्द्र इव मुखं मुखचन्द्र इति ।

किं पुनरुपमानं किंवोपमेयं किं यदेवोपमानं तदेवोपमेयं, आहोस्विदन्यदुपमानमन्यदुपमेयम् ? किञ्चातः यदि यदेवोपमानं, तदेवोपमेयम्, उपमार्थो न घटते । न हि भवति गौरिव गौः, अन्यदुपमानमन्यदुपमेयं तथाप्युपमार्थो न घटते । नहि भवति गौरिवाश्व इति, एवं तर्हि यत्र किञ्चित्सामान्यं कश्चिच्च विशेषः तत्रोपमानोपमेये भवतः । किं वक्तव्यमेतत् । नहि कथमप्यनुक्तं गम्यते ? मानं हि नामानिर्ज्ञातज्ञानार्थमुपादीयते । यथा प्रस्थादिमानमनिर्ज्ञातस्य धान्यादेर्मेयस्यात्यन्तावच्छेदायोपादीयते तत्समीपेऽयं नात्यन्ताय मिमीते तदुपमानं ; यथा गौरिव गवयः । गौरस्य निर्ज्ञातः तर्हि यस्य गवयो निर्ज्ञातः स्यात् गौरनिर्ज्ञातः कर्तव्यः, तेन गवय इव गौरिति । बाढं कर्तव्यं, यथा भेदसादृश्याध्यासितमूर्तयः पदार्थाः परस्परमनियमेनोपमानोपमेयभावमधिगच्छन्ति । यथा चन्द्र इव मुखं कामिन्यां, मुखमिव चन्द्रो यामिन्यां, यत्र पुनर्भेदसादृश्याध्यासितमूर्तित्वं न, तत्रोपमानोपमेयभावोऽपि न । यथा गौरिव गौः, गौरिवाश्व इति ।

ननु य एते भेदसादृश्याध्यासिताः पदार्थास्ते नान्तरेण देशकालक्रियादिसम्पादितं विरोधं भवितुमर्हन्तीति सामानाधिकरण्यानुपपत्तिः । नैवम् ; यद्यप्युपमानमुपमेयं च परमार्थतो भिन्नं तथाप्युपमानशब्दा गौणीं वृत्तिमाश्रित्योपमेये वर्तमानास्तयोर्भेदं तिरोदधति ।

तथा हि ; यदा व्याघ्रादयः शौर्याद्यतिशयनिबन्धनमुपमानोपमेयसम्बन्धमनुभूय ततः उपमानोपमेयसम्बन्धाद्यारोपिता भेदा उपमेये वर्तन्ते व्याघ्रसदृशोऽयं व्याघ्र इति, तदा पुरुषादिश्रुतिभिरभिन्नाधिकरणाः समस्यन्त इति किं पुनरुपमानोपमेयप्रतिपत्तिनिबन्धनेभ्य एव शब्देभ्यः सादृश्यप्रतिपत्तिः ? उत तेभ्यश्चान्येभ्यश्चेति ।

किञ्चातो यदि तेभ्य एव पुरुषं व्याघ्रं च वीक्षस्वेत्यत्रापि स्यात् । इव प्रयोगवैयर्थ्यं च । अथ द्वितीयः पक्षः पुरुषो व्याघ्र इवेत्येव स्यात्, न पुरुषव्याघ्र इति । यथेच्छसि तथास्तु ।

अस्तु तावत्प्रथमः पक्षः । ननु चोक्तं पुरुषं व्याघ्रं च वीक्षस्वेत्यत्रापि सादृश्यप्रतिपत्तिः स्यात् । इह हि पुरुषव्याघ्रयोर्वीक्षणक्रियासमावेशमात्रं विवक्षितम् । न सादृश्यम् । ननु विवक्षातोऽपि सादृश्यप्रतिपत्ताविवादिशब्दोपादानमनर्थकम् । यत्र मुख्यवृत्तिव्यतिक्रमेण गौणीं वृत्तिमाश्रित्योपमानशब्दा उपमेयविशेषेषु प्रयुज्यन्ते तत्रैव इवादिशब्दविकलाः सादृश्यं गमयन्ति । यथा कश्चिद्व्याघ्रं पुरुषं व्याघ्र इत्याह, तेन मन्यामहे व्याघ्रसदृशोऽयं पुरुष इति । ततश्च व्याघ्रधर्माणां शौर्यबलवत्वादीनां व्याघ्रशब्दात्पुरुषे प्रतिपत्तिर्भविष्यति । यदा पुनरुपमानोपमेयशब्दा

मुख्यार्थप्रतिपत्तये विवक्षितोपमानोपमेयभावेषु वाक्येषु स्वरूपाभेदादशक्ताः सादृश्यमवगमयितुं, तदाऽपेक्षन्ते द्वितीयमिवादिशब्दप्रयोगमिति किं पुनरिहोदाहरणं शस्त्रीव श्यामा शस्त्रीश्यामेति ।

ननु चात्र श्यामाशब्दोपात्तस्य धर्मस्योपमानोपमेयोस्तुल्यताद्योतनायेवशब्दः प्रयुज्यते । व्याघ्र इव पुरुष इत्यत्र तु सामान्यप्रयोगाभावात् कस्य पुरुषव्याघ्रयोस्साधारण्यमिवशब्देनावद्योत्यत इति ? उच्यते, शब्दः क्वचिदभिधावृत्त्या अर्थं बोधयति । यथा गुडशब्दो गुडद्रव्यं, क्वचिद्गमकवृत्त्या, यथा गुडद्रव्याविनाभाविमाधुर्यं । एवमिह व्याघ्रशब्देन व्याघ्राविनाभाविशौर्यादिकं गमितं तस्य व्याघ्रपुरुषयोस्सादृश्यसिद्ध्यर्थमुभयाधिकरणताद्योतनमिवेन क्रियत इति । एतेन शस्त्रीश्यामेत्यपि व्याख्यातम् । अत्राप्यनुपात्तमपि देवदत्तेति गम्यते । क्व पुनरयं श्यामाशब्दो वर्तते शस्त्र्यामित्याह । केन तर्हीदानीं देवदत्तो गम्यते ? समासेन । यदाह— उपमानानि सामान्यवचनैः समस्यन्ते समानत्वं च साधारण्ये सति स्यात् । तत्तु देवदत्तमन्तरेण नोपपद्यत इति । यद्येवं शस्त्रीश्यामो देवदत्त इति न सिध्यति । उपसर्जनस्येति ह्रस्वत्वं भविष्यतीति यदि तर्हि उपसर्जनान्येवंजातीयकान्यपि भवन्ति । तित्तिरिकल्माषीकुम्भकपाललोहिनीत्स्वनुपसर्जनलक्षणईकारो न प्राप्नोति । एवं तर्हि शस्त्र्यामेव शस्त्रीशब्दो वर्तते । श्यामाशब्दस्तु देवदत्तायाम् । एवमपि गुणो निर्दिष्टो भवति । बहवश्च शस्त्र्यां गुणाः सूक्ष्मा श्लक्ष्णा तीक्ष्णा पृथुः श्यामेति । अनिर्दिश्यमानस्यापि गुणस्य भवति लोके सम्प्रत्ययः । तद्यथा— चन्द्रमुखी देवदत्तेति । बहवश्चन्द्रे गुणाः, या चासौ प्रियदर्शनता सा गम्यते । यथा च व्याघ्रोऽयं पुरुष इति बहुष्वपि व्याघ्रगुणेषु शौर्यं बलवत्ता वा प्रतीयत इति । एवमपि समानाधिकरणेनेति वर्तते । व्यधिकरणत्वात्समासो न प्राप्नोति । किं हि वचनान्न भवति । यद्यपि तावद्वचनात्समासः स्यात् । मृगीव चपला मृगचपलेति समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोति । एवं तर्हि तस्यामेवोभयं वर्तते । एतच्चात्र युक्तं यत्तस्यामेवोभयं वर्तते, इतरथा हि बह्वपेक्ष्यं स्यात् । यदा तावदेवं विग्रहः क्रियते तदा शस्त्रीश्यामा, एवं देवदत्तेति तदा श्यामेति देवदत्तायामपेक्ष्यं स्यात् । यदाप्येवं विग्रहः क्रियते शस्त्रीश्यामा देवदत्तेति तदापि श्यामेति शस्त्र्यापेक्ष्यं स्यात् । यदा शस्त्रीश्यामा चासौ श्यामा च शस्त्रीश्यामेति तदा न किञ्चिदपेक्ष्यते, सामानाधिकरण्यं च भवति ।

नन्वेवं सति शस्त्रीशब्दस्य देवदत्तायां प्रवृत्तिनिमित्तमनिर्दिष्टं भवति प्रतीयमानं भविष्यतीति चेत् किं तदिति पृच्छामि । यदि श्यामत्वमेव ? श्यामेति शब्दस्योक्तार्थत्वादप्रयोगः प्राप्नोति । नहि गुणवृत्त्या प्रतिपादितेषु गुणेषु तदभिधानाय गुणवचनः प्रयुज्यते, न हि भवति पुरुषोऽयं व्याघ्रशूर इति ।

अथानभिहितं तैक्ष्ण्यादिकमुपादाय शस्त्रीशब्दो देवदत्तायां वर्तते तर्हि तीक्ष्णश्यामगुणवचनयोः खञ्जकुणवत्समासे उपमानानि सामान्यवचनैरिति विरुध्यते, श्यामशस्त्रीति प्रयोगः प्राप्नोति ।

ननु पक्षत्रयेऽपि दोषदर्शनात् पक्षान्तराभावाच्च किन्तु भवितव्यमेवोपमानसमासेन भवितव्यम् । किन्तु पूर्वोत्तरपक्षौ व्युदस्य मध्यमे पक्षे शस्त्रीव श्यामा देवदत्तेत्यवैयधिकरण्येऽपि वचनसामर्थ्यात् ।

ननूक्तं तत्र मृगचपलेति समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोति । नैवम् । नेह पूर्वपदं शस्त्रीत्वेन विवक्षितमपि तु मृगत्वजातिमात्रेण यथा मृगक्षीरं कुक्कुटाण्डमिति । उपमानसमासे गुणवचनस्य विशेषभावत्वात् सामान्यवचनत्वाप्रसिद्धिः । यतः श्यामाशब्दोऽयं सादृश्यसिद्धये शस्त्रीशब्देनाभिसम्बध्यमानो विशेषवचनः सम्बध्यते । तेनैवं श्यामत्वस्य उभयत्र भावात्तद्वाचकत्वाच्च शब्दसामान्यवचनत्वप्रसिद्धेः । न चावश्यं स एव सामान्यवचनः। यो बहूनां सामान्यमाह, द्वयोरपि यः सामान्यमाह, सोऽपि सामान्यवचनः ।

अथवा सामान्यवचनैरित्येतेन सर्वश्च शब्दोऽन्येनाभिसम्बध्यमानो विशेषवचनः सम्पद्यते । तत एवं विज्ञास्यामः प्रागभिसम्बन्धाद्यः सामान्यवचन इति ।

नन्वेवं सत्युपमितं व्याघ्रादिभिरित्यत्र सामान्याप्रयोगग्रहणमतिरिच्यते । व्याघ्रादयोऽपि भेदोपनिबन्धनस्यैवादेः प्रयोगे यदोपमान एव वर्तन्ते तदा सामान्यप्रयोगमपेक्षन्ते पुरुषोऽयं व्याघ्र इव शूरः सिंह इव बलवानिति । अभेदोपक्रमे चाभिधाने सम्बन्धनिमित्तस्योपमानशब्दैरेव अन्तर्भावितत्वादप्रयोगः सामान्यशब्दस्येति । अप्रयोगेऽपि च सामान्यधर्मावसायश्चन्द्रमुखवद्भवि-ष्यति । तदुक्तं, सिंहो व्याघ्र इति पूजायां, श्वा काक इति कुत्सायामिति ; नैवम्, यद्यन्त-र्भूतोपमानकुत्सार्थं सम्बन्धप्रतिपदो व्याघ्रादिशब्दैरुपमेयं पुरुषादिपूजार्थं वाभिधीयते । तथापि तन्निमित्तस्यानेकत्वान्नियमाय निमित्ततृतीयान्तशौर्यादिपदप्रयोगो न विरुध्यते । पुरुषोऽयं व्याघ्रः शौर्येणेति भिन्ने हि वस्तुन्यभेदोपचारः सारूप्यमात्रं गमयेन्न तस्यात्मातिशयं ; यथा हि सुमनायते दुर्मनायते अभिमनायत इति सुदुरभीनां भवत्यर्थविशेषणपक्षे प्रत्ययेनोपात्तार्थानामपि प्रत्ययस्य रूपाभेदादनवसीयमानविभागमुपसर्गार्थमवच्छेत्तुं प्रयोगः । कथं पुरुषव्याघ्रादौ तस्याः पूजाया निमित्तभेदसम्भवे नियमाय सदृशभागोपनिपाती शब्दः प्रयुज्यत इति । एवमयमेकार्थी-भावस्तद्धिताख्यातयोरपि अनन्तप्रकार एव द्रष्टव्यः । तत्र तद्धिते सामान्येन त्रिधा, सम्बन्ध-विषयः, कारकविषयः, स्वार्थविषयश्च । तेषु सम्बन्धो द्विधा, प्रधानमप्रधानं च । प्रधानं यथा– गावोऽस्य सन्ति, सलातुरोऽस्याभिजनः सालातुरीय इति । अप्रधानं यथा– वसिष्ठस्यापत्यं वासिष्ठः, चाषाणां समूहश्चाषमिति । कारकं द्विधा, प्रधानमप्रधानंच । प्रधानं यथा— विषेण वध्यो विष्यः शत्रुः, पद्मस्मिन् दृश्यं पद्यः कर्दम इति । अप्रधानं यथा— व्याकरणं वेत्ति अधीते वा वैयाकरणः, अक्षैर्दीव्यत्याक्षिक इति । स्वार्थो द्विधा– मुख्य उपचरितश्च । मुख्यो यथा— यव एव यावकः, मणिरेव माणिक इति । उपचरितो यथा— कुशाग्रीया बुद्धिः, काकतालीयमिव काकतालीयो न्याय इति । आख्यातेऽपि त्रिधा, कारकेण, सम्बन्धिना,

प्रादिभिश्च । कारकेण यथा– अभृशो भृशो भवति भृशायते, शब्दं करोति शब्दायते, हस्तिना अतिक्रामति अतिहस्तयति, कष्टाय कर्मणे क्रामति कष्टायते, पाशान्विमोचयति विपाशयति, प्रासाद इवाचरति प्रासादीयतीति । सम्बन्धिना यथा— व्याकरणस्य सूत्रं करोति व्याकरणं सूत्रयति, कंसस्य वधमाचष्टे कंसं घातयति, आरात्रेर्विवासमास्ते रात्रिं विवासयति, पुष्येण चन्द्रस्य योगं जानाति पुष्येण चन्द्रं योजयति, माहिष्मत्यां सूर्योद्गमं प्राप्नोति माहिष्मत्यां सूर्यमुद्गमयति, कालस्य गमनमुपविष्टः प्रतिपालयति कालं गमयतीति ।

प्रादयः पुनः षोढा– वाचकाः, द्योतकाः, सहाभिधायकाः, विशेषकाः, निरर्थकाश्चेति । ते च क्रिययैव सम्बध्यमानाः क्रियाप्रधानत्वादाख्यातस्य तद्व्यपदेशभाजो भवन्ति । तत्रोपसर्गाणां वाचकत्वं यथा– प्रादयो गताद्यर्थे प्रथमया, प्राचार्यः, प्रान्तेवासीति । अत्यादयः क्रान्ताद्यर्थे द्वितीयया, अतिखट्वः, अतिमाल इति । अवादयः क्रुष्टाद्यर्थे तृतीयया, अवकोकिलम्, अवमयूरमिति । पर्यादयो ग्लानाद्यर्थे चतुर्थ्या, पर्यध्ययनः, परिप्रवचन इति । निरादयः क्रान्ताद्यर्थे पञ्चम्या, निर्वाराणसी, निष्कौशाम्बिरिति । एवं प्रपतितः पर्णः प्रपर्णः, प्राचीन-पलाशः, सङ्गता आपोऽस्मिन्निति समापम्, सङ्गतमक्ष्णेण समक्षमिति ।

धातुलीनस्यैवार्थविशेषस्य प्रकाशकत्वं द्योतकत्वम् । द्योत्यश्च तदन्यः । तत्सदृशस्तद्विरुद्ध-स्तदभावस्तदुत्कर्षस्तदपकर्ष इति षडर्था भवन्तीति । तेषु तदन्यो यथा– प्रतीक्षते, उपक्रमत इति । तत्सदृशो यथा— संवदति, अनुकरोतीति । तद्विरुद्धो यथा— प्रतिष्ठते, उन्मज्जतीति । तदभावो यथा— वियुज्यन्ते, प्रस्मरतीति । तदुत्कर्षो यथा– प्रगल्भते, अतिक्रामतीति । तदपकर्षो यथा— विहसति, प्राश्नातीति । अत्र च योऽसौ क्रियात्मभूतो धर्मः कालहरणादि-स्तद्धात्वभिहितमेवासत्त्वभूतमनभिदधत् प्रादिरवद्योतयति । यथाऽक्षिनिकोचादयोऽनाभिदधत एवार्थान् प्रदर्शयन्ति, एवं क्रियास्थान् प्रारम्भादीनब्रुवन्त एव प्रादयोऽवद्योतयन्ति । धातोरेकाकिनः क्रियाविशेषाभिधानासामर्थ्ये सहकारिभावः सहाभिधायकत्वं तत्रान्तरङ्गो बाह्यः अव्यभिचारी व्यभिचारी व्यवहितः सविशेषश्च सहाभिधायको भवति । तेष्वन्तरङ्गो यथा— सङ्ग्रामयते, असङ्ग्रामयत । बाह्यो यथा— अनुरुध्यते, अन्वरुध्यत । अव्यभिचारी यथा— अधीते, अध्येति । व्यभिचारी यथा– आचामति, संधुक्षयति । व्यवहितो यथा — पुच्छमुद्-स्यत्युत्पुच्छयते । सविशेषो यथा— सेनया अभियाति अभिषेणयति, वीणयोपगायति उपवीणयति । सहार्थाभिधाने तूपसर्गयोर्भेदप्रतिपत्तिः कथम् ? यद्यपि धातुरुपसर्गं न व्यभिचरति व्यभिचरत्येवोपसर्गो धातुम् । अतः शक्यतेऽन्वयव्यतिरेकाभ्यां भेदः कल्पयितुम् । यावानयं समादिरुपसर्गोऽन्यत्र दृष्टः इहापि तावानेव भवितुर्भवतीति । सजातीयेभ्यश्चावच्छेदको विशेषकः । स षोढा, प्रकृतिविशेषकः, प्रकृत्यर्थविशेषकः, प्रत्ययविशेषकः, प्रत्ययार्थविशेषकः, उभयविशेषकः, उभयार्थविशेषकश्च । तेषु प्रकृतिविशेषको यथा— विजयते, पराजयते ।

प्रकृत्यर्थविशेषको यथा— सङ्क्रीडति, सङ्क्रीडते । प्रत्ययविशेषको यथा— विशालं विशङ्कटम् । प्रत्ययार्थविशेषको यथा— अभिमनायते, दुर्मनायते । उभयविशेषको यथा— उपतिष्ठति, उपतिष्ठते । अत्र च प्रादिः प्रकर्षादिकमर्थं ब्रुवाणः क्रियां सामान्येनोपगृह्णाति । न क्रियासामान्यविशेषयोरात्मानं नियमयति । धातुरपि क्रियां ब्रुवन् प्रकर्षादिकमर्थं सामान्येनोपगृह्णाति । न तु सामान्यविशेषयोरात्मानं नियमयति । परस्परोपश्लेषे तु तयोर्विशेषणविशेष्यभावो नीलोत्पलादिवद्भवति । कार्यार्थत्वं यथा— प्रयुङ्क्ते, पराकरोति, अभिषुणोति, प्रणमति, वित्त, समीपमिति । आत्मनेपदं, परस्मैपदं, षत्वं, णत्वं, तत्वं, ईत्वं च कार्याण्युपसर्गे भवन्ति । निरर्थकत्वं यथा— निह्नुते, निरवञ्जन्ति, प्रलम्बते, संश्रयतीति । अत्र पदोपचयमात्रे प्रादिः प्रयुक्त इति निरर्थकत्वम् । आहुश्च—

स वाचको विशेषाणां स भवेद्द्योतकोऽपि वा ।
शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते ॥
क्रियाविशेषको वा स्यात्काव्यार्थं वोपदिश्यते । पदोपचयमात्रेवाऽनर्थकः प्रादिरिष्यते ॥

इति । एवमयमनेकरूपः पदैकार्थीभावः । एवं वाक्यार्थीभावोऽपि । तत्राख्यातं साव्ययकारकविशेषणं वाक्यं एकातिङ्वाक्यमित्यादयो विकल्पाः । तत्र चैकवाक्यत्वात् पदादुत्तरयोस्तिङामन्त्रितपदयोर्निघातः । युष्मदस्मदोर्वान्नावादय आदेशाः । वाक्यस्य टेः प्लुत उदात्त इति तु वाक्याचामन्त्यस्य प्लुत इत्यादीनि प्रयोजनान्यभिधीयन्ते । क्रियाकारकाव्ययविशेषणपदार्थानां च परस्परमुपकार्योपकारकभावेनावस्थितानां भावना विधिः प्रतिभा वेति वाक्यार्थः प्रथते । एवं वाक्यानामपि परस्परमुपमानोपमेयभावादिभिरिवादिशब्दप्रयोगे मुक्तकादिष्वेकार्थीभावो भवति । एतेनैकक्रियाकारकाभिनिवेशिनोर्युगलकसन्दानितककलापककुलकादयो वाक्यविशेषा व्याख्याताः । तत्र द्वाभ्यां चतुष्पदीभ्यां युगलकम्, तिसृभिः सन्दानितकम्, चतुर्भिः कीलापकं, पञ्चादिभिः कुलकमिति संज्ञा विधीयते ।

एतेनैकप्रघट्टकोपनिबन्धानां सुभाषितानां समूहः सङ्घातः । अनेकप्रघट्टकोपनिबद्धानां तु कोश इत्यपि व्याख्यातम् । नगरर्तूद्यानचन्द्रार्कोदयार्णववर्णनादयस्तु सङ्घातरूपा एव प्रबन्धान्तःपातिनो वाक्यसमूहाः प्रकरणव्यपदेशभाजोऽवान्तरवाक्यतां लभन्ते । तदर्थाश्चैकार्थीभावमनुभवन्ति ।

यस्तु तैरुपक्रियमाणो महावाक्यार्थः सर्गबन्धादावाख्यायिकादौ मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्यैः पञ्चसन्धिभिरुपक्षेपपरिकरादिभिश्चतुष्षष्टिसन्ध्यङ्गैरङ्कषोडशकरूपभारत्यादिरूपवृत्तिचतुष्टयेन च यथायोगमुपकृतः कृतान्योन्यविशेषणविशेष्यभावः सुभद्राहरणं जानकीहरणमित्यादिना महावाक्यार्थरूपेण प्रथते स प्रबन्धैकार्थीभावोऽपर इत्याख्यायते ।

यस्तु तद्रूपरामायणादिप्रबन्धार्थानामवधारणेनोपहितसंस्कारस्य रामवद्वर्तितव्यं न रावणादिवदित्यादिविधिनिषेधप्रतिभाविशेष उपजायते, स समस्तविश्वव्यापी चतुर्वर्गैकहेतुः परो महावाक्यैकार्थोऽर्थमूर्त्या विपरिणतमनादिनिधनमखण्डं शब्दब्रह्मेत्युच्यते ।

अखण्डः सैष वाक्यार्थः शब्दब्रह्मेति गीयते ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्ष्यमाणानामजिह्मा राजपद्धतिः ॥

उक्ताश्चतस्रोऽथ पुनश्चतस्रः
शब्दार्थसम्बन्धभिदाः क्रमेण ।
चतस्र एवाथ वचोविशेषे
निषेदुषीस्ताः परिकीर्तयामः ॥

इति महाराजाधिराज श्री भोजदेवविरचिते शृङ्गारप्रकाशे
सापेक्षशब्दशब्दशक्तिप्रकाशो नाम अष्टमप्रकाशः
समाप्तः ॥

श्रीशृङ्गारप्रकाशग्रन्थस्थानां प्रथमाद्यष्टमप्रकाशान्तभागसंग्रथितानां पद्यानां

वर्णानुक्रमसूची ।

पद्यानामादिभागः.	पत्रसंख्या.
अ	
अइदिअर किणपेच्छसि.	२२४
अकर्मकत्वे सत्येवं	५१
अकुञ्चितप्रेमनिरूपितक्रमं	८७
अखण्डः सैव वाक्यार्थः	३०४
अगणिअणयणायासा	२३६
अग्रशालमधिरुह्य	१८२
अङ्कुरिते पल्लविते	२३०
अङ्गहिंगिहसुगच्छडि	२३८
अङ्गेनाङ्गं प्रतनु तनुना	२६८
अच्छिन्नमेखलमलब्ध	१
अजन्मा पुरुषस्तावत्	८४
अजित्वा सार्णवामुर्वीं	२७५
अडादीनां व्यवस्थार्थं	६१
अण्णसन्नद्ध बालिअ	२४९
अण्णं लडहत्तणअं	२३६
अत एवहि वाक्यार्थं	२१७
अत एव पदं लोके	२९५
अतहट्ठिएवि तहतह	२१९
अन्तर्भूतणिजर्थानां	१४६, १५०
अन्तस्थत्वं वहिष्ठत्वं	१३६
अत्ता एत्थ णिमज्जइ	२४७
अत्रार्धकुङ्कुमेत्युक्ते	२१९
अत्रापि पक्षे पूर्वस्मिन्	१३५
अतिथिं नाम काकुत्स्थात्	९५

पद्यानामादिभागः	पत्रसंख्या
अतिक्रान्तसुखाः कालाः	२२७
अतोऽत्र किञ्चिद्भवतीं	१८१
अथ वासवस्य वचनेन	१२१
अत्थविसेसा णहि तह	२
अथाजिनाषाढधरः	११७
अथाह वर्णी विदितः	१५८
अथानुवृत्ति व्यावृत्ति	१८९
अथाभिव्यक्तिसामर्थ्य	१८८
अथेदं रक्षोभिः कनक	२२८
अर्थेषु च प्रयोगेषु	२१०
अथो विभक्त्यर्थविधः	१९०
अथोपरिष्टाद्भ्रमरैः	११८
अदूरविप्रकर्षात्तु	२२१, २५२
अदृष्टत्वात्प्रतिनिधेः	१४५
अध्यासामासुरुत्तुङ्ग	२७५
अध्रुवेण निमित्तेन	२०७
अनन्तरोक्तसम्बन्धः	५५
अन्यथैवाग्निसंयोगात्	२१०
अन्यथैव प्रवर्तन्ते	२९५
अन्यथैव मतिश्शाब्दी	२९५
अन्यत्रप्रवृत्तौ शब्दस्य	•२११
अन्ये पूर्वापरीभूत	२११
अनाश्रिते तु व्यापारे	१०१
अनिराकृततापसम्पदं	२२५

पद्यानामादिभागः	पत्रसंख्या
अन्विष्यद्भिरयं चिरात्	२२९
अन्वितस्याभिधानेऽपि	२८६
अनुस्कुनुहि मा मन्तून्	३
अनुवृत्तिर्हि येष्वस्य	१८९
अनुरागवती सन्ध्या	२२८
अनुस्यूतेव भेदाभ्यां	६६
अनेन यूना सह पार्थिवेन	१७९
अनेन सार्धं विहराम्बु	१७९
अपकर्ताऽहमस्मीति	१६६
अप्यवस्तुनि कथाप्रवृत्तये	२४५
अपाये यदुदासीनं	१५२
अप्रातिकूलिकतया	२
अप्राप्यपचेतसिमानि	१७४
अपि प्रसन्नेन महर्षिणा	१६९
अपूर्वं कालशक्तिं वा	५७, १४०
अपेक्ष्य मध्यमः पूर्वं	२६०
अभिधा भावनामात्रः	२१२
अभिधा च विवक्षा च	२६७
अभिधात्री मता शक्तिः	२९६
अभिधेयाविनाभूत	२२३
अभिनवकरिदन्तच्छेद	२२३
अभिमुखे मयि संहृतं	१७०
अभ्युद्गता पुरस्तात्	२२४
अभूदभूमिः प्रतिपक्ष	११७
अमंक्ष्यद्भसुधातोये	१६५

अम्बुरुखोच्चिअ २६९
अमृतममृतं चन्द्रः २२७
अमृतात्मनि पद्मानि २३२
अयमान्दोलितप्रौढ ९२
अयमालोहितच्छायो २३२
अयं निजः परो वेति २५७
अलंकृताप्यन्वय १७९
अलभ्यशोकाभिभवा १८०
अव अक्खो ञ्ची समु १०३
अवऊहिअ पुव्वदि २३०
अवचनं वचनं प्रिय १६९
अवधेरपि वाच्यत्वं ४५
अवनिपवनवह्निव्योम २७५
अवस्था वस्तूनि प्रथयति २७६
अवस्तुनिर्बन्धपरे १७५
अव्ययानि निपाताश्च ३७
अविभागोऽपि बुद्ध्यात्मा २२०
अविग्रहागतादिस्था ५१
अश्वधीश्शाबलेयादौ १८८
अशोकनिर्भर्त्सित १७६
अष्टमीचन्द्रके कुन्द १४५
असकलहसितत्वात् २६९
असंभृतं मण्डनं ११७
असौ शरण्यश्शरणा २६८
अस्तीत्यालोचनाज्ञानं २१८
अस्मिन्नपारे संसारे २४०
अस्मिन्नीषद्वलितविषम २२५
अस्त्युत्तरस्यां दिशि ११९
अस्तु वापि तरसस्मात् २६०
अस्यौपम्यद्वयस्यापि ४७
अस्वच्छे सलिलात्मनि ११६
अहपे . . तिववगा १२०
अहं वा कुम्भकर्णो वा १५८
अर्हतो या क्रियाकर्तुः ४७
अक्षत्रारिकृताभिमन्यु २४४

आ

आकृतिग्रहणा जातिः २०८
आकारैश्च व्यवच्छेदात् २०७
आकांक्षासन्निधिप्राप्त २७८
आख्यातानां तु वाच्यो २११
आंखीजणुकणांस १०३
आज्ञापय ज्ञातिविशेष १७५
आज्ञातं स जटायुरेषः २४२
आत्मस्थितं गुणविशेष १
आत्मनेपदरूपेण ९०
आत्मानमात्मना वेत्सि २३२
आद्यमेव हि विज्ञानं १८८
आद्यूनस्सन् गृहिण्येव १७३
आर्द्रकेसरसुगन्धि १७५
आधारत्वमिव प्राप्ताः १४८
आनन्त्यव्यभिचाराभ्यां २७९
आप्याययति मित्रोऽयं १८३
आभरणस्याभरणं २३०
आभावनोदयमनन्य २
आभासोऽवगमो व्यक्तिः १४७
आयतीगवमागच्छति ७६
आयामियामिनीभोग १४१
आयान्त्यपि न तत्पिण्डं १८८
आरूढो मलयाचलं २३४
आलोचनान्ताच्छ्रवणे १८२
आशुदिशशानो वृषभो १२०
आश्लेषे प्रथमं क्रमात् २४६
आस्कन्दनदलत्कुन्द १४१
आसाइअंअणाए २४७
आस्तां विधिपदं तावत् २१४

इ

इङ्गुदीपादपः सोयं २२४
इतस्स दैत्यः प्राप्तश्रीः २४५
इति प्रविश्याभिहिताः १७६
इति प्रायोभावाः १७५
इतो गमिष्याम्यथ ११७, १७८
इत्यौषधिप्रस्थविलासि ११९
इत्थं विधिज्ञेन पुरो ९४
इत्थं तयोरध्वनि ११८
इदमप्यपरं हस्त १९०
इदमन्धं तमःकृत्स्नं २२०, २३७
इदमम्लानमानायाः २३५
इदमाद्यं पदस्थानं ३०४
इन्द्रियैरन्यथाप्राप्तौ १३८
इयं च दुर्वारमहा ११८
इयं गेहे लक्ष्मीरियं २८०
इवशब्दप्रयोगे तु ५३
इहाधीती पूर्वं ९६
इहाप्यानीयमानायां १९०

उ

उक्तः क्रमात् द्वादशभेद १२५
उक्ता षोढैवमेषापि ६
उक्ताश्चतस्रः प्रथमाः २६७
उक्ताश्चतस्रोऽथ पुनः ३०४
उच्यतां स वचनी २४२, २४४
उच्छिणसुपडिअ कुसुमं २४८

उत्तारणाय जगतः ५०
उत्तालालकमञ्जनानि १४१
उत्फुल्लस्थलनलिनी २२५
उदारकीर्तेरुदयं ९२
उद्वेजयत्यङ्गुलि १८१
उन्नमय्य सकचग्रहं १८३
उन्मीलितं तूलिकयेव ११७
उपमानोपमेयत्वं ४७
उपाधिरेवं त्रिविधः १९०
उपायमात्रान्नानात्वं २०३
उपाध्वं तत्पान्थाः २२८

ऊ

ऊरुमूलचपलेक्षणं १३१

ए

एक इह जीवलोके ५९
एकदू असलोणीअ १०२
एक एव हि कालोऽस्याः १९०
एकातपत्रं जगतः १९२
एका हि अहिंहि २३८
एति जीवन्तमानन्दः २३१
एते वयममी दाराः १८३
एद्दहमेत्तत्थणि आ २४५
एवमिन्द्रियसुखस्य १७४
एवं डित्थादिशब्दानां २०८
एष्टव्या बहवः पुत्राः २५०
एस अवसाणविरसो २२९

ओ

ओदने साध्यमानेऽपि २१२
ओप्यन्ते चोद्धियन्ते च २७८

औ

औदासीन्यदशायां तु २१५
औषसातपभयात् ९४

क

क . . . ए धूमं धारे ९६
कण्डूयति न यो मर्म ४
कत्तोसंवडइमहं २२६
कर्तृकर्मव्यवहितां १५४
कर्त्रादिवचनास्तावत् २११
कदलीप्रकाण्डरुचिर ९५
कदा नौ सङ्गमो भावी २४५
कनकफलकस्फारजघना २३४
कन्यारत्नमयोनिजन्म १२०
कन्यान्तःपुरमेव ५४
कपोलौ लोहिताग्रेते ४
कमलमनम्भसि कमले २२५
कामिशुध्यन्तु यज्वानः ४
करौ धुनाना नव ९५
कलक्वणितगर्भेण १८१
कलाभिः पृथगर्थाभिः १४२
कविः सृजति काव्यानि ३
कस्स व ण होइ रोसो २५०
कस्य नावनतिं कुर्यात् २३०
कस्य नो कुरुते मुग्धे १०२
कंबलि आल एकं ते १०३
क्वचित्सम्भाविनो भेदाः ६२
क्वचित्स्वल्पेऽप्यर्थे प्रचुर २४०
का त्वं शुभे कस्य १७५
कार्यज्ञः प्रष्टव्यः २७२
कार्यकारणभावो हि २०९
कारकत्वं च पक्षेऽस्मिन् १३४
कालः कालविदामेकः १४२
कालात्मानमनाश्रित्य १४३
कालभावाध्वगन्तव्याः १४८
कालाध्वभावदेशानां ,,
कालानुपाति यद्रूपं ३८, १३६
कालो वा विश्वरूपात्मा १४३
काषाः पुष्यन्ति मेघान्ते १५४
किं किरातेन यच्चक्रे २४१
किं गतेन नहि युक्तं २४२
किञ्चिच्छेषनिशातुषार १७३
किं कस्स वारएणं २८०
किन्तु स्वहेतोरस्या व्यक्तिः १९०
किं द्वारि दैवहतिके ५८, २२६
किमिदानीं फलस्यैव २१६
किमिव हि मधुराणां २२९
क्रियन्मानं जलं विप्र १०४
कुचद्वन्द्वे तन्वि द्विप १७०
कुत्साप्रशंसातिशयैः ५८
कुत्सितत्वेन कुत्स्यो वा ५९
कुतो भवानध्वनि ९५
कुमुदानि प्रयुज्यन्ते ११६
कुमुदानि निमीलन्ति २३१
कुलेन कान्त्या वयसा १९२
कुविआओ पसा २२४, २३५
कुशलं तस्या जीवति ११६
कृतोर्मिलेखं शिथिलत्वं १७४
क्रममारचय्य च १२१
क्रमात्सदसतां तेषां १३८
क्रमेण युगपत्पूर्वं १४४
क्रियमाणं तु यत्कर्म ८६

क्रियायाः करणं तस्य १००
क्रियाकृता विशेषाणां १४७
क्रियानिमित्त संसर्ग १३५
क्रियाभेदात्तथैकस्मिन् १४२
क्रियामन्ये तु मन्यन्ते ५७, १४०
क्रियाया द्योतको नायं १७
क्रियायाः परिनिष्पत्तिः १५०
क्रियायां कालोऽन्तर्भवति १६०
क्रियायाश्च पदार्थत्वात् २२२
क्रियाविशेषजन्यानां १६, १८६
क्रियाविशेषाः संघातैः ६१
क्रियाविशेष एवासौ २१५
क्रियाविशेषको वा स्यात् ३०३
क्रियाशब्दास्तु विविधाः २११
क्रियोपाधिश्च सम्भूत १६२
क्रोधं प्रभो संहर ९२, १६६
क्रेनासीनः सुखमकरुणे २३३
क्वेदमन्यत्र दृष्टं चेत् १८९
कौमारी सा भवेन्द्रार्या ५०
कंवळि आळ एर्क ते १०३

ग

गअणंच मत्तमेहं २३६
गङ्गायां घोष इत्यादौ २१०
गच्छ गच्छसि चेत्कान्त २३९
गच्छेति वक्तुमिच्छामि २०
गतमस्तं यथार्केण ४०
गतया पुनः प्रतिगवाक्ष ९३
गतस्सकालो यत्रासीत् २४०
गतेऽर्धरात्रे परिमन्दमन्दं २०
गन्धर्वपुरसुरायुध २२६
गर्भेष्वम्भोरुहाणां २५१
गान्धर्वमस्त्रं तद्‌तः ११८
गामधास्यत्कथं नागः १६५
ग्लानिच्छेदिक्षुत्प्रबोधाय १७३
गिरोभिर्ब्रह्म वामशीः ५
गुणः कृतात्मसंस्कारः १४२
गुणं शुक्लादिशब्दास्तु २११
गुणभावेन साकाङ्क्षं २७८
गुणभूतैरवयवैः १३७
गुणानामेव दौरात्म्यात् २२९
गुणानुरक्तामनुरक्त ९१
गुणानुरागमिश्रेण २१९, २२५
गुणैकनियतास्तावत् २११
ग्रसमानमिवौजांसि २२७
ग्रहीतृग्रहणग्राह्य २२०
गेहाजिरेषु नवशालिकणा ९६
गेहाद्याता सरितं १८०
गोनासाय नियोजिता १८१
गोलाणईए तूहे २२६
गौर्गौः कामदुघा सम्यक् २४८
गौरी मा तस्य तत्यैताः १७३

च

चकितहरिणीहारिनेत्र २३५
चटच्चटितिचर्मणि २१
चञ्चद्भुजभ्रमित ३०
चंचवग्रचुम्बितताम्र १४१
चन्दणिहिपक्कचलणा २७१
चन्द्रज्योत्स्नाविशद २३१
चन्द्रमाः पीयते देवैः २३२
चपलो निर्दयश्चासौ २३९
चर्माणि द्वीपिनं हन्ति ३६, १५५
चयापचयसङ्घात २०६
चरन्ति चतुरम्भोधि १०३
चलन्तो देवदत्ताद्याः १३५
चारुता वपुरभूषयत् ९१
चित्तनिर्वृतिविधायि ९१
चिदण्डिमुखिमस्जीनां १५०
चिरक्षिप्रादिभेदे च १४२
चिरक्षिप्रव्यवस्थानं १४२
चुम्बनादलकचूर्ण ९३
चुम्बिज्जइसअहुत्तं २३६
च्युतामिन्दोर्लेखां २२५
चूडामणिशिरोरत्न १८३
चोद्यचुञ्चुत्वमुत्सृज्य १९०

छ

छदा . . वळअ दीहिअ २२८
छिन्नेन पतता वह्नौ २०

ज

जनाय शुद्धान्तचराय २२०
जयत्यमलकौस्तुभ १०३
जहविग्गवडहीजइ १२१
ज्वलन्त्येधांसि न पुनः १३५
जातश्चायं मुखेन्दुस्ते १३६
जातिगुणाज्जातिगुणे ४४
जातिमेवाकृतिं प्राह २०५
जिज्ञासा जायते बोद्धुः २८२
जीविताशा बलवती २४७

ठ

ठिअमठ्ठिअं वदीसइ २४०

ण

णमह अवड्ढिअतुङ्गं १०२, २५७
णिअदइअदंसगुणकिद २४७

त

तटित्खचयतीवाशाः ३
ततः कुमुदनाथेन १०४
ततः किराताधिपतेः ११७
तत्तदुच्छ्वसितपीतं ९२
तत्त्वे वा व्यतिरेके वा १४५
तथा कर्त्रा नियुक्तेषु १४६
तथा गतायां परिहास १८१
तथाहि रौति यश्रुते २१७
तथैव जातियुक्तेति १९०
तथोपलक्षणे जातौ २०७
तदभिव्यञ्जिका यत्र १९०
तदंशग्रहणे तस्य १८८
तदागमे तत्प्रतीतेः २११
तदेवास्तु प्रमाणं वा १८८
तदेतत्काकताळीयं २७१
तपः श्रुतं च योनिश्च ८२
तत्प्रयोगावसेयत्वात् ६२
तमन्वगच्छत्प्रथमः १७९
तमस्य लोकयन्त्रस्य १४२
तमातिथेयी बहुमान ११७
तया दुहित्रा सुतरां १८१
तया विभज्यमानोऽसौ १४२
तस्मात्कारकचक्रेण १३५
तस्मात्क्रियान्तराभावात् १३५
तस्मात्पूर्वाक्षसम्पाते १८९
तस्मात्सकृदभिव्यक्ता १९०
तस्मादस्मिन्नभिव्यक्ता १९०
तस्मादगोनिवृत्तं तत् ,,
तस्मै हिमाद्रेः प्रयतां १७७
तस्मिन् क्षणे पौरविला ११९
तस्याः प्रकामं प्रिय १८०
तस्यैव वाच्यताभाव २११
तत्स्वभावविशेषत्वात् ३९
तह कमळक्कमळचन्दो २२७
तं विनिष्पिष्य काकुत्स्था ११८
त्वं जीवितं त्वमसि २०, २४४
त्वन्मुखं त्वन्मुखमिव २३२
त्वमहनीव निवर्हय १७८
त्वमेव हव्यं होता च २५७
तात्पर्यमेव वचसि १, २२१
ताम्बूलबहलरक्तः २२४
ताभ्यामुत्पादितो वत्सः १९०
तामस्मदर्थे युष्माभिः ९२
ताला जाअन्ति गुणा २२७
तालैश्शिञ्जिद्वलयसुभगैः २२९
तावदेव विनिश्चित्य १३४
तासां मुखैरासव ११९, १२१
तां पुलोमतनया ९२
तां प्रत्यभिव्यक्त १८१
त्यागरूपं प्रहातव्ये ४९, १४९
तिग्मं धाम चिरं चकास्ति ११६
त्रिधोपसर्जनं त्रेधा ८४
तीर्थेषु सत्सु द्विज २७५
तीव्रः प्रतापो मधुरं २०४
तुग्ग अढोब्झरमुहळे १२०
तुरङ्गकान्तामुख २३५
तुषारलेशाकुलितोत्पला १७०
तुहअसमं सोहग्गं २७१
तेच्चिअजीआतेच्चे २८०
तेनाद्रिबन्धो ववृधे १०४
तेनान्विताभिधानं हि २९६
ते पुच्छिज्जदि पत्तडि २७३
तेऽमी क्रिया च कालश्च १५९
तेषामुच्चावचार्थे ६२, १८४
तेषां न द्रव्यपर्यन्ता २११
ते हिमालयमामन्त्र्य ११९
तैश्शरीरं च वाक्यानां १२०
तैक्ष्ण्यगौरवकाठिन्य १४५

द

दण्डादण्डि न कुर्वन्ति ७६
दत्तमात्तमदनं दयितेन १९२
दत्तानन्दाः प्रजानां २५१
दन्तोज्वलासु विमलोपल २७०
दशरश्मिशतोपमद्युतिं २३५
दातुं वा प्रभवसि मां ९४
दातुः स्यातुर्द्विषां २२४
दानं वित्तादृतं वाचः २४६
दिङ्मातङ्गघटाविभक्त २४३
दिणिहदिवट्ठो इति १२१
दिनानि रात्रयः पक्ष १४३
दिलीपानन्तरं राज्ये २७१
दिवाकरकरालात १४१
दुर्वचं त्वदथ मास्म १६५
दूइ तुमं विअणिउणा २३६
दाक्षिण्यत्र यदा त्वस्याः १९०
देआपसि अणिवत्तसु २४८
देवदत्तादिकुत्सायां ५९
देहेनैवात्मनस्तस्मात् १९०
दैत्याधिपप्राणमुषां २१९
दैवादपत्रमच्छायं २६८
द्रव्यमात्रस्य तु प्रेष १५५
द्रव्यात्मापि च यः कालः १६०
द्वन्द्वो यावद्भिरारब्धः २६
द्वयी सत्ता पदार्थानां १३६

द्विरदमदजलौघासार २६१
द्विष्टोऽप्यसौ परार्थ २६

ध

धन्यास्स्थ याः कथयतः २५५
धातुप्रकरणाद्धातुः ४
धातोस्साधनयोगस्य ६१
धूपोष्मणा त्याजितं ९३
धूतहेतिरप्यधूत १७३
धृतिः क्षमा दमश्शौचं २३०

न

न केवलेह प्रकृतिः ३७
न च साम्प्रतिकी कुत्सा ५९
न दानेन न मानेन २४६, २७१
नन्वात्मनीयसामान्ये २०६
न नूनमस्ति नोऽश्वः १२१
न प्रसादमुचितं गमिता १७८
नमस्तुङ्गशिरश्चुम्बि २७५
न मीलयति पद्मानि २३२
न रुणत्सीन्द्रियग्रामं ३
न लङ्घयामास महा १७७
नवजलधरस्सन्नद्धोऽयं २४१
न विमुञ्चेति सामर्थ्य २८८
नवो नवो भवति १२०
न स्रजो रुरुचिरे ९४
न सोऽस्ति प्रत्ययो २१८
न हि गामानयेत्यादौ २९२
न हि डित्थत्वसामान्यं २०८
नाम यस्याभि २३२, २६२
नामापि स्त्रीति संह्लादि २५४
निघातादिव्यवस्थार्थं ११६
निजनयनप्रतिबिम्बैः २२४
नित्यं विशिष्ट एवार्थे २९०
निर्दिष्टविषयं किञ्चित् १५२
निर्धारणे विभक्ते यः १५४
निपीयमानस्तबका ९२
निमित्तमेकमित्यत्र १९१
निर्माल्यं नयनश्रियः २३७
नियतं साधनं साध्ये २७८
नियन्तृगतिभेदेन १४२
निरपेक्षप्रयोगे या २९६
निरीक्ष्यसंरम्भनिरस्त २७६
निवार्यतामालि किमप्य १९२
निर्वाणभूयिष्ठमथास्य ११९
निर्व्यापारस्य नन्वस्य १३४
निर्विकल्पकवेलायां १८९
निर्वर्णितं निश्वसितेन २४६
निशामुखे प्रदोषे च १४४
निष्पन्नमात्रे कर्तृत्वं १४५
निसर्गभिन्नास्पदं ७४
नीपानान्दोळयन्नेव ३
नीहारजालमलिनः २३८
नूनमुन्नमति यज्वनां १७५
नृपसुतमभितः १८२
नैते सुखस्य जानन्ति २३८
नैसर्गिकी १८०

प

पक्वान्नमिव राजेन्द्र २४६
पडिपक्खमन्तुपुञ्जे २२७
पतयाळूनि चेष्टासु ४
पत्युश्शिरश्चन्द्रकला १९२
पदजातं श्रुतं सर्वं २८६
पदं तद्वन्तमेवार्थं २१०
पदमभ्यधिका २९१, २९३
पदमिह त्रिविधं ८४
पदादपि तदायत्त २०९
पदे पदे कूबरिणः २३४
पदैरेवान्वितस्वार्थं २८७
पपसाअरूपसोधण २३१
परस्परेण स्पृहणीय १६५
परार्थे यः पीडां २३१
परावरविभागार्थं १४२
परिम्लानं पीनस्तनजघन २३७
परिक्षते वक्षसि १७८
पल्लविअं पिवअकर २३०
पल्लवोपमितिसाम्य १७०
पश्यतः श्वैतिमं २८९, २९२
पश्यत्यनुगतं रूपं १८८
पाकं हि पचिरेवाह २९२
पाता . . वासिष्विति १२१
पायाद्वो रचितक्रमः २२०
पिअसङ्गमकिंवद्धि २८०
पिण्डसर्वेगतत्वे तु १८८
पिण्डेनासीदसञ्जाते ,,
पिपिप्रिय ससस्वयं २१
पिबतु मधु सुगन्धीनि २७०
पिबन्मधु यथकामं २२७
पुत्रस्य जन्मनि यथा १४५
पुनर्ग्रहीतुं नियमः १७९
पुनरपि सुलभं तपः २५५
पुराणं मानवो धर्मः २४४
पुरीमवस्कन्द लुनीहि १७७
पुष्पं प्रवाळोपहितं १८०

पूर्वोत्तरैर्यदा भावैः १३८
प्रकामधवले यस्याः १०२
प्रकृतिप्रत्ययात्रेव ३७
प्रकृतिप्रत्ययौ त्रेधा ८४
प्रकृतिप्रत्ययौ ब्रूतः २७९, २९२
प्रकृतिप्रत्ययौ यद्वत् २९६
प्रकृतिः प्रातिपदिक ३३
प्रकृतिष्षट्प्रकारेषा ५
प्रकृतिस्साधनानां ५७, १४०
प्रकृत्यर्थविशिष्टो यः ५५
प्रकृत्यादिविभागेन १२३
प्रकृत्युच्छेदसम्भूतं १४७
प्रकृष्ट इति शुक्लादि ५९
प्रतिपत्त्याऽन्वयं यस्मात् २७९
प्रतिपत्तिर्गुणानां तु ,,
प्रतिपाद्यो निवर्त्यश्च १२५
प्रतीच्छत्याशोकीं २३७
प्रतीतिभेदाद्भेदस्तु १८९
प्रतीयमानं पुनः २२१
प्रत्यक्षं न च निष्कृष्टं २०९
प्रत्यग्रोन्मेषजिह्मा २७०
प्रत्युक्तापरभावश्चेत् १५८
प्रधानकर्मणाख्येये १५०
प्रधानगुणभावेन २७९
प्रधानं तं प्राहुर्य १६०
प्रपरापसमन्वव १३
प्रयुक्तसत्कारविशेष ९३
प्रयोगप्रतिपत्तिभ्यां २१०-११
प्रयोगार्हेषु सिद्धस्सन् ६१
प्रवर्तयति कालोऽपि १४३
प्रवृत्तिः पुरुषस्यास्ति १५९
प्रशान्तधर्माभिभवः १७६
प्रसन्नदिक्पांसुविविक्त १७९
प्रसन्नाः कान्तिहारिण्यः २२३
प्रसिद्धपदसामाना २१७
प्रसीद विश्राम्यतु १७६
प्रागन्यतश्शक्तिलाभात् १४५
प्रातः प्रत्यूषयोः स्नाति १४४
प्रातिलोम्यानुलोम १०१
प्राथम्यादभिधातृत्वात् २९१
प्राप्तश्रीरेष कस्मात् २२१, २३१
प्रालेयाद्रेरुपतटं १७४
प्रियंवदान् प्राप्तमथ ११८
प्रेम पश्यति भयानि २७६

फ

फनमथ चन अप्पकुत्ति १०२
फलांशे भावनायाश्च २१२

ब

बध्नन्नङ्गेषु रोमाञ्चं १८२
बहलतमाहअराई २४७
बिभ्रतौ मधुरतामति ९३
बीजकालेषु सद्बुद्धा ६१
बुधव्यापार एवैषः १३५
बुद्धिस्स्यादभिसम्बन्धात् ६१
बुद्ध्वेदमेव भगवान् २१६

भ

भक्तिप्रह्वाय दातुं २५०
भमधम्मिअ वीसद्धो २४७
भवताद्भवतो मतिश्शुभा १७४
भवतु समदनारत १८२, २८०
भवतु रुषि कठोरा २२८, २२९
भवतु विदितमेतत् ,,
भवतु विदितं शब्दाः २४५
भवत्सम्भावनोत्थाय १८२
भवादृशाश्चेदधिकुर्वते १७४
भविष्यत्यन्यजातायां १९०
भवेद्भीष्ममद्रोणं ८४
भवेद्यदि विशेषैकविषयं १८८
भागैरनर्थकैर्भिन्नाः २६७
भावरूपं तु यत्कर्म १४९
भिन्नकण्ठध्वनिर्धीरैः २४०
भूतादयो महाभेदाः १४३
भूतानां प्राणिनः श्रेष्ठाः २७५
भूयात्तेषां कुले जन्म ३
भेदानाकांक्षतस्तस्य २९४
भ्रुकुटिरारचिता गतं २४१
भ्रेमुर्ववल्गुर्ननृतुः १०४

म

मगधेषु स्तनौ पीनौ २०४, २१९
मथ्नामि कौरवशतं २४१
मदनाहिअ कुटुम्बि १०३
मदप्रमदहर्षेषु १४४
मदस्रुतिश्यामितगण्ड ११८
मन्दं मन्दं नुदति पवनः १७५
मधुद्विरेफः कुसुमैक २३४
मधुपृषत्पिङ्गाः ,,
मनसिजचैत्ररथं २३५
मन्यते न तृणायापि १६९
मन्ये शंके ध्रुवं प्रायः १८३
महत्त्वं सङ्गभावं च १५९

महिलत्ताण णिव्वाहि २६९
महुपहि किं विपत्थिअ २४७
मागच्छ प्रमदाप्रिय २४०
मानभङ्गपटुना सुरते ९१
मा पुनस्तमभिसीसर ९५
मा भवन्तमनलः पवनो वा २८२
मा भैश्शशांक मम शीधुनि २२५
मायेन्द्रजालप्रख्योऽयं २१८
मिलन्त्याशासु जीमूताः ३
मीमांससे न शास्त्राणि ४
मीलच्चक्षुर्विजिह्म श्रुति २५१
मुखपंकजरंगेऽस्मिन् २२७
मुखेन सा पद्मसुगन्धिना १७७
मुग्धामजातरजसं २३३
मुसलक्षेपहुंकार . . . ४
मूलजालमधिभोक्तृ २५६
मूले कण्टकसन्ततिः २७२
मैवं खण्डाद्यभिव्यक्तं १८८
मौग्ध्यप्रागल्भ्यमाध्यस्थ्य १४४
मौलिकाराविस्तारि १४१

य

य आत्मनेपदाद्भेदः १६७
य एते यज्वानः प्रथित २२५
यज्ञांगयोनित्वमपेक्ष्य ११९
यच्च वृत्तिविकल्पादि १८९
यच्च कोऽयमिति प्रश्ने २७६
यजेत दद्याज्जुहुयात् २१५
यतः पदार्थावाक्यार्थ ,,
यत्तालीदलपाकपाण्डु २३३
यत्पादपंकजरजः परि १
यत्रापि तत्क्रियायोगः २११
यथाऽनेकमपि कान्त १११
यथा नृपाणां प्रणय १३१
यथा च भागाः पचतेः १६६
यथा गौरिति सङ्घातः १३८
यथा राज्ञो नियुक्तेषु १४६
यथा जलादिभिर्व्यक्तं २०६
यथा भूतेन्द्रियोत्पाद्यं २०९
यथा विध्यन्तपर्यन्तः २१०
यथा पाकं करोतीति २१५
यथा यथा सन्निधानं २८३
यथार्थेन प्रमाणेन २८६
यथेन्द्रियगतो भेदः २०६
यथैव सन्निधौ तस्य १५१
यथोपपत्तिच्छलना ११७
यदसञ्जायते सद्धा ९२, १४७
यदवक्रं वचश्शास्त्रे २२१, २५१
यदभिप्रायसर्वस्वं ,, २५२
यदप्येकं पदं दृष्टं २७६
यद्यदाकांक्षितं योग्यं २७८,२८२
यदाभिधानसामर्थ्यं ६२
यदि त्वं मन्यसे तेन १५८
यदि मे वल्लभा दूती १८३, २४०
यदेव रोचते मह्यं १०३, २५५
यद्येतौ व्याधितौ स्यातां १९३
यद्योदनो न पक्तव्यः १३५
यश्च निम्बं परशुना १०४
यश्चापकर्षपर्यन्तं १३८
यश्चोभयोस्समो दोषः २७९
यस्मादनर्घाणि हृतानि २३४
यस्यार्थास्तस्य मित्राणि २७५
याचेह वृत्तिस्तत्सूत्र १८९
याऽपेक्षा यच्च सामर्थ्यं २६७
यावत्सिद्धमसिद्धं वा १३३
या सामान्याश्रया संज्ञा २७
युगपज्ञनुसंवित्तिः २०९
युष्मच्छासनलङ्घनायसि २४१
येन ध्वस्तमनोभवेन २४५
येनान्विताभिधाने च २१०
ये पुनः कल्पितानेक २०८
येषामर्थेषु सामान्यं ,,
येषां प्राणिवधः क्रीडा २३०
योऽभूदित्यादिकश्शब्दः १२५
योऽर्थः प्रतीयते यस्मात् २११
योरत्थणीये बहुणो २२३
योहि दीर्घासिताक्षस्य २२६
यं सर्वशैलाः परिकल्प्य २३४

र

रइकिरणाणुग्गाहि २३२
रजोजुषे जन्मनि सत्व १२१
रत्नच्छायाव्यतिकरमिव २२६
रतान्तकालकान्तश्री १४१
रत्यादयोऽर्धशत २
रत्यादयो यदि रसाः २
रागकान्तनयनेषु ९५
रामाय पुण्यमहसे १६४
रूढ्या यत्र सदर्थोपि २२३
रूपं तदोजस्वि तदेव १७८
रे हस्त दक्षिण मृतस्य २३१
रोचिष्णु काञ्चनचयांशु २७१
रोषावेशादाभिमुख्येन ७७

ल

लइवण्णडवि उल्लुदुत्थ २७३
अविअण्फड वाँउदुहु १०३
लक्ष्मणानुगतो रामः १८२
लावण्यसिन्धुरपरैवहि २५०
लाक्षागृहानलविषान्न २४१
लीलास्मितेन शुचिना २८२
लोकयात्राभयं लज्जा २४६
लौकिकानां हि साधूनां २३८

व

वयस्स तुमंपि थेव २३८
वच्चमहव्विअ एका २४८
वर्णप्रकर्षे सति कर्णिकारं १७३
वदत वदत सत्यं रूपं १७८
वधूशब्देन तु दिशां २१९
वन्यं फलं चार्तवमाह १८०
वपुषा परमेण भूधराणां १२१
वयं तथा नाम यथात्थ २३५
वल्गूयति न योऽसाधुं ४
ववसाअरइपओसो २२७
वष्टिभागुरिरल्लोपं १४
वस्तुतत्त्वदनिर्देश्यं १५१
वस्तूपलक्षणं यत्र २८४
व्यक्तेरेव पदार्थत्वं २०८
व्यतिपक्तार्थबुध्या हि २७९
व्यपगतघनपटलं २२०
व्यवहारात्तु शब्दार्थ २१७
व्यस्तायामपि संपूर्णः १४६
वा ओनवुन्ननुपजिमु १२१
वाक्यार्थमात्र एतेषां २८८
वाक्यार्थमितये तेषां २९६
वाक्यार्थो लक्ष्यमाणो हि २९०
वागर्थाविव संपृक्तौ १०२
वाङ्मपता चेदुत्क्रामेत् २२०
वाचकत्वं निपातानां १९०
वाच्यस्यार्थस्य वाक्यार्थे २९०
वाच्यविशेषाः प्रत्याय्याः २२२
वाणिधमो डिथच्चरुणखओ २६९
विकल्पयोनयश्शब्दाः २१९
विकसन्ति कदम्बानि १०४
वित्रस्तशत्रुः स्पृहयालु २७६
विदितं वो यथा स्वार्था २५७
विधावनाश्रिते साध्यः २१२
विधौ कृतमतिक्रम्य ,,
विनात्मरूपग्रहणात् २०६
विनोदमिच्छन्नथ ११७
विपत्प्रतीकारपरेण २७१
विपदि धैर्यमथा ९५
विपक्षमखिलीकृत्य २७५
विप्पअपि आपुआणिणा १०२
विपुलतरनितम्बं भोग ९७
विभक्त्यर्थेऽव्ययीभावः १९८
विभक्त्यर्थोऽथ वृत्यर्थः २२२
विभक्तिवृत्त्यर्थवतोः ,,
विभूषणोद्भासि १७८
विविक्तदीर्घिकोद्यान १४४
विशेष्यं नाभिधा गच्छेत् २०५
विशेषकर्मसंबन्धे ५१
विशेषश्श्रूयमाणोपि ५२
विषवृक्षोऽपि संवर्ध्य २३९
विहाराहारसंहार २११
विसृष्टरागादधरात् १७७
व्रतेषु गोष्ठीप्रेक्षासु १४४
वृत्तिं वर्तयतामेवं २०४
वीराद्भुतादिषु च येह १
वीहिस्तम्बकरिः क्षेत्रे १६९
वेदाद्धुरुनियोगाद्वा २१६
वेविरसिण्णकरंगुलि २७२
वेवावल्लचिउदेह २८०
वैदर्भनिर्दिष्टमसौ ९३

श

शक्तिमात्रासमूहस्य १४५, २३८
शतं वारानुक्तः प्रिय १७६
शब्दे तां जातिं शब्दमेवा ४४
शब्दोपहितरूपांस्तान् ९७
शयाने शेरते रात्रौ १४१
शय्यन्ते हतशायिकाः १७६
शरद्धेमन्तयोरन्यत् १४४
शल्यमपि स्फुरद्दन्तं २४१
शलाकापर्यभिद्यूतं ७७
शशंस तस्मै प्रणिपत्य ९४
शशिनमसूत प्राची २३०
शाटकश्चेन्न पातव्यः १३६
शास्त्यै वोऽस्तु कपाल २४९
श्यामलाः प्रावृषेण्याभिः २२४
शिखण्डिमण्डलारब्ध १४१
शिखरिणिकनुनाम कियत् २४८
शिखिच्छदच्छत्रपतत्र १९२
शिलाघनै र्नाकसदां ९३
शूद्रैव भार्या शूद्रस्य १०१
शृङ्गारवीरकरुणाद्भुत १
श्रीमल्लताभवनमोषधयः ९४

श्रोतुश्च प्रतिपन्नत्वं २१७
शैलैस्सन्धयतिस्म ९६
,, बन्ध ,, १७३

ष

षष्ठ्यभावादसत्वोक्तेः ६२
षष्ठ्यभावादसत्वाच्च १८४

स

स एव कालः कात्स्न्र्येन १४५
सख्या वा नायिकाया वा २४२
सङ्ग्रामेषु चरत्येषः २६२
सच्चंचिअ कढमओ २२९
सच्चंधन्नाधन्नाजात २६९
स जहार तयोर्मध्ये ११८
सणिअंवच्च किसोअरि २४८
सत्ता लक्षणमन्येतु १४२
सत्वात्मनाममलधर्म ७
सतु द्रव्याद्विभिन्नो वा १९८
स ते प्रियश्चेत् सुभगः १७७
सदृशं त्रिषु लिङ्गेषु ७
सद्यः प्रवाळोद्गम १७७
. . . नदापान्थः पूषा १७४
सन्ध्याभ्रकपिशस्तत्र ११८
सन्निधिशब्दजन्मैव २८३
सपदि सखीभिर्निभृतं २२४
स पौरकार्याणि विचिन्त्य १७९
स बालभावाद्वपुषा १८१
स भगवान्गणाधिनाथो २५७
समजस्याद्गवां गोभिः १६९
समानवृत्तिता नाम १८७
समानवृत्तिसापेक्षं १८९
समानवृत्त्यपेक्षत्वात् १८९
समुदायेन सम्बन्धः २७४
समूहस्सतथाभूतः १३७
सरस्वतीव कर्णाटी ४७
सरळे साहसरागं १०२
स राजा तत्सौख्यं सच २२८
सलीलमानकलतान्त १७७
स वाचको विशेषाणां ३०३
सविता विधवति विधुरपि ५
सर्वत्र ग्रहणं तस्याः १९०
सर्वत्र सहजा शक्तिः १४५
सर्वत्रागृह्यमाणं च १८८
सर्वभेदानुगुण्यं तु २९४
सर्वसर्वगतापि स्यात् १८८
सर्वक्षितिभृतां नाथ २४१
सर्वं सखे त्वय्युपपन्नं १७५
सर्वोपमा द्रव्यसमुच्च ११७
ससेतुं वन्धयामास २७५
सहभृत्यगणं सबान्धवं २४४
सहसैव न सर्वेषां २८३
सन्तमेव चिरमप्रकृत ९२
सम्पदो जलतरङ्ग २४४
सम्बन्धिशब्दस्सापेक्षः २६, ५५
सम्भवत्येकवाक्यत्वे २८६
सम्भिन्नस्तैर्व्यवस्थानां १४३
सम्बोधनपदं यच्च ११२
स्तनोपपीडं परिरभ्य १७४
स्पर्शभाजि विगदच्छवि ९५
स्मरत्यदो दाशरथिः १६६
स्वयं विशीर्णद्रुमपर्ण २७०
स्वरूपादुद्भवत्कार्यं १९६
स्वल्पैरसावपि न दृश्यते २३८
संवत्सरैर्युगैः कल्पैः १४३
संशयाय दधतोः २४३
संसर्गात्तु क्रिया सिद्धा १३५
संसर्गिभेदकं यद्यत् २२६
संहत्यकारिपक्षे तु २९६
साउप्पन्नीगोटी डइ २६९
साकाङ्क्षावयवं भेदे ११२
साङ्गसंयोगिनः पाशात् १४५
सा चूर्णगौरं रघु ९६
साटोपमुर्वीमनिशं १६६, २३९
साध्यमानत्वपक्षे तु २१७
साध्यसाधनसम्बन्धः २१२
साध्यसाधनयोर्लोके २८४
साध्यं च साध्यमानत्वात् २१५
सा मङ्गलस्नानविशुद्ध १७६
सामान्यभूता सा पूर्वं ५७
,, धात्वर्थैः १४०
सामान्यमिदमित्येवं १८९
सामान्यांशादपोद्धृत्य २०९
सामानाधिकरण्यादि २१०
सामान्येनैव योग्यत्वं २८४
साम्योत्कर्षापकर्षेषु १४३
सावशेषपदमुक्तं ९६
सावसलोनी गोरडी २६९
सा सम्भवद्भिः कुसुमैः १८०
स्थाने तपो दुश्चरं ११९
स्थानेऽवसीदसि रघूद्वह २३१
स्थायित्वमत्र विषया २
स्वादिभिः केवलैर्यत्र ६२
स्वाश्रये समवेतानां १४५

स्निग्धश्यामलकान्तिलिप्त २२८
सुखैस्तेभ्यो विभावर्यः १८२
सुगन्धिनिश्वास १७९, ११९
सुण्णम्मि गिरिं गामे ९६
सुदुर्दर्शे इवादर्शे १४२
सुभ्रु त्वं कुपितेत्यपास्त २४२
सुवर्णपुष्पां पृथिवीं २३५
सुवर्णादि यथा युक्तं २०७
सुसूक्ष्मजटकेशेन २५
सुसूक्ष्मजटकेशादौ २७
सूईवेहेमुसलं २३६
सूर्याचन्द्रमसौ यस्य २२४
सूर्यानलानिल ३०
सूर्यीयति सुधारश्मि ४
स्मृतिसन्निहितैरेवं २८६
सेयं पश्यति नो कुरङ्गक २४२
स्वेदानुविद्धार्द्रनख ९४
सोयमित्यभिसम्बन्धात् ३९
सोऽस्मिन् जयति जीवातुः १०४
स्तोकत्वस्याभिनिर्वृत्तेः १५१
सैष द्वादशभेदोऽर्थः २१७
सौभाग्यमिव २२१, २५२

ह

हदमाणुशमंशभोअणं १०२
हरिबाणाविमौ रोषात् १८२
हस्तस्थिताखण्डलचक्र २७०
हस्तेन हस्तं परिगृह्य १७८
हा धिक्कष्टमनिष्टं ५४
हारो थणाणसवणा २८०
हा सौरभं क तत्ते २३३
हिअ इखुकुइगोडरी २६९
हिअ इति रिञ्छिवहि ,,
हिमलवसदृशश्रमोद २२७
हिरण्यकशिपुर्दैत्यः १०१
हिरण्यपूर्वं कशिपुं २३५
हिरउ हरन्त हो चोर १०३
हुतहुताशनदीप्तिवनश्रियः १८२
हृतोष्ठरागैर्नयनोद २२५
हेतुत्वे कर्मसंज्ञायां १५२
हे हस्त दक्षिण मृतस्य २३१
होडसे नाभिजातेषु ५

क्ष

क्षणे निमेषे नाड्यां वा १४३

आहत्य समुदितपद्यसङ्ख्या :— ९०९.

समाप्ता पद्यानां वर्णानुक्रमसूची.